॥ श्रीः ॥

त्रिकाण्डशेष

नाम

संस्कृतप्राचीनकोषः ।

कलिङ्गाधिनाथेन

श्रीपुरुषोत्तमदेवनृपतिवरेण

विरचितः ।

लङ्कायाम्

दोडन्दुग्रामे शैलबिम्बाराममहाविहारे सरस्वतीमण्डपमधिवसता

श्रीबौद्धसिद्धान्ताचार्य्यधर्मरक्षितचन्द्रकीर्त्युपाधिधारिणा श्रीमता-श्रीशीलस्कन्ध महानायकयतिवरेण

(लङ्कागवर्नमेण्टस्य प्राचीनभाषोपकारसमित्यां सामाजिकधुरन्धरेण)

विरचितया

सान्वयधातु–लिङ्ग–प्रत्ययोदाहरणादिसमलंकृतया

सारार्थचन्द्रिकानामिकया

व्याख्यया समन्वितः ।

तेनैव कृतया अकारादिहान्तवर्णानुसारिण्या कोषस्थ-शब्दानुक्रमणिकया सनाथीकृतश्च ।

सोऽयं

क्षेमराजश्रीकृष्णदासेन

मुम्बय्याम्

(खेतवाडी ७ वीं गली खम्बाटा लैन)

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयेऽङ्कयित्वा प्रकाशितः ।

संवत् १९७२, शके १८३७.

PREFACE.

The Trikândaçesha, a supplement to the Amarakosha, was written by an Indian king named Purushottamadeva as appears from the prefatory stanza "Ayam prayatnah Purushottamasya" &c. It is stated in the Kavicaritra, a Marati work, that Purushottamadeva ruled in the Kalinga country in the fourteenth century of the Sâlivâhana saka era at Kataka his capital, that he was born of the Orisa royal clan and that he wrote the three books Trikândaçesha, Hârâvalî and Ekâksharakosha with a view to facilitate the teaching of Sanskrit in the schools of his kingdom. Pandit Cri Anandarâma in the introduction to his edition of the Nânârthasangraha (page 14) says that king Purushottamadeva lived not earlier than the thirteenth century of the Christian era and that he was born of the Halâyudha clan of Vangadeça. But the statement in Kavicaritra that the royal author of Trikândçesha was a king of Kalingadeça may be accepted as correct. In the Hârâvalî written by this author, occurs the following stanza.

"Sudhiyâ Janamejayena yatnât
Dhritisimhena samam nirûpité yam
Viditobahudrisvabhih Kavindraih
Bhuvi Koshânumatah kcramo madîyah"

i. e. "The learned will appreciate the great pains bestowed by us on this work which has been written in consultation with the learned scholars Janamejaya and Dhritisimha." Though there is nothing direct in the Trikândaçesha to show who these scholars Janamejaya and Dhritisimha were, the first mentioned is known to have been a son of King Parîkshit and a pandit of consummate learning, while in the Kshattriya varga of the Trikândacesha Purushottamadeva himself refers to Janamejaya as a "râjarishi" as follows "Atha râjarishî Janamejaya sangnakah Pârîkshitah." Dhritisimha was likewise a "king pandit." From ancient writings it

appears that these honorific suffixes "deva" and "simha" were applied only to persons of royal birth or position. The fact that the book was written in consultation with two such learned persons enhances its value and the acknowledgment of such help shows the author's candour. This goes to support the view that our author was a learned king who ruled in Kâlingdeca.

The three valuable books Trikâdacesha, Hârâvalî and Varnâdeca are known to have been written by Purushottamadeva. Two other useful works Ekâksharakosha and Dvirûpakosha also appear to have been written by an individual having the name of Purushottamadeva. Some doubt whether he is the same as the author of the work under notice. We do not doubt it. The Sanskrit kosha compiled by Amarasinha is in the opinion of some learned men complete in the four books Amarakosha, Trikândaçesha, Hârâvalî and Ekâksharakosha. As Trikândaçesha and Hârâvalî are both attributed to Purushottamadeva it is more likely that Ekâsksharakosha is also by the same author. Two different books with the same title "Dvirûpakosha" are attributed to the authorship of Crîharsha and Bharatamalla. There is yet another Dvirûpakosha by Purushottamadeva. Two more books Bhedyabhedaka and Vishnubhaktikalpalatâ are written by a Purushottamadeva, but it cannot be determined whether this is our author or another person of that name.

Like Amarasinha, Purushottamadeva was a Buddhist, a conclusion suggested by the very first stanza (as Namaskâram) in the book

> "Jayanti santah kucalam prajânâm
> Namo Munîndrâya surâh smritâcca"

According to Amarakosha "Munîndrah Crîghanah, Sâstâ &c," the title Munîndra is applied to Buddha and not to any of the Hindu deities Brahma, Vishnu or Civa. Nor should it be supposed that if the author's faith was Hinduism he would have written so in adoration of Buddha. Besides the names applied to Buddha,

> "Buddho, Kanishtaga, Mahâmuni, Dharmacaktrâ
> Râgâcanih, Tricaranah, Khasamo Dacârhah"

are first mentioned as was done by Amarasinha in his Nâmalingânusâsana and by Hemacandra in his Abhidhanacintamani—these also being Buddhists, and take precedence of the names of Brahma and other Hindu deities.

There is a wide discrepancy in the statement in the introduction to the Nânârthasangraha that King Purushottamadeva lived not earlier than the thirteenth century of the Christian era and the opinion of Professor Rajendralâlmitra expressed in his "Notices of Sanskrit Manuscripts" that the author lived in the tenth or eleventh century. Many scholars have accepted that Amarasinha lived in the eleventh century. On this presumption the statement that Purushottamadeva lived in the eleventh century is very doubtful, nor can it be believed that he flourished in the thirteenth century. In view of these conflicting statements it is difficult to decide with any degree of certainty as to when the author lived.

It was stated above that Amarasinha and Purushottamadeva were alike Buddhists. Evidence of the fact that the former was a Buddhist has been produced by Pandits Vâmanâchârya and Durgâprasâda in their edition of Amarakosha published under the auspices of the Bombay Government as also in the edition of the same work by Pandits Kâsinâtha and Civadatta prepared at the request of Mr. Tukârâma Jâvajî. The views of these learned editors on this question have been quoted in my Sanskrit preface which follows.

It is hardly necessary to mention that Nâmalingânusâsana generally known as Amarakosha is a valuable book widely used in various countries where Sanskrit is learnt. Learned men in different countries have written commentaries upon it, some of them being:—Vâkyapradîpa, Kâçikâ, Amarakoshotghâtana, Koumudî, Cabdârthasandîpikà, Amarapanjikâ, Amaradîpika, Subodhinî, Vyâkhyâsudhâ, Saradâsundarî, Vidvanmanoharâ, Amaraviveka, Madhumâdhavî, Padacandrikâ, Trikândaçintâmanî, Trikândaviveka Pradîpamanjarî, Pîyûsha, Vaishamyakoumudî, Padavivritti, Padamanjarî, Vyâkhyâmrita, Sandehabhanjikâ, Tikâsarvasva,

The above-named are all in Sanskrit. There are, besides, paraphrases Karnâta, Kâsmîra, Tibetan, Telungu, Marâtî, Burmese, Siamese, Sinhalese, &c. But we have neither, seen nor heard of a commentary in respect of the Trikândaçesha. Having observed the want of such a work felt by students of Sanskrit, I have consulted several koshas and prepared this commentary (named Sârârtha-candrikâ).

The Trikândacesha consists of three divisions, twenty-five chapters and one thousand and fifty-three stanzas. Some copies of the book contain more and others less than that number of stanzas. In the tikà on the first and second divisions I have given the compound words showing the simpler words of which they are formed arranging single words so as to be easily distinguishable from each other, cited from other koshas words having the same signification and in some places I have noted the gender and combination (Sandhi). In the Nânârthavarga of the third division, general meanings are given of all the words as well as particular meanings from other koshas. Of these words, genders, roots. and inflections have been clearly shown. The meanings of particles in the avyaya-varga have been explained and to better elucidate their application examples have been quoted from the poems Cicupâlabadha, Raghu-vamça, Kumârasambhava and other standard works. All the nouns in this work have also been given in an index alphabetically arranged.

In collating the text, I have made use of four books printed in Jayapura, Bombay and Benares. Variations in the text have been found in many places. I am glad to note that the edition printed in Bombay was found the most reliable. Noteworthy variations in the text have been shown in the tikà within inverted commas.

Much care has been taken to secure accuracy in the text and to the writing of the tikà, and if any errors due to oversight or short-comings on my part have crept in, I trust that they would be viewed

with indulgence by the learned reader. If, however, the student will derive any degree of help from this work in his pursuit of knowledge I shall feel amply repaid for my labour.

> Gacchatâm pathi martyânâm, pâdâh kvâpi skhalantihi
> Hasanti durjanâstatra, samâdadhate sajjanâh.
> Jagatyeke prasîdanti parakritye viceshatah,
> Kecit tatrâpyasûyanti, svabhâvo' yam durâkramah.

Sailabimbârâma, Dodanduwa,
Ceylon, *May 14th 1915.*

C. A. SEELAKKHNDHA.
CHIEF HIGH PRIEST.

॥ नमः श्रीशाक्यमुनये ॥

अथ प्रस्तावना ।

अयं हि अमरकोषपरिशिष्टरूपत्रिकाण्डशेषः श्रीमता राज्ञा पुरुषोत्तमदेवेन विरचितः । "अयं प्रयत्नः पुरुषोत्तमस्य" इत्युक्तत्वात् । अयं नृपतिः पुरुषोत्तमदेवः कदा कतमं भूमण्डलं मण्डयांचकारेति ? । महाराष्ट्रभाषानिबद्धे कविचरित्राख्यग्रन्थे तु पुरुषोत्तमदेवः कलिङ्गदेशाधिपतिर्महीपतिः शालिवाहनशकाब्दचतुर्दशशतकस्य पूर्वमासीदिति । तस्य च राज्ञः कटकाभिधानं नगरं राजधानी बभूव । स च पुरुषोत्तमदेवस्त्वोरीषाढ्यः क्षत्रिय आसीत् । तेनैव राज्ञा त्रिकाण्डशेषः—हारावली—एकाक्षरकोषश्चेति ग्रन्थत्रयं स्वदेशीयपाठशालोपयुक्तं विधाय प्रणीतमित्याद्युक्तमस्ति । श्रीमता आनन्दरामेण त्वस्य त्रिकाण्डशेषस्य कर्त्ता पुरुषोत्तमदेवो वङ्गदेशीयो हलायुधवंशसमुत्पन्नः कृष्टाब्दीयत्रयोदशशतकोत्तरार्द्धान्न प्राचीन इति नानार्थसङ्ग्रहोपोद्घाते चतुर्दशे पृष्ठे स्पष्टमुच्यते । एतस्य त्रिकाण्डशेषस्य कर्त्ता पुरुषोत्तमदेवो हि कलिङ्गदेशाधिपतिर्महीपतिरेवेति यद्युक्तिरुपदर्शिताप्यस्ति । तस्या आवश्यकतमत्वात् सम्यक् प्रतीयत एव अस्य कर्त्ता राजा पुरुषोत्तमदेव इति । कस्मादिति ? । तेनैव राज्ञा पुरुषोत्तमदेवेन हारावलीसमाप्तावेवञ्चोक्तम् । यथाः—

सुधिया जनमेजयेन यत्नाद्धृतिसिंहेन समं निरूपितेऽयम् ।
विदितो बहुदृश्वभिः कवीन्द्रैर्भुवि कोषानुमतः श्रमो मदीयः ॥

कोऽयं धृतिसिंहः ? कोऽयं जनमेजयश्चेति ? न तत्र स्फुटीकृतः । अयं धृतिसिंहस्तु कश्चित् सुधीवरो नृपतिरेवासीत् । जनमेजयोऽपि परीक्षिद्राजपुत्रः प्रशस्तधीशाली विद्वद्वर एव । पुरुषोत्तमदेवेनाप्ययं जनमेजयस्तु राजर्षिरिति स्वकोषे त्रिकाण्डशेषे क्षत्रियवर्गे चोक्तम् । यथा—"अथ राजर्षिर्जनमेजयसंज्ञकः । पारीक्षितः" इति । अत एवैताभ्यां विद्वन्नृपतिवराभ्यां समं स्वमतैकीकरणार्थं कृतनिरूपणादेव हारावल्याः कृतमावस्तेनैव तत्र विशदीकृतः । तत एवास्या हारावल्या राज्ञा पुरुषोत्तमदेवेन तत्तुल्यैरन्यैर्विद्वन्नृपतिवरैश्च समं निश्चयं कृत्वा निरूप्य सम्भाष्य च करणं भूयिष्ठं ग्रन्थगौरवोत्पादने तस्य राज्ञो नैसर्गिकगुण इति स्पष्टमवगम्यत एव । तस्मादयं त्रिकाण्डशेषस्य कर्त्ता पुरुषोत्तमदेवः कालिङ्गदेशीय ओरीषाख्यक्षत्रियवंशसमुत्पन्नो नृपतिरेवेति सम्यङ् निर्णेतुं शक्यते । न त्वन्य इति । राजेन्द्रलालमित्रस्तु "नोटिस् आब् संस्कृतम्यान्युस्क्रिप्टम्" नाम्नि सूचीपत्रे कृष्टाब्दस्य दशमे एकादशे शतके पुरुषोत्तमदेवसत्तां वदति । वयं हि पुरुषोत्तमदेवस्य देशकालनिर्णयम्प्रति किमपि वक्तुं न प्रभवामः । त्रिकाण्डशेषः—हारावली—वर्णादेशश्चेति ग्रन्थत्रितयं पुरुषोत्तमदेवप्रणीतमुपलभ्यते । एकाक्षरकोषद्विरूपकोषयोः पुरुषोत्तमदेवकृततायां केचित् सन्दिग्धतां वदन्ति । वयं न तथा वदामः । कस्मात् ? अमरसिंहाचार्य्यकृतम् अभिधानशास्त्रन्तु अमरकोषः—त्रिकाण्डशेषः—हारावली—एकाक्षरकोषश्चेति एभिश्चतुर्भिरङ्गैः सम्पूर्णं जातमिति पूर्व्वीयाणां केषाञ्चिद्विदुषां संमतम् । तथापि शेषास्तु त्रयो ग्रन्थाः पुरुषोत्तमदेवेनैव विरचिताः सन्ति । अतस्त्वयमेकाक्षरकोषोऽपि पुरुषोत्तमदेवेनैव विरचितव्यो भवेन्नान्येन।श्रीहर्षभरतमल्लकृतावन्यौ द्विरूपकोषौ स्याताम्।तथा पुरुषोत्तमदेवकृतस्यापि द्विरूपकोषस्य भवनं शक्यत

एव।केचित्तु एकाक्षरकोषद्विरूपकोषयोः क्वचिदेव पुस्तकेषु पुरुषोत्तमदेवनाममात्रोपलम्भोऽपि दृश्यते। न त्ववसानश्लोकादेर्दर्शनम् । अत एव तयोः पुस्तकयोः पुरुषोत्तमदेवकृतभावं सन्दिग्धमिति वदन्ति।तन्न। पुरुषोत्तमदेवप्रणीतौ भेद्यभेदकप्रकाश-विष्णुभक्तिकल्पलताभिधानावन्यावपि ग्रन्थौ समुपलभ्येते।स तु पुरुषोत्तमदेवस्त्रिकाण्डशेषकर्ता अयमेव वा इतर इति वाऽस्मान् सम्यङ् न प्रतिभाति॥

अयमपि पुरुषोत्तमदेव आचार्य्यामरसिंहवद्बौद्ध एवासीत् । यतोऽनेन त्रिकाण्डशेषसमारम्भे "जयन्ति सन्तः कुशलं प्रजानां नमो मुनीन्द्राय सुराः स्मृताश्च" इति नमस्कारो दर्शितः । अत्र मुनीन्द्रशब्देन भगवान्मारजिच्छाक्यमुनिरेवोच्यते । न त्वन्यः । "मुनीन्द्रः श्रीघनः शास्ता मुनिः" इत्युक्तेः । यदि वेदानुसारिणापि केनचित्कदाप्येवं नमस्कारो क्रियते ? न क्रियत एव । वैदिकमतविरुद्धत्वात् । किन्तु "स्वर्लोको देवलोकः स्यादवरोहः फलोदयः" इत्यादिना देवदैत्यानां नामान्युक्त्वाऽनन्तरं देवविशेषनामारम्भे शिवविष्ण्वादिनामान्युपेक्ष्य "बुद्धोऽकनिष्ठगमहामुनिधर्म्मचक्रारागाशनिस्त्रिशरणः खसमो दशार्हः" इत्यादिना बुद्धनामान्येव वक्तुमुपक्रान्तानि। यथाऽमरसिंहहेमचन्द्राभ्यां स्वकोषयोर्जिननामानि निर्दिष्टानि तथात्र पुरुषोत्तदेवेन । तेनास्य पुरुषोत्तमदेवस्यापि बौद्धत्वमवसीयते ॥

अयं पुरुषोत्तमदेवः क्रृष्टाब्दीयत्रयोदशशतकतोत्तरार्द्धान्न प्राचीन इति वचनस्य च राजेन्द्रलालमित्रस्य सूचीपत्रे क्रृष्टाब्दस्य दशमे एकादशे शतके पुरुषोत्तमदेवजन्मादेशस्य च बहुदूरमन्तरालम् । एवमप्याचार्य्यामरसिंहस्य क्रृष्टाब्दीयैकादशशतके सत्तान्तु केचिद्विद्वद्वराः संप्रतीच्छन्ति । यद्येतत्तथापि भवेत्तु पुरुषोत्तमदेवस्यापि क्रृष्टाब्दीये दशमे एकादशे शतके भवनमपि प्रायः सन्दिग्धत्वमापादीयते। एवं सति क्रृष्टाब्दीये त्रयोदशशतके पुरुषोत्तमदेवस्य सम्भवनं कथमत्र सम्प्रतीच्छनीयं तस्यासन्नतरत्वात् । एतेषां हि कालनिर्णयम्प्रति बहूनि शङ्कास्थानानि भूयो दृश्यन्ते ॥

अयं पुरुषोत्तमदेवोऽपि आचार्य्यामरसिंहवद्बौद्ध इति यदुक्तं पूर्व्वमस्माभिः तदप्यत्र शिष्यशिक्षणार्थं विशदीकृत्य लिख्यते । एतस्मिन् विषये अमरकोषशोधनकर्तृभिर्वामनाचार्य्य—दुर्गाप्रसाद—काशिनाथ—शिवदत्तादिभिः पण्डितैः प्रायः सद्युक्तिप्रदर्शनपूर्व्वकं सम्यङ् निर्णीतम् । तेषु वामनाचार्य्यस्य मतमेव भूयिष्ठमादरणीयम्भवति । तद्यथावतः आविष्क्रियतेऽत्रामरसिंहसत्तायाम् ॥

"अयममरसिंहो बौद्ध एव । तदुक्तं व्याख्यासुधाख्यया (रामाश्रमीति प्रसिद्धया) भानुदीक्षितकृतया व्याख्यया समेतस्यामरकोषस्याङ्कितपुस्तके पण्डितशिवदत्तशर्मणा । अयममरसिंहः कदा किंजातीयः कुत्रत्यं महीमण्डलं मण्डयांचकारेति न निश्चितम् । परन्तु "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः" इत्यादिना देवसामान्यनामान्युक्त्वा देवविशेषनामारम्भेः—

"सर्व्वज्ञः सुगतो बुद्धो धर्म्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः" ।

इत्यादिना बुद्धनाम्नां लेखनेन बौद्धत्वमवसीयते । केचित्तु—

"धन्वन्तरिः क्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य"

इति धेक्रमनवरत्नख्यापकश्लोकतो विक्रमसमकालिकत्वममरसिंहस्य वदन्ति । परे तुः—

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा*जयन्त्यष्टौ च शाब्दिकाः" ॥

इति पद्यानुरोधेन पाणिनि समन्तभद्रयोरन्तरालभवत्वं ब्रुवते । अत्रेदं बोध्यम् । इदं न क्रमबोधकम् । पाणिनिमहाभाष्यप्रवृत्तिसमकालिकनिष्पत्तिकचान्द्रव्याकरणकर्त्तुश्चन्द्राचार्य्यस्य पाणिनेः प्राग्लेखनात् । अस्य वैयाकरणत्वन्तु "अमरसिंहो हि पापीयान् सर्व्वं भाष्यमचूचुरत्" इति पद्यात्सकलभाष्यतत्त्वज्ञत्वस्य (सम्पूर्णमहाभाष्यतत्त्वज्ञत्वस्य) प्रतीतेः प्रतीतमेव । इत्थम्भङ्ग्यन्तरेणोक्तिस्तु बौद्धत्वेन सकलवैदिकविरुद्धत्वात्" इति ॥

बौद्धत्वादेव नानार्थवर्गे "धर्म्मराजौ जिनयमौ" इति श्लोके जिनशब्दस्य पूर्व्वनिपातेन निर्देशोऽमरसिंहेन कृतः । तथा हि "जिनयमौ" इत्यत्र "तापसपर्व्वतौ" इत्यादाविव "अल्पाच्तरम् (२, २, ३४) इत्यादिसूत्राणामप्राप्त्या "अभ्यर्हितञ्च" इति वार्तिकेनैव जिनशब्दस्य पूर्व्वनिपातः । अभ्यर्हितत्वञ्च पूज्यत्वम् । तच्च बौद्धानां मते बुद्धापरपर्य्यायस्य जिनस्य देवविशेषत्वात्स्पष्टमेव । यद्ययममरसिंहो बौद्धो न स्यात्, किन्तु वेदानुसार्य्येव स्यात्तदा वैदिकमते जिनापेक्षया यमस्यैवाभ्यर्हितत्वाच्छन्दोभङ्गाद्यभावाच्च 'यमजिनौ इत्येव वदेत् । (तथापि नोक्तम्) ॥

किञ्चास्य बौद्धत्वे बहवः प्राचीना अमरकोषटीकाग्रन्था अप्यानुकूल्यं भजन्ते । तथा हि—"यस्य ज्ञानदयासिन्धोः" इति प्रथमश्लोकव्याख्यानावसरे "हे धीराः ज्ञानदयासिन्धोः ज्ञानदयाभ्यां सिन्धुरिव सिन्धुस्तस्य अगाधस्य यस्य अनघाः गुणाः सन्ति स भगवान् श्रिये अमृताय च सेव्यतामाराध्यताम्" । इत्यभिप्रायकं विस्तरेणान्वयं प्रदर्श्य विशेष्यानिर्देशप्रयुक्तदोषपरिहारायोक्तं रायमुकुटीकारेण । अत्रानुक्तोऽपि वाक्ये लक्ष्यार्थो ज्ञानदयादिभिः स्फुटं प्रतीयते । यथाः—"अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनाली बालमन्दारपुष्पम्" इत्यादावनुक्तोऽपि सूर्य्य उदयतिना पद्ममुद्राभञ्जनादिना च लक्ष्यते । अन्येतु क्वचिद्विशेषणमपि विशेष्यप्रतिपत्तिकरम् । यथा—"निधानगर्भामिव सागराम्बराम्" इति । एवमिहापि ज्ञानदयासिन्ध्वादिविशेषणं विशेष्यप्रतिपत्तिकरमित्यदोष इत्याहुः । इह तु बुद्धादिपदोल्लेखे कृते दक्षिणापथपथिकसार्थानामनुपादेयता स्यात् । कृष्णादिपदोद्देशे त्वनुपादेयत्वात् तत्कालबलितमदोद्धुराणां बौद्धानामित्युभयसाधारण्येनोपदेयतार्थं मुख्यानुद्देशः"—इति ।

अमरदीपिकायामप्युक्तम्—"समुद्रपक्षे सर्व्वज्ञानलक्षणां धियं बुद्धिं रान्ति गृह्णन्तीति धीराः देवाः । बुद्धपक्षे भो धीराः पण्डिताः स बुद्धः सेव्यताम्" इति ।

त्रिकाण्डरहस्ये रामनाथेनाप्युक्तम्—"यदाऽसौ कविरमरसिंहो ग्रन्थमेतं चकार तदानीमनादृतवेदपथानां मदोद्धुराणामतिप्राबल्यमासीत् । अत एव कृष्णादिपदोल्लेखे तेषामनुपादेयता स्यात् । बुद्धादिपदोल्लेखे तु दक्षिणापथप्रवृत्तानामनुपादेयता स्यादित्युभयेषां तत्रोपादेयतार्थमस्य मङ्गलश्लोकस्य तादृशी गूढार्थता" इति ।

अमरकोषोद्घाटने क्षीरस्वामिनापि—"यस्य भगवतो ज्ञानदययोः बोधकरुणयोः सिन्ध्वोः समु-

* "भवन्त्यष्टादिशाब्दिकाः" इति क्वचित् ।

द्रस्येव गम्भीरस्य अनवाः निष्पापाः गुणाः क्षान्त्यादयो बोधिपक्ष्याः सप्तत्रिंशत्'' इति प्रथम-श्लोकव्याख्यानावसरे उक्त्वा द्वितीयश्लोकस्यावतरणं दत्तम् । "इति ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्य श्रोतृप्रोत्साहनार्थं स्वप्रवृत्तिप्रयोजनं साभिधेयमादिवाक्येनाह समाहृत्येति" इति ।

एवञ्च यत्तूक्तं भानुदीक्षितेन-"स्वामी तु (क्षीरस्वामी तु) "जिनमनुस्मृत्य" इति स्मरणल-क्षणं मङ्गलमाह । तन्न । जिनवाचकपदस्यात्रादर्शनात् । सामान्यशब्दानां जिनलक्षणविशेषपर-त्वेन व्याख्यानस्य वैदिकानामनुचितत्वात् । "अमरकर्तुः (नामलिङ्गानुशासनकर्तुः) जैनत्वे प्रमा-णाभावाच्च" इति । तत्तु अनादेयमेव । जिनवाचकपदानुपन्यासे कारणस्य प्राचीनै रायमुकुटी-कारादिभिरुक्तस्योपदर्शितत्वात् । सामान्यशब्दानां जिनलक्षणविशेषपरत्वेन व्याख्यानस्य बौद्ध-ग्रन्थव्याख्याने प्रवृत्तानां वैदिकानामपि उचितत्वात् । प्रकृतग्रन्थकर्तुर्जैनत्वे प्रमाणस्य प्रागुपपा-दितत्वाच्चेति विचारिभिर्विचार्य्यम्" ॥

"तदनन्तरमाचार्य्यामरसिंहम्प्रति दुर्गाप्रसाद—काशिनाथ—शिवदत्तादीनां विदुषां मतनिदर्शनम् । "नामलिङ्गानुशासनप्रणेताऽमरसिंहः कदा कुत्र समुत्पन्न इत्यादि" इति अद्यापि न निश्चेतुं शक्यते । तत्र "धन्वन्तरिक्षपणकामरसिंहशङ्कु" इत्यादि नवरत्नश्लोकं ज्योतिर्विदाभरणान्तिमाध्यायस्थं पश्यन्तः कृष्टाब्दारम्भात् प्राक् प्रथमे शतकेऽमरसिंहसत्तां बहवः समर्थयन्ते । विल्सन् पण्डितः स्वकीयसंस्कृताभिधानस्य (१८१९ मिते कृष्टाब्दे मुद्रितस्य) भूमिकायां पञ्चशतमिते कृष्टाब्दे-ऽमरसिंह आसीदिति स्थिरीकरोति । डाक्टर केर्ननाम्ना विदुषा बृहत्संहितोपोद्घाते वराहमि-हिरामरसिंहौ समकालिकौ । कृष्टाब्दीयषष्ठशतपूर्व्वार्द्धसमुद्भूतौ चेति निर्णीतम् । वेबरपण्डि-तस्तु अमरकोषातिरिक्ताः सर्व्वेऽपि कोषाः कृष्टाब्दीयैकादशद्वादशशतकाधस्तना एव समुपल-भ्यन्ते । अतोमरकोषोऽपि तेभ्यो नातिप्राचीनो भवितुमर्हतीति "हिष्टरि आव् इण्डियन् संस्कृ-तलिटरेचर" नाम्नि ग्रन्थे वदति । एवं संदिग्ध एवाद्याप्यमरकोषस्य समयः । साम्प्रतमुपलभ्य-माने कोषकलापे नैकोप्यमरकोषात्प्राचीन इति सर्व्वसम्मतम् । किन्त्वासन् केचन कोषा अमर-कोषात्प्रागपि । "समाहृत्यान्यतन्त्राणि" इति तदुक्तेः । अयममरसिंहो बौद्ध आसीदित्यनुमी-यते । यतोऽनेनामरकोषे देवदैत्यसामान्यनामान्युक्त्वाऽनन्तरं शिवविष्ण्वादिनामान्युपेक्ष्य "सर्व्वज्ञः सुगतो बुद्धः" इत्यादि बुद्धनामान्येव वक्तुमुपक्रान्तानि । यथा हेमचन्द्रेण स्वकोषे जिनना-मानि । वैदिकमतानुयायी ब्राह्मणस्तु कदापि नैवं कुर्य्यात्" इति ॥

एवं नवीनैर्वामनाचार्य्य—दुर्गाप्रसाद—काशिनाथ—शिवदत्तादिभिर्भारतदेशीयैः प्रशस्तबुद्धि-शालिभिर्ब्राह्मणपण्डितवरैस्तु आचार्य्यामरसिंहस्य बौद्धत्वं प्राचीनत्वञ्चाभिन्ननानाविधसदुपयु-क्तिनिदर्शनेन निर्णीतं सम्प्रतीच्छितञ्च दृश्यते । सम्प्रति नानादेशप्रचलितसंस्कृतविशिष्टकोषग्रन्थ-कृतानाममरसिंह—पुरुषोत्तमदेव—हेमचन्द्र—महेश्वरादीनाञ्च गीर्व्वाणवाणीनिबद्धानामन्यनानाविध-न्यायालङ्कारकाव्यादिविशिष्टग्रन्थनिर्मितानां मानतुङ्ग—भूपाल—जम्बुगुरु—प्रभव-शय्यम्भव—यशो-भद्र—सम्भूत—भद्रबाहु—स्थूलभद्र-महागिरि—वाग्भट—चन्द्रगोमि-जिनदेवमुनीश्वर—सुहस्ति-सुस्थि-त-सुप्रतिबुद्ध—कोटिक—वज्रसूरि—प्रद्युम्नसूरि —गुणसेनसूरि—देवचन्द्र—धर्म्मदास —सोमप्रभ—जिन-प्रभु—शोभनमुनि-क्षेमेन्द्रादीनां प्रशस्तनिपुणबुद्धिशालिनां कविपुङ्गवानाञ्च बौद्धत्वमपि सन्दर्शनं सुश्रवणं साम्प्रतं स्वदेशीयविदेशीयानां बौद्धानां केषाञ्चित् सहृदयानाममन्दानन्दमावहत्येव ॥

परन्त्वमरकोषापरनामधेयस्य नामलिङ्गानुशासनस्यातीव प्रचलितत्वात्तदर्थविशदीकरणेन तत्तद्देशीयैर्बहुभिः पण्डितैः कृतानेकविधाष्टीका अपि भूयिष्ठं विद्यन्ते। तद्यथा—वाक्यप्रदीपः—काशिका—अमरकोषोद्घाटनम्—कौमुदी—पदार्थकौमुदी—शब्दार्थसंदीपिका—अमरपञ्चिका—अमरदीपिका—सुबोधिनी—व्याख्यासुधा—शारदासुन्दरी—विद्वन्मनोहरा—अमरविवेकः—मधुमाधवी—पदचन्द्रिका—त्रिकाण्डचिन्तामणिः—त्रिकाण्डविवेकः—प्रदीपमञ्जरी-पीयूषम्—वैषम्यकौमुदी—पदवृत्तिः-पदमञ्जरी—व्याख्यामृतम्—संदेहभञ्जिका—टीकासर्व्वस्वम्; एतदतिरिक्ताः कर्णाट—काश्मीर—तिबेट-तैलङ्ग—महाराष्ट्र—ब्रह्म—स्याम—सिंहलभाषानिबद्धास्तत्तद्देशोपयोगिन्योऽन्या अपि अमरकोषटीका भूयस्यो वर्त्तन्ते॥

किन्त्वमरकोषपरिशिष्टरूपस्याऽस्य त्रिकाण्डशेषस्य क्वचित्तु देशे केनचित् कृतायाः टीकायाः संविद्यमानता नास्माभिस्तावल्लक्षिता न श्रुता च। अत एव मया सम्प्रति जगदुपकृतये नानाकोषग्रन्थसमालोचनात् सारांशसंकलनेन यथार्थवत् कोषार्थजिज्ञासूनां तदायत्तार्थानाञ्च यथावत् सुगमता स्यात्तथैवेयं "सारार्थचन्द्रिका" नाम टीका कृता। तत्र प्रायः प्रथमद्वितीयकाण्डयोरेकसम्बन्धाभिधेयानां शब्दानां पृथक्पृथग्विधयाऽन्यकोषात् पर्य्यायनामानि च प्रयुज्य कचिल्लिङ्गभेदसमासवाक्यानि च प्रदर्शितानि। विशेषतो नानार्थवर्गे सर्व्वेषामभिधानशब्दानां सामान्यार्थान् प्रदर्श्य नानाकोषेभ्यो विशेषार्थानाञ्च संकलनेन लिङ्गधातुप्रत्ययाद्यवयवा अपि दर्शिताः। अव्ययवर्गेपि तत्रोपयुक्तानामव्ययानां सान्वयार्थसहितानि शिशुपालबध—रघुवंश—कुमारसम्भवादिमहाकाव्येभ्यो नानाविधान्युदाहरणानि समुद्धृत्य यथावद्विशदीकृतानि। तद्वदयं त्रिकाण्डशेषः अकारादिवर्णानुपूर्व्व्यानुसारिण्या शब्दानुक्रमणिकया सनाथीकृतश्च॥

एतस्य त्रिकाण्डशेषस्य परिशोधने जयपुर—मुम्बयी—काशीषु मुद्रिताश्चत्वारस्त्रिकाण्डशेषपुस्तकाः प्रायोस्माभिरादर्शीकृताः। तेषु मुम्बयीमुद्रितपुस्तकः परिशुद्धः। शेषाः सदोषा एव। तेषु चतुर्षु पुस्तकेषु भूयशो विशेषपाठा अपि दृष्टाः। तेषां कतिपया विशेषतरपाठाः टीकायां तत्र तत्र " " अनेन चिह्नेन प्रयुक्ताः सन्ति। कतिपयास्तथानादरीकृताश्च॥

एतस्य परिशोधने व्याख्यानकरणे च यथावत्करणार्थं मयापि भूयः समुद्योगः कृतः। तथापि यदत्र मम किञ्चित् स्खलितं सुधीभिर्लक्ष्येत तत् परिशोधनीयम्। एतद्दर्शने सुधियः सुकुमारमतयः कोषार्थजिज्ञासवश्च सततं प्रवर्त्तन्तामित्येव मम विनयतः प्रार्थना। तेनैव मम श्रमसाफल्यं भवेदित्यलं पल्लवितेन। अपि त्वेयं सारार्थचन्द्रिकाख्या व्याख्या तु मया अतः पञ्चदशवर्षादुपरि विरचितेति ज्ञातव्यम्। ॥ शिवमस्तु॥

गच्छतां पथि मर्त्यानां पादाः क्वापि स्खलन्ति हि।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥
जगत्येके प्रसीदन्ति परकृत्ये विशेषतः।
केचित्तत्राप्यसूयन्ति स्वभावोऽयं दुराक्रमः॥

श्रीशीलस्कन्धयतिवरस्य।

१८३७ शकाब्दे वैशाखमासि प्रथमे दिवसे
लङ्कायां दोडन्दुवग्रामे शैलबिम्बारामविहारात्॥

॥ श्रीः ॥

त्रिकाण्डशेषस्य विषयानुक्रमः ।

प्रथमं काण्डम् ।

द्वितीयं काण्डम् ’

तृतीयं काण्डम् ।

इति त्रिकाण्डशेषस्य विषयानुक्रमः ।

॥ श्रीः ॥

अथ

सटीकत्रिकाण्डशेषकोषस्य-

प्रथमः काण्डः ।

नमः सम्यक्सम्बुद्धाय ।

जयन्ति सन्तः कुशलं प्रजानां नमो मुनीन्द्राय सुराः स्मृताश्च ।
स्तुताऽसि वाग्देवि दयस्व मातर्विधेहि विघ्नाधिप मङ्गलानि ॥ १ ॥

॥ नमः श्रीशाक्यमुनये ॥

प्रणम्य शिवदं बुद्धं सर्वज्ञं विश्वतोमुखम् । सारार्थचन्द्रिकाख्येयं व्याख्या प्रक्रियते मया ॥
पाणिन्यादीन्मुनीन्स्मृत्वा तद्ग्रन्थादीनुपास्य च । भूरिप्रयुक्तशब्दानां स्फुटनायायमुद्यमः ॥
कोषाः सन्त्यत्र भूयांसो विविधा विपुलाश्च ते । अल्पायासेन भाषायाः शिक्षणायायमाग्रहः ॥

इह खलु श्रीमान् पुरुषोत्तमदेवः सुधीवर आचार्यामरसिंहकृते नामलिङ्गानुशासने अभिधानशास्त्रे प्रायेणानुपदिष्टानां संज्ञाशब्दानां परिदीपनाय स्वचिकीर्षितस्याऽस्य त्रिकाण्डशेषकोषस्य निर्विघ्नपरिसमाप्त्यर्थं विहितं प्रणामादिकं मङ्गलसूचनं शिष्यशिक्षार्थं ग्रन्थादौ दर्शयति—जयन्तीत्यादिना ॥ तत्र सन्तः साधवः । प्रशस्तपण्डिता इति यावत् । जयन्ति सर्वोत्कर्षेण प्रवर्तन्ते । जयग्रहणं कुर्वन्त्विति स्पष्टार्थः। जययुक्ता भवन्त्विति वा अत्र "जेस्तुवन्त्वोस्तिवन्ती" इत्यनुशासनादन्तुस्थानेऽन्तिः।अयं तु सच्छब्दः सत्यसाधुधीरादिषु अनेकेष्वर्थेषु प्रवर्तनादिहावश्यं मङ्गलार्थद्योतको भवति । तथा चोक्तं गीतायाम् "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति । ततस्तु ग्रन्थकार आत्मनः शिष्याणां चाभीष्टसिद्धिकामो जयन्ति सन्त इति प्रथमं सच्छब्दप्रयोगं कृतवानिति भावः । ततः अनन्तरम् । प्रजानां सत्त्वानां कुशलं कल्याणम् आरोग्यं वा । "अश्रुतपदस्यानुसन्धानमध्याहारः" "अनुक्तस्यावश्यं वक्तव्यस्याहरणमध्याहारः" इति वा वचनात् अस्त्विति क्रियापदमध्याहार्यम्। ग्रन्थारम्भे हि कल्याणादिको यः कश्चिदिष्टाभिशंसनसूचकः शब्दप्रयोगः सर्वजनहितकारित्वं समुद्वहति । तथा चोक्तं श्रीमयूरभट्टेन—"कल्याणं वः क्रियासु किशलयरुचयस्ते कराः भास्करस्य" इति । मुनीनां प्रत्येकबुद्धादीनां वीतरागाणाम् अथवा श्रोतापन्नादीनां परिशुद्धचित्तानां सप्तानामार्यगणानाम् इन्द्रः श्रेष्ठः । तदुक्तम्—

अलौकिकत्वादमरः स्वकोशे न यानि नामानि समुल्लिलेख ।
विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य ॥ २ ॥

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" इति । अथ वा मन्वत्रिविष्णुहारीतादीनां स्थिरचित्तानां सप्तानामृषीणाम् इन्द्रः अधिपतिः । अत्र मुनीन्द्रशब्देन भगवान् शाक्यमुनिरेवोच्यते "मुनीन्द्रः श्रीघनः शास्ता" इत्यमरोक्तत्वात् । मुनीन्द्रायेत्यत्र नमःशब्दयोगे चतुर्थी दर्शिता । नमः इत्येतदव्ययं नतावपि वर्तते । तस्मादनेन नमःशब्देनाऽत्र नमस्कारकरणमवश्यमवगम्यते । अस्त्वित्यत्राप्यन्वयः । सुराः देवाः स्मृताः अनुस्मरणपथं नीताः । मयेति शेषः । क्वचित् 'स्थ' इति पाठः । एवं सति भवथेत्यर्थः । यूयमिति शेषः । यत्र ग्रन्थादौ देवतानुस्मरणं कस्यचित् ऐहलौकिकस्य फलस्य सिद्धयेऽप्यावश्यकम् । तथाप्याहुः पूर्वीयाः—"देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः । मित्रामित्रविचारो वा न तत्र फलकल्पना ॥ देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥" इति । वाग्देवि हे सरस्वति त्वं भवती स्तुता असि स्तवं कृता भवसि । मयेत्यन्वयः । वागधिकृते ग्रन्थारम्भे सरस्वत्याः अनुस्मरणं शिष्यशिक्षकयोर्ज्ञानसमृद्ध्यै हिताय च सर्वथैव प्रयोजनं भवति । तत आह जयदेवः—"वाग्देवताचरितचित्रितचित्तसद्मा" इति । मातः हे अम्ब त्वं दयस्व अनुकम्पां कुरु । मयीति शेषः । अत्र ग्रन्थोत्पादनसमये मातृशब्देनैव मातुरनुस्मरणं शिवप्रसादलाभायाभाषितम् । इयं माता तु शिवसहचरी । तस्याः अनुस्मरणाच्छिवः प्रसीदत्येवेति केषाञ्चिन्मतम् । ताः मातरोऽष्टौ भवन्तीति पूर्वीयैरुक्तम् । यथा— "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्टमातरः" इति । विघ्नाधिप हे गणेश त्वं भवान् मङ्गलानि शुभानि । अभीष्टार्थसिद्धिकराणीत्यर्थः । विधेहि कुरु । विपूर्वो धा धातुः करणार्थे वर्तते । ममेति शेषः । केचित्तु शिष्याणामिति पदं शेषः इति पठन्ति ग्रन्थकरणावस्थायां विघ्नराजस्य स्मरणं सकलविघ्नोपशान्त्या ज्ञानोत्पादने सामर्थ्यं जनयते इति केषाञ्चिच्छाब्दिकानां मतम् । अयमस्य स्पष्टार्थः ॥ १ ॥

अमरः आचार्यामरसिंहः स्वकोशे स्वयं कृते नामलिङ्गानुशासने अभिधानग्रन्थे यानि नामानि अभिधानानि । अलौकिकत्वात् लोकव्यवहारविषये प्रायेणाविदितत्वात् । लौकिकप्रत्यक्षागम्यत्वादिति भावः । न समुल्लिलेख न समुद्दीतानि कृतवान् । न लिखितवानित्यर्थः । अत्रान्तर्गतानि सर्वाणि नामानि पञ्चविधानि भवन्ति । उणाद्यन्तं कृदन्तं तद्धितान्तं समासान्तमनुकरणमिति । यथा—"उणाद्यन्तं कृदन्तं च तद्धितान्तं समासजम् । शब्दानुकरणं चेति नाम पञ्चविधं स्मृतम् ॥" इति । तैः अमरसिंहेन अनुक्तैर्नामभिरपि । अपिशब्दः समुच्चये । अधुना अस्मिन् काले प्रचारं प्रसरणम् । महर्षीणां तेषुतेषु वाक्यरचनादिषु प्रायः प्रयोगमिति भावः । विलोक्य विशेषेण समीक्ष्य । न श्रुतिवशात् स्वचक्षुषैव दृष्ट्वेत्यर्थः । पुरुषोत्तमस्य तन्नामकस्य विदुषः अयं प्रयत्नः परिशिष्टनामसङ्कलने कार्या

वर्गक्रमस्तथा नामलिङ्गयोस्तूपदेशता ।
परिभाषादिकं सर्वमत्राप्यमरकोषवत् ॥ ३ ॥
स्वर्लोको देवलोकः स्यादवरोहः फलोदयः ।
मन्दरः सैरिभः शक्रभवनं खं दिवं नभः ॥ ४ ॥
स्वाहाभुजस्तु वसुलाः पूजिताश्च चिरायुषः ।
शौभा निलिम्पा द्युषदः स्वर्गिणश्च नभःसदः ॥ ५ ॥

नुकूलः प्रयासः । भवतीत्यन्वयः ॥ २ ॥ अत्रापि अस्मिन् त्रिकाण्डशेषकोषेऽपि वर्गक्रमः वर्गाणामनुक्रमः तथा तद्वत् नामलिङ्गयोः नाम्नां लिङ्गानां च उपदेशता उपदेशकथनं च। तुशब्दश्चार्थे क्वचित् । 'सूपदेशता' इति पाठः । अनुशासनविधिरित्यर्थः । परिभाषादिकं कृत्रिमसंज्ञादिकं वा विशिष्टसंज्ञादिकं च सर्वं सकलमपि अमरकोषवत् । अमरकोषे उक्तानुक्रमस्येवेत्यर्थः । क्वचित् 'अमरसिंहवत्' इति पाठः । अस्मिंस्तु त्रिकाण्डशेषकोषे नाम्नां स्त्रीपुंनपुंसकलिङ्गभेददर्शनं परिभाषादिकानां संज्ञानां दर्शनं च अमरकोषे आचार्यामरसिंहेन उक्तविधिनैवावगन्तव्यमिति भावः । अत्रापि प्रायः रूपभेदेन आकारविशेषेण च स्त्रीपुंनपुंसकं ज्ञेयम् । यथा । स्वर्लोको देवलोकः स्यादवरोहः फलोदयः । विकटा वज्रवाराही गौरी पौत्रिरथा च सा । शक्रभवनं खं दिवं नभः । तथा, क्वचित् शब्दान्तरसान्निध्याल्लिङ्गं ज्ञेयम् । यथा—दैत्यमाता दितिर्दनुः । अथ हंसरथो ब्रह्मा विरिञ्चोऽष्टश्रवः सनत् । खं मरुन्मेघवर्त्म च । अत्र संयुक्ताः दनुसनन्मेघवर्त्म शब्दाः दैत्यमातृविरिञ्चखशब्दैः साहचर्यात् स्त्रीपुंनपुंसकलिङ्गा भवन्ति । तथा, क्वचिल्लिङ्गविशेषकथनाच्च स्त्रीपुंनपुंसकत्वं दर्शयति । यथा—गाडवः कन्धरो वातरथो वारिमसिः स्त्रियाम् । क्लीबं च शैलशिबिरं धरणीप्लवश्च । पुमान् कचङ्गलो वाङ्क इति । तथा, स्त्रीपुंनपुंसकलिङ्गकथनेषु त्रिष्विति पदं स्त्रीपुंसयोर्द्वयोरिति पदं प्रयुक्तम् । निषिद्धलिङ्गे अस्त्री अपुमानिति पदे च प्रयुज्येते । यथा—छेको नागारिके त्रिषु । ग्रन्थिपर्णे च न द्वयोः । अनीकोऽस्त्री रणे सैन्ये । तारकं दृशिभ न नेति । तथाऽत्र त्वन्तशब्दः अथादिशब्दश्च पूर्वेण न सम्बध्यते । यथा—लोकनाथस्तु लोकेश इति । लोकनाथ इति त्वन्तं पदं पौत्रिरथया न सम्बध्यते । किंतु लोकेशशब्देन सम्बद्धम् । तथा—स्वयम्भुवोऽथ मारीची त्रिमुखा वज्रकालिका । इत्यथादिपदं न पूर्वभाक् । किंतु प्रत्येकबुद्धस्य पर्यायः । एवमत्र यानि वक्तव्यानि अपराणि स्युस्तान्यत्र अमरकोषोक्तक्रमेणाप्यूहनीयानि ॥३॥ अथाभिधानकथनमारभते—**स्वर्लोक** इति॥स्वर्लोकः देवलोकः अवरोहः । ततो हि सर्वे जनाः भोगावसाने यस्मादवतरन्तीति सः । फलोदयः । फलस्य कर्मफलस्य उदयः दृष्टियोग्यस्थानम् । मन्दरः सैरिभः "शैरिभः" सैरिकः" शक्रभवनं खं दिवं नभः इति दश नामानि **स्वर्गस्य** ॥ अत्र शक्रभवनं खं दिवं नभः इति इमे शब्दाः नपुंसकाः । शेषाः पुँल्लिङ्गाः ॥ ४ ॥ स्वाहाभुजः वसुलाः "सुवलाः इति केशवे । "सुबालाः" इति हैमे । पूजिताः चिरायुषः। चिरमायुर्येषां ते । शौभाः निलिम्पाः द्युषदः स्वर्गिणः नभःसद् "नभस्सद्"

ऋनामा त्वदितिर्देवमाता स्यादथ पूर्वजाः ।
पितरश्चन्द्रगोलस्था न्यस्तशस्त्राः स्वधाभुजः ॥ ६ ॥
कव्यवालादयस्ते च दैत्यास्तु प्रघसाः खराः ।
क्रतुद्विषश्चेष्टिमुषो दैत्यमाता दितिर्दनुः ॥ ७ ॥
बुद्धोऽकनिष्ठगमहामुनिधर्मचक्रा
रागाशनिस्त्रिशरणः खसमो दशार्हः ।
तापी गुणाकरमहासुखवज्रिणश्च
मैत्रीबलासमजितारिसमन्तभद्राः ॥ ८ ॥
महाबोधिर्धर्मधातुः श्वेतकेतुर्जिनः खजित् ।
त्रिमूर्तिर्दशभूमीशः पञ्चज्ञानो बहुक्षमः ॥ ९ ॥
सम्बुद्धः करुणाकूर्चः सर्वदर्शी महाबलः ।
विश्वबोधो धर्मकायः संगुप्तोऽर्हन्मुनिश्चितः ॥ १० ॥

इति नव देवानाम् ॥ अत्र सर्वे पुंल्लिङ्गाः । व्यक्तिबाहुल्याद्बहुवचनप्रयोगः॥५॥ ऋनामा अदितिः देवमाता इति त्रीणि अदित्याः । सर्वाः स्त्रीलिङ्गकाः ॥ पूर्वजाः "पूर्वजाः" पितरः चन्द्रगोलस्थाः । न्यस्तशस्त्राः । न्यस्तानि क्षिप्तानि शस्त्राणि आयुधानि यैस्ते । स्वधाभुजः इति पञ्च **पितृदेवानाम्** ॥६॥ कव्यवालाः "काव्यबालाः" इत्येकं **पितृदेवभेदस्य ॥** गणवाचकत्वादत्र बहुवचनप्रयोगः । दैत्याः प्रघसाः खराः "चेरतुः खरदूषणौ च" इति भट्टिः । कचित्तु क्षवाः क्षराः इति च पाठौ । क्रतुद्विषः इष्टिमुषः "इष्टिमृषः" । इष्टीः यागान् मुष्णन्तीति ते॥ इति पञ्च **असुराणाम्** ॥ दैत्यमाता दितिः दनुः इति त्रीणि **असुरमातुः** ॥ ७ ॥ बुद्धः अकनिष्ठगः । अकं पापं तस्य निष्ठम् अवसानम् अगमदिति सः । महामुनिः धर्मचक्रः "धर्मवक्रः" रागाशनिः "रागारिः" त्रिशरणः । त्रिषु लोकेषु शरणं रक्षणं यस्य सः । खसमः । खेन आकाशेन समाः तुल्याः गुणाः यस्य सः । दशार्हः तापी गुणाकरः महासुखः वज्री । वज्रं ज्ञानवज्रमस्यास्तीति सः । मैत्रीबलः असमः । नास्ति समोऽस्येति सः । जितारिः जिताः पराजिताः अरयः रागादिक्लेशाः येन सः । समन्तभद्रः ॥ ८ ॥ महाबोधिः धर्मधातुः श्वेतकेतुः । श्वेतः शुक्लः केतुः ध्वजो यस्य सः । जिनः खजित् त्रिमूर्तिः । तिस्रो मूर्तयो शारीरिकपारिभोगिकोद्देशिकाः प्रतिमाः यस्य सः । दशभूमीशः पञ्चज्ञानः । पञ्च ज्ञानानि यस्य सः । बहुक्षमः । बह्वी क्षमा यस्य सः ॥ ९ ॥ सम्बुद्धः करुणाकूर्चः । करुणा एव कूर्चो यस्य सः । समन्तभद्रः । "समन्तभद्रः संगुप्तो दयाकूर्चो विनायकः" इति हैमः । अथवा करुणः।करुणा दया अस्यास्तीति सः। कूर्चः । कूर्चं भ्रुवोर्मध्ये स्थितं लोम। "कूर्चमस्त्री भ्रुवोर्मध्यम्" इत्यमरः । "कूर्चमस्त्री भ्रुवोर्मध्ये कत्थनश्मश्रुकैतवे" इति कोषान्तरम् । तदस्यास्तीति

व्यामाभो द्वादशाख्यश्च वीतरागः सुभाषितः ।
सर्वार्थसिद्धस्तु महाश्रमणः कलिशासनः ॥ ११ ॥
गोपेशश्चाथाऽस्य यशोधरेयो राहुलः सुतः ।
देवदत्तोऽनुजोऽथ स्युः श्रावकाः शिष्यसंज्ञिनः ॥ १२ ॥
प्रत्येकबुद्धाः खड्गाः स्युः सुदान्ताश्चैकचारिणः ।
स्वयम्भुवोऽथ मारीची त्रिमुखा वज्रकालिका ॥ १३ ॥
विकटा वज्रवाराही गौरी पौत्रिरथा च सा ।
लोकनाथस्तु लोकेशः सरोजो गुणसागरः ॥ १४ ॥
लोकेश्वरः कृपाद्वैतः सुधावर्षी हलाहलः ।
सुखावतीश्वरः कन्यारामोऽसिताभ्रशेखरः ॥ १५ ॥
चिन्तामणिः पद्मपाणिर्बहुरूपः खसर्पणः ।
अनीचदर्शी कारण्डव्यूहः पोतलकप्रियः ॥ १६ ॥

सः । सर्वदर्शी महाबलः विश्वबोधः धर्मकायः संगुप्तः अर्हन् सुनिश्चितः ॥ १० ॥ व्यामाभः । तिर्य्यक् पार्श्वतो विस्तृतयोर्बाह्वोरन्तरालपरिमाणे स्थाने आभा प्रभा यस्य सः । कचित्तु "व्योमाभः" । व्योम्ना आकाशेन आभाः तुल्याः गुणाः यस्य सः । द्वादशाख्यः । द्वादश आख्या अस्य । द्वादशाख्यः सूर्य्य इति नाम यस्य स वा । वीतरागः । वीतः अपगतः रागः आलयो यस्मात् सः । सुभाषितः । शोभनानि भाषितानि यस्य सः। इति सप्तत्रिंशन्नामानि **बुद्धस्य**॥ सर्वार्थसिद्धः महाश्रमणः कलिशासनः "कुलिशासनः"। कलौ युगे शासनम् अनुशासनं यस्य सः । अथ वा कलौ पापे विवादे वा शासनं हितसाधनं यस्य सः॥ ११॥ गोपेशः। गोपानां (गोकुलस्थगोपानां) ईशः स्वामी। इति चत्वारि **शाक्यमुनेः**॥ यशोधरेयः राहुलः इति द्वे **शाक्यमुनिसुतस्य** ॥ देवदत्तः इत्येकं **शाक्यमुनिभ्रातुः** ॥ अत्र तु महामायानाम देवी किल एकमेव सिद्धार्थकुमारं प्रसूता । तस्मादस्य शाक्यमुनेरेकमातृगर्भजातः अन्यः सहोदरो नाऽसीत् । राज्ञः शुद्धोदनस्य तु प्रजापतीगोतमीनामिकायाः अपरायाः देव्याः नन्द इति एकः पुत्रः नन्देति एका दुहिता चाऽभवताम् । तावेकमातृगर्भसंभवाविति दाक्षिणात्येषु बौद्धधर्मप्रकाशितेषु पुस्तकेषु दृष्टम्॥ श्रावकाः। ये यस्य धर्मानुशासनं शृण्वंति ते। शिष्यसंज्ञिनः । इति द्वे **शिष्याणाम्**॥ १२॥ प्रत्येकबुद्धाः खड्गाः सुदान्ताः एकचारिणः । एकाकिचरणशीलमेषां ते। स्वयम्भुवः इति पञ्च **प्रत्येकबुद्धानाम्** ॥ मारीची त्रिमुखा वज्रकालिका । वज्रमिव कालो वर्णोऽस्त्यस्याः सा ॥ १३ ॥ विकटा वज्रवाराही गौरी पौत्रिरथा इति सप्त **मायादेव्याः** ॥ लोकनाथः लोकेशः सरोजः गुणसागरः ॥ १४ ॥ लोकेश्वरः कृपाद्वैतः । कृपया अद्वैतं द्विधा भेदगतभावं नास्ति यस्य सः । अथवा कृतं सजातीयादिभेदशून्यं येन सः । सुधावर्षी हलाहलः सुखावतीश्वरः कन्यारामः असिताभ्रशेखरः । असितः कृष्णवर्णः अभ्रः मेघ इव शेखरः शिखा यस्य सः ॥ १५ ॥ चिन्तामणिः

जटाधरो महावीर्यो वज्रसूर्योऽवलोकितः ।
तारा महाश्रीरोङ्कारा स्वाहाश्रीश्च मनोरमा ॥ १७ ॥
तारिणी च जयाऽनन्ता शिवा लोकेश्वरात्मजा ।
खदूरवासिनी भद्रा वेश्याली च सरस्वती ॥ १८ ॥
शंखिनी च महातारा वसुधारा धनन्ददा ।
त्रिलोचना लोचना स्यान्मणिभद्रस्तु जम्भलः ॥ १९ ॥
पूर्वयक्षो जलेन्द्रोऽथ मञ्जुश्रीर्ज्ञानदर्पणः ।
मञ्जुभद्रो मञ्जुघोषः कुमारोऽष्टारचक्रवान् ॥ २० ॥
स्थिरचक्रो वज्रधरः प्रज्ञाकायश्च वादिराट् ।
नीलोत्पली महाराजो नीलः शार्दूलवाहनः ॥ २१ ॥
धियांपतिः पूर्वजिनः खड्गी दण्डी विभूषणः ।
बालव्रतः पञ्चवीरः सिंहकेलिः शिखाधरः ॥ २२ ॥
वागीश्वरोऽथ हेवज्रो हेरुकश्चक्रसंवरः ।
देवो वज्रकपाली च निशम्भः शशिशेखरः ॥ २३ ॥
वज्रकीटोऽथ मैत्रेयो युवराज्ञोऽजितश्च सः ।
चीवरी श्रमणो भिक्षुर्वल्लयश्चैत्रोऽथ चेलुकः ॥ २४ ॥

पद्मपाणिः । पद्मं पाणौ यस्य सः । बहुरूपः खसर्पणः अनीचदर्शी कारण्डव्यूहः पोतलकप्रियः ॥ १६ ॥ जटाधरः महावीर्यः वज्रसूर्यः "वज्रसूर्यः" अवलोकितः इति द्वाविंशतिर्**बुद्धविशेषस्य** ॥ तारा महाश्रीः ओङ्कारा स्वाहाश्रीः मनोरमा ॥ १७ ॥ तारिणी जया अनन्ता शिवा लोकेश्वरा आत्मजा खदूरवासिनी भद्रा वेश्याली "वैश्या" सरस्वती "नीलसरस्वती" ॥ १८ ॥ शङ्खिनी महातारा वसुधारा।वसोः चेदिराजस्य प्रियार्थं धारा घृतादिस्रवसन्ततिर्यस्याः सा।धनन्ददा त्रिलोचना । त्रीणि लोचनानि यस्याः सा । लोचना । इत्येकविंशति**रूपदेवताविशेषस्य** ॥ मणिभद्रः जम्भलः ॥ १९ ॥ पूर्वयक्षः जलेन्द्रः । जलस्य इन्द्रः प्रधानः । इति चत्वारि **पूर्वयक्षस्य** ॥ मञ्जुश्रीः ज्ञानदर्पणः । ज्ञानमेव दर्पणं यस्य सः । मञ्जुभद्रः "मञ्जुवज्र" मञ्जुघोषः कुमारः अष्टारचक्रवान् ॥ २० ॥ स्थिरचक्रः वज्रधरः प्रज्ञाकायः वादिराट् । वादिनां राजा । नीलोत्पली महाराजः नीलः क्वचित् "महोराजनीलः" इति । शार्दूलवाहनः । शार्दूलो व्याघ्रविशेषः वाहनं यानं यस्य सः ॥ २१ ॥ धियांपतिः पूर्वजिनः खड्गी । खड्गम् अस्यास्तीति सः । दण्डी । दण्डः अस्याऽस्तीति सः । विभूषणः बालव्रतः पञ्चवीरः सिंहकेलिः । सिंहस्येव केलिः क्रीडा यस्य सः । शिखाधरः । शिखां चूडां धरतीति सः ॥ २२ ॥ वागीश्वरः । वाचाम् ईश्वरः प्रधानः । इति चतुर्विंशतिः **पूर्वजिन इति ख्यातस्य उपास्यदेवभेदस्य** ॥ हेवज्रः " हेरम्बः " हेरुकः चक्रसंवरः देवः वज्रकपाली निशम्भः "निशुम्भी" शशिशेखरः ॥ २३ ॥ वज्रकीटः इत्यष्टौ **वज्रकीटस्य** ॥ मैत्रेयः युवराज

श्रामणेरः प्रव्रजितो महापासकगोमिनौ।
अथ हंसरथो ब्रह्मा विरिञ्चोऽष्टश्रवः सनत् ॥ २५ ॥
कञ्जः प्राणश्च वेदीशवेदगर्भौ पुराणगीः।
अब्जजो विश्वरेताश्च कमलः प्रपितामहः ॥ २६ ॥
नाभिजन्मा शतधृतिर्ब्राह्मी तु ब्रह्मकन्यका।
वाग्देवी शारदा शुक्ला महाश्वेता सरस्वती ॥ २७ ॥
अथ हरिशतबिन्दुश्रीकरश्रीवराहा-
जितपरपुरुषश्रीगर्भषड्बिन्दुनन्ताः।
नरकजिदृतधामा केशवो जन्मकीलः
क्रतुपुरुषनृसिंहश्रन्थजह्नूच्चदेवाः ॥ २८ ॥
कोकः पुराणपुरुषो नलिनेशयश्च
वासुर्नरायणपुनर्वसुविश्वरूपाः।
अः श्रीनिवासधरणीधरवामनैक-
शृङ्गाश्च वृष्णिवृषशत्रुदशावताराः ॥ २९ ॥

अजितः इति त्रीणि **भाविबुद्धस्य** ॥ चीवरी। चीवरमस्याऽस्तीति। श्रमणः भिक्षुः बल्यः कचित् "वन्यः" इति। चैत्रः इति पञ्च **बौद्धभिक्षोः**। चेलुकः ॥२४॥ श्रामणेरः प्रव्रजितः महापासकः गोमी। गौः प्रभुरस्याऽस्तीति। कचित् "मेलिकः गोमिकः" इति पाठौ। इति पञ्च **भिक्षुशिष्यस्य श्रमणोद्देशस्य** ॥ हंसरथः। हंसो रथो यस्य। सः ब्रह्मा विरिञ्चः अष्टश्रवः। अष्टौ श्रवाः कर्णाः यस्य सः। सनत् ॥ २५ ॥ कञ्जः। कमित्यव्ययं तस्मिन् के पद्मे जातः। प्राणः वेदीशः। वेदीनाम् ईशः स्वामी। वेदगर्भः पुराणगीः "पुराणगः" अब्जजः। अब्जे पद्मे जायत इति। विश्वरेताः। विश्वं रेतो जन्यं यस्य सः। कमलः प्रपितामहः ॥ २६ ॥ नाभिजन्मा। नाभौ विष्णुनाभौ जायत इति। शतधृतिः इति षोड़श **ब्रह्मणः**। ब्राह्मी ब्रह्मकन्यका वाग्देवी शारदा शुक्ला महाश्वेता सरस्वती इति सप्त **सरस्वत्याः** ॥ २७ ॥ हरिः शतबिन्दुः। शतानि बिन्दवो यस्य सः। श्रीकरः श्रीवराहः अजितः परपुरुषः। पुरुषेषु परः उत्तमः। वा परः श्रेष्ठश्चाऽसौ पुरुषः। श्रीगर्भः। श्रीर्गर्भेऽस्य सः। षड्बिन्दुः। षट् बिन्दवो यस्य सः। अनन्तः नरकजित्। नरकं नरकासुरं जितवान्। ऋतधामा। ऋतं सत्यं धाम यस्य सः। केशवः जन्मकीलः क्रतुपुरुषः "ऋतुपुरुषः" नृसिंहः। ना चाऽसौ सिंहश्च वा ना सिंह इव शौर्य्यादिमत्त्वात्। श्रन्थजह्नुः। उच्चदेवः॥ २८॥ कोकः पुराणपुरुषः पुराणैरुपस्तुत्यः पुरुषः। नलिनेशयः। नलिने पद्मे शेते सः। वासुः नरायणः "नारायणः" पुनर्वसुः विश्वरूपः अः। "अः स्यादभावे स्वल्पार्थे विष्णावेष त्वनव्ययम्" इति विश्वः। श्रीनिवासः धरणीधरः वामनः एकशृङ्गः वृष्णिः वृषशत्रुः। वृषस्य कामस्य शत्रुः। दशावतारः॥ २९॥

सोमगर्भादिदेवादिवराहस्वर्णबिन्दवः ।
गदाग्रजो मुञ्जकेशी सदायोगी सनातनः ॥ ३० ॥
रन्तिदेवशिवकीर्तनौ त्रिपात्सोमसिन्धुरपि राहुमूर्धच्छित् ।
कालनेमियवनारिपाण्डवाभीलसिन्धुवृषकृष्णकेशिनः ॥ ३१ ॥
हेमशंखः शतावर्त्ती मनुसात्वतवारिशाः ।
वर्द्धमानः सतानन्दो जगन्नाथः सुयामुनः ॥ ३२ ॥
पूतनाधेनुकारिष्टकेशिचाणूरसूदनः ।
भूकश्यपस्त्वस्य पिता दुन्दुक्षित्यदितिः प्रसूः ॥ ३३ ॥
स्यन्दनस्तु शतानन्दः सारथिश्चास्य दारुकः ।
तुरङ्गाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ ३४ ॥
ध्वजो भुजङ्गहा मन्त्री पवनव्याधिरुद्धवः ।
शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥ ३५ ॥
बलभद्रस्तु हालः स्यात्सौनन्दी हलतालभृत् ।
संवर्तकी गुप्तचरो रुक्मिदार्य्येककुण्डलः ॥ ३६ ॥

सोमगर्भः । सोमस्य तदात्मकामृतरूपमोक्षस्य गर्भः स्थानं यस्य सः । आदिदेवः । आदौ दीव्यति स्वयं राजते सः । आदिवराहः । आद्यो वराहः तस्यादिवराहरूपत्वात् । स्वर्णबिन्दुः । स्वर्णवर्णाः बिन्दवो यस्य सः । गदाग्रजः मुञ्जकेशी सदायोगी सनातनः ॥ ३० ॥ रन्तिदेवः शिवकीर्तनः त्रिपाद् । त्रयः पादाः यस्य सः । सोमसिन्धुः राहुमूर्धच्छित् । राहोः सिंहिकासुतस्य मूर्धानं छिनत्ति सः । क्वचित् "राहुमूर्धभिद्" इति पाठः । कालनेमिः यवनारिः पाण्डवः आभीलः सिन्धुवृषः कृष्णः केशी ॥ ३१ ॥ हेमशङ्खः शतावर्ती मनुः "शतावर्त्यासन्द" इति क्वचित् पाठः । सात्वतः वारिशः । वारिणि समुद्रे शेते । वर्धमानः सतानन्दः जगन्नाथः सुयामुनः ॥ ३२ ॥ पूतनासूदनः धेनुकसूदनः अरिष्टसूदनः केशिसूदनः चाणूरसूदनः "चानूरसूदनः" । "द्वन्द्वात्परं श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते" इति न्यायात् परस्थितः सूदनशब्दः पूतनादिभिः शब्दैः पृथक्पृथक् सम्बन्धनीयः । न तु केवलैः पूतनादिशब्दैर्विष्णुनामावगम्यते । "केशिनिसूदनः" अप्यत्र । इति षट्षष्टि **विष्णोः** ॥ अस्येति प्रत्येकं सम्बध्यते । भूकश्यपः इत्येकं **विष्णोः पितुः** ॥ दुन्दुक्षिती अदितिः इति द्वे **विष्णोर्मातुः** ॥ ३३ ॥ शतानन्दः । शतमानन्दयति सः । इत्येकं **विष्णो रथस्य** ॥ दारुकः इत्येकं **विष्णोः सारथेः** ॥ शैब्यः सुग्रीवः मेघपुष्पः बलाहकः इति चत्वारि **विष्णोस्तुरङ्गाणाम्** ॥ ३४ ॥ भुजङ्गहा इत्येकं **विष्णोर्ध्वजस्य** । पवनव्याधिः पवनेन जनितो व्याधिर्यस्य सः । उद्धवः इति द्वे **विष्णोर्मन्त्रिणः** ॥ शैनेयः शिनेर्नप्ता युयुधानः सात्यकिः । सत्यकस्य वृष्णिवंश्यनृपस्याऽपत्यम् । इति चत्वारि **सात्यकेः** ॥ ३५ ॥ बलभद्रः

मधुप्रियोऽथ प्रद्युम्नो जराभीरुः शमातकः ।
प्रसूनाशनिपञ्चेषू कञ्जनो मधुसारथिः ।
रागरज्जुः कलाकेलिमधुदीपरवीषवः ॥ ३७ ॥
इः केतुर्मकराङ्कः सङ्कल्पभवोऽङ्गजश्च रूपास्त्रः ।
रणरणको रतिरमणः संसारगुरुर्मनोजन्मा ॥ ३८ ॥
कार्ष्णिश्चाऽस्य प्रिया रागलता केलिकला रतिः ।
सेः केलती चाऽस्य बाणा मोहनोन्मादनौ तथा ॥ ३९ ॥
सन्तापनः शोषणश्च निश्चेष्टीकरणोऽपि च ।
सुतोऽनिरुद्धः स्याद्विश्वकेतुः प्रीतितृषौ सुते ॥ ४० ॥
श्री च लक्ष्मी चला सा मा रमाजलधिजेऽन्दिरा ।
मणिः स्यमन्तको हस्ते विष्णोरुरसि कौस्तुभः ॥ ४१ ॥
तार्क्ष्यः शिलौकः कामायुररुणो वरजश्चिरात् ।
पक्षिसिंह उल्लूतीशो वज्रतुण्डः सुधाहरः ।
स्वर्णपक्षः सुमुखसूः शाल्मली भुजगाशनः ॥ ४२ ॥

हालः सौनन्दी हलभृत् तालभृत् संवर्तकी गुप्तचरः रुक्मिदारी एककुण्डलः ॥३६॥ मधुप्रियः इति दश **बलभद्रस्य** ॥ प्रद्युम्नः जराभीरुः शमातकः प्रसूनाशनिः "प्रसूनासमः" पञ्चेषुः कञ्जनः मधुसारथिः रागरज्जुः कलाकेलिः मधुदीपः रवीषुः ॥३७॥ इः केतुः "कन्तुः" मकरांकः सङ्कल्पभवः अङ्गजः रूपास्त्रः रणरणकः रतिरमणः । रत्याः रमणः पतिः । संसारगुरुः । संसारस्य गुरुर्महान् । मनोजन्मा । मनसि जायते सः । कार्ष्णिः इति द्वाविंशतिः **अनङ्गस्य** ॥ ३८ ॥ रागलता केलिकला रतिः "केलिकलावती" सेः केलती इति पञ्च **कामभार्यायाः** । मोहनः उन्मादनः ॥ ३९ ॥ सन्तापनः शोषणः निश्चेष्टीकरणः "निश्चेष्टाकरणः" इति पञ्च **कामबाणानाम्** ॥ तेषां पृथक्पृथक् एकैकस्य एकैकमेव नाम भवति । ते कतमा इति ? । "अरविन्दमशोकश्च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः" इति । अनिरुद्धः विश्वकेतुः द्वे **अनङ्गसुतस्य** ॥ प्रीतिः तृट् इति द्वे **अनंगसुतायाः** ॥ ४० ॥ श्रीः लक्ष्मीः[1] ई चला सा मा रमा जलधिजा इन्दिरा इति नव **लक्ष्म्याः** ॥ स्यमन्तकः इत्येकं **विष्णोर्हस्तमणेः** ॥ कौस्तुभः इत्येकं **विष्णोः उरोमणेः** ॥ ४१ ॥ तार्क्ष्यः शिलौकः कामायुः अरुणः वरजः चिरात् । चिरमतति । अतः क्विप् । पक्षिसिंह उल्लूतीशः "उन्नतीशः" वज्रतुण्डः । वज्रमिव तुण्डं मुखं यस्य सः । सुधाहरः स्वर्णपक्षः ।स्वर्णमिव पीतौ पक्षौ यस्य सः । सुमुखसूः शाल्मली भुजगाशनः । भुजगान् सर्पान् अश्नाति । इति चतुर्दश **गरुडस्य** ॥४२॥

---

१ श्रीलक्ष्मीशब्दौ 'कृदिकारादक्तिनः' इति ङीषन्तौ ।

शम्भुर्भगाली कपिशाञ्जनश्च हीरः कटप्रूर्भरुरेरिहाणौ ।
पुरारिपञ्चाननभैरवाट्टहासप्रहासाश्च खकुन्तलश्च ॥ ४३ ॥
कण्ठेकालजयन्तगुह्यगुरवो जोतिङ्गगोपालकौ
पिङ्गाक्षः कटमर्दरैवतजटाटङ्काव्ययाः कूटकृत् ।
चन्द्रापीडमहानटौ च शमिरो हः शैलधन्वा जटा-
चीरोऽथर्वणनन्दिवर्धनगुडाकेशाग्रकालञ्जराः ॥ ४४ ॥
मिहिराणो जगद्योनिष्टङ्कटीकोऽब्जवाहनः ।
कृतङ्करो वरो बुद्धः सुप्रतापोऽकुतश्चलः ॥ ४५ ॥
उः स्थाणुः शिपिविष्टश्च मः कीलो धर्मवाहनः ।
विरूपविषमत्र्यक्षाः सन्ध्यानटी वृषाञ्चनः ॥ ४६ ॥
एकपाद्भौतिको भद्रोर्ध्वरेताः पांशुचन्दनः ।
अस्थिमाली शिवश्चाऽस्य खट्वाङ्गस्तु सुखंघुणः ॥ ४७ ॥
अजगवोऽजगावश्च वृषो भृङ्गी रिटिस्त्वसौ ।
भृङ्गरिटः शलो भृङ्गी नाडीदेहोऽस्थिविग्रहः ॥ ४८ ॥
महाकालो महाभीमो महाकायो वृषाणकः ।
द्वाःस्थस्तु नन्दीशालङ्कायनस्ताण्डवतालिकाः ॥ ४९ ॥

शम्भुः भगाली कपिशाञ्जनः हीरः कटप्रूः भरुः रेरिहाणः पुरारिः पञ्चाननः भैरवः अट्टहासः प्रहासः खकुन्तलः ॥ ४३ ॥ कण्ठेकालः जयन्तः गुह्यः गुरुः जोतिङ्गः "जोटिङ्गः" गोपालकः पिङ्गाक्षः कटमर्दः रैवतः जटाटङ्कः अव्ययः । नास्ति व्यये विनाशे यस्य सः । कूटकृत् चन्द्रापीडः महानटः शमिरः "शशिधरः" हः शैलधन्वा जटाचीरः "जटाटीनः" अथर्वणः । नन्दिवर्द्धनः गुडाकेशः अग्रः कालञ्जरः ॥ ४४ ॥ मिहिराणः जगद्योनिः टङ्कटीकः "कङ्कटीकः" अब्जवाहनः कृतङ्करः "कृष्करः" वरः बुद्धः कचित् "वरबुद्धः वरवृद्धः" इति च पाठौ । सुप्रतापः " सुप्रसादः " अकुतश्चलः " अद्भुतस्वनः " ॥ ४५ ॥ उः स्थाणुः शिपिविष्टः मः कीलः धर्मवाहनः विरूपः विषमः त्र्यक्षः सन्ध्यानटी "सन्ध्यानाटी" वृषाञ्चनः ॥ ४६ ॥ एकपाद् । एकं पदं पदगतियोग्यकालो यस्य सः । भौतिकः भद्रः ऊर्ध्वरेताः पांशुचन्दनः अस्थिमाली शिवः इति त्रिषष्टिः **महादेवस्य** ॥ खट्वांगः सुखंघुणः । कचित् "सुखंखणः" इति पाठः । इति द्वे **शिवखट्वाङ्गस्य** ॥ ४७ ॥ अजगवः । अजगावः । कचित् "अजकवः अजकावः" इति पाठः । इति द्वे **शिवधनुषः** ॥ वृषः भृङ्गी इति द्वे **शिववृषभस्य** ॥ असौ, रिटिः भृङ्गरिटः "भृङ्गरिटिः" शलः भृङ्गी "भृङ्गिः" नाडीदेहः अस्थि-विग्रहः इति षट् **शिवपार्श्वानुचरस्य भृङ्गिणः** ॥ ४८ ॥ महाकालः महाभीमः महा-कायः वृषाणकः इति चत्वारि **नन्दिनः** ॥ नन्दी शालङ्कायनः ताण्डवतालिकः नन्दिकेश्वरः

स्यान्नन्दिकेश्वरोऽथाऽऽर्या हिण्डी शिखरवासिनी।
शक्तिः सिंहरथा गोला सिनीवाली दृषद्वती॥ ५०॥
सौः कृष्णपिङ्गला लम्बा शैलेयी गणनायिका।
वारालिकैकानंशा च शिवदूती यमस्वसा॥ ५१॥
कोटवी बाभ्रवी कैटभी कैटभा यादवी कर्बुरी चेश्वरी चेश्वरा।
भ्रामरी दक्षकन्या च बर्हिध्वजी नन्दपुत्री च मारी च कालञ्जरी॥
गौतमी तामसी षष्ठी जयन्ती शूलधृक् सती।
सिंहस्तस्या मनस्तालः सख्यौ च विजयाजये॥ ५३॥
वज्रशुण्डः करिमुखः पृष्णिशृङ्गो गणाग्रणीः।
त्रिधातुरेकदन्तश्च द्विदेहो मूषिकाञ्चनः॥ ५४॥
विघ्नहारी कुमारस्तु स्वामी द्वादशलोचनः।
बालचर्यः सिद्धसेनः कृकवाकुध्वजश्च सः॥ ५५॥
देवराजस्तु लः कौशिकोऽसँन्महा–
बाहुदन्तेयदँल्मीवराणोऽद्रिभित्।
वज्रपाणिर्महेन्द्रः सुरग्रामणी–
र्यामनेमिर्वृषा नाकनाथो हरिः॥ ५६॥
प्राचीनबर्हिः खदिरः कपिलाश्वो वरक्रतुः।
प्राचीपतिस्तपस्तङ्कः पुलोमाँरिश्च माहिरः॥ ५७॥

इति चत्वारि **शिवद्वारस्थस्य**॥ ४९॥ आर्या हिण्डी शिखरवासिनी शक्तिः सिंहरथा गोला सिनीवाली। सिनीं श्वेतां चन्द्रकलां वलति धारयति। दृषद्वती॥ ५०॥ सौः "सोः" कृष्णपिंगला लम्बा शैलेयी गणनायिका वारालिका एकानंशा शिवदूती यमस्वसा॥ ५१॥ कोटवी बाभ्रवी कैटभी कैटभा यादवी कर्बुरी ईश्वरी ईश्वरा भ्रामरी दक्षकन्या बर्हिध्वजी नन्दपुत्री मारी कालञ्जरी॥ ५२॥ गौतमी तामसी षष्ठी जयन्ती शूलधृक् सती इति सप्तत्रिंशत् **पार्वत्याः**॥ मनस्तालः इत्येकं **पार्वत्याः सिंहस्य**॥ विजया जया इति द्वे **पार्वत्याः सख्योः**॥ ५३॥ वज्रशुण्डः करिमुखः पृष्णिशृङ्गः गणाग्रणीः त्रिधातुः एकदन्तः। एको दन्तोऽस्य। द्विदेहः मूषिकाञ्चनः॥ ५४॥ विघ्नहारी इति नव **गणेशस्य**॥ कुमारः स्वामी द्वादशलोचनः बालचर्यः। बालानां चर्य्या यस्य सः। सिद्धसेनः कृकवाकुध्वजः इति षट् **कार्तिकेयस्य**॥ ५५॥ देवराजः लः कौशिकः असन् "असत्" इत्यपि पाठः। महाबाहुः दन्तेयः दल्मी "दाल्मी" वराणः अद्रिभित्। अद्रिं पर्व्वतं भिनन्ति वा अद्रेर्भित् यस्य सः। वज्रपाणिः महेन्द्रः सुरग्रामणीः यामनेमिः वृषा नाकनाथः हरिः॥ ५६॥ प्राचीनबर्हिः खदिरः कपिलाश्वः वरक्रतुः प्राचीपतिः तपः तङ्कः पुलोमारिः "पुलोमशत्रुः पुलोमरिपुः

पृतनाषाँड् प्रियात्वस्य चारुधारा शतावरी ।
शचीं सुता देवसेना मातलिस्तु हयङ्कषः ॥ ५८ ॥
उच्चैःश्रवाः श्वेतहयो वृषणाश्वोऽमरावती ।
वृषभासा सुरपुरी वनमैन्द्रं वृषण्वसु ॥ ५९ ॥
नन्दनं कन्दसारं स्यान्मिश्रकावनमित्यपि ।
हस्तिमल्लश्चतुर्दन्तो भद्ररेणुर्मदांवरः ॥ ६० ॥
श्वेतद्विपः सुदामाऽथ वज्रोऽस्त्री गिरिकण्टकः ।
वज्राशनिर्भिदुर्भिद्रो जम्भारिस्त्रिदशायुधम् ॥ ६१ ॥
शतधारं शतारं चाभ्रोत्थं भिदिरमम्बुजम् ।
मार्जारकर्णी चामुण्डा कर्णमोटिश्च चर्चिका ॥ ६२ ॥
विद्याधरः कामरूपी खेचरः स्थिरयौवनः ।
स्पर्शानन्दा रतिमदाऽप्सरसः सुमदात्मजा ॥ ६३ ॥
देवोद्यानानि वैभ्राजं मिश्रकं सिध्रकावणम् ।
चैत्ररथं च नासिक्यौ युजौ दस्रौ गदागदौ ॥ ६४ ॥
शुष्मँघासिघसँवोऽभ्रतिर्जुहूर्बाण ईषिरतुषग्रहाशिराः ।
छागवाहनपृँदाकुर्वर्हिषः स्वर्णसप्तघृतमन्त्रदीधितिः ॥ ६५ ॥

पुलोमवैरी" प्रभृतयोऽप्यत्र । माहिरः ॥ ५७ ॥ पृतनाषाड् । "पृतनासाट्" अप्यत्र । पृतनां सेनां साहयते । इति षड्विंशतिः **इन्द्रस्य** ॥ चारुधारा शतावरी शची "शचिः" इति त्रीणि **इन्द्रपत्न्याः** ॥ देवसेना इत्येकम् **इन्द्रसुतायाः** ॥ मातलिः इत्येकं **हयङ्कषस्य इन्द्रसारथेः** ॥ ५८ ॥ उच्चैःश्रवाः । उच्चैरुन्नतं श्रवोऽस्य । श्वेतहयः वृषणाश्वः इति त्रीणि **इन्द्राश्वस्य** ॥ अमरावती वृषभासा सुरपुरी इति त्रीणि **इन्द्रपुरस्य** ॥ वृषण्वसु ॥ ५९ ॥ नन्दनं कन्दसारं मिश्रकावनम् इति चत्वारि **इन्द्रवनस्य** ॥ हस्तिमल्लः चतुर्दन्तः भद्ररेणुः मदांवरः ॥ ६० ॥ श्वेतद्विपः सुदामा इति षट् **ऐरावतस्य** ॥ वज्रः गिरिकण्टकः वज्राशनिः भिदुः भिद्रः जम्भारिः "जम्भावी" त्रिदशायुधम् ॥ ६१ ॥ शतधारम् शतारम् अभ्रोत्थं भिदिरम् अम्बुजम् इति द्वादश **वज्रायुधस्य** ॥ मार्जारकर्णी चामुण्डा कर्णमोटिः क्वचित् "कर्ममोटिः" चर्चिका । इति चत्वारि **चामुण्डायाः** ॥ ६२ ॥ विद्याधरः कामरूपी खेचरः स्थिरयौवनः इति चत्वारि **विद्याधरस्य** ॥ स्पर्शानन्दा रतिमदा अप्सरसः सुमदात्मजा "सुदमात्मजा" इति चत्वारि **अप्सरसः** ॥ ६३ ॥ वैभ्राजं मिश्रकं सिध्रकावणम् । सिध्रकप्रधानं वनम् । णत्वं दीर्घश्च । **चैत्ररथम्** इति चत्वारि **दिव्योद्यानानाम्** ॥ एकैकमेकैकस्य । नासिक्यौ युजौ दस्रौ गदागदौ इति चत्वारि **अश्विनीकुमारयोः स्वर्वैद्ययोः** ॥ ६४ ॥ शुष्म "शुष्मा" अप्यत्र । घासिघसवः "घासिसघयः" अभ्रतिः । "अङ्गतिः" अप्यत्र । जुहूः बाणः ईषिः अतुषः ग्रहः अशिरः

पर्परीकहवनात्मनिपीथाः सप्तजिह्वसमिधावसितार्चिः।
नाचिकेतभुजिभारतविश्वप्साः शुचिः पचिसमन्तभुजो च॥६६॥
वडवाग्निस्तु सलिलेन्धनः स्याद्वडवामुखम्।
काकध्वजो वाणिजश्च स्कन्धाग्निः स्थूलकाष्ठधृक्॥ ६७॥
छागणस्तु करीषाग्निस्तृणाग्निः स्यात्तरत्समः।
तुषानलः कुकूलः स्यान्मुर्मुरोऽथाग्निकुक्कुटः॥ ६८॥
सङ्किलो दहनोल्का स्यादङ्गारः कोकिलाज्झुलौ।
धूमोऽम्भसूर्मरुद्वाहखतमालशिखिध्वजाः॥ ६९॥
अग्निवाहस्तरीः स्वाहा त्वऽग्नायी दहनप्रिया॥
जीवितेशो यमः शीर्णपादश्च महिषध्वजः॥ ७०॥
मन्दोऽस्य कान्ता धूमोर्णा चित्रगुप्तस्तु लेखकः।
भृत्यौ चण्डमहाचण्डौ कालीमी तु विचारभूः॥ ७१॥
पञ्जिका त्वग्रसन्धानी नृचक्षास्तु खसात्मजः।
कीलालपः पलाशी च क्षपाटो नरविश्वणः॥ ७२॥

छागवाहनः पृदाकुबर्हिषः, "सृदाकुबर्हिषः" स्वर्णभासो दीधितिशब्दः स्वर्णादिभिः शब्दैर्योज्यः। यथा—स्वर्णदीधितिः सप्तदीधितिः घृतदीधितिः मन्त्रदीधितिः॥ ६५॥ पर्परीकः हवनम् आत्मा निपीथः सप्तजिह्वः समिधः असितार्चिः। "असितकार्चिः" अप्यत्र। नाचिकेतभुजिः। "नाचिकेताः" अप्यत्र। भारतः विश्वप्सः। विश्वं प्साति भक्षति सः। शुचिः पचिः समन्तभुक्। समन्तात् भुंक्ते सः। इति अष्टाविंशतिः **अग्नेः**॥ ६६॥ वडवाग्निः। वडवायाः शिवसृष्टाश्वाया मुखस्थोऽग्निः। वडवानलादयोऽप्यत्र। सलिलेन्धनः वडवामुखम् काकध्वजः वाणिजः स्कन्धाग्निः स्थूलकाष्ठधक् "तृणकाष्ठधृक्" इति सप्त **वडवानलस्य**॥ ६७॥ छागणः करीषाग्निः इति द्वे **करीषाग्नेः**॥ तृणाग्निः तरत्समः "वत्सलः" इति द्वे **तृणाग्नेः**॥ तुषानलः कुकूलः मुर्मुरः इति त्रीणि **तुषानलस्य**॥ अग्निकुक्कुटः। अग्नेः कुक्कुट इव रक्तवर्णस्फुलिङ्गत्वात् ज्वलदग्निव्याप्ततृणपुञ्जः॥ ६८॥ सङ्किलः दहनोल्का। दहनस्य उल्का पतत्तेजःपुञ्जः। इति त्रीणि **अग्निकणायाः**॥ अङ्गारः कोकिलः अज्झुलः इति त्रीणि **अङ्गारस्य**॥ धूमः अम्भसूः मरुद्वाहः खतमालः शिखिध्वजः॥ ६९॥ अग्निवाहः तरीः "स्तरी" इति सप्त **धूमस्य**॥ स्वाहा अग्नायी दहनप्रिया इति त्रयः **अग्नियोषितः**॥७०॥ जीवितेशः यमः शीर्णपादः महिषध्वजः मन्दः इति पञ्च **यमस्य**॥ धूमोर्णा इत्येकं **यमपत्न्याः**॥ चित्रगुप्तः इत्येकं **यमलेखकस्य**॥ चण्डः महाचण्डः इति द्वे **यमभृत्ययोः**॥ कालीमी। "कालीची" इति क्वचित्पाठः। इत्येकं **विचारभुवः**॥॥ ७१॥ पञ्जिका अग्रसन्धानी इति द्वे **यमपाञ्जिकायाः**॥ यया तु प्राणिवर्गस्य प्राग्भवीयकर्मानुसारेण शुभा-

सन्ध्याबलो रात्रिमठो हनूषः शमनीषदः ।
पलाशो विखुरः शंकुः कापीशेयस्तु पिण्डकः ॥ ७३ ॥
पिशाचो मेघनादस्तु वरुणो वः परञ्जयः ।
दैत्यदेवश्च वातिस्तु नभःप्राणो जगद्वलः ॥ ७४ ॥
भोगिकान्तः कम्पलक्ष्मायश्च धारावलिश्च वाः ।
खश्वासः क्षिपणुर्धूलिध्वजः सरयुरङ्कतिः ॥ ७५ ॥
वातुलो वातगुल्मः स्याच्चरवायुर्निदाघजः ।
झञ्झानिलः प्रावृषिजो वासन्तो मलयानिलः ॥ ७६ ॥
श्रीदधनकेलिमयुराट्श्वेतोदररत्नगर्भनिधिनाथाः ।
कुतनुकुहेच्छावसवः पिशाचकी सत्यसङ्गरस्त्रिशिराः ॥ ७७ ॥
अस्त्री पद्मो महापद्मः शंखो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वाः स्युर्निधयो नव ॥ ७८ ॥
सुतोऽस्य मायुराजः स्यात्तथा वर्णकविर्निधी ।
आसङ्गिनी च वाताली स्याद्वात्या वातमण्डली ॥ ७९ ॥

इति स्वर्गवर्गः ॥ १ ॥

शुभसूचनं सर्वं लिख्यते, सा यमपञ्जिका । केचित् यमपट्टिकेति वदन्ति । नृचक्षाः । नॄन् चष्टे पश्यति भक्ष्यत्वेन । खसात्मजः कीलालपः पलाशी क्षपाटः नरविश्वणः ॥ ७२ ॥ सन्ध्यावलः रात्रिमठः हनूषः शमनीषदः पलाशः विखुरः शंकुः इति त्रयोदश **यमदूतस्य राक्षसस्य**॥ कापीशेयः पिण्डकः "पिङ्गकः" ॥ ७३ ॥ पिशाचः इति त्रीणि **पिशाचस्य** ॥ मेघनादः **मेघस्येव नादो यस्य सः** । वरुणः वः परञ्जयः दैत्यदेवः इति पञ्च **वरुणस्य** ॥ वातिः नभः-प्राणः जगद्वलः ॥ ७४ ॥ भोगिकान्तः कम्पलक्ष्मा यः धारावलिः "धारावनिः" वाः खश्वासः क्षिपणुः धूलिध्वजः सरयुः अङ्कतिः । अञ्चतिरप्यत्र । इति त्रयोदश **वायोः** ॥ ७५ ॥ वातुलः वातगुल्मः इति द्वे **वातगुल्मस्य** ॥ चरवायुः इत्येकं **निदाघवायोः** ॥ झञ्झानिलः इत्येकं **प्रावृड्वायोः** ॥ मलयानिलः इत्येकं **वसन्तकालभववायोः** ॥ ७६ ॥ श्रीदः धनकेलिः मयुराट् "मनुराट्" श्वेतोदरः रत्नगर्भः निधिनाथः कुतनुः कुहेच्छः आवसुः पिशाचकी सत्यसङ्गरः त्रिशिराः इति द्वादश **कुबेरस्य** ॥ ७७ ॥ पद्मः महापद्मः शङ्खः मकरः कच्छपः मुकुन्दः कुन्दः नीलः खर्वाः । कचित्तु "चर्चा" इति पाठान्तरम् । इति प्रत्येकमेकैकं **नवानां महानिधीनाम्** ॥ ७८ ॥ मायुराजः वर्णकः विर्निधः इति त्रीणि **कुबेरसूनोः** ॥ आसङ्गिनी वाताली वात्या वातमण्डली इति चत्वारि **वातभ्रमस्य** ॥७९॥ इति स्वर्गवर्गः ॥१॥

कुनाभिः स्याद्विहायस्तु खं मरुन्मेघवर्त्म च ।
अक्षरं चा [इति व्योमवर्गः२] थ पाथोदः खतमालो गदाम्बरः१
मदयित्नुर्वायुदारुर्व्योमधूमो नभोगजः ।
गडेरः कन्धरो वातरथो वारिमसिः स्त्रियाम् ॥ २ ॥
करका स्याद्धनकफो बीजोदकमिराचरम् ।
मेघास्थिवर्षणन्तु स्याद्गोघृतञ्च परामृतम् ॥
सौदाम्नी त्वशनिर्विद्युदणुभा वाऽचिरद्युतिः ॥ ३ ॥
तिथिप्रणीर्दर्शविपन्निशामणिस्त्रिनेत्रचूडामणिरत्रिनेत्रभूः ।
सुधाङ्गमौ द्वौ मृगपिप्लुपक्षजौ दशाश्वसिप्रग्रहनेमिचन्दिराः॥४॥
छायामृगधरो राजा माः परिज्ञो बलक्षगुः ।
द्विजो दाक्षायणी तुङ्गी रोहिणी यज्वनाम्पतिः ॥ ५ ॥
उडुपः पर्वधिः क्लेदो जयन्तस्तपसो हरिः ।
तारापीडः खचमसो विकसः सिन्धुनन्दनः ॥ ६ ॥

कुनाभिः विहायः "विहायसम्" खं मरुत् मेघवर्त्म । मेघस्य वर्त्म मार्गो यस्मिन् । अक्षरम् । नास्ति क्षरो नश्वरं यस्य । इति षट् **आकाशस्य** ॥ इति व्योमवर्गः ॥ २ ॥ पाथोदः खतमालः । खे तमाल इव सः । गदाम्बरः॥१॥मदयित्नुः वायुदारुः व्योमधूमः।व्योम्नः धूम इव नीलभावात् । नभोगजः । नभसि गज इव । गडेरः "गाडवः" कन्धरः । कं जलं धारयति । वातरथः। वातस्य रथः । वारिमसिः । वारि जलं मसिरिव नीलतापादकं यस्य । इत्येकादश **मेघस्य** ॥ २ ॥ करका "करकः" । स्त्रियां गौरादित्वात् ङीप् । "करकी" घनकफः । घनस्य मेघस्य कफ इव । "घनककः" बीजोदकम् इराचरम् । इरासु चरति "इराचरम्" मेघास्थि । मेघानामस्थीव संहतकठिनत्वात् । इति पञ्च **वर्षोपलस्य**॥ वर्षणं गोघृतं परामृतम् इति त्रीणि **वृष्टेः** ॥ सौदाम्नी "सौदामनी" "सौदामिनी" । सुदामा पर्वतभेदस्तेनैका दिक् तत्प्रान्तभवत्वात् । अशनिः विद्युत् अणुभा । अण्वी सूक्ष्माभा दीप्तिर्यस्याः । वा अचिरद्युतिः । अचिरा बहुकालास्थायिनी द्युतिर्यस्याः । इति षट् **विद्युतः** ॥ ३ ॥ तिथिप्रणीः । तिथीन् प्रणयति स्वगत्या निष्पादयति । दर्शविपत् "दर्शवियत्" निशामणिः त्रिनेत्रचूडामणिः अत्रिनेत्रभूः सुधाङ्गः । सुधेवाप्यायनमङ्गमस्य । **मः** मृगपिप्लुः । मृगः शशः पिप्लुः कृष्णचिह्नं यस्य । 'मृगपिप्रुः' पक्षजः दशाश्वः दश अश्वा रथे यस्य । सिप्रः ग्रहनेमिः प्रहणेमिः" चन्दिरः ॥ ४ ॥ छायाधरः छायाभृदादयोऽप्यत्र । मृगधरः । शशभृदादयोऽप्यत्र । राजामाः परिज्ञः बलक्षगुः । बलक्षाः शुक्लवर्णाः गावः रश्मयः यस्य सः । द्विजपतिः दाक्षायणीपतिः तुङ्गीपतिः रोहिणीपतिः यज्वनाम्पतिः ॥ ५ ॥ उडुपः "उडूपः" । उडूनि नक्षत्राणि पाति । पर्वधिः "पर्वरिः" क्लेदः "क्लेदुः" जयन्तः तपसः हरिः तारापीडः । तारापीडमिव यस्य ।

चन्द्रिका चन्द्रशाला स्यान्नीहारः खनिशाजलम् ।
शीतं तु शीतलं पत्रहिमं तु हिमदुर्दिनम् ॥ ७ ॥
कुज्झुटिर्धूममहिषी रतांध्री च कुहेलिका ।
धूमिका च नभोरेणुरथाऽगस्त्याग्निमारुती ॥ ८ ॥
सत्याग्निर्वारुणिर्विन्ध्यकूटो वातापिसूदनः ।
दीप्ताग्निरौर्वशेयश्च समुद्रचुलुकोऽस्य तु ॥ ९ ॥
प्रियो कौषीतकी लोपामुद्राख्या च विदर्भजा ।
प्राक्फाल्गुनेयस्तूऽतथ्यानुजः पारुष्यगोरथौ ॥ १० ॥
दीदिविर्द्वादशकरश्चक्षाः सुरगुरुर्गुरुः ।
शुक्रो भः शतपर्वेशो मघाभूर्भृगुरास्फुजित ॥ ११ ॥
षोडशार्चिर्नवार्चिस्तु मङ्गलः खोल्मुकः कुजः ।
बुधो हेमा राजपुत्र एकदेहः प्रहर्षणः ॥ १२ ॥
स्यात्पञ्चार्चिः श्रविष्ठाजः श्यामाङ्गैकाङ्गरोधनाः ।
शनैश्चरो नीलवासा मन्दश्छायात्मजः शनिः ॥ १३ ॥

खचमसः । खे आकाशे चमसः पात्रविशेष इव । विकसः "विकुसः" सिन्धुनन्दनः । सिन्धोः सागरस्य नन्दनः सुतः । इति चतुस्त्रिंशत् **चन्द्रस्य** ॥ ६ ॥ चन्द्रिका । चन्द्रः स्वाश्रयत्वेनास्यास्तीति । चन्द्रशाला । चन्द्रः शालेवाधारो यस्याः । इति द्वे **चन्द्रकिरणस्य** ॥ नीहारः खनिशाजलम् इति द्वे **हिमस्य** ॥ शीतं शीतलम् इति द्वे **शीतलस्य** ॥ पत्रहिमं हिमदुर्दिनम् इति द्वे **हिमदुर्दिनस्य** ॥ ७ ॥ कुज्झुटिः "कुज्झुटी" धूममहिषी रतांध्री "रतार्था" कुहेलिका "कुहोधिका" धूमिका नभोरेणुः इति षट् **कुहेलिकायाः** ॥ अगस्त्याग्निः मारुतिः ॥ ८ ॥ सत्याग्निः वारुणिः । वरुणस्याऽपत्यम् । विन्ध्यकूटः वातापिसूदनः । वातापिं सूदयति हिनस्ति । दीप्ताग्निः । दीप्तः अग्निर्जठरानलो यस्य । और्वशेयः समुद्रचुलुकः । समुद्रः चुलुकः गण्डूषमितजलमिव अनायासेन पीतत्वाद्यस्य । इति नव **अगस्तिमुनेः** ॥ ९ ॥ कौषीतकी "कौशीतकी" लोपामुद्रा विदर्भजा । विदर्भे कुण्डिननगरे जायते । इति त्रीणि **अगस्तिमुनिपत्न्याः** ॥ प्राक्फाल्गुनेयः उतथ्यानुजः । अतथ्यावरजादयोऽप्यत्र । पारुष्यः गोरथः "गोरथः" ॥ १० ॥ दीदिविः द्वादशकरः । द्वादश कराः हस्ताः यस्य । चक्षाः सुरगुरुः गुरुः इति नव **बृहस्पतेः** ॥ शुक्रः भः शतपर्वेशः मघाभूः भृगुः आस्फुजित् ॥ ११ ॥ षोडशार्चिः इति सप्त **शुक्रस्य** ॥ नवार्चिः मङ्गलः खोल्मुकः कुजः इति चत्वारि **कुजस्य** ॥ बुधः हेमा राजपुत्रः । राज्ञश्चन्द्रस्य पुत्रः । एकदेहः प्रहर्षणः । "प्रहर्षुलः" अप्यत्र ॥ १२ ॥ पञ्चार्चिः । श्रविष्ठाजः श्रविष्ठानक्षत्रे जायते । श्यामाङ्गः । श्यामं हरिद्वर्णमङ्गमस्य । एकाङ्गः "एकान्धः" रोधनः इति दश **बुधस्य** ॥ शनैश्चरः नीलवासाः

राहुस्तु ग्रहकल्लोलोऽभ्रपिशाचोऽप्यथाऽहिकः ।
केतुर्ज्योतिरथस्तु स्याद्ग्रहाधारो ध्रुवश्च सः ॥ १४ ॥
तत्क्षणं सूर्य्यमुक्तादिग्बुधैरङ्गारिणी स्मृता ।
आसन्नास्तमया धीरैरुच्यते सोपधूपिता ॥ १५ ॥
सुनीतिर्ध्रुवमाता स्यान्माता दक्षस्य मारिषा ।
छायापथो देवपथः सोमधारा नभःसरित् ॥ १६ ॥
दिनप्रणीस्त्ववऽव्यधिषौ भानेमिरवरव्रतः ।
गभस्तिहस्तोंऽशुधरः खरांशुर्भा रविर्भगः ॥
वेदोदयः प्रतिदिवा मातुः पितुस्तमोपहः ॥ १७ ॥
दिनमणिहरिहेलिब्रंध्नभाकोषभाभृ-
दरथिखगपतङ्गेनाद्रयः सप्तसप्तिः ।
मिहिरमहिरपीथाः कालकृत्पद्मपाणिः
खमणिररुणशूरावंशुमानंशुमाली ॥ १८ ॥
छाया स्यात्तपती मन्दजननी भूमयी वरी ।
संज्ञा तु यमकालिन्दीरेवन्तमनुदस्रसूः ॥ १९ ॥

मन्दः छायात्मजः । छायायाः सूर्य्यभार्यायाः आत्मजः पुत्रः । शनिः इति पञ्च **शनैश्चरस्य** ॥ १३ ॥ राहुः ग्रहकल्लोलः । ग्रहाणां ग्रहेषु वा कल्लोलः महातरङ्गः । अभ्रपिशाचः इति त्रीणि **राहोः** ॥ आहिकः केतुः इति द्वे **केतोः**॥ ज्योतिरथः "ज्योतीरथः" ज्योतीनां नक्षत्राणां रथः।ग्रहाधारः ध्रुवः इति त्रीणि **ध्रुवस्य**॥१४॥अङ्गारिणी इत्येका **तत्क्षणसूर्यत्यक्तदिशायाः**॥बुधैः पण्डितैः स्मृतेत्यर्थः।उपधूपिता इत्येकं **निकटसूर्यास्तमयदिशायाः**॥ धीरैः उच्यते कथ्यत इत्यर्थः ॥ १५ ॥ सुनीतिः । सुष्ठु नीतिर्यस्याः । इत्येकं **ध्रुवमातुः** ॥ मारिषा इत्येकं **दक्षमातुः** ॥ छायापथः देवपथः । देवैरर्चिरादिभिरातिवाहिकैरुपलक्षितः पन्थाः । सोमधारा नभःसरित् इति चत्वारि **देवपथस्य** ॥ १६ ॥ दिनप्रणीः अविः अधिषः "अधिपः" क्वचित् "अव्यतिषः" भानेमिः अवरव्रतः गभस्तिहस्तः । गभस्तयो हस्ता इव जलाकर्षकत्वात् यस्य । अंशुधरः खरांशुः । खराः कठिनाः अंशवः किरणाः यस्य । भाः रविः भगः वेदोदयः । वेदस्य ज्ञानस्य उदयः वृद्धिर्येन सः । क्वचित्तु "वेदादयः" । प्रतिदिवा मातुः पितुः तमोपहः । तमोऽन्धकारमज्ञानं वा अपहन्ति ॥ १७ ॥ दिनमणिः हरिः हेलिः ब्रध्नः "ब्रन्धः" भाकोषः भाभृत् "भानुः"अरथिः "उदरथिः" खगः पतङ्गः । पतन् सन् गच्छति । इनः अद्रिः सप्तसप्तिः । सप्त सप्तयो अश्वा यस्य । मिहिरः महिरः पीथः कालकृत् पद्मपाणिः । पद्मं पाणौ यस्य । खमणिः । खे आकाशे मणिरिव । अरुणः शूरः सूरोऽप्यत्र । अंशुमान् अंशुमाली इत्यष्टत्रिंशत् **सूर्यस्य** ॥१८॥ छाया तपती मन्दजननी भूमयी वरी इति पञ्च **छायाना-**

त्रसरेणुर्महावीर्या स्वातिः सूर्या सुवर्चला ।
सुरेणुर्द्युमयी त्वाष्ट्री प्रिये चेते विवस्वतः ॥ २० ॥
अश्मनो रमणोऽनूरुर्जटायुस्त्वरुणात्मजः ।

इति दिग्वर्गः ॥ ३ ॥

कालस्त्वपष्टुर्जहको भवन्तो भसदित्यपि ॥ २१ ॥
पीथः पीयुस्तिथश्चाऽथ वास्रो व्युष्टांशके दिनम् ।
उषा प्रभातं गोसर्गः सायोऽत्सूरौ विकालके ॥ २२ ॥
रात्री रक्षोजननी निषत्वरी चक्रभेदनी घोरा ।
श्यामा याम्या दोषा तुङ्गी भौती शताक्षी च ॥ २३ ॥
वासुरोषा निशाख्या च वासतेयी तमस्विनी ।
यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा ॥ २४ ॥
निःसम्पातोऽर्धरात्रः स्यात्सर्वावसर इत्यपि ।
उच्चन्द्रापररात्रौ द्वौ दर्शोऽमाऽमावसी च सा ॥ २५ ॥

म्न्याः **सूर्यपत्न्याः शनिमातुश्च** ॥ संज्ञा । अत्र सूः शब्दो यमादिभिः शब्दैर्योज्यः । यथा—यमसूः कालिन्दीसूः रेवन्तसूः मनुसूः दस्रसूः॥१९॥त्रसरेणुः महावीर्य्या स्वातिः सूर्य्या सुवर्चला सुरेणः "स्वरणुः" द्युमयी "द्युः मही" त्वाष्ट्री इति चतुर्दश **संज्ञानाम्न्याः सूर्यपत्न्याः यममातुश्च**॥ एते छाया संज्ञेति द्वे विवस्वतः सूर्यस्य प्रिये भार्ये अभूताम् इति वचनात् सूर्यस्य द्वे पत्न्यौ स्याताम् । एका मन्दमाता छायानाम्नी।एका यममाता संज्ञानाम्नी च भवति ॥२०॥ अश्मनः रमणः अनूरुः। न स्तः ऊरू यस्य।इति त्रीणि **सूर्यसारथेः अरुणस्य**।।जटायुः "जटायुस्" इति क्वचित् सान्तः। जटं संहतमायुरस्य । अरुणात्मजः इति द्वे **अरुणसूनोः**।। इति दिग्वर्गः ॥३॥ कालः अपष्टुः जहकः भवन्तः "भसन्तः" भसत् ॥२१॥ पीथः पीयुः तिथः इत्यष्टौ **कालस्य** ॥ वासः व्युष्टम् अंशकं दिनम् इति चत्वारि **दिवसस्य**॥उषा "ऊषः" "उषः" प्रभातम् इति द्वे **प्रभातस्य** ॥ गोसर्गः सायः उत्सूरः "अस्तवः" इति त्रीणि **विकालस्य** ॥ २२ ॥ रात्री "रात्रिः" रक्षोजननी निषत्वरी "सत्वरी" चक्रभेदनी । चक्रौ भिनत्ति परस्परं वियोजयति । घोरा श्यामा याम्या दोषा तुंगी भौती शताक्षी । शतमक्षिणीव पुष्पाण्यस्याः ॥ २३ ॥ वासुरा उषा निशा क्वचित् "वास्तवोषा निशाख्या च" इति पाठः । वासतेयी । वसतेर्हिता । तमस्विनी । तमस् अस्ति । "तमा निशा" इति क्वचित् पाठः । इति षोडश **रात्रेः** ॥ श्वनिशं श्वनिशा इति द्वे **कुक्कुरमादकरात्रेः** ॥ यस्यां निशि रात्रौ श्वानः कुक्कुराः मत्ताः मदयुक्ताः भवन्तीत्यत्रान्वयः । सा रात्री चेत्यत्र व्यतिरेकस्यार्थः ॥ २४ ॥ निःसम्पातः । निर्गतः सम्पातो गतागतं यस्मात् । अर्धरात्रः "धर्मरात्रः" सर्वावसरः इति त्रीणि **अर्धरात्रेः**॥ उच्चन्द्रः । उच्छिष्टः स्वल्पावशिष्टश्चन्द्रो यत्र । अपररात्रः । अपरं रात्रेः । इति द्वे **रात्रिशेषस्य**॥

भूता कृष्णचतुर्दश्यां पौर्णम्यां धर्मवासरः।
शक्रोत्सवो ध्वजोत्थानं शारदी द्यूतपूर्णिमा ॥ २६ ॥
कोजागरः शरत्पर्व कौमुदीचारमस्त्रियाम्।
यक्षरात्रिस्तु दीपाली चैत्रावल्यां मधूत्सवः ॥ २७ ॥
सुवसन्तः काममहो वासन्ती कर्दमी स्त्रियौ।
आमस्तु मासो वर्षांशो वत्सरस्तु युगांशकः ॥ २८ ॥
ऋतुवृत्तिर्मासमालः स्यात्कालग्रन्थिरुर्वटः।
कालप्रभातं शरदा प्रावृषा तु जलार्णवः ॥ २९ ॥
कौमुदः कार्तिको मासः फाल्गुनालस्तु फाल्गुनः।
ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वजम् ॥ ३० ॥
कृतं सत्ययुगं त्रेताऽग्नायी द्वापरयज्ञियौ।
कलिर्झर्झरकः कर्मयुगं पापं तु पातकम् ॥ ३१ ॥
शल्यं तूस्तं च कल्कोऽथ भद्रं भल्लं शिवं तथा।
शं शुभं चाव्यये प्राणी सत्त्वो रूपं चतुष्पदः ॥ ३२ ॥

दर्शः। दृश्यते शास्त्रे चन्द्रार्कसङ्गमो यत्र। अमा। न माति चन्द्रस्य सर्वकलाव्यापकतया स्थिता सूर्य्यकिरणसम्पर्कादृदीप्ता कला। अमावसी। अमा सह वसतश्चन्द्रार्कौ यत्र। "अमावासी" इति त्रीणि **अमावस्याः** ॥ २९ ॥ भूता "भूतः" इत्येकं **कृष्णचतुर्दश्याः** ॥ धर्मवासरः। धर्मार्थं वासरः। इत्येकं **पौर्णमास्याः** ॥ शक्रोत्सवः। शक्रस्य तद्ध्वजस्य उत्सवः ध्वजोत्थानं। ध्वजस्य शक्रध्वजस्य उत्थानम् इति द्वे **शक्रध्वजोत्थानमङ्गलस्य** ॥ शारदी द्यूतपूर्णिमा ॥ २६ ॥ कोजागरः। को जागर्त्तीति वदत्यस्मिन्। पृषोदरादित्वात् साधुः। शरत्पर्व कौमुदीचारम् इति पञ्च **कोजागरपूर्णिमानिमित्तोत्सवस्य** ॥ वा **आश्विनपौर्णमास्याः** ॥ यक्षरात्रिः दीपाली इति द्वे **कार्तिकपूर्णिमारात्रेः** ॥ मधूत्सवः ॥ २७ ॥ सुवसन्तः काममहः वासन्ती कर्दमी "कूर्दमा" इमौ शब्दौ स्त्रीलिङ्गे स्याताम् इति पञ्च **चैत्रपौर्णमास्याः** ॥ आमः मासः वर्षांशः वर्षस्य अंशः भागः। इति त्रीणि **मासस्य** ॥ वत्सरः युगांशकः ॥ २८ ॥ ऋतुवृत्तिः। ऋतूनां वृत्तिः पर्यायेणावर्तना यत्र। मासमालः "मासमानः" कालग्रन्थिः उर्वटः "उर्बटः" इति षट् **वर्षस्य** ॥ कालप्रभातं शरदा इति द्वे **शरदृतोः** ॥ प्रावृषा "प्रावृट्" जलार्णवः इति द्वे **वर्षर्तोः** ॥ २९ ॥ कौमुदः कार्तिकः इति द्वे **कार्तिकस्य** ॥ फाल्गुनालः फाल्गुनः इति द्वे **फाल्गुनस्य** ॥ ज्येष्ठामूलीयम् आषाढपूर्वजम् इति द्वे **ज्येष्ठमासस्य** ॥ इच्छन्ति सुधिय इति शेषः ॥ ३० ॥ कृतं सत्ययुगम् इति द्वे **कृतयुगस्य** ॥ त्रेता अग्नायी इति द्वे **त्रेतायुगस्य** ॥ द्वापरः यज्ञियः इति द्वे **द्वापरयुगस्य** ॥ कलिः झर्झरकः कर्मयुगम् इति त्रीणि **कलियुगस्य** ॥ पापं पातकं ॥ ३१ ॥ शल्यम् ऊस्तं कल्कः इति पञ्च **पापस्य** ॥

अथात्मा कर्मभुग्देही जीवः पुरुषपुद्गलौ ।
अन्तर्यामीश्वरश्चान्तःकरणं तु मनो निगु ॥ ३३ ॥
इति कालवर्गः ॥ ४ ॥

बुद्धिः पण्डा विदा चार्वी विचारस्तर्कनिश्चयौ ।
गुञ्जा चर्चाऽथ सिद्धान्तोत्तरपक्षसमाधयः ।
कृतान्तः पूर्वपक्षस्तु चोद्यं गीर्भणितिर्गिरा ॥ १ ॥
वाचा छन्दस्तु निगमः साम्न्युक्थं स्वरपत्तनम् ।
ब्रह्माक्षरं स्यादोंकारः प्रश्नदूती प्रहेलिका ॥ २ ॥
संज्ञाऽधिवचनं सद्यःकृतं लक्षणनामनी ।
व्यपदेशः प्रसिद्धस्तु टङ्कारोऽथ नवः स्तवः ॥ ३ ॥
इति धीवर्गः ॥ ५ ॥

शब्दाभिलापौ त्वभिधाऽभिधानं वाचको ध्वनिः ।
ह्रासः कुहरितश्चाऽथ मन्मनो गद्गदध्वनौ ॥ १ ॥
तूरं तु तूर्यं स्यात्ताड्यमानास्तु पटहादयः ।
कर्वदिः करताली स्याद्धनिनाला तु काहला ॥ २ ॥

भद्रं भल्लं "भन्दं"।शिवं शं शुभम् इति पञ्च शुभस्य॥शं शुभं इति द्वयंअव्यये च भवति प्राणी सत्त्वः रूपं चतुष्पदः इति चत्वारि **प्राणिमात्रस्य**॥३२॥कर्मभुक् देही जीवः पुरुषःपुद्गलः "पुंगलः" पुंगलतीति वा पुत् कुत्सितं गलो यस्मात्। अन्तर्यामी ईश्वरः इत्यष्टौ **आत्मनः**॥ अन्तःकरणं मनः निगु इति त्रीणि **मनसः** ॥३३॥ इति कालवर्गः ॥४॥ बुद्धिः पण्डा विदा चार्वी इति चत्वारि **बुद्धेः**॥ विचारः तर्कः निश्चयः "निर्णयः" गुञ्जा चर्चा इति पञ्च **विचारस्य** ॥ सिद्धान्तः। सिद्धं निश्चितोऽन्तो यस्मात् । उत्तरपक्षः उत्तरमुत्तीर्यमानं पक्षो यस्य । वादे पूर्वपक्षस्य मर्दनक्षमः । समाधिः कृतान्तः।कृतः अन्तो विपर्ययनाशो निश्चयो विषयपरिच्छेदो वा येन। इति चत्वारि **सिद्धान्तस्य** ॥ पूर्वपक्षः चोद्यम् इति द्वे **प्रश्नस्य**॥ गीः भणितिः गिरा ॥ १ ॥ वाचा 'वाञ्छा' इति चत्वारि **वचनस्य**॥ छन्दः निगमः इति द्वे **निगमस्य** ॥ साम्नी उक्थं स्वरपत्तनम्।स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः । इति त्रीणि **सामवेदस्य** ॥ ब्रह्माक्षरम् । ब्रह्मणः अक्षरम् । ओङ्कारः इति द्वे **प्रणवस्य** ॥ प्रश्नदूती । प्रश्नस्य दूती । प्रहेलिका इति द्वे **दुर्बोधार्थज्ञानाय प्रश्नस्य प्रहेलिकायाः** ॥ २ ॥ संज्ञा अधिवचनं सद्यःकृतम् । सद्यस्तत्क्षणात् कृतम् । लक्षणं नाम व्यपदेशः इति षट् **नाम्नः** ॥ प्रसिद्धः टङ्कारः इति द्वे **प्रसिद्धस्य** ॥ नवः स्तवः इति द्वे **स्तवकरणस्य** ॥ ३ ॥ इति धीवर्गः ॥ ५ ॥ शब्दः अभिलापः अभिधा अभिधानं वाचकः ध्वनिः ह्रासः कुहरितः इत्यष्टौ **ध्वनेः** ॥ मन्मनः गद्गदध्वनिः । मिन्मिनः गंगदः मूकः अवागादयोऽप्यत्र । इति द्वे **कफादिनाऽव्यक्तशब्दस्य गद्गदध्वनेः** ॥ १ ॥ तूरं तूर्यम्

मड्डुको मर्दलो मन्त्रो ढक्का विजयमर्दलः ।
द्रगडः प्रतिपत्तूर्यं डमरुः सूत्रकोणकः ॥ ३ ॥
नाली घटी यामनाली दण्डढक्का यमेरुका ।
यामघोषोऽथ ताम्री स्यान्मानरन्ध्रा विकालिका ॥ ४ ॥
भवरुत्प्रेतपटहो मृत्युदण्डकरश्च सः ।
रणतूर्यं तु संग्रामपटहो भयडिण्डिमः ॥ ५ ॥
भुक्ततूर्यं नृपाभीलं मल्लतूर्यं महास्वनः ।
मुखवाद्यं वक्रतालं वेणौ विवरनालिका ॥ ६ ॥
वारवाणिः प्रगातास्यात्कथकैकनटौ समौ ॥ ७ ॥

इति शब्दादिवर्गः ॥ ६ ॥

सर्ववेशी लयारम्भः स्यात्तालावचरो नटः ।
लयपुत्री नटी नर्तुः खड्गधारादिनर्त्तके ॥ १ ॥

इति द्वे **ताडयमानपटहादेः** ॥ कर्दिः "करर्धिः" करताली इति द्वे **करतालस्य** ॥ ध्वनिनाला । ध्वनेर्नाला । काहला । कुत्सितं हलति लिखति । कोः कादेशश्च । इति द्वे **काहलध्वनेः** ॥ २ ॥ मड्डुकः । मजन्ति अन्ये शब्दा अत्रेति । पृषोदरादित्वात् साधुः । मर्दलः "मर्दनः" मन्त्रः "मेन्द्रः" इति त्रीणि **मृदङ्गस्य** ॥ केचित्तु "विपुलडमरोः" इति वदन्ति । ढक्का विजयमर्दलः इति द्वे **विजयढक्कायाः** ॥ द्रगडः प्रतिपत्तूर्यम् इति द्वे **प्रतिवादिततूर्यविशेषस्य** ॥ डमरुः सूत्रकोणकः इति द्वे **कापालिकायाः** ॥ ३ ॥ नाली घटी यामनाली यामे नाल्यस्य । दण्डढक्का । दण्डाकारा ढक्का । यमेरुका यामघोषः "यामघोषी" यामे घोषोऽस्य । इति षट् **दण्डढक्कायाः । घटीयन्त्रभेदस्य वा** ॥ ताम्री । ताम्रेण निर्मिता । मानरन्ध्रा । मानाय कालप्रमाणज्ञानाय रन्ध्रं यस्याः । विकालिका इति त्रीणि **कालज्ञानार्थं ताम्रेण निर्मितस्य यन्त्रविशेषस्य** ॥ ४ ॥ भवरुत् प्रेतपटहः मृत्युदण्डकरः "मृत्युभंगुरकः" इति त्रीणि **प्रेतपटहस्य** ॥ रणतूर्यम् । रणे युद्धे नादितं तूर्यम् । संग्रामपटहः भयडिण्डिमः । भये परतः स्वानिष्टसम्भावनरूपके डिण्डिमः । इति त्रीणि **रणतूर्यस्य** ॥ ५ ॥ भुक्ततूर्यं नृपाभीलं "नृपाहारं नृपाभारम्" इति द्वे **अन्नकालविज्ञापनार्थं नादिततूर्यस्य** ॥ मल्लतूर्यं महास्वनः इति द्वे **मल्लवाद्यस्य** ॥ मुखवाद्यम् । मुखेन वाद्यम् । वक्रतालम् । वक्रे तालं यस्य । "वक्रनालम्" इति द्वे **मुखवाद्यस्य** । विवरनालिका । विवरयुक्तं नालमस्त्यस्याः ॥ ६ ॥ वारवाणिः । वारं समूहं वाणते । इति द्वे **वेणुवादकस्य** ॥ प्रगाता इत्येकं **वंशीवादकस्य** ॥ कथकः एकनटः इति द्वे **तत्त्वनिर्णयार्थं वादरूपकथाकर्तुः** ॥ ७ ॥ इति शब्दादिवर्गः ॥ ६ ॥ सर्ववेशी । सर्वेषां वेशो धार्यत्वेनास्त्यस्य । लयारम्भः "लयालम्भः" ताला-

प्लवकः केलकश्चाऽथ भण्डश्चाटुपटुः समौ ।
गायनो गाथकः स्त्रीणां हल्लीषं सहनर्तनम् ॥ २ ॥
वात्सल्यशान्तौ तु रसौ शृङ्गारः कौशिकः स्मृतः ।
सम्भोगो विप्रयोगश्च तद्भेदौ वर्णिका मसी ॥ ३ ॥
मसिर्ना ध्यामलं तु स्याद्ध्यामोऽवज्ञा तु पांसनम् ।
डमरुस्तु चमत्कारः प्रौढिस्तु कियदेतिका ॥ ४ ॥
स्वेदः प्रश्रवणं सिप्रो द्वयोर्व्रीडो नटार्थिका ।
भामः क्रोधे निःसमस्तु शोके वीर्यं शुटीरता ॥ ५ ॥
छलं मिषं च वैदग्धी भङ्गिश्चेभनिमीलिका ।
उत्कण्ठा रुहरुहिका हव्यासस्त्वतिचिन्तिया ॥ ६ ॥
स्याच्चिन्ता चिन्तयाऽथोऽद्वाहनं रणरणं च तत् ।
सोत्कण्ठा स्मृतिराध्यानं हेवाकोऽध्यवसायिता ॥ ७ ॥

वचरः नटः इति चत्वारि **नटस्य** ॥ लयपुत्री नटी नर्तूः इति त्रीणि **नटयोषितः** ॥ १ ॥ प्लवकः केलकः इति द्वे **खड्गधारिणः नर्तकस्य** ॥ भण्डः चाटुपटुः चाटौ मिथ्यापरितोषणे वाक्ये पटुः । "चाटुवटुः" इति द्वे **चाटूक्तिभाषकनटस्य विदूषकस्य**॥ गायनःगाथकः इति द्वे **गायकस्य**॥ हल्लीषं सहनर्तनम् इति द्वे **स्त्रीभिः सह नर्तकस्य । स्त्रीणां मण्डलिकाकारनृत्यस्य वा** ॥२॥ वात्सल्यः । वत्सलस्य भावः । शान्तः इति द्वे **पुत्रादिस्नेहानुगुणयोः रसभेदयोः** ॥ शृङ्गारः कौशिकः इति द्वे **नाट्योक्तरसभेदयोः** ॥ पृथगेकैकस्य । सम्भोगः विप्रयोगः "विप्रलम्भः" इति द्वे **शृङ्गाराद्यवस्थाभेदस्य** ॥ वर्णिका मसी ॥३॥ मसिः "मशिः" इति त्रीणि **पत्रलेखनद्रव्यभूतायाः मस्याः**॥ ध्यामलं "व्यामनं" ध्यामः "व्यामः" इति द्वे **बाह्वोरन्तरालपरिमाणस्य** ॥ अवज्ञा पांसनम् इति द्वे **अनादरस्य** ॥ डमरुः । चमत्कारः इति द्वे **चमत्कारस्य** ॥ प्रौढिः कियदेतिका । कियत् एतत् आरभ्यमाणं करोति । "अभियोगोद्यमौ प्रौढिरुद्योगः कियदेतिका ।" इति हैमः । क्वचित्तु "कियदेहिका" इति द्वे **उत्साहस्य** ॥ ४ ॥ स्वेदः प्रश्रवणं "प्रस्रवणं" सिप्रः । क्वचित्तु "स्विप्रः" । इति त्रीणि **स्वेदजलस्य** व्रीडः नटार्थिका "नटान्धिका" इति द्वे **लज्जायाः** ॥ भामः क्रोधः इति द्वे **क्रोधस्य** ॥ निःसमः "निःशमः" शोकः इति द्वे **शोकस्य** ॥ वीर्यं शुटीरता इति द्वे **वीर्यस्य** ॥ ५ ॥ छलं मिषम् इति द्वे **शठस्य** ॥ वैदग्धी । विदग्धस्य भावः । भङ्गिः "भङ्गी" इभनिमीलिका । इभं हस्तिनमपि निमीलयति सेवनात् निद्रापयति । इति त्रीणि **भङ्ग्याः**॥ उत्कण्ठा रुहरुहिका इति द्वे **औत्सुक्यस्य** ॥ हव्यासः अतिचिन्तिया ॥ ६ ॥ चिन्ता चिन्तया इति चत्वारि **चिन्तायाः** ॥ उद्वाहनं रणरणम् इति द्वे **विवाहस्य**॥ सोत्कण्ठा स्मृतिःआध्यानं हेवाकः

परिहासः केलिमुखः केलिर्देवननर्मणी ।
आटोपारोपटङ्कारा भवेदारभटी स्त्रियाम् ॥ ८ ॥
रोमोद्गमस्तु पुलकस्त्वक्पुष्पं च त्वगंकुरः ।
स्वदोषगूहनं म्रक्षो रागसंगौ तु गृध्रता ॥ ९ ॥
कामचारः स यच्चिते पापमाधाय शंसनम् ।
कौकृत्यं विप्रतीसारो विबाधा तु विहेठनम् ॥ १० ॥
दुःखलोको भवश्चैव संसारः कष्टचारकः ।
निर्वाणमन्तको मोक्षः शीतिभावः शमोऽमृतम् ॥ ११ ॥

इति नाट्यवर्गः ॥ ७ ॥

अधोऽव्ययं स्यात्पाताले सप्तधा तदुदीरितम् ।
अतलं सुतलं चैव वितलं च गभस्तिमत् ॥ १ ॥
तलं प्रतलपाताले विरोकं श्वभ्रमस्त्रियाम् ।
तमसं तु निशाचर्म नीलपंकं रजोबलम् ॥ २ ॥
दिक्कण्टको वियद्भूतिः खत्वग्वृत्रोऽथ नागभित् ।
दम्भूः स्त्री स्याद्गुल्मताजगरावथ हलाहलः ॥ ३ ॥

अध्यवसायिता इति पञ्च **औत्सुक्यान्वितस्य** ॥ ७ ॥ परिहासः "परीहासः" केलिमुखः इति द्वे **क्रीडायाः** ॥ केलिः देवनं नर्म इति त्रीणि **परिहासस्य** ॥ आटोपः आरोपः टङ्कारः आरभटी इति चत्वारि **दर्पस्य** ॥८॥ रोमोद्गमः "रोमोद्भेदः" पुलकः त्वक्पुष्पं त्वगङ्कुरः इति चत्वारि **पुलकस्य** ॥ स्वदोषगूहनं म्रक्षः "मृक्षः" इति द्वे **स्वदोषगूहनस्य**॥ रागः सङ्गः गृध्रता इति त्रीणि **गृध्रतायाः** ॥ ९ ॥ कामचारः "कामाचारः" "काम्यकारः" इत्येकं **सपापकथनस्य** ॥ चित्ते मनसि पापं हिंसादिकां क्रियाम् आधाय निधाय उत्पाद्येत्यर्थः । यत् शंसनं यत् प्रशंसाकारणं सः कामचारः इति व्यञ्जयस्यार्थः कौकृत्यं विप्रतीसारः इति द्वे **कुकृत्यस्य** ॥ विबाधा विहेठनम् इति द्वे **पीडायाः** ॥ १० ॥ दुःखलोकः भवः संसारः कष्टचारकः "कष्टकारकः" इति चत्वारि **संसारस्य** ॥ निर्वाणम् अन्तकः "अस्तुकः" मोक्षः शीतिभावः शमः अमृतम् इति षट् **निर्वाणस्य** ॥११॥ इति नाट्यवर्गः ॥ ७ ॥ अधः इति अव्ययं निपातपदं **पातालस्य**॥ अतलं सुतलं वितलं । गभस्तिमत् तेजवदित्यर्थः ॥१॥ तलं प्रतलं पातालमिति तच्च **सप्तपातालस्य**॥सप्तधा सप्तप्रकारेण उदीरितं कथितम् ।विद्वद्भिरिति शेषः । एतानि सप्त पातालानि ग्रन्थान्तरे एवं निर्दिष्टानि।यथा—"अतलं वितलं चैव नितलं च क्रमादधः । महातलं च सुतलं पातालं सप्त कीर्तितम्" इति।विरोकं श्वभ्रम् इति द्वे **श्वभ्रस्य**॥ तमसं निशाचर्म । निशायाः चर्म । नीलपङ्कम् । नीलः पंक इव यत्तत् । रजोबलम् ॥ २ ॥ दिक्कण्टकः "दिनान्तकः" वियद्भूतिः खत्वक् "खलुक्" वृत्रः इत्यष्टौ **अन्धकारस्य** ॥ नाग-

ब्रह्मसर्पोऽश्वलाला च द्विमुखाहिरहीरणिः ।
राजाहिरलगर्दस्तु कालसर्पो महाविषः ॥ ४ ॥
माण्डपुष्पस्तु भुजगो भवेत्कौक्कुटिकन्दलः ।
गोनासगोनसौ हालाहलं हालहलं विषम् ॥ ५ ॥
अथाब्भक्षो द्विरसनः समकोलश्च भेकभुक् ।
कुम्भीनसो मण्डली च गरलं जंगमं विषम् ॥ ६ ॥
अनन्तो वासुकिः पद्मो महापद्मोऽपि तक्षकः ।
कर्कोटिः कुलिकः शंख इत्यष्टौ नागनायकाः ॥ ७ ॥

भित् "नागभृत्" दम्भूः "दम्फूः" "डुण्डुः" इति द्वे **सर्पभेदस्य** ॥ वल्लूतः अजगरः इति द्वे **अजगरस्य** ॥ हलाहलः ॥ ३ ॥ ब्रह्मसर्पः अश्वलाला इति त्रीणि **ब्रह्मसर्पस्य** ॥ द्विमुखाहिः । द्विमुखश्चासौ अहिश्च । "द्विमुखः" अप्यत्र । द्वे मुखे यस्य । अहीरणिः । अहीन् ईरयति दूरीकरोति । तद्दर्शनादितरे सर्पाः पलायन्त इति भावः । राजाहिः इति त्रीणि **राजसर्प इति ख्यातस्य द्विमुखसर्पस्य** ॥ अलगर्दः । "अलगर्धः" अप्यत्र । कालसर्पः महाविषः इति त्रीणि **कालसर्पस्य** ॥ ४ ॥ भाण्डपुष्पः भुजगः इति द्वे **भाण्डपुष्पाख्यसर्पविशेषस्य** ॥ कौक्कुटिकन्दलः गोनासः गोनसः इति त्रीणि **तिलित्स इति ख्यातस्य सर्पस्य** । घोणसोऽप्यत्र । "भवेत्तिलित्सो गोनासो गोनसो घोणसोऽपि च" इति हैमः । हालाहलं हालहलं विषम् इति त्रीणि **विषस्य** ॥ ५ ॥ अब्भक्षः । अपो भक्षयति । द्विरसनः समकोलः भेकभुक् कुम्भीनसः मण्डली इति षट् **सर्पस्य** ॥ गरलम् । गिलति जीवनम् । इत्येकं **गतिशक्तियुक्तस्य जङ्गमविषस्य** ॥ ६ ॥ अनन्तः वासुकिः पद्मः महापद्मः तक्षकः कर्कोटिः कुलिकः शङ्खः इत्यष्टौ **नागराजानाम्** ॥ तेषां पृथगेकैकमेकैकस्य । तेषामाकारविशेषोप्येवं ज्ञेयः । अनन्तः द्विसहस्राक्षः श्यामवर्णः । अथवा । शुक्लः श्वेतपङ्कजलाञ्छनः । वासुकिः श्वेतो नीलः पद्मलाञ्छनवान् । पद्मः बिन्दुसमुदायाङ्कितमस्तकः शुक्लवर्णः । महापद्मः अतिशुक्लः दशबिन्दुमस्तकः । तक्षकः लोहिताङ्गः स्वस्तिकाङ्कितमस्तकः । कर्कोटिः मिश्रवर्णः दृष्टिविषः । तथा चोक्तम् । "कर्कोटिर्नाम सर्पो यः स दृष्टिविष उच्यते" इति । कुलिकः अर्धचन्द्रमौलिः ज्वालाधूमसदृशवर्णः । शङ्खः श्वेतवर्णधरः चन्द्राभरेखान्वितगलः । तथा चोक्तं नाममालायाम्—"शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः । स च श्यामोऽथ वा शुक्लः सितपङ्कजलाञ्छनः ॥ वासुकिस्तु सर्पराजः श्वेतो नीलः सरोजवान् । तक्षकस्तु लोहिताङ्गः स्वस्तिकाङ्कितमस्तकः ॥ महापद्मस्त्वतिशुक्लो दशविन्दुकमस्तकः । शङ्खस्तु श्वेतो बिभ्राणो रेखाबिन्दुसितो गले ॥ कुलिकोऽर्धचन्द्र-

तद्वन्धवस्तु कुमुदकम्बलाश्वतरादयः।
पुरी भोगवती चैषां भोगिन्यो नागकन्यकाः ॥ ८ ॥
इति पातालभोगिवर्गः ॥ ८ ॥
अकं दुःखमघं चैन्द्री त्वलक्ष्मीः कालकर्णिका ॥ १ ॥
इति नरकवर्गः ॥ ९ ॥
पाथोधिसिन्धुमकरालयवारिराशि-
गंगाधरेन्दुजनकास्तिमिरूर्मिमाली।
वार्धिर्मितद्रुतिमिकोषमहाशयाश्च-
क्लीब च शैलशिबिरं धरणीप्लवश्च ॥ १ ॥
पुमान् कचंगलो वांकः कूलंकषपरंगवौ।
तरन्तो दारदः पेरुर्महीप्राचीरमद्वयोः ॥ २ ॥
नदीनश्चाथ कमलं नीरं नाराः स्त्रियामिरा।
कं दकं जलमस्थानमगाधेऽथाम्भसांभ्रमः ॥ ३ ॥
तारूरो वायुगुल्मश्च कललाभः कलङ्कुरः।
पुरोटिः पत्रझङ्कारे दर्णिः कूलचुण्डकः ॥ ४ ॥

मौलिर्ज्वालाधूमसमप्रभः'' इति ॥ ७ ॥ कुमुदः कम्बलः अश्वतरः। आदिना इहानुक्त्वा अन्ये च। इति त्रीणि **तन्नागराजबान्धवानाम्** ॥ भोगवती। भोगः सर्पशरीरः भूम्नाऽस्त्यस्याम्। इत्येकं **सर्पनगरस्य वा नागभवनस्य** ॥ भोगिन्यः नागकन्यकाः इति द्वे **नागकन्यकानाम्** ॥ ८ ॥ इति पातालभोगिवर्गः ॥ ८ ॥ अकं दुःखम् अघम् इति त्रीणि **दुःखस्य** ॥ ऐन्द्री अलक्ष्मीः कालकर्णिका इति त्रीणि **अलक्ष्म्याः** ॥ १ ॥ इति नरकवर्गः ॥ ९ ॥ पाथोधिः। पाथांसि जलानि धीयन्तेऽत्र। सिन्धुः मकरालयः। मकराणां तन्नामकजलजन्तूनाम् आलयः वासो यस्मिन्। वारिराशिः गङ्गाधरः। गङ्गां धरति। इन्दुजनकः। इन्दोः जनकः। तिमिः ऊर्मिमाली। ऊर्मिमालाऽस्त्यस्य। वार्धिः। वारि जलानि धीयन्तेऽत्र। मितद्रुः ''सितद्रुः''। मितं द्राति द्रवति वा। तिमिकोषः। तिमीनां मत्स्यानां कोषः उत्पत्तिर्यस्मिन्। महाशयः। महान् उदरः आशयो यस्य। शैलशिबिरम्। शैलानां नगानां शिबिरमिव। न०। धरणीप्लवः ॥ १ ॥ कचङ्गलः वाङ्कः कूलङ्कषः। कूलं कषति। परङ्गः ''परङ्गवः'' तरन्तः दारदः। दरदेशसन्निकृष्टः। पेरुः। पु०। महीप्राचीरम्। मह्याः प्राचीरमिवावरकम्। न० ॥ २ ॥ नदीनः। नदीनाम् इनः प्रभुः। इति त्रयोविंशतिः **समुद्रस्य** ॥ कमलं नीरं नाराः। ''आपो नारा इति प्रोक्ताः'' इति। इरा। स्त्री०। कं दकं जलम् इति सप्त **जलस्य** अस्थानम्। नास्ति स्थानं तलस्पर्शो यस्य। क्वचित् ''अस्थायम्'' ''अस्थाघम्'' अगाधः। नास्ति गाधः प्रतिष्ठा यस्य। इति द्वे **अतलस्पर्शजलस्य** ॥ अम्भसांभ्रमः ॥ ३ ॥ तारूरः

चुलुको घनजम्बाले दलाढ्ये पंककर्वटः ।
तरणो भेलके वारिरथो नौस्तरिकः प्लवः ॥ ५ ॥
होडस्तरांधुर्वहनः तरण्डो वार्वटः पुमान् ।
पादारकः स्यात्पोलिन्दः पत्रबाले तुलाधटः ॥ ६ ॥
समुद्रकफडिण्डीरजलहासास्तु फेणके ।
कैवर्ते जालिकश्छोटी कुपिनी स्यादथ प्लवः ॥ ७ ॥
पलवः पञ्जराखेटः कण्टकी तु जलेशयः ।
आत्माशी शम्बरो मूकोऽनिमिषो वल्कवानपि ॥ ८ ॥
मीने वदालः पाठीनो मत्स्यराजस्तु रोहितः ।
भालांकश्चाथ कुलिशं कटं काष्टील इत्यपि ॥ ९ ॥
फलकी स्याच्चित्रफली वाजग्रीवो मदार्मदः ।
कवयी क्रकचपृष्ठी कंकत्रोटो जलव्यधः ॥ १० ॥

"तानूरः" वायुगुल्मः कललाभः "कलमामः" "कणलाभः" कलङ्कुरः "कुलङ्कुरः" इति पञ्च **जलभ्रमस्य॥** पुरोटिः इत्येकं **पत्रझङ्कार इति ख्यातस्य पत्रचलननादस्य॥** दरणिः "वदालः" कूलचुण्डकः कूलहण्डकः इति द्वे **तीरस्थमत्स्यभेदस्य** ॥ ४ ॥ चुलुकः इत्येकं **निबिडपङ्क इति प्रसिद्धस्य घनजम्बालस्य** ॥ पङ्ककर्वटः इत्येकं **पङ्कबहुलस्य दलाढ्यस्थानस्य** ॥ तरणः इत्येकं **डोङ्गा इति ख्यातस्य भेलकस्य** ॥ वारिरथः नौः तरिकः प्लवः इति चत्वारि **नौकायाः** ॥ ५ ॥ होडः तरान्धुः वहनः इति त्रीणि **समुद्रगामिनौकाभेदस्य** ॥ तरण्डः "वहित्रं"वार्वटः । पु० । इति द्वे **पोतजलयानस्य** ॥ पादारकः पोलिन्दः इति द्वे **पोलिन्दस्य** ॥ तुलाघटः इत्येकं **पत्रबालस्य** ॥ केचित्तु "तुलाधर" इति वदन्ति ॥ ६ ॥ समुद्रकफः डिण्डीरः "ड़िण्ड़रः" जलहासः इति त्रीणि **समुद्रफेणस्य** ॥ जालिकः छोटी "कोटिः" कुपिनी इति त्रीणि **कैवर्तस्य** ॥ प्लवः ॥ ७ ॥ पलवः पञ्जराखेटः इति त्रीणि **पञ्जराखेटस्य** ॥ कण्टकी "कण्डी" जलेशयः आत्माशी शम्बरः मूकः अनिमिषः । नास्ति निमिषः चक्षुःस्पन्दनं यस्य । "अनिमेषः" अप्यत्र । वल्कवान् इति सप्त **मत्स्यस्य** ॥ ८ ॥ वदालः पाठीनः इति द्वे **पाठीनमत्स्यस्य॥** मत्स्यराजः रोहितः मालाङ्कः "लालाङ्गः" भालस्येवाङ्को यस्य । इति त्रीणि **रोहितमत्स्यस्य** ॥ कुलिशम् । कौ जले लिशति श्लिष्यति । कटं काष्टीलः इति त्रीणि **मत्स्यविशेषस्य** ॥ ९ ॥ फलकी चित्रफली इति द्वे **फलक्याः** ॥ वाजग्रीवः "राजग्रीवः" मदार्मदः इति द्वे **मत्स्यभेदस्य** । कवयी क्रकचपृष्ठी इति द्वे **कवयी इति ख्यातस्य मत्स्यविशेषस्य॥** कङ्कत्रोटः "कङ्कत्रोटिः" । कङ्कस्य त्रोट इव चक्षुरस्य । जलव्यधः इति द्वे **मत्स्यविशेषस्य** ॥ १० ॥

शफरः श्वेतकोलः स्यात्खशेटस्तु खलेशयः ।
इल्लिशे वारिकर्पूरगाङ्गेयशफराधिपाः ॥ ११ ॥
जलतालोऽथ चलत्पूर्णिमाचन्द्रचञ्चलौ ।
जलवृश्चिक इश्वाके गङ्गाटेयो गलानिलः ॥ १२ ॥
शालः शकुलगण्डः स्यादन्धाहिः कूर्चिका द्वयोः ।
ब्राह्मी तु पङ्कगण्डको लघुगर्गस्त्रिकण्टकः ॥ १३ ॥
तिर्यग्यानः कुलीरः स्यान्मुखास्त्रो हरिलोचनः ।
बहिः कुटीचरः पोताधानं तु स्याज्जलाण्डकम् ॥ १४ ॥
जलरूपस्तु मकरो मरोलिरसिदंष्ट्रकः ।
मीनरस्तन्तुनागस्तु नक्रवाडवहारकौ ॥ १५ ॥
नक्रस्तु वार्भटः स्यादम्बुकिण्टोम्बुकण्टकः ।
जलशूकरमायादझषाशनह्रदग्रहाः ॥ १६ ॥
जलकूर्मस्त्वम्बुकीशो वसाढ्यः शिशुकश्च सः ।
उद्रस्तु जलमार्जारजलाखुनकुलप्लवाः ॥ १७ ॥

शफरः श्वेतकोलः इति द्वे **मत्स्यविशेषस्य** ॥ "खशेटः" खेटकः खलेशयः इति द्वे **खलेशयस्य** ॥ वारिकर्पूरः गाङ्गेयः शफराधिपः ॥ ११ ॥ जलतालः इति चत्वारि **इल्लिश इति ख्यातस्य मत्स्यविशेषस्य** । चलत्पूर्णिमा चन्द्रचञ्चलः इति द्वे **चन्द्रमत्स्य इति ख्यातस्य मत्स्यविशेषस्य** ॥ जलवृश्चिकः इत्येकं **इश्वाकस्य** ॥ गङ्गाटेयः गलानिलः इति द्वे **मत्स्यविशेषस्य** ॥ १२ ॥ शालः शकुलगण्डः इति द्वे **शाल इति ख्यातस्य क्षुद्रमत्स्यविशेषस्य**॥ अन्धाहिः । अन्धे जले अहिः नागः । कूर्चिका इति द्वे **जलनाग इति ख्यातस्य कूर्चिकस्य**॥अत्र जलसर्पः उदकनागः उदकाहिः अपि सङ्गृह्यते । ब्राह्मी पङ्कगण्डकः । पंके गण्डे यस्य । इति द्वे **पङ्कगण्डस्य**॥ लघुगर्गः त्रिकण्टकः । त्रयः कण्टकाः यस्य । इति द्वे **त्रिकण्टकस्य** ॥ १३ ॥ तिर्यग्यानः कुलीरः मुखास्त्रः । मुखमेवास्त्रं यस्य । हरिलोचनः । हरेर्लोचनमिव लोचने यस्य । बहिःकुटीचरः इति पञ्च **कुलीरस्य** ॥ पोताधानम् । पोतानां शिशूनामण्डजातमत्स्यानामाधानम् । जलाण्डकम् इति द्वे **जलाण्डकस्य क्षुद्रमत्स्यसंघस्य** ॥ १४ ॥ जलरूपः मकरः मरोलिः असिदंष्ट्रकः मीनरः इति पञ्च **मकरस्य** ॥ तन्तुनागः नक्रहारकः वाडवहारकः इति त्रीणि **हाङ्गर इति ख्यातस्य जलजन्तुभेदस्य** ॥१५॥ नक्रः वार्भटः अम्बुकिण्टः "अम्बुकिरातः" अम्बुकण्टकः जलशूकरः मायादः झषाशनः ह्रदग्रहः इत्यष्टौ **कुम्भीरस्य** ॥ १६ ॥ जलकूर्मः अम्बुकीशः वसाढ्यः शिशुकः इति चत्वारि **शिशुमारस्य** ॥ उद्रः जलमार्जारः

मृत्किरा घुर्घुरी वारिक्रमिस्तु जलमक्षिका ।
पटालुका जलौकाम्बुसर्पिणी वेणिवेधिनी ॥ १८ ॥
व्यङ्गस्तु नन्दको भेको गूढवर्चाः क्षतालयः ।
कोकोजिह्वोऽथ पञ्चाङ्गगुप्ते क्रोडांघ्रिकच्छपौ ॥ १९ ॥
गडुः किञ्चुलुकोऽथाऽम्बुर्विकिरश्चूडकश्च सः ।
चुण्टा चुण्टी च लूताऽथान्धकूपः कर्करान्धुकः ॥ २० ॥
पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका ।
अवघट्टावटौ तुल्यौ तल्लं विल्लं तलं च तत् ॥ २१ ॥
द्विजप्रपालवाले स्यात्केदारः पांशुमर्दनः ।
नदी निर्झरिणी रोधोवक्रा सागरगामिनी ॥ २२ ॥
तलोदा चाम्पिला सिन्धुर्ऋषिकुल्या वहा च सा ।
अध्वगा गान्दिनी गङ्गा हैमवत्युग्रशेखरा ॥ २३ ॥
धर्मद्रवी सिद्धसिन्धुस्तापी तु यमुना यमी ।
रेवा तु पूर्वगंगा स्यान्मुरला तु मुरन्दला ॥ २४ ॥

जलाखुः नकुलः प्लवः इति पञ्च **जलबिडालस्य**॥१७॥मृत्किरा घुर्घुरी इति द्वे **घुर्घुर्य्याः** ॥ घुर्घुरी कीटविशेषः । वारिक्रमिः जलमक्षिका पटालुका जलौका अम्बुसर्पिणी । अम्बुनि सर्पति । वेणिवेधिनी इति षट् **जलौकायाः**॥१८॥व्यङ्गः । विगतं विकलं वा अंगं यस्य । नन्दकः भेकः गूढवर्चाः । गूढं केनाप्यदृश्यं वर्चो विष्ठा शुक्रं वा यस्य । "गूढवर्त्राः" क्षतालयः "क्रतालयः" कोकः "रेकः" अजिह्वः । नास्ति जिह्वा रसना यस्य । इति सप्त **भेकस्य** ॥ क्रोडांघ्रिः । **क्रोडे** अंघ्रिर्यस्य । कच्छपः इति द्वे **पञ्चाङ्गगुप्त इति ख्यातस्य कूर्मस्य** ॥ १९॥ गडुः किञ्चुलुकः । किञ्चित् चुलुम्पति । इति द्वे **महीलताख्यस्य कीटभेदस्य** ॥ अम्बुः विकिरः । विकीर्यते । चूडकः चुण्टा चुण्टी लूता "चूडा" इति षट् **कूपस्य** ॥ अन्धकूपः । अन्धयतीत्यन्धः स चासौ कूपः । कर्करान्धुकः । कर्करः कठोरः अतिशयितान्धकारवत्त्वात् । अन्धुः **कूपो** यत्र । इति द्वे **अत्यन्धकारवतः कूपस्य** ॥ २० ॥ पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका इति पञ्च **वाप्याः** ॥ अवघट्टः अवटः । तलमध्यत्र । इति द्वे **गर्तस्य** ॥ **तल्लं** विल्लं तलम् ॥ २१॥ द्विजप्रपम् आलवालम् इति पञ्च **आलवालस्य** ॥ केदारः पांशुमर्दनः "पांसुमर्दनः" पांशून् शष्पार्थं चिरसञ्चितान् गोमयान् मर्दयते । इति द्वे **क्षेत्रस्य** ॥ **नदी** निर्झरिणी । पर्वतान्निःसृतजलप्रवाहः कारणत्वेनास्त्यस्याः । रोधोवक्रा । रोधसा वक्रा । सागरगामिनी ॥ २२ ॥ तलोदा चाम्पिला सिन्धुः ऋषिकुल्या वहा अध्वगा "त्र्यध्वगा" गान्दिनी "गान्धिनी" गङ्गा हैमवती उग्रशेखरा ॥ २३ ॥ धर्मद्रवी सिद्धसिन्धुः इति **षोडश गङ्गायाः** ॥ तापी यमुना. यमी इति त्रीणि **यमुनायाः नद्याः** ॥ रेवा पूर्वगङ्गा **मुरला**

स्यादर्द्धगङ्गा कावेरी वाशिष्ठी गोमती समे ।
अथ गोदावरी भीमोपला गोला च गौतमी ॥ २५ ॥
सप्तगोदावरं तत्र कुवलं तूत्पलं कुवम् ।
कैरवं गन्धसोमं स्यात्कन्दोटश्च निशाहसः ॥ २६ ॥
श्रीकरं कृष्णकन्दं च रक्तोत्पलमलिप्रियम् ।
लक्ष्मीगृहं कुमुच्चाऽथ शालूकः पङ्कशूरणः ॥ २७ ॥
प्रश्नी तु कुम्भिका वारिमूली पर्णी खमूलिका ।
स्याद्वारिचत्वरोऽथाम्बुतालः सलिलकुन्तलः ॥ २८ ॥
शैवलो हठपर्णी स्त्री कावारं वारिचामरम् ।
पद्मे कवारं पङ्केजं बिसनाभिस्तु पद्मिनी ॥ २९ ॥
पुटकिन्येवमेवाऽन्याः कुन्दिनीतालिनीमुखाः ।
विषण्डं तन्तुलविषे शृङ्गाटो वारिकुब्जकः ॥ ३० ॥

इति वारिवर्गः ॥ १० ॥

इति सटीकत्रिकाण्डशेषे प्रथमः काण्डः समाप्तः १.

मुरन्दला इति चत्वारि **नर्मदायाः नद्याः**॥२४॥अर्द्धगङ्गा कावेरी इति द्वे **कावेर्याः नद्याः**॥ वाशिष्ठी "वासिष्ठी" गोमती।इति द्वे **गोमत्याः नद्याः**॥गोदावरी भीमोपला गोला गौतमी ॥२५॥सप्तगोदावरम् इति क्वचित् "गौतमी" पञ्च **गोदावर्याः नद्याः**॥कुवलम् उत्पलं कुवम् इति त्रीणि **उत्पलस्य** ॥ कैरवं गन्धसोमम् । गन्धार्थं सोमो विधुर्यस्य । चन्द्रोदये हि तस्य गन्धः । कन्दोटः निशाहसः ॥ २६ ॥ श्रीकरं कृष्णकन्दम् इति षट् **कुमुदस्य** ॥ रक्तोत्पलम् अलिप्रियम् । अलीनां प्रियमधिकमोदकत्वात् ॥ लक्ष्मीगृहम् । लक्ष्म्याः श्रियाः गृहं सदनम् । कुमुद् इति चत्वारि **रक्तोत्पलस्य** ॥ शालूकः पंकशूरणः इति द्वे **कुमुदमूलस्य** ॥ २७ ॥ प्रश्नी "पृश्नी" कुम्भिका वारिमूली पर्णी "वारिपर्णी" अप्यत्र । खमूलिका "खमूली" अप्यत्र । वारिचत्वरः इति षट् **कुम्भिकायाः** ॥ अम्बुतालः सलिलकुन्तलः । सलिलस्य कुन्तलाः केशा इव ॥ २८ ॥ शैवलः हठपर्णी । हठं प्लवमानं पर्णं यस्याः । कावारं वारिचामरम् । वारिणश्चामर इव । इति षट् **शैवालस्य**॥ कवारं पंकेजं "पंकजम्" इति त्रीणि **पद्मस्य**॥बिसनाभिः।बिसं नाभौ यस्य । पद्मिनी ॥ २९॥पुटकिनी इति त्रीणि **पुटकिनीतिख्यातायाः पद्मिन्याः** ॥ कुन्दिनी "कुण्टिनी" तालिनी "अम्लानिनी" मुखा इति त्रीणि **पद्मिनीभेदस्य** ॥ पृथगेकैकमेकैकस्य । विषण्डं "विसण्डं" तन्तुलं "तन्तुरं" विषम् इति त्रीणि **मृणालस्य**॥ शृङ्गाटः वारिकुब्जकः । वारिणि कुब्ज इव । इति द्वे **जलकण्टकस्य**॥अन्याः शेषसंज्ञाः । एवमेव उक्तानुक्रमेणैव बोध्याः ॥ ३० ॥ इति वारिवर्गः ॥ १० ॥ इत्याचार्यश्रीशीलस्कन्धस्थविरविरचितायां सारार्थचन्द्रिकाख्यायां त्रिकाण्डशेषटीकायां प्रथमः काण्डः समाप्तः ॥

इति सटीकत्रिकाण्डशेषकोषस्य प्रथमः काण्डः समाप्तः १.

अथ

सटीकत्रिकाण्डशेषकोषस्य-

द्वितीयः काण्डः ।

भूर्भूतधात्री गिरिकर्णिकाब्धिद्वीपा समुद्राम्बरमेखला कुः ।
क्षमाऽद्रिकीला च जगद्वहा च पुंसि स्मृतौ मध्यमलोकमर्त्यौ ॥१॥

सँहा कान्ता गन्धवती रत्नगर्भा च मेदिनी ।
स्वँस्थली भारताख्यं तु वर्षं हैमवतं विदुः ॥ २ ॥
भारतं नरभूः किंपूरुषं हरिवर्षं ततः ।
भद्राश्वमुत्तरकुरुर्हिरण्मयमिलावृतम् ॥ ३ ॥
केतुमालममूनि स्युर्भुवो वर्षाणि वै नव ।
जम्बुप्लक्षकुशक्रौञ्चशाकशाल्मलिपुष्करैः ॥ ४ ॥
द्वीपाः सप्ताथ सप्तैव समुद्रा अपि कीर्त्तिताः ।
लवणेक्षुसुरासर्पिर्दधिदुग्धपयोमयाः ॥ ५ ॥

श्रीगणेशाय नमः । अथ द्वितीयकाण्डो व्याख्यायते । भूः भूतधात्री। भूतानि जन्तून् धारयति । गिरिकर्णिका अब्धिद्वीपा समुद्राम्बरा । समुद्रः अम्बरमिव वेष्टनाकारः यस्याः । समुद्रमेखला । समुद्ररसनादयोऽप्यत्र । कुः क्षमा अद्रिकीला । अद्रयः कुलाचलाः कीलाः शंकव इव यस्याः । जगद्वहा मध्यमलोकः । मध्यलोकोऽप्यत्र । मध्यमश्चासौ लोकः । तस्याः पातालस्वर्लोकयोर्मध्यवर्तित्वात् । मर्त्यः "मर्तः" । इमौ मध्यमलोकमर्त्याविति द्वौ शब्दौ पुँल्लिङ्गकौ स्मृतौ ॥ १ ॥ सहा "महा" कान्ता गन्धवती रत्नगर्भा मेदिनी स्वस्थली "खस्थली" "खस्तनी" इति अष्टादश **पृथिव्याः** ॥ भारतं वर्षम् । भारतवर्षमप्यत्र । "हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता । तस्माच्च भारतं वर्षम्" इति । हैमवतम् इति त्रीणि **हिमवत्खण्डस्य** ॥ २ ॥ भारतं नरभूः किंपूरुषं "किंपुरुषं" हरिवर्षं भद्राश्वम् उत्तरकुरुः हिरण्मयम् इलावृतम् ॥ ३ ॥ केतुमालम् इति नव **भुवो नववर्षात्मकस्य जम्बुद्वीपस्य नवानां वर्षाणां पृथगेकैकमेकैकस्य** ॥ जम्बुः "जम्बू" प्लक्षः कुशः क्रौञ्चः शाकः शाल्मलिः पुष्करः इति सप्त **जम्ब्वादिभिर्वृक्षैश्चिह्नितानां सप्तानां द्वीपानां** ॥ **पृथगेकैकमेकैकस्य** ॥ ४ ॥ लवणः इक्षुः सुरा सर्पिः दधिः दुग्धः पयोमयः "जलान्तकः" इति सप्त **सप्तसमुद्राणां पृथगेकैकमेकैकस्य** ॥५॥

ऊषरं तूषवानूषो ब्रह्मावर्तस्तपोवटः ।
कुरुक्षेत्रं प्रयागश्च हिमाद्रिं विन्ध्यमन्तरा ॥ ६ ॥
मध्यदेशोऽथ पुण्ड्राः स्युर्वरेन्द्री गौडनीवृतिः ।
प्रभासः सोमतीर्थं स्यादन्तर्वेदी कुशस्थली ॥ ७ ॥
प्राग्ज्योतिषं कामरूपे तीरभुक्तिस्तु निच्छविः ।
विदेहाश्चाऽथ काश्मीरे कीराः स्युः शास्त्रशिल्पिनः ॥ ८ ॥
तुरुष्काः खशयष्टक्का बाह्लिकाश्च त्रिगर्तकाः ।
दशेरका मरुभुवो मालवाः स्युरवन्तयः ॥ ९ ॥
डाहलाश्चेदयश्चैद्याः कारुषास्तु बृहद्गृहाः ।
यदवस्तु दशार्हाः स्युः सात्वताः कुकुराश्च ते ॥ १० ॥
ओड्रा उत्कलनामानो मगधाः कीकटा मताः ।
वेलाकूलं तामलिप्तं तामलिप्ती तमालिका ॥ ११ ॥
एकचक्रं हरिगृहं शम्भुपुर्यथ वर्तनिः ।
पूर्वदेशोऽथ साकेतमयोध्योत्तरकोशलाः ॥ १२ ॥

ऊषरम् "उषरः" ऊषवान् ऊषः । उषोऽप्यत्र । इति त्रीणि **क्षारमृत्तिकायुक्तायाः ऊषरभूम्याः** ॥ ब्रह्मावर्तः तपोवटः इति द्वे **ब्रह्मावर्त इति ख्यातस्य**॥सरस्वतीदृषद्वत्योर्देवनद्योरन्तर्भूतस्य देशभेदस्य । मध्यदेशः इत्येकं **कुरुक्षेत्रप्रयागयोर्हिमाद्रिविन्ध्ययोश्च मध्यवर्तिनो मध्यदेशस्य** ॥६॥ पुण्ड्राः "पुड्राः" वरेन्द्री गौडनीवृतिः इति त्रीणि **गौडदेशस्य** ॥ प्रभासः सोमतीर्थम् इति द्वे **प्रभासतीर्थस्य** ॥ केचित्तु प्रभासस्येति पठन्ति । अन्तर्वेदी कुशस्थली इति द्वे **अन्तर्वेद्याः** ॥७॥ प्राग्ज्योतिषम् । कचित्तु प्राग्ज्योतिषः । इत्येकं **कामरूपदेशस्य** ॥ तीरभुक्तिः निच्छविः विदेहाः इति त्रीणि **विदेहस्य** ॥ कीराः शास्त्रशिल्पिनः इति द्वे **काश्मीरस्य** ॥ ८ ॥ तुरुष्काः खशयः टक्काः "थस्काः" बाह्लिकाः त्रिगर्त्तकाः "विगर्तकाः" दशेरकाः मरुभुवः मालवाः अवन्तयः इति नव **देशभेदानां पृथगेकैकमेकैकदेशस्य** ॥९॥ डाहलाः चेदयः चैद्याः इति त्रीणि **चैद्यस्य**॥ जनपदनामत्वादत्र बहुवचनम् । कारुषाः बृहद्गृहाः इति द्वे **कारुषस्य** ॥ यदवः दशार्हाः सात्वताः कुकुराः इति चत्वारि **दशार्हस्य** ॥१०॥ ओड्राः "ओण्ड्राः" उत्कलाः इति द्वे **जगन्नाथप्रान्तदेशवर्तिनः ओड्रदेशस्य** ॥ मगधाः कीकटाः । किञ्चित् कुत्सितं कटन्ति । इति द्वे **मगधदेशस्य** ॥ वेलाकूलं तामलिप्तं तामलिप्ती तमालिका इति चत्वारि **तामलिप्तिदेशस्य**।११॥एकचक्रम् । एकं चक्रं यत्र हरिगृहं शम्भुपुरी । कचित् "सुम्भपुरी"। इति त्रीणि **शम्भुपुर्याः**॥ वर्तनिः पूर्वदेशः "पूर्वदेशः" इति द्वे **प्राच्यामवस्थितस्य जनपदस्य**॥ साकेतम् अयोध्या उत्तरकोशला इति त्रीणि **सरयूतीरवर्तिनः अयोध्येति प्रसिद्धस्य**・

कुशस्थलं कान्यकुब्जं नागाह्वं हस्तिनापुरम् ।
गजाह्वं हास्तिनं चाऽथ श्रावस्ती धर्मपत्तनम् ॥ १३ ॥
कुरुक्षेत्रं विनशनं कौशाम्बी वत्सपत्तनम् ।
प्राजापत्यः प्रयागः स्याद्द्वारका वनमालिनी ॥ १४ ॥
द्वारवत्यब्धिनगरी विदेहा मिथिले समे ।
मथुरा तु मधूपघ्नं जित्वरी तु तपस्स्थली ॥ १५ ॥
वाराणसी तीर्थराजी विशालोज्जयिनी समे ।
चम्पा तु मालिनी पुष्पपुरं पाटलिपुत्रकम् ॥ १६ ॥
देवीकोटो बाणपुरं कोटीवर्षमुषावनम् ।
स्याच्छोणितपुरं चाथ योजनं मार्गधेनुकम् ॥ १७ ॥
क्रिमिशैलस्तु वल्मीकः शक्रमूर्धाऽथ सञ्चरः ।
धरणः पिण्डलः सेतुः पन्थास्तु क्षुल्लमो वहः ॥ १८ ॥

नगरस्य ॥ १२ ॥ कुशस्थलम् । कुशानां स्थलम् । कान्यकुब्जम् । कन्याः कुब्जाः यत्र तत्र हि वायुना कन्याशतस्य कुब्जत्वं कृतमिति । इति द्वे **कान्यकुब्जदेशस्य** ॥ नागाह्वं "नागाङ्कं" हस्तिनापुरम् । हस्तिना तदाख्यनृपेण चिह्नितं तत्कृतं पुरम् । गजाह्वं हास्तिनम् इति चत्वारि **हस्तिनापुरस्य** ॥ श्रावस्ती "श्रावन्ती" धर्मपत्तनम् धर्माणां पत्तनं पुरम् । इति द्वे **धर्मपत्तनाख्यपुरस्य** ॥ १३ ॥ कुरुक्षेत्रम् । कुत्सितं रौति :कुरु पापं कर्म । तस्य क्षेपणादपाकरणात् क्षेत्रम् । विनशनम् इति द्वे **कुरुपाण्डवानां युद्धभूमिसंख्यातस्य कुरुक्षेत्रस्य** ॥ कौशाम्बी । कुशाम्बेन निर्वृत्ता । वत्सपत्तनम् । वत्सस्य वत्सराजस्य पत्तनं नगरम् इति द्वे **उत्तरदेशस्थस्य कौशाम्बीनगरस्य** ॥ प्राजापत्यः प्रयागः। प्रकृष्टो यागो यस्मात् इति द्वे **गङ्गा यमुनयोः सङ्गमजातस्य प्रयाग इति प्रसिद्धस्य तीर्थभेदस्य** ॥ द्वारका वनमालिनी ॥ १४ ॥ द्वारवती अब्धिनगरी इति चत्वारि **समुद्रसन्निकृष्टस्य द्वारकेतिख्यातस्य तीर्थभेदस्य** ॥ विदेहा मिथिला इति द्वे **मिथिलाराजधान्याः** ॥ मथुरा मधूपघ्नम् इति द्वे **मथुरायाः** ॥ जित्वरी तपस्स्थली ॥ १५॥ वाराणसी "बाराणसी" वरणा च असी च सीमात्वेनास्त्यस्याः॥ तीर्थराजी "तीर्थराज्ञी" इति चत्वारि **काश्याः** ॥ विशाला उज्जयिनी "उज्जयनी" अप्यत्र । इति द्वे **विक्रमादित्यराजधान्याः अवन्तिपुर्याः** ॥ चम्पा मालिनी इति द्वे **चम्पानगर्याः** ॥ पुष्पपुरं पाटलिपुत्रकम् इति द्वे **पाटलिपुत्रनगरस्य** ॥ १६ ॥ देवीकोटः "देवीकोठः" बाणपुरं "वाणपुरं" कोटीवर्षम् उषावनं शोणितपुरम् इति पञ्च **शोणितपुरस्य** ॥ योजनं मार्गधेनुकम् इति द्वे **योजनस्य** ॥ १७ ॥ क्रिमिशैलः वल्मीकः शक्रमूर्धा । शक्रस्येव शिखावान् मूर्धा यस्य । इति त्रीणि **वल्मीकस्य** ॥ सञ्चरः "सञ्चारः" धरणः पिण्डलः "पिण्डिलः" सेतुः इति

वाटः पथश्च मार्थश्च खपुरन्तूर्ध्वगं पुरम् ।
हरिश्चन्द्रपुरं शौभमुद्रङ्गः प्रतिमार्गकः ॥ १९ ॥
त्रङ्गा त्रङ्गो निर्मुटस्तु पण्याजीवकचङ्गलौ ।
पुंसि हट्टक्रयारोहौ जन्यं ग्राममुखं च तत् ॥ २० ॥
स्यादभिस्यन्दनगरं शाखानगरमित्यपि ।
शासनं धर्मकीलः स्यान्मकुतिः शूद्रशासनम् ॥ २१ ॥
पट्टोलिका क्लप्तकीला पांशुकीलं न कस्यचित् ।
षड्भिर्यवैः स्यादङ्गुष्ठ एतैर्द्वादशभिर्भवेत् ॥ २२ ॥
वितस्तिः स्यादतो द्वाभ्यां हस्तः स्यात्तच्चतुष्टयम् ।
दण्डो धन्वन्तरं तस्य सहस्रद्वितयेन तु ॥ २३ ॥
क्रोशस्ताभ्यान्तु गव्यूतिस्तद्द्वयं योजनं मतम् ॥
चतुरष्टशतग्रामान्तर्द्रोणमुखकर्वटौ ॥ २४ ॥

इति भूमिवर्गः ॥ १ ॥

चत्वारि **सेतोः** ॥ पन्थाः क्षुल्लमः "खुलमः" वहः ॥ १८ ॥ वाटः पथः माथः "मार्गः" इति षण्**मार्गस्य** ॥ खपुरम् । खमिन्द्रियमाकाशं वा पिपर्त्ति । इत्येकम् **ऊर्ध्वगपुरस्य** ॥ हारिश्चन्द्रपुरं शौभम् इति द्वे **शोभपुरस्य** ॥ उद्रङ्गः प्रतिमार्गकः ॥ १९ ॥ त्रङ्गा त्रङ्गः इति चत्वारि **प्रतिमार्गस्य** ॥ निर्मुटः पण्याजीवकः चङ्गलः इति त्रीणि **वणिग्जनस्य** ॥ हट्टक्रयः आरोहः । एतौ द्वौ पुँल्लिङ्गकौ । जन्यं ग्राममुखम् । ग्रामस्य मुखं यत्र । इति चत्वारि **क्रयविक्रयस्थानस्य** ॥ २० ॥ अभिस्यन्दनगरम् । अभिस्यन्देन प्रधाननगरातिवृद्ध्या तदतिवाहेन कृतं नगरम् । क्वचित् "अभिस्यन्दरमणम्" । शाखानगरम् इति द्वे **शाखानगरस्य** ॥ शासनं धर्मकीलः इति द्वे **राजशासनस्य** ॥ मकुतिः "मङ्कुतिः" शूद्रशासनम् इति द्वे **शूद्रशासनस्य** ॥ ॥ २१ ॥ पट्टोलिका क्लप्तकीला इति द्वे **व्यवस्थापत्रस्य** । पांशुकीलम् "पांसुकीलम्" इत्येकम् **अनामपट्टोलिकायाः** अङ्गुष्ठः इत्येकं **वृद्धाङ्गुल्याः** ॥ स च षड्भिर्यवैः प्रयामः स्यात् । अन्ये तु अष्टयवोदरपरिमाण इति च पठन्ति । तथोक्तं भास्कराचार्येण—"यवोदरैरङ्गुलमष्टसङ्ख्यैः इति । वितस्तिः इत्येकं **वितस्त्याः** ॥ सा तु एतैर्द्वादशभिरङ्गुलैः परिमिता भवेत् ॥ २२ ॥ हस्तः इत्येकं **हस्तस्य** ॥ अतो वितस्त्या द्वाभ्यां हस्तः स्यात् । दण्डः धन्वन्तरम् इति द्वे **हस्तचतुष्टयात्मकस्य दण्डस्य** ॥ २३ ॥ क्रोशः इत्येकं **हस्तद्विसहस्रपरिमितस्य क्रोशस्य** ॥ गव्यूतिः "गोर्यूतिः" इत्येकं **क्रोशद्वयपरिमाणायाः गव्यूत्याः** ॥ योजनम् इत्येकं **चतुष्क्रोशपरिमाणस्य योजनस्य** ॥ केचित्तु "चतुर्गव्यूतिर्योजनम्" इति पठन्ति । द्रोणमुखः कर्वटः इत्येकैकं **चतुरष्टशतग्राममध्ये**

गर्भागारापवरके वास्तु स्याद्गृहपोतकः ।
स्यात्प्रासादो देवकुलं पुत्रिका शालभञ्जिका ॥ १ ॥
ओको गृहं पिटं चालो वडभी चन्द्रशालिका ।
कूटागारं चाथ कपिशीर्षं घोटकशीर्षकम् ॥ २ ॥
क्रमशीर्षं चाथ खरकुटी नापितशालिका ।
कुलायिका पक्षिशाला कारावेश्म वधाङ्ककम् ॥ ३ ॥
कायमानं तृणकुटी दर्भटं निभृतं गृहम् ।
कुडङ्गोद्घाटपिठरा इन्द्रकोषस्तु मञ्चकः ॥ ४ ॥
वासागारं भोगगृहं कन्यापत्न्याटनिष्कुटाः ।
देवीगृहं तु वलभी लयनं सौगतालयः ॥ ५ ॥
शिवस्य वृषमण्डप्यां बुधैर्गोपिटकं स्मृतम् ।
वातायनं गृहाक्षं स्याद्वधूटशयनं तथा ॥ ६ ॥

यत्र सुन्दरस्थाने गत्वा सन्निहितजनपदवासिनो जनाः क्रयविक्रयादिना जीवन्ति तादृशस्य ग्रामस्य पुरस्य नगरमात्रस्य वा॥ इह तु केचिद् "द्विशतग्राममध्ये" इति पठन्ति ॥ २४ ॥ इति भूमिवर्गः ॥१॥ गर्भागारम् । गर्भ इवागारम् । अपवारकम् इति द्वे **मध्यवर्त्तिनो वासगृहस्य॥** वास्तु गृहपोतकः इति द्वे **वासगृहभूमेः॥** प्रासादः देवकुलम् इति द्वे **राज्ञां देवानां वा गृहभेदस्य** ॥ पुत्रिका शालभञ्जिका इति द्वे **काष्ठनिर्मितपुत्तलिकायाः** ॥ १ ॥ ओकः गृहम् इति द्वे **गृहस्य** ॥ पिटं चालः इति द्वे **गृहाच्छादनतृणादेः** ॥ वडभी "वलभी" "वडभिः" चन्द्रशालिका कूटागारम् इति त्रीणि **गृहचूडायाः प्रासादाग्रस्थगृहस्य च** ॥ कपिशीर्षम् । कपीनां प्रियं शीर्षमग्रम् । घोटकशीर्षकम् "खोडकशीर्षकम्" ॥२॥ क्रमशीर्षम् इति त्रीणि **कपिशीर्षस्य प्राकाराग्रस्य च** ॥ खरकुटी नापितशालिका इति द्वे **क्षुरकर्मकारकगृहस्य** ॥ कुलायिका "कुशालिका" । कुलायाः पक्षिवासस्थानं विद्यतेऽस्याम् । पक्षिशाला इति द्वे **पक्षिशालायाः** ॥ कारावेश्म । कारैव वेश्म । वधाङ्ककम् इति द्वे **बन्धनागारस्य** ॥३॥ कायमानं तृणकुटी इति द्वे **तृणच्छन्नगृहस्य** ॥ दर्भटम् "दर्भटः" "दर्भतः" इत्येकं **निभृतगृहस्य गुप्तागारस्य** । कुडङ्गः "कुद्रंकः" उद्घाटः पिठरः इति त्रीणि **गृहभेदस्य** ॥ इन्द्रकोषः । इन्द्रस्य कोष इव सुखदायकत्वात् । मञ्चकः इति द्वे **मञ्चस्य** ॥ ४ ॥ वासागारं भोगगृहं कन्याटः पत्न्याटः निष्कुटः इति पञ्च **वासयोग्यगृहस्य** ॥ देवीगृहं वलभी इति द्वे **देवायतनस्य** ॥ लयनं सौगतालयः इति द्वे **बुद्धार्थं कृतस्य गृहस्य** ॥ ५ ॥ गोपिटकम् "गोपुटिकम्" इत्येकं **शिवस्य वृषमण्डप्याः** ॥ बुधैः पण्डितैः स्मृतं ज्ञातम् । वातायनम् । वातस्य अयनं गतिर्येन । गृहाक्षम् । गृहस्य अक्षमिन्द्रियम् । वधूट-

उपशल्योपकण्ठे द्वे कपाटो द्वारकण्टकः।
कवाटश्चाररं कन्थावाटः प्राकार इत्यपि ॥ ७ ॥
इति पुरवर्गः ॥ २ ॥

शैलः स्थावरधातुभृद्धरकुकीलौव्यङ्गकः सानुमा-
ञ्जीमूतः पृथुशेखरश्च कटकी दन्ती नगो निर्झरी।
कुट्टारोऽथ हिमालयो नगपतिर्मेनाधवोमागुरू
कैलासो गणपर्वतश्च रजतप्रस्थः कुबेराचलः ॥ १ ॥
हिरण्यनाभमैनाकसुनाभा हिमवत्सुते।
शैलाग्रे शिखरं शृङ्गं दन्तः प्राग्भारमित्यपि ॥ २ ॥
पूर्वाद्रिर्दिनमूर्धा स्यादस्ताद्रिश्चरमाचलः।
चन्दनाद्रिस्तु मलयः कौञ्चः क्रौञ्चश्च माल्यवान् ॥ ३ ॥
महेन्द्रो मलयः सह्यः शुक्तिमान् गन्धमादनः।
विन्ध्यश्च पारियात्रश्च सप्तैते च कुलाचलाः ॥ ४ ॥

शयनम् इति त्रीणि **गवाक्षस्य** ॥६॥ उपशल्यम् उपकण्ठम्। उपगतं कण्ठम् अस्थिस्थानम्। इति द्वे **ग्रामान्तस्य** ॥ कपाटः द्वारकण्टकः कवाटः अररम् इति चत्वारि **कवाटस्य** ॥ कन्थावाटः प्राकारः इति द्वे **प्राकारस्य** ॥ ७॥ इति पुरवर्गः ॥२॥ शैलः स्थावरः धातुभृत् धरः कुकीलः व्यङ्गकः "व्यंशकः" सानुमान् जीमूतः पृथुशेखरः कटकी दन्ती। दन्तः शिखरमस्त्यस्य अथवा दन्तः सानुरस्त्यस्य। नगः निर्झरी कुट्टारः इति चतुर्दश **पर्वतस्य** ॥ हिमालयः नगपतिः मेनाधवः। मेनायाः हिमालयपत्न्याः धवः स्वामी। उमागुरुः। उमायाः गुरुर्पिता। इति चत्वारि **हिमालयस्य** ॥ कैलासः। केलसः स्फटिकस्तस्येव शुभ्रः। केलं तेनास्यतेऽत्र वा। गणपर्वतः रजतप्रस्थः कुबेराचलः इति चत्वारि **कैलासस्य** ॥ १ ॥ हिरण्यनाभः मैनाकः सुनाभः इति त्रीणि **हिमवत्सुतस्य मैनाकस्य** ॥ शिखरं शृङ्गं दन्तः प्राग्भारम् इति चत्वारि **शैलाग्रस्य पर्वतशिखरस्य** ॥ २ ॥ पूर्वाद्रिः दिनमूर्धा इति द्वे **मलयपर्वतस्य**॥ अस्ताद्रिः चरमाचलः इति द्वे **अस्तपर्वतस्य**॥ चन्दनाद्रिः मलयः इति द्वे **मलयपर्वतस्य** ॥ कौञ्चः क्रौञ्चः माल्यवान् इति त्रीणि **माल्यवत्पर्वतस्य** ॥ कौञ्चक्रौञ्च शब्दयोः पृथक् प्रयोगौ दृष्टौ। उदाहरणे यथा- "सस्मार नूनं दृढकौञ्चकुञ्जभागच्छिदो भार्गवमार्गणस्य" इति जानकीहरणम्। "सशैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्मणा। केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" इति पुराणम् ॥ ३ ॥ महेन्द्रः मलयः सह्यः शुक्तिमान् "शक्तिमान्" गन्धमादनः "ऋक्षः" विन्ध्यः पारियात्रः "पारियात्रकः", "पारिपात्रिकः" इति सप्त **पृथगेकैकमेकैकस्य कुलाचलस्य**। तथाप्याह ग्रन्थान्तरे- 'महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः।

अश्मा पञ्चरुकः पाटः पारटीटश्च मृन्मरुः ।
घर्षणालः शिलापुत्रो गृहाश्मा गृहकच्छपः ॥ ५ ॥
गैरिकं तु वनालक्तं रक्तधातुर्गवेरुकम् ।
प्रत्यश्मा गिरिमृच्चाथ शिलाधातुः शितोपलः ॥ ६ ॥
मृत्कोलो वर्णलेखा च कठिनी कक्खटी खटी ॥ ७ ॥

इति शैलवर्गः ॥ ३ ॥

वार्क्षं वनं तलं तल्कं गुहिलं समजं त्रसम् ।
लीलोद्यानं देवनं स्याद्वीथ्याली पङ्क्तिरावली ॥ १ ॥
वृक्षः कारस्करो गच्छः पलाशी विष्टरः स्थिरः ।
चैत्यो देवतरुर्देवावासे करिभकुञ्जरौ ॥ २ ॥
छायातरुः स्थिरच्छायो वन्दा काकरुहा स्मृताः ।
वनस्पतिर्निर्लुटः स्यात्फुल्लोन्निद्रविकस्वराः ॥ ३ ॥
स्मितोन्मुद्रौ किलिञ्जस्तु सूक्ष्मदार्वथ पल्लवः ।
किशलं किसलं चाथोत्कलिकाङ्करिते समे ॥ ४ ॥

विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः" इति ॥४॥ अश्मा पञ्चरुकः "पवारुकः" पाटः "काटः" पारटीटः मृत् मरुः इति षट् **अश्मनः**॥घर्षणालः।घर्षणाय अलति पर्याप्नोति।शिलापुत्रः।शिलायाः पुत्र इव । इति द्वे **शिलापुत्र इति ख्यातस्य प्रस्तरखण्डस्य**॥ गृहाश्मा गृहकच्छपः । गृहे कच्छप इव । इति द्वे **शिलापट्ट इति प्रसिद्धायाः पेषणशिलायाः** ॥ ५॥ गैरिकं वनालक्तम् । वनस्य अलक्त इव । रक्तधातुः गवेरुकं प्रत्यश्मा गिरिमृद् । गिरेर्मृदिव । इति षट् **गैरिकस्य** ॥ शिलाधातुः शितोपलः "सितोपलः" "श्वेतोपलः" ॥ ६ ॥ मृत्कोलः 'मक्कोलः' इति त्रीणि **पीतवर्णस्य गैरिकभेदस्य** ॥ वर्णलेखा कठिनी कक्खटी खटी इति चत्वारि **वर्णलेखनसाधनायाः खटिकायाः** ॥ ७ ॥ इति शैलवर्गः ॥ ३ ॥ वार्क्षं वनं तलं तल्कं गुहिलं "गुहिनं" । गहनमित्यादयोऽप्यत्र । समजं त्रसम् इति सप्त **वनस्य** ॥ लीलोद्यानम् । लीलार्थमुद्यानम् । देवनम् इति द्वे **क्रीडोद्यानस्य**॥वीथी "रिञ्छः" आली पङ्क्तिः आवली । इकारान्ताः वीथिः आलिः आवलिरप्यत्र।इति चत्वारि पङ्क्तेः॥१॥वृक्षः कारस्करः गच्छः।कचित् "गक्षः" पलाशी विष्टरः स्थिरः इति षट् **वृक्षस्य** ॥ चैत्यः देवतरुः करिभः कुञ्जरः इति चत्वारि **ग्रामादिप्रसिद्धस्य देवावासवृक्षस्य** ॥२॥ छायातरुः।छायार्थमाश्रितः तरुः । स्थिरच्छायः । इति द्वे **छायार्थं निषेवितस्य तरोः** ॥ वन्दा काकरुहा । काकवत् रोहति अन्तरिक्षे मूल्यशून्यतया जायते । इति द्वे **वन्दावृक्षस्य** ॥ वनस्पतिः निर्लुटः "निर्मुटः" इति द्वे **अपुष्पवृक्षस्य** ॥ फुल्लः उन्निद्रः विकस्वरः ॥ ३ ॥स्मितः उन्मुद्रः इति पञ्च **कुसुमितवृक्षस्य** ॥ किलिञ्जः सूक्ष्मदारुः इति द्वे **सूक्ष्मकाष्ठस्य**॥पल्लवः किशलं "विसलं"

गुच्छो गुलुच्छः क्षेपः स्याच्चमरी मञ्जरं न ना ।
मञ्जिश्च गोन्दी गुन्दी च मकरन्दो मरन्दवत् ॥ ५ ॥
वेधकः कण्टके पत्रसूचिद्रुनखवङ्किलाः ।
पिप्पलो वादरङ्गः स्याच्चैत्यद्रुः केशवालयः ॥ ६ ॥
यक्षोऽडुम्बरकं त्वस्य फलेऽथ ग्रहनाशनः ।
देववृक्षो दलेगन्धिः सप्तपर्णः शिरोरुजा ॥ ७ ॥
दन्तकर्षणजम्बीरौ कतकोम्बुप्रसादनः ।
वरुणस्त्वश्मरीघ्नोऽथाध्वगभोग्यो मधुद्रुमः ॥ ८ ॥
कपिचूतोऽम्रातकोऽस्य फले पशुहरीतकी ।
पिकबन्धुस्तु चूतः स्यात्स्त्रीप्रियः षट्पदातिथिः ॥ ९ ॥
मधुदूतो वसन्तद्रुर्महाकालोरुकालकौ ।
शोभाञ्जनस्तु स्त्रीचित्तहारी विद्रधिनाशनः ॥ १० ॥
प्रभाञ्जनोऽथ प्राचीनपनसो गोहरीतकी ।
महाकपित्थो बिल्वश्च कोलिर्गृध्रनखी स्मृता ॥ ११ ॥

किसलम् । किसलयमप्यत्र। इति त्रीणि **पल्लवस्य**॥ उत्कलिका अङ्गारिता इति द्वे **पलाशोत्कलिकायाः** ॥ ४ ॥ गुच्छः गुलुच्छः क्षेपः इति त्रीणि **कलिकाकुसुमादिसमूहवतः स्तबकस्य** ॥ चमरी मञ्जरं मञ्जिः इति त्रीणि **पुष्पमञ्जर्याः** ॥ अत्र मञ्जरशब्दः पुँल्लिङ्गे न भवति । गोन्दी गुन्दी इति द्वे **पुष्परेणोः** ॥ मकरन्दः मरन्दः इति द्वे **पुष्पमधोः** ॥ ५ ॥ वेधकः पत्रसूचिः द्रुनखः । द्रोर्नखः । वङ्किलः इति चत्वारि **कण्टकस्य** ॥ पिप्पलः वादरङ्गः चैत्यद्रुः "चैत्यदुः" केशवालयः ॥ ६ ॥ यक्षः इति पञ्च **पिप्पलस्य** ॥ उडुम्बरकम् "उदुम्बरकम्" इत्येकं **तत्फलस्य** ॥ ग्रहनाशनः "गृहनाशनः" । ग्रहं ग्रहजन्यारिष्टं नाशयति । देववृक्षः दलेगन्धिः "दानगन्धिः" सप्तपर्णः शिरोरुजा इति पञ्च **सप्तपर्णवृक्षस्य** ॥ ७ ॥ दन्तकर्षणः "दन्तहर्षणः" जम्बीरः "जम्भिरः" इति द्वे **दन्तशठवृक्षस्य** ॥ कतकः अम्बुप्रसादनः । अम्बूनि प्रसीदन्त्यनेन । अम्बुप्रसादोऽप्यत्र । इति द्वे **निर्माल्लीति ख्यातस्य कतकवृक्षस्य** ॥ वरुणः अश्मरीघ्नः इति द्वे **वरुणवृक्षस्य** ॥ अध्वगभोग्यः मधुद्रुमः ॥ ८ ॥ कपिचूतः अम्रातकः इति चत्वारि **अम्रातकवृक्षस्य** ॥ पशुहरीतकी । पशूनां हरीतकीव हितकारित्वात् । इत्येकम् **अम्रातकफलस्य** ॥ पिकबन्धुः । पिकानां कोकिलानां बन्धुः । चूतः स्त्रीप्रियः । स्त्रीणां प्रियः षट्पदातिथिः ॥ ९ ॥ मधुदूतः वसन्तद्रुः इति षट् **आम्रस्य** ॥ महाकालः। महांश्चासौ कालश्च । उरुकालकः इतिं द्वे **महाकालस्य** ॥ शोभाञ्जनः । शोभायै आञ्यते । स्त्रीचित्तहारी । स्त्रियाश्चित्तं हरति । विद्रधिनाशनः । विद्रधिं नाशयति ॥ १० ॥ प्रभाञ्जनः

स्यात्पिच्छलदला स्वादुफलाऽथो नागरङ्गकः ।
चक्राधिवासी नारङ्गः किर्मीरस्त्वक्सुगन्धकः ॥ १२ ॥
स्याद्वर्मणः पिच्छिलत्वग्धवस्तु मधुरत्वचः ।
पिशाचद्रुः पीतफलः शाकोटः कर्कशच्छदः ॥ १३ ॥
अर्शोहितस्तु रक्षोघ्नो भल्लातक्यथ शाल्मली ।
दुरारोहा स्मृता पिण्डीतगरः कफवर्धनः ॥ १४ ॥
काकँचिञ्ची तुलाबीजं खदिरो बालपत्रकः ।
यूपद्रुः कुष्ठहृच्चाथ करञ्जो घृतपूर्णकः ॥ १५ ॥
रसायनफला पथ्या शक्रसृष्टा सुधोद्भवा ।
सरलो धूपवृक्षः स्याच्छोणको न्यङ्गुभूरुहः ॥ १६ ॥
चम्पकोषस्तु मुरजफलः स्यात्पनसश्च सः ।
डहुः क्षुद्राम्लपनसो निचुलो रक्तमञ्जरः ॥ १७ ॥

इति चत्वारि **शोभाञ्जनवृक्षस्य** ॥ प्राचीनपनसः गोहरीतकी । गोः हरीतकीव हितकारित्वात् । महाकपित्थः । महांश्चासौ कपित्थश्च । बिल्वः इति चत्वारि **बिल्ववृक्षस्य** ॥ कोलिः गृध्रनखी । गृध्रस्य नख इव पत्रादि अस्याः ॥ ११ ॥ पिच्छिलदला स्वादुफला । स्वादु मधुररसं फलमस्याः । इति चत्वारि **बदर्याः** ॥ नागरङ्गकः चक्राधिवासी नारङ्गः किर्मीरः । किर्मीरं चित्रवर्णो यस्य । त्वक्सुगन्धकः ॥ १२ ॥ वर्मणः पिच्छलत्वक् इति सप्त **नागरङ्गकस्य** ॥ धवः मधुरत्वचः पिशाचद्रुः । पिशाचानां द्रुः । पीतफलः । पीतं पाण्डुवर्णं फलमस्य । इति चत्वारि **धवस्य** ॥ शाकोटः कर्कशच्छदः इति द्वे **शाकोटस्य** ॥ १३ ॥ अर्शोहितः । अर्शसः हितः पथ्यम् । रक्षोघ्नः भल्लातकी इति त्रीणि **भल्लातक्याः** ॥ शाल्मली दुरारोहा इति द्वे **शाल्मल्याः** ॥ पिण्डीतगरः ककवर्धनः इति द्वे **पण्डीतगरस्य** ॥ १४ ॥ काकचिञ्ची । काकवर्णा चिञ्चा प्रान्तभागः फले यस्याः । "काकविञ्चिः" "काकचिञ्चा" तुलाबीजम् । तुलायाः बीजं मूलम् । इति द्वे **काकचिञ्च्याः**॥ खदिरः बालपत्रकः यूपद्रुः कुष्ठहृत् इति चत्वारि **खदिरस्य** ॥ करञ्जः घृतपूर्णकः इति द्वे **करञ्जस्य** ॥ १५ ॥ रसायनफला । रसायनमौषधविशेष इव फलं व्याधिघातकं यस्याः । पथ्या शक्रसृष्टा । शक्रेण सृष्टा निर्मिता । सुधोद्भवा इति चत्वारि **हरीतक्याः** ॥ सरलः धूपवृक्षः इति द्वे **सरलवृक्षस्य** ॥ शोणकः न्यङ्गुभूरुहः । न्यङ्गुरिव भूरुहः । तस्य बहुशृङ्गाकारत्वात् । "न्यङ्कुभूरुहः" इति द्वे **शोणकवृक्षस्य** ॥१६॥ चम्पकोषः "चम्पकालुः" "चम्पकोल्वः" मुरजफलः मुरज इव फलं यस्य । पनसः इति त्रीणि **पनसवृक्षस्य**॥ डहुः "डहूः" क्षुद्राम्लपनसः । आम्लः आम्लरसः पनसः क्षुद्रश्चासौ आम्लपनसश्च । इति द्वे **लकुचस्य** ॥निचुलः रक्तमञ्जरः। रक्तवर्णा मञ्जरी अस्यास्य

निम्बोऽर्कपादपः पुण्यगन्धस्तु कुसुमाधिराट् ।
चयको वरलब्धश्च वकुलः सिंहकेशरः ॥ १८ ॥
सीधुगन्धोऽथ कङ्केलिर्नटः कान्ताङ्घ्रिदोहदः ।
अशोकः पिण्डपुष्पस्तु दाडिमः फलशाडवः ॥ १९ ॥
दाडिम्बः पर्वरुट् च स्यात्स्वाद्वम्लः शुकवल्लभः ।
पिण्डीरोऽथ सुवर्णेभनागाख्यो नागकेशरः ॥ २० ॥
स्यात्पुष्परोचनश्चाऽपि चूर्णं तस्य हरिद्रवः ।
निशिपुष्पा तु शेफाली कुटजः पाण्डुरद्रुमः ॥ २१ ॥
लताशङ्कुतरुः शालो नीपो धाराकदम्बकः ।
कटङ्कटेरी हरिद्रा शिंशपा युग्मपत्रिका ॥ २२ ॥
पटोलं स्याद्राजफलं तस्य मूले तु रम्यकम् ।
सूत्रपुष्पस्तु कार्पासे जीर्णपर्णं कदम्बकम् ॥ २३ ॥

इति द्वे **हिज्जलवृक्षस्य** ॥ १७ ॥ निम्बः अर्कपादपः । अर्कः अर्कवृक्ष इव तीक्ष्णः पादपः। इति द्वे **निम्बवृक्षस्य** ॥ पुण्यगन्धः । पुण्यः पवित्रो गन्धो यस्य । कुसुमाधिराट् । कुसुमानां कुसुमेषु वा अधिराट् । कुसुमाधिपोऽप्यत्र । चयकः वरलब्धः । वरः उत्कर्षः पुष्पेषु लब्धो येन । इति चत्वारि **चम्पकवृक्षस्य** ॥ वकुलः "बकुलः" सिंहकेशरः ॥ १८ ॥ सीधुगन्धः इति त्रीणि **वकुलस्य**॥ कङ्केलिः 'कङ्केल्लिः'। कङ्केम् अप्यत्र । नटः कान्ताङ्घ्रिदोहदः । कान्ताङ्घ्रिः नारीपादस्पर्शः दोहदं पुष्पोद्गमौषधं यस्य । अशोकः इति चत्वारि **अशोकवृक्षस्य** ॥ पिण्डपुष्पः । पिण्डं संहतं पुष्पं यस्य । दाडिमः फलशाडवः ॥ १९ ॥ दाडिम्बः पर्वरुट् । पर्वणि रोहति।स्वाद्वम्लः । स्वादुः अम्लः यस्यः । "स्वाद्वम्लः" शुकवल्लभः । शुकानां वल्लभः प्रियः। पिण्डीरः । पिण्डं पिण्डाकारं फलमीरयति । "दाडिम्बसारपिण्डीरस्वाद्वम्ल शुकवल्लभाः" इति रभसः ॥ इत्यष्टौ **दाडिमस्य** ॥ सुवर्णाख्यः "सुवर्णाख्यः" सुष्ठु वर्णं पत्रं तदाख्या यस्य । इभाख्यः नागाख्यः नागकेशरः ॥ २० ॥ पुष्परोचनः । "स्वर्णेभसर्पाख्यो नागकेशरः षट्पदप्रियः" इति रभसः । इति पञ्च **नागकेशरस्य** ॥ हरिद्रवः । हरिवर्णः द्रवः गुणो यस्य । इत्येकं **नागकेशरचूर्णस्य** ॥ निशिपुष्पा । निशि रात्रौ पुष्पाणि यस्याः । शेफाली इति द्वे **शेफाल्याः**॥ कुटजः पाण्डुरद्रुमः । पाण्डुरश्चासौ द्रुमश्च । इति द्वे **कुटजवृक्षस्य** ॥ २१ ॥ लताशङ्कुतरुः शालः इति द्वे **शालवृक्षस्य** ॥ नीपः धाराकदम्बकः ॥ धाराकालिकः कदम्बः । इति द्वे **नीपवृक्षस्य प्रावृषेण्यकदम्बभेदस्य च** ॥ कटङ्कटेरी हरिद्रा इति द्वे **हरिद्रायाः** ॥ शिंशपा युग्मपत्रिका "गुरुपत्रिका"इति द्वे **शिंशपायाः** ॥ २२ ॥ पटोलं राजफलम् इति द्वे **पटोलस्य** ॥ रम्यकम् इत्येकं **पटोलमूलस्य**॥ सूत्रपुष्पः । सूत्रगर्भं पुष्पं यस्य । इत्येकं **कार्पासस्य** ॥ जीर्णपर्णम् । जीर्णानि पर्णान्यस्य ।

प्रहसन्ती तु यूथीस्याद्वमनः पुष्पचामरः ।
मालतीपुष्पकलिकां सौमनस्यायनीं विदुः ॥ २४ ॥
कुन्दे स्याद्वोरटः पुंसि ग्रैष्मी तु नवमालिका ।
रक्तपिण्डस्त्वोड्रपुष्पः स्यादम्लानः कुरण्टकः ॥ २५ ॥
कन्दलशिलीन्ध्रपुष्पे श्लेष्मघ्ना त्रिपुरमल्लिका प्रोक्ता ।
एरण्डहस्तिकर्णौ प्राचीनामलकवारिबदरे द्वे ॥ २६ ॥
बृहत्पाटलिधुस्तूरौ कदली त्वायतच्छदा ।
स्यात्तन्तुविग्रहा मञ्जिफला वारणवल्लभा ॥ २७ ॥
वातिङ्गणस्तु वार्ताकुर्वार्ताकः शाकबिल्वकः ।
क्लीबे वङ्गं च वार्त्ताकी स्यान्महाबृहतीत्यपि ॥ २८ ॥
कुष्ठं गदाह्वयं मूलं त्वस्य पुष्करमूलकम् ।
वङ्गसेनस्त्वगस्तिद्रुः शुकनासो मुनिद्रुमः ॥ २९ ॥

कदम्बकम् इति द्वे **कदम्बवृक्षस्य** ॥ २३ ॥ प्रहसन्ती "प्रहसन्तिनी" यूथी इति द्वे **यूथिकायाः** ॥ वमनः पुष्पचामरः । पुष्पं चामर इव यस्य । इति द्वे **मदनस्य** ॥ मालतीं ॥ मां लक्ष्मीं शोभां वा लतति वेष्टते । इत्येकं **सौमनस्यायन्याः मालतीपुष्पकलिकायाः** ॥ २४ ॥ वोरटः "वोरवः" इत्येकं **कुन्दस्य** ॥ ग्रैष्मी । ग्रीष्मे भवा । नवमालिका "नवमल्लिका" इति द्वे **नवमाल्लिकायाः** ॥ रक्तपिण्डः । रक्तः पिण्डः यस्य । ओड्रपुष्पः "ओण्ड्रपुष्पः" ओण्ड्रं पुष्पमस्य । इति द्वे **जवावृक्षस्य** ॥ अम्लानः । नास्ति म्लानः अस्य । कुरण्टकः इति द्वे **महामहा इति प्रसिद्धस्य कुरण्टकवृक्षस्य** ॥ २५ ॥ कन्दलं शिलीन्ध्रपुष्पम् इति द्वे **कन्दलीलतापुष्पस्य** ॥ श्लेष्मघ्ना "श्लेष्मघ्नी" त्रिपुरमल्लिका । त्रिपुराणां मल्लिका । इति द्वे **त्रिपुरमल्लिकायाः** ॥ एरण्डः हस्तिकर्णः । हस्तिनः कर्ण इव पर्णमस्य । इति द्वे **एरण्डस्य** ॥ प्राचीनामलकम् । प्राचीनं च तत् आमलकं च । वारिबदरा इति द्वे **पानीयामलक इति ख्यातस्य । प्राचीनामलकस्य** ॥ २६ ॥ बृहत्पाटलिः धुस्तूरः इति द्वे **धुस्तूरवृक्षस्य** ॥ कदली आयतच्छदा । आयताः दीर्घाः छदाः पत्राणि यस्याः । तन्तुविग्रहा मञ्जिफला । मञ्जिः मञ्जरी फले यस्याः । वारणवल्लभा । वारणानां हस्तीनां वल्लभा प्रिया । इति पञ्च **कदलीवृक्षस्य** ॥ २७ ॥ वातिङ्गणः वार्ताकुः वार्ताकः शाकबिल्वकः । शाकोपि बिल्व इव । स्वार्थे कन् प्रत्ययः । वङ्गं वार्ताकी महाबृहती । "वातिङ्गणस्तु वार्तागो वार्ताकः शाकबिल्वकः" इति रभसः । "वार्ता वातिङ्गणे वृत्तौ" इति विश्वः । इति सप्त **वार्ताकोः** ॥ २८ ॥ कुष्ठं गदाह्वयम् इति द्वे **कुष्ठस्य** ॥ पुष्करमूलकम् इत्येकं **कुष्ठमूलस्य** ॥ वङ्गसेनः । वङ्गमिव शुभ्रा सेना पुष्पमस्य । "वङ्गसेनः" अगस्तिद्रुङ्कः । अगस्तिप्रियः द्रुर्वृक्षः । शुकनासः । शुकस्य नासेव

अनलिः कुनली पुत्रञ्जीवस्तु श्लीपदापहः।
छत्रको मल्लिपत्रं स्यात्कुब्जको वारिकण्टकः ॥ ३० ॥
वास्तूकष्टक्कदेशीयः शाकवीरो वनामलः।
शोथजिद्गरहा कालशाकोऽप्यथ महौषधी ॥ ३१ ॥
मही विषघ्नी चक्राङ्गी मत्स्याक्षी हिलमोचिका।
जलब्रह्मी च शालिञ्चे पक्तूरो लोहमारकः ॥ ३२ ॥
पेचुकं पेचुली पेचुर्नाडीचो विश्वरोचनः।
केशराजो नागमारः वपरुर्भृङ्गसोदरः ॥ ३३ ॥
सुनिषण्णं चुञ्चुः पुंसि छत्रपत्रं तमालकम्।
स्थलपद्ममथो देवपली मध्वालुकं विदुः ॥ ३४ ॥
फलपुच्छो वरण्डालुः स्याद्रङ्गेष्टालुकं तु यत्।
श्रीमस्तकः स्वस्तिकः स्याद्राहूच्छिष्टो रसोनकः ॥ ३५ ॥

पत्रमस्य। मुनिद्रुमः। मुनीनां प्रियो मुनिनामको वा द्रुमः ॥ २९ ॥ अनलिः कुनली इति षट् **मुनिवृक्षस्य**॥ पुत्रञ्जीवः "पुत्रजीवः"। पुत्रजीवकोऽप्यत्र। श्लीपदापहः श्लीपदं रोगमपहन्ति। इति द्वे **पुत्रञ्जीववृक्षस्य** ॥ छत्रकः मल्लिपत्रम्। मल्लिरिव पत्रमस्य। इति द्वे **छत्रकवृक्षस्य** ॥ कुब्जकः। इत्येकं महसह इति **ख्यातस्य पुष्पप्रधानवृक्षस्य** ॥ "अशोकात्पुष्पसाहस्रात्सेवतीपुष्पमुत्तमम्। सेवतीपुष्पसाहस्रात्कुब्जकं पुष्पमुत्तमम्" इति नारसिंहम्। वारिकण्टकः। वारिणः कण्टक इव। इत्येकं **शृङ्गाटकस्य** ॥ ३० ॥ वास्तुकः टक्कदेशीयः शाकवीरः। शाकेषु वीरः वीर्याधायकत्वात्। वनामलः। वनश्चासौ अमलश्च। इति चत्वारि **वास्तूकशाकस्य** ॥ शोथजित्। शोथं जयति। शोथजित्; शोथघ्नी शोथहृदादयोऽप्यत्र। इत्येकं **पुनर्नवायाः** ॥ गरहा कालशाकः इति द्वे **श्राद्धीयस्य कालशाकस्य** ॥ महौषधी ॥ ३१ ॥ मही विषघ्नी चक्राङ्गी "चक्राङ्गा" चक्रमङ्गमस्य। इति चत्वारि **कटुरोहिण्याः** ॥ मत्स्याक्षी। मत्स्याक्षीव पुष्पमस्याः। हिलमोचिका जलब्रह्मी इति त्रीणि **हिलमोचिका इति ख्यातायाः जलब्रह्म्याः** पक्तूरः "पकूरः" लोहमारकः। लोहं मारयति जारयति। इति द्वे **शालिञ्चशाकस्य** ॥ ३२ ॥ पेचुकं "केचुकं" पेचुली पेचुः नाडीचः "नारीचः" विश्वरोचनः इति पञ्च **नाडीचशाकस्य** ॥ केशराजः। केशा राजन्तेऽनेन। नागमारः। नागं हस्तिनं मारयति। वपरुः "वररुः" भृङ्गसोदरः "भङ्गसोदरः" इति चत्वारि **भृङ्गराजस्य** ॥ ३३ ॥ सुनिषण्णम्। सुष्ठु निषण्णं स्वप्नो यस्मात्। चुञ्चुः इति द्वे **सुनिषण्णशाकस्य** ॥ चुञ्चुशब्दः पुंलिङ्गः। छत्रपत्रम्। छत्रमिव पत्रमस्य। तमालकं स्थलपद्मम् इति त्रीणि **स्थलपद्मस्य**॥ देवपली "देवपती" मध्वालुकः मधुर्मधुर आलुर्यस्य। इति द्वे **मध्वालिवति ख्यातस्य मूलभेदस्य** ॥ ३४ ॥ फलपुच्छः। फलं पुच्छमिव यस्य। वरण्डालुः इति द्वे **वरण्डालिवति प्रसिद्धस्य एरण्डवृक्ष-**

कुष्माण्डस्तु घृणावासस्तिमिषो ग्राम्यकर्कटी ।
वालुकी कर्कटी वारुर्मूत्रला रोमशा च सा ॥ ३६ ॥
स्याच्चेलानश्चित्रफलः सुखाशो राजतेनिशः ।
लतापनसनाटाम्लौ सेटुरूर्ध्वासितस्तु यः ॥ ३७ ॥
परारुः कारवेल्लोऽसौ गोडुम्बा राजचिर्भटः ।
मृत्युबीजस्तु वंशः स्यात्केतकः क्रकचच्छदः ॥ ३८ ॥
दक्कटो बहुमूलः स्यात्करीरे वेणुकर्करः ।
काशोऽश्ववालः काकेक्षुर्वनहासश्च जन्तुला ॥ ३९ ॥
गुडदारुर्मधुतृणं स्यादिक्षुरसिपत्रकः ।
खारोदको नारिकेलः करकाम्भाः शिरःफलः ॥ ४० ॥

विशेषस्य ॥ रक्तेष्टालुकं श्रीमस्तकः स्वस्तिकः इति त्रीणि **रक्तेष्टालिवति ख्यातस्य सितावरशाकस्य**॥राहूच्छिष्टः । राहोः उच्छिष्टः । रसोनकः इति द्वे **लसुनस्य** ॥ ३५॥ कुष्माण्डः । कूष्माण्डोऽप्यत्र । घृणावासः तिमिषः ग्राम्यकर्कटी । ग्राम्या च सा कर्कटी च । इति चत्वारि **कुष्माण्डस्य**॥ वालुकी कर्कटी वारुः मूत्रला रोमशा इति पञ्च **कर्कट्याः**॥३६॥ चेलानः "चेलाळः" चित्रफलः । चित्रं फलं यस्य । सुखाशः । सुखेनाऽश्यते । राजतेनिशः "राजतामिषः" "राजतेमिषः" लतापनसः । लतायां पनसमिव स्थूलं फलमस्य । नाटाम्लः "नाटाम्रः" सेटुः "सेदुः" इति सप्त **राजतिनिश इति ख्यातस्य सुखाशवृक्षस्य**॥ ऊर्ध्वासितः । ऊर्ध्वमुपरिभागे असितः कृष्णः आसितो वा ॥ ३७ ॥ परारुः "पवारुः" कारवेल्लः । कारं वेल्लते । गोडुम्बा । गां भूमिं तुम्बति अर्दते । राजचिर्भटः "राजचिर्चिटः" "राजचिर्भटी"अप्यत्र ।इति पञ्च **कारवेल्लस्य**॥मृत्युबीजः ।मृत्युं दाह एव बीजं कारणमस्य। तस्य दाहादेवाङ्कुरादेरुद्भवः । वंशः इति द्वे **वंशस्य** ॥ केतकः क्रकचच्छदः इति द्वे **केतकस्य**॥३८॥दक्कटः बहुमूलः । बहूनि मूलानि यस्य । इति द्वे **बहुमूल इति प्रसिद्धस्य शिग्रोः** ॥ वेणुकर्करः "वेणुकर्कटः" इत्येकं **करीरस्य** ॥ अन्यत्र करवीरस्येति दृश्यते । काशः अश्ववालः । अश्वस्य वालः केशर इव तदाकारपुष्पत्वात् । काकेक्षुः वनहासः । वनस्य हास इव प्रकाशकत्वात् । "वनहारः" जन्तुला "चुर्णला" । जन्तून् कीटान् लाति । इति पञ्च **काश इति ख्यातस्य काशतृणस्य** ॥ ३९ ॥ गुडदारुः । गुडप्रधानो दारुः शाकः । मधुतृणम् । मधु च तत्तृणं च । वा पुंस्त्वमपि । इक्षुः असिपत्रकः । असिरिव तीक्ष्णं पत्रमस्य । कन् वा । असिपत्रोऽप्यत्र । इति चत्वारि **इक्षोः** ॥ खारोदकः "खानोदकः" नारिकेलः। नालिः केन वायुना जलेन वा इलति चलति। रलयोरैक्यम् । करकाम्भाः । करकाया अम्भ इवाम्भो यस्य । शिरःफलः । शिर इव फलमस्य ।

सुरञ्जनो गोपदलो राजतालश्छटाफलः ।
करमट्टस्तन्तुसारो गुवाको कोट इत्यपि ॥ ४१ ॥
रामपूगस्तु कामीनो मुनिपूगः सुरेवटः ।
पूगरोटस्तु हिन्तालः क्लीबं किरीटि तत्फलम् ॥ ४२ ॥
घनामयः स्यात्खर्जूरो द्वौ तु काचिमभञ्जरू ।
तरौ देवकुलोद्भूते दूर्वा तु हरितालिका ॥ ४३ ॥

इति वनौषधिवर्गः ॥ ४ ॥

सिंहः कण्ठीरवो भीमविक्रान्तः करिमाचलः ।
पञ्चशिखश्च शैलाटः पारीन्द्रः श्वेतपिङ्गलः ॥ १ ॥
मरुत्प्लवश्च नादोऽस्य चुक्कारः क्ष्वेडितं च तत् ।
उत्पादकस्तु शरभः शार्दूलोऽष्टापदश्च सः ॥ २ ॥
अथ हिंस्रपशुर्व्याडः श्वापदः शिबिरित्यपि ।
बाध्रीणसस्त्वेकचरो गणोत्साहश्च गण्डकः ॥ ३ ॥
हिंसारुः श्वापदो व्याघ्रे महिषस्तु रजस्वलः ।
दंशभीरुर्जरन्तश्च लालिको यमवाहनः ॥ ४ ॥

इति चत्वारि **नारिकेलस्य** ॥ ४० ॥ सुरञ्जनः । सुरञ्जयति । गोपदलः । गोपदमात्रस्थानं लाति । राजतालः । राज्ञस्ताल इव प्रियः । छटाफलः । छटेव परस्परान्वितं फलमस्य । करमट्टः तन्तुसारः गुवाकः कोटः "झोरः" इत्यष्टौ **पूगवृक्षस्य** ॥ ४१ ॥ रामपूगः । रामः अभिरामः पूगः । कामीनः । काममनुगच्छति । मुनिपूगः सुरेवटः इति चत्वारि **रामपूग इति ख्यातस्य पूगभेदस्य॥** पूगरोटः हिन्तालः । हीनस्तालो यस्मात्। इति द्वे **हिन्तालस्य ॥** किरीटि "तिरीटि" इत्येकं **हिन्तालफलस्य** ॥ ४२ ॥ घनामयः खर्जूरः इति द्वे **खर्जूरस्य ॥** काचिमः भञ्जरुः इति द्वे **देवकुलोद्भूतस्य तरोः ॥** दूर्वा हरितालिका । हरेस्तालो हस्ततालो यस्याम् । इति द्वे **दूर्वायाः** ॥ ४३ ॥ इति वनौषधिवर्गः ॥ ४ ॥ सिंहः कण्ठीरवः । कण्ठ्यां रवो यस्य । भीमविक्रान्तः । भीमो विक्रान्तो यस्य । करिमाचलः पञ्चशिखः । पंच शिखा यस्य । शैलाटः । शैलं पर्वतमटति।पारीन्द्रः। पारी इन्द्र इव । "पारीन्द्रः" श्वेतपिङ्गलः । देहेन श्वेतः जटया पिङ्गलः ॥१॥ मरुत्प्लवः "मरुत्पवः" इति नव **सिंहस्य॥** चुक्कारः क्ष्वेडितं इति द्वे **सिंहनादस्य॥**उत्पादकः । ऊर्ध्वस्थिताः पादाः यस्य। अस्य पृष्ठस्थ चतुश्चरणत्वादूर्ध्वपादत्वम् । तस्य लक्षणम् "अष्टपादूर्द्ध्वनयन ऊर्द्ध्वपादचतुष्टयः" इत्युक्तम् । शरभः शार्दूलः अष्टापदः । अष्टसु धातुषु पदं प्रतिष्ठा यस्य । इति चत्वारि **शरभमृग इति ख्यातस्य गजारातेः** ॥२॥ हिंस्रपशुः व्याडः श्वापदः । शुन इवापदस्मात् । शिबिः इति चत्वारि **हिंस्रपशोः ॥** बाध्रीणसः "बाध्रीनसः" एकचरः । एकः सन् चरति । गणोत्साहः गण्डकः इति चत्वारि **गण्डकपशोः** ॥ ३ ॥ हिंसारुः श्वापदः व्याघ्रः इति त्रीणि **व्याघ्रस्य ॥** महिषः रज-

अथ शूकरे वनाहिरदन्तायुधवक्रवज्रदीर्घरदाः ।
सूचीरोमा बहुसूराखनिकः स्थूलनासिको भूक्षित् ॥ ५ ॥
एणः कुरङ्गमो रिश्यः स्यादृश्यश्चारुलोचनः ।
गोलाङ्गूले कपित्थास्यदधिशोणनगाटनाः ॥ ६ ॥
किखिश्च हूरवस्तु स्याच्छृगालो घोररासनः ।
लोपाशो मृतमत्तश्च वनश्वाऽथशृगालिका ॥ ७ ॥
लोपाशिका दीप्तजिह्वा किखिरुल्कामुखी च सा ।
विडालः कुन्दमो नक्तचारी दीप्ताक्षजाहकौ ॥ ८ ॥
शशकस्तु वनाखुः स्यात्खट्टाशी पूतिशालिका ।
गवयस्तु गवानूक एडकः शिशुवाह्यकः ॥ ९ ॥
वनच्छागोऽथ गन्धौतुः खट्टाशो वनवासनः ।
उन्दुरुस्तुटुमो रन्ध्रबभ्रुर्दीना तु मूषिका ॥ १० ॥

स्वलः दंशभीरुः। दंशात् वनमक्षिकायाः भीर्यस्य। जरन्तः लालिकः "नालिकः" यमवाहनः। यमं वाहयति। स्थानात् स्थानान्तरं नयति। इति षट् महिषस्य॥४॥ वनाहिरः दन्तायुधः। दन्ता आयुधा इव यस्य। वक्ररदः वज्ररदः। वज्रदन्तादयोऽप्यत्र। दीर्घरदः"दीर्घरतः"दीर्घौ रदौ यस्य। सूचीरोमा सूची इव रोमाणि यस्य। बहुसूः आखनिकः स्थूलनासिकः। स्थूला नासिका यस्य। भूक्षित् इति दश शूकरस्य॥५॥ एणः कुरङ्गमः। कौ रङ्गं मिमीते। रिश्यः ऋश्यः चारुलोचनः। चारू लोचने यस्य। इति पञ्च कुरङ्गस्य॥ तस्य लक्षणम् "कुरङ्गमीषत्ताम्रः स्याद्धरिणाकृतिको महान्" इत्युक्तम्। गोलाङ्गूलः। गोरिव कृष्णं लाङ्गूलमस्य। कपित्थास्यः। कपित्थमिवास्यं यस्य। दधिशोणः नगाटनः। नगेषु वृक्षेषु अटति॥ ६॥ किखिः इति पञ्च वानरस्य॥ हूरवः। हूहू इति रवो यस्य। शृगालः घोररासनः "घोरवाशनः" घोरं रासनं शब्दोऽस्य। लोपाशः "लोपाकः" मृतमत्तः वनश्वा। वने श्वा इव। इति षट् शृगालस्य॥ शृगालिका॥ ७॥ लोपाशिका "लोमालिका" दीप्तजिह्वा। दीप्ता ज्वलन्ती जिह्वा यस्याः। तस्या हि रात्रौ जिह्वा ज्वलतीति प्रसिद्धम्। किखिः उल्कामुखी इति पञ्च शृगालिकायाः॥ विडालः कुन्दमः नक्तचारी। नक्ते रात्रौ चरतीति। दीप्ताक्षः। दीप्तमक्षं यस्य। जाहकः इति पञ्च विडालस्य॥ ८॥ शशकः वनाखुः। वने आखुरिव। इति द्वे शशकस्य॥ खट्टाशी "खट्टासी" पूतिशालिका "पूतिशारिजा"। इति द्वे खट्टाश्याः॥ गवयः गवानूकः "गवालुकः" इति द्वे गवानूकस्य॥ एडकः शिशुवाह्यकः॥९॥ वनच्छागः इति त्रीणि एडकस्य॥ गन्धौतुः। गन्धश्चासौ ओतुश्च गन्धेन युक्त ओतुर्वा। खट्टाशः वनवासनः इति त्रीणि खट्टाशस्य॥ उन्दुरुः। उन्दुरः उन्दूरः उन्दुरुश्चाप्यत्र। तुटुमः। "तुटुमो हारमहार्यवेपथुः" इति जानकीहरणम्। रन्ध्रबभ्रुः इति त्रीणि मूषिकस्य॥ दीना

स्याच्चिकी वेश्मनकुलः पुंवृषो गन्धमूषिकः ।
स्याद्वेदारः क्रकचपात्कृकलाशस्तृणाञ्जनः ॥ ११ ॥
प्रतिसूर्योऽप्याञ्जनस्तु चित्रकोलो हलाहलः ।
कारस्कराटिका कर्णजलौका स्यादथो वटिः ॥ १२ ॥
उत्पादिको देहिका स्यादष्टपादस्तु किन्तनुः ।
प्रासादकुक्कुटो झिल्लीकण्ठो गृहकपोतकः ॥ १३ ॥
पारावतोऽथ शक्राख्यो दिवान्धो वक्रनासिकः ।
हरिनेत्रो दिवाभीतो नखाशी पीयुघर्घरौ ॥ १४ ॥
काकभीरुर्नक्तचारो कणाटीनस्तु खञ्जनः ।
काकच्छद: खञ्जखेलस्तातलो मुनिपुत्रकः ॥ १५ ॥
भद्रनामा रतनिधिः काष्ठकुट्टः शतच्छदे ।
दीर्घपात्रस्तु कङ्कः स्याद्गलेगण्डस्तु मर्कटः ॥ १६ ॥
चातके बभ्रुवापीहघनतोलत्रिशङ्कवः ।
वर्षप्रियोऽथ मेधावी चिरिः कीरः पलाशनः ॥ १७ ॥

मूषिका इति द्वे **मूषिकायाः** ॥ १० ॥ चिकः "चिकः" वेश्मनकुलः । वेश्मनि नकुलः । पुंवृषः गन्धमूषिकः इति चत्वारि **छुछुन्दर्याः**॥ वेदारः क्रकचपाद् । क्रकचमिव पादौ यस्य । वा अन्त्यलोपः । "क्रकचपादः" कृकलाशः तृणाञ्जनः ॥ ११ ॥ प्रतिसूर्यः । प्रतिरूपः सूर्यः यस्य । इति **पञ्चकृकलाशस्य**॥ आञ्जनः "अञ्जिनामा" चित्रकोलः हलाहलः इति त्रीणि **गृहगोधिकेति ख्यातायाः पल्ल्याः** ॥ कारस्करीटिका कर्णजलौका । कर्णजलूका अप्यत्र । इति द्वे **कर्णजलौका इति ख्यातायाः शतपद्याः** ॥ वटिः ॥ १२ ॥ उत्पादिकः देहिका । इति त्रीणि **उत्पादिकस्य**॥ अष्टपादः । अष्टपाद् अष्टपदोऽप्यत्र। किन्तनुः इति द्वे **लूतेति-ख्यातस्य कीटभेदस्य** ॥ प्रासादकुक्कुटः झिल्लिकण्ठः गृहकपोतकः ॥ १३ ॥ पारावतः इति चत्वारि **पारावतस्य** ॥ शक्राख्यः । शक्रस्येवाख्या यस्य । दिवान्धः । दिवा दिवसे अन्धः, दर्शनाभावात् । वक्रनासिकः हरिनेत्रः । हरी पिङ्गलवर्णे नेत्रे यस्य । दिवाभीतः । दिवा दिवसे भीतः । नखाशी पीयुः घर्घरः ॥ १४ ॥ काकभीरुः । काकात् भीरुर्यः । नक्तचारी । नक्ते रात्रौ चरतीति । इति **दश उलूकस्य** ॥ कणाटीनः खञ्जनः काकच्छदः । काकस्य च्छदः पक्ष इव छदो यस्य । "काकच्छदिः" खञ्जखेलः । खञ्ज इव खेलति । तातलः "तातनः" मुनिपुत्रकः । मुनेः पुत्रः ॥ १५ ॥ भद्रनामा रतनिधिः इत्यष्टौ **खञ्जनस्य** ॥ काष्ठकुट्टः । काष्ठं कुट्टयति छिनत्ति । इत्येकं **शतच्छद इति प्रसिद्धस्य काष्ठकुट्ट-पक्षिणः** ॥ दीर्घपादः । दीर्घौ पादौ यस्य । कङ्कः इति द्वे **कङ्कस्य** ॥ गलेगण्डः । गले गण्ड इव यस्य । मर्कटः इति द्वे **गलेगण्डपक्षिणः** ॥ १६ ॥ बभ्रुः वापीहः घनतोलः

कुक्कुटस्तु विवृत्ताक्षो रात्रिवेदी कलाविकः ।
उषाकलोऽथ ताम्राक्षः काकपुष्टः कुहूमुखः ॥ १८ ॥
मधुकण्ठो घोषयित्नुः कामतालः सुतार्दनः ।
काको रतज्वरः सूत्री श्रावको गूढमैथुनः ॥ १९ ॥
कारवः परमृत्युश्च लुण्टाको मौकुलिर्द्विकः ।
शक्रजः सत्यवाक्काणोऽपकृष्टो नगरीवकः ॥ २० ॥
ऐन्द्रिश्च नाडीजङ्घोऽथ गृध्रः स्याद्दूरदर्शनः ।
शितिकण्ठस्तु दात्यूहः काकमद्गुः कगेटुरः ।
चिरम्भणस्तु चिल्लः स्यात्खभ्रान्तिः कण्ठनीडकः ॥ २१ ॥
सूक्ता मदनशलाका चित्राक्षी शालिकाऽवचण्डा च ।
शकुनज्ञा तु ज्येष्ठा गृहोलिकाऽटाट्टनी मूली ॥ २२ ॥
दीर्घजङ्घो निशैडः स्याद्वकोटः शुक्लवायसः ।
कङ्केरुर्द्वारबलिभुक्छिखी चन्द्रविहङ्गमः ॥ २३ ॥

त्रिशङ्कुः।त्रिषु अवयवेषु शङ्कुरिव यस्य । वर्षप्रियः । वर्षाः प्रियाअस्य। इति पञ्च **चातकपक्षिणः** मेधावी । मेधाऽस्त्यस्य । चिरिः "चिमिः" कीरः पलाशनः "फलाशनः" पलादनोऽप्यत्र। "कीरस्तु शुको रक्तपादः पलादनः" इति हैमः । इति चत्वारि **कीरपक्षिणः** ॥ १७ ॥ कुक्कुटः विवृत्ताक्षः । विवृत्तमक्षं यस्य । रात्रिवेदी कलाविकः उषाकलः इति पञ्च **उषाकल इतिख्यातस्य कुक्कुटस्य** ॥ ताम्राक्षः । ताम्रमक्षं यस्य । काकपुष्टः । काकेन पुष्टः यः । कुहूमुखः । कुहूरिति शब्दः मुखे यस्य ॥ १८ ॥ मधुकण्ठः । मधु मधुरः कण्ठो यस्य । घोषयित्नुः कामतालः सुतार्दनः । सुतस्य अर्दनं यस्य । "सुतर्दनः" इति सप्त **कोकिलपक्षिणः**॥काकः रतज्वरः "रतजरः" । रते रमणे ज्वरः यस्य । सूत्री श्रावकः गूढमैथुनः । गूढं केनाप्यदृश्यं मैथुनं यस्य ॥ १९ ॥ कारवः । का इति रवो यस्य । परमृत्युः लुण्टाकः मौकुलिः "मौद्गलिः" द्विकः । द्वौ कौ ककारौ यत्र । शक्रजः । शक्रात् जायते । सत्यवाक् । सत्यं वाक् यस्य । काणः अपकृष्टः "अपकृष्णः" नगरीवकः ॥ २० ॥ ऐन्द्रिः नाडीजङ्घः । नाडी जङ्घा यस्य । इति सप्तदश **काकस्य** ॥ गृध्रः दूरदर्शनः । दूरात् पश्यति । "दूरदर्शिनिः" दूरदृगप्यत्र । इति द्वे **गृध्रस्य** ॥ शितिकण्ठः । शितिः कण्ठो यस्य । दात्यूहः काकमद्गुः कगेटुरः "कचाटुरः" इति चत्वारि **दात्यूहस्य** ॥ चिरम्भणः चिल्लः "चिल्लुः" खभ्रान्तिः कण्ठनीडकः इति चत्वारि **चिल्लस्य** ॥२१॥ सूक्ता मदनशलाका चित्राक्षी चित्रमक्षमस्याः।शालिका शारिकाऽप्यत्र।अवचण्डा इति पञ्च **शारिकायाः**॥ शकुनज्ञा ज्येष्ठा गृहोलिका अटाट्टनी "अट्टनी" मूली इति पञ्च **गृहगोधिकायाः** ॥ २२ ॥ दीर्घजङ्घः दीर्घजङ्घे यस्य । निशैडः "निशौतः" वकोटः शुक्लवायसः कङ्करुः "कङ्केरुः" वारबलिभुक् "दारुबलि-

बकेरुका बलाका स्यात्कुररो मत्स्यनाशनः ।
द्वन्द्वचारी चक्रवाकः सारसस्तु कलाङ्कुरः ॥ २४ ॥
गोनर्दश्चित्रपक्षस्तु तित्तिरिः स्यात्कपिञ्जलः ।
लघुमांसो मयूरस्तु चन्द्रकी चित्रमेखलः ॥ २५ ॥
प्रचलाकी सितापाङ्गशिखावलगलव्रताः ।
मार्जारकण्ठोऽथ तिलमयूरः स्यात्कुरुण्टकः ॥ २६ ॥
झम्पाशनो मीनरङ्को नासाच्छिन्ना तु पूर्णिका ।
पिपीलिका तु हारी स्याद्यमकीटस्तु घुर्घुरः ॥ २७ ॥
स्यान्मर्कटस्तु शलक आशाबन्धोऽस्य जालके ।
फालखेलागरुद्बोधा भारती व्योमनासिका ॥ २८ ॥
चञ्चुसूचिस्तु सुगृहः पीततुण्डोऽथ सर्षपी ।
हापुत्रिका खञ्जनिका तुलिकास्फोटिके समे ॥ २९ ॥
करटुर्व्याधनः कर्चूनरः कूणिश्च वाग्गुदः ।
वर्तिका विष्णुलिङ्गी स्याल्लावको लघुजङ्गलः ॥ ३० ॥

भुक्'' शिखी चन्द्रविहङ्गमः । चन्द्रश्चासौ विहङ्गमः । इत्यष्टौ बकस्य ॥२३॥ बकेरुका बलाका इति द्वे **बलाकायाः** ॥ कुररः मत्स्यनाशनः । इति द्वे **कुररस्य** ॥ द्वन्द्वचारी. चक्रवाकः इति द्वे **चक्रवाकस्य** ॥ सारसः कलाङ्कुरः ॥२४॥ गोनर्दः ''गोमर्दः'' इति त्रीणि **सारसपक्षिणः** ॥ चित्रपक्षः । चित्रं पक्षमस्य । तित्तिरिः तित्तिरोऽप्यत्र । कपिञ्जलः । कमिव पिञ्जते । लघुमांसः । लघु मांसमस्य । इति चत्वारि **तित्तिरपक्षिणः** ॥ मयूरः चन्द्रकी। चन्द्रका अस्यास्ति । चित्रमेखलः । चित्रा मेखलास्य ॥ २५ ॥ प्रचलाकी सितापाङ्गः ''शिखापाङ्गः'' । सितमपाङ्गं यस्य । शिखावलः । शिखास्त्यस्य । गलव्रतः मार्जारकण्ठः ''मार्जारकः'' । मार्जालकोऽप्यत्र । इत्यष्टौ **मयूरस्य** ॥ तिलमयूरः कुरुण्टकः ''गुरण्डकः'' इति द्वे **तिलमयूरस्य** ॥२६॥ झम्पाशनः ''मत्स्याशनः'' मीनरङ्कः इति द्वे **मीनरङ्कस्य** ॥ नासाच्छिन्ना पूर्णिका इति द्वे **पूर्णिकायाः**॥ पिपीलिका हारी ''होरा'' इति द्वे **पिपीलिकायाः**। यमकीटः । यमस्य कीटः । घुर्घुरः । घुरित्यव्यक्तं ध्वनिं घुरति । इति द्वे **घुर्घुरस्य** ॥ २७॥ मर्कटः।शलकः । इति द्वे **मर्कटस्य** ॥ आशाबन्धः । आशां दिशां बध्नाति । इत्येकं **मर्कटजालस्य** ॥ फालखेला गरुद्बोधा ''गरुद्योधी'' भारती व्योमनासिका ''व्योमलासिका'' व्योम इव नासिका यस्याः । इति चत्वारि **भारत्याः** ॥ एषा भारती तु पक्षिभेदे स्यात् ॥२८॥ चञ्चुसूचिः । चञ्चुः सूचिरिव यस्य । सुगृहः पीततुण्डः ''पीतमुण्डः'' पीतम् ईषद्रक्तं तुण्डं यस्य । इति त्रीणि **कारण्डवपक्षिणः** ॥ सर्षपी ''सर्षपा'' हापुत्रिका खञ्जनिका तुलिका स्फोटिका ''स्फाटिका'' इति पञ्च **हापुत्रिकायाः** ॥ २९ ॥ करटुः ''करटः''

सरःकाकस्तु हंसः स्याज्जालपात्पुरुदंशकः ।
गोभण्डीरः पङ्कीरः कोयष्टिर्जलकुक्कुभः ॥ ३१ ॥
जीवञ्जीवो विषमृत्युर्जीवजीवोऽथ मक्षिका ।
माचिका भम्भराली च दंशः स्याद्भाम्भरालिकः ॥ ३२ ॥
भाङ्कारी चर्मचट्यां तु जतुनी गृहमाचिका ।
विषसृक्को भृङ्गरोलो वरोलस्तृणषट्पदः ॥ ३३ ॥
वरटी तु वरोली स्याद्ब्राह्मण्यथ तमोमणिः ।
ध्वान्तोन्मेषश्च खद्योतो ज्योतिर्बीजो निमेषरुक् ॥ ३४ ॥
भ्रमरश्चञ्चरीकः स्याद्रोलम्बो मधुसूदनः ।
इन्दिन्दिरः पुष्पकीटो मधुदो मधुकेशटः ॥ ३५ ॥
रेणुवासोऽथ मशको घोषो रणरणश्च सः ।
पक्षी तु नाडीचरणः स्याच्चञ्चुभृदनेकजः ॥ ३६ ॥
स्युः खगोत्पतवारङ्ककण्ठाग्निव्योमचारिणः ।
युगलद्वन्द्वयुग्मानि युगं यमलयामले ॥ ३७ ॥

इति सिंहादिवर्गः ॥ ५ ॥

व्याधनः कर्चूर्नरः इति त्रीणि **करटपक्षिणः** ॥ कूणिः वाग्गुदः "वाग्गदः" इति द्वे **वाग्गुदस्य** ॥ वर्तिका विष्णुलिङ्गी । विष्णोर्लिङ्गं लक्षणमस्याः । इति द्वे **वर्तिकायाः** ॥ लावकः लघुजङ्गलः इति द्वे **लावकस्य** ॥ ३० ॥ सरःकाकः । सरसि जले काक इव । हंसः । जालपाद् । जाल इव पादावस्य । "जालपादिः" पुरुदंशकः । उरुदंशकः । उरुर्महान् दंशको यस्य । इति चत्वारि **हंसस्य** ॥ गोभण्डीरः पङ्कीरः । पङ्के कीर इव । कोयष्टिः जलकुक्कुभः इति चत्वारि **जलकुक्कुभस्य** ॥ ३१ ॥ जीवञ्जीवः जीवान् जीवयति दर्शनेन तृप्तिकरत्वात् । विषमृत्युः जीवजीवः । जीवान् जीवयति । इति त्रीणि **चकोरपक्षिणः** ॥ मक्षिका माचिका भम्भराली इति त्रीणि **मक्षिकायाः** ॥ दंशः भाम्भरालिकः "भ्रमरालिका" ॥ ३२ ॥ भाङ्कारी "भङ्कारी" इति त्रीणि **दंशस्य** ॥ चर्मचटी जतुनी गृहमाचिका इति त्रीणि **चर्मचट्याः** ॥ विषसृक्कः भृङ्गरोलः । भृङ्ग इव रौति । वरोलः तृणषट्पदः इति चत्वारि **भृङ्गरोलस्य** ॥ ३३ ॥ वरटी वरोली "वराली" ब्राह्मणी इति त्रीणि **वरट्याः** ॥ तमोमणिः । तमसि अन्धकारे मणिरिव । ध्वान्तोन्मेषः । ध्वान्ते अन्धकारे उन्मेषोऽस्य । खद्योतः ज्योतिर्बीजः । ज्योतेः बीजं कारणं यस्य । निमेषरुक् इति पञ्च **खद्योतस्य** ॥ ३४ ॥ भ्रमरः चञ्चरीकः रोलम्बः मधुसूदनः। मधु माध्वीकं सूदयति भक्षयति। इन्दिन्दिरः पुष्पकीटः पुष्पस्य कीट इव । मधुदः "मधुद्रोक्" मधुकेशटः ॥ ३५ ॥ रेणुवासः "वेणुवासः" । रेणौ वासोऽस्य । इति नव **भ्रमरस्य** ॥ मशकः घोषः रणरणः इति त्रीणि **मशकस्य** ॥ पक्षी नाडीचरणः चञ्चुभृत् अनेकजः ॥ ३६ ॥ खगः खे । आकाशे गच्छतीति । उत्पतः वारङ्कः

स्त्री वधूर्योषिता रामा मण्डयन्ती वधूजनः।
कन्यकाऽलकनन्दा सा दूषिता धर्मकारिणी ॥ १ ॥
सस्वेदा चाथ तरुणी दिक्करी धनिका च सा।
मरुण्डोच्चललाटा स्यात्सश्मश्रुर्नरमानिनी ॥ २ ॥
स्नुषा वधूटी मधुरनिस्वना हंसगद्गदा।
सुखोष्णशीता तुहिनग्रीष्मयोर्वरवर्णिनी।
क्रोधना भामिनी चण्डी दारुस्त्रीशालभञ्जिका ॥ ३ ॥
विरक्ता दुर्भगा सप्तपुत्रसूः सुतवस्करा।
पतिव्रतैकपत्नी स्याद्विधवा जालिका मता ॥ ४ ॥
विश्वस्ता लञ्जिनी तु स्याल्लञ्जिका कलकूजिका।
वेश्या शूला वारवाणिर्झर्झराप्यथ कुट्टिनी ॥ ५ ॥
इज्या स्याद्रततालो च घटदासी गणेरुका।
मलिष्ठा सरजाः षाण्मातुरद्वैमातुरौ समौ ॥ ६ ॥

कण्ठाग्निः। कण्ठे अग्निः पाकाग्निर्यस्य। व्योमचारी। व्योम्नि चरति। इति नव **पक्षिणः** ॥ युगलं द्वन्द्वं युग्मं युगं यमलं यामलम् इति षड् **युग्मस्य** ॥ ३७ ॥ इति सिंहादिवर्गः ॥ ९ ॥

स्त्री वधूः योषिता रामा मण्डयन्ती वधूजनः इति षट् **स्त्रियाः** ॥ कन्यका अलकनन्दा इति द्वे **कन्यायाः** ॥ "कन्यका दशमे प्रोक्ता" इति स्मृतिवचनात्। अयं तु कन्यकाशब्दो दशवर्षायां कुमार्यां वर्तते। दूषिता "भूषिता" धर्मकारिणी ॥ १ ॥ सस्वेदा इति त्रीणि **दूषितादिस्त्रीविशेषाणाम्** ॥ तरुणी दिक्करी धनिका इति त्रीणि **तरुण्याः** ॥ मरुण्डा उच्चललाटा। उच्चं ललाटं यस्याः। इति द्वे **उच्चललाटायाः** ॥ सश्मश्रुः। सह श्मश्रुणा या वर्तते। नरमानिनी इति द्वे **सश्मश्रवाः** ॥ २ ॥ स्नुषा वधूटी इति द्वे **स्नुषायाः** ॥ मधुरनिस्वना। मधुरो निस्वनः शब्दो यस्याः। हंसगद्गदा "हंसगद्गदा" हंसस्येव गद्गदः स्वरविशेषः यस्याः। इति द्वे **मधुरनिस्वनायाः** ॥ वरवर्णिनी इत्येकं **शीतग्रीष्मकालयोः सुखोष्णायाः सुखशीतायाः स्त्रियाः** ॥ तथाप्युक्तम्—"शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला ॥ तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कीर्तिता" इति। क्रोधना भामिनी चण्डी इति त्रीणि **क्रोधनायाः** ॥ दारुस्त्री दारु इव स्त्री। शालभञ्जिका शालेन भज्यते निर्मीयते। इति द्वे **दारुस्त्रियाः** ॥ ३ ॥ विरक्ता "विवृक्ता" दुर्भगा। दुष्टं भगं भाग्यं यस्याः। इति द्वे **पतिस्नेहशून्यायाः दुर्भगायाः स्त्रियाः** ॥ सप्तपुत्रसूः सुतवस्करा इति द्वे **सप्तपुत्रायाः** ॥ पतिव्रता। पतिः पतिसेवनं व्रतं यस्याः। एकपत्नी। एकः समानः अनन्यो वा पतिर्यस्याः। इति द्वे **पतिव्रतायाः** ॥ विधवा। विगतो धवो यस्याः। जालिका ॥ ४ ॥ विश्वस्ता इति त्रीणि **विधवायाः** ॥ लञ्जिनी "वाञ्छिनी" लञ्जिका कलकूजिका "कलतूलिका" इति त्रीणि **लञ्जिन्याः** ॥ वेश्या शूला वारवाणिः "वारवाणी" अन्यत्र। झर्झरा इति चत्वारि **वेश्यायाः** ॥ कुट्टिनी "कुट्टनी" ॥ ५ ॥ इज्या रततालो। रते

समदुर्दुहिता पुत्रो द्वितीयः कुलधारकः ।
पिता जनयिता वप्ता शिशुकः क्षीरकण्ठकः ॥ ७ ॥
बालो मुष्टिन्धयश्चाथ श्यालिका केलिकुञ्चिका ।
नागरो देवलः श्यालो वारकीरोऽथ साश्रुधीः ॥ ८ ॥
श्वश्रुर्वृद्धः शतानीको जरन्तः स्यादथांशकः ।
सगन्धाज्ञातिदायादा मातुलो मातुकेशटः ॥ ९ ॥
भर्ता भरुर्नर्मकीलः प्राणनाथः सुखोत्सवः ।
हृदयेशो रतगुरुर्जारः पापपतिः समौ ॥ १० ॥
कुमारभृत्या स्याद्बालतन्त्रं गर्भिण्यवेक्षणम् ।
गर्भाष्टमो देवमासो नाभिनालाऽमला स्मृता ॥ ११ ॥
आधानिकं पुंसवनं सीमन्तोन्नयनं च तत् ।
खल्लीटः खलितिः कल्लो बधिरः खोरखञ्जकौ ॥ १२ ॥

स्त्रीपुंसयोः सङ्गमे मैथुने ताली तालजातसुरेव । घटदासी गणेरुका इति पञ्च **कुट्टिन्याः** ॥ म्लिष्टा सरजाः इति द्वे **म्लानाङ्ग्याः** ॥ षाण्मातुरः षण्णां मातॄणामपत्यम् । द्वैमातुरः । द्वयोर्मात्रोरपत्यम् । इति द्वे **षाण्मातुरस्य द्वैमातुरस्य च** ॥ षाण्मातुरद्वैमातुराविति द्वौ शब्दौ कार्तिकेये गणेशे च स्तः–"षाण्मातुरः शक्तिधरः" इति अमरोक्तत्वात् ।कृत्तिकात्रिकं गङ्गा पृथिवी पार्वती चेति षण्मातरः कार्तिकेयस्य सन्ति तथा "विनायको विघ्नराजद्वैमातुरगणाधिपाः" इति अमरोक्तत्वात् । गणेशस्य दुर्गा चामुण्डेति द्वौ मातरौ भवतः ताभ्यां गणेशः पालित इति पुराणेषु प्रसिद्धिः जरासन्धस्य नृपस्यापि द्वौ मातरौ स्तः इति प्रतीतः ॥ ६ ॥ समदुः दुहिता इति द्वे **दुहितुः** ॥ पुत्रः द्वितीयः । द्वयोः पूर्णः । कुलधारकः कुलस्य वंशस्य धारकः इति त्रीणि **पुत्रस्य** ॥ पिता जनयिता वप्ता इति त्रीणि **पितुः** ॥ शिशुकः क्षीरकण्ठकः । क्षीरं कण्ठे यस्य ॥ ७ ॥ बालः मुष्टिन्धयः । मुष्टिं धयति इति चत्वारि **बालस्य** ॥ श्यालिका केलिकुञ्चिका इति द्वे **श्यालिकायाः**॥नागरः "वागारः"देवलः इति द्वे **देवरस्य**॥ श्यालः वारकीरः इति द्वे **शालस्य**॥साश्रुधीः "सारनुधीः"॥ ८॥ श्वश्रुः इति द्वे **श्वश्र्वाः** ॥ वृद्धः शतानीकः जरन्तः इति त्रीणि **वृद्धस्य** ॥ अंशकः सगन्धः ज्ञातिः दायादः इति चत्वारि **ज्ञातेः** ॥ मातुलः मातुकेशटः "मातुकेशरः" इति द्वे **मातुलस्य** ॥ ९ ॥ भर्ता भरुः नर्मकीलः प्राणनाथः। प्राणानां नाथः।सुखोत्सवः। सुखकर उत्सवो यस्मात् । हृदयेशः हृदयस्य ईशः नाथः। रतगुरुः। रते स्त्रीपुंसयोः सङ्गमे मैथुने गुरुः । इति सप्त **भर्तुः**॥जारः पापपतिः। पापात्मकः पतिः । इति द्वे **जारस्य** ॥ मुख्यादन्यभर्तुरित्यर्थः ॥१०॥ कुमारभृत्या बालतन्त्रं गर्भिण्यवेक्षणम् इति त्रीणि **प्रसवकाले गर्भिणीपरिचर्यायाः** गर्भाष्टमः देवमासः इति द्वे **गर्भग्रहणावधिकस्य अष्टममासस्य**॥नाभिनाला अमला इति द्वे **नाभिनालायाः**॥ ॥ ११ ॥ आधानिकं पुंसवनम् । पुमान् सूयतेऽनेन।सीमन्तोन्नयनम् । सीमन्तस्य तदाख्यगर्भसं-

दोर्गडुर्बाहुकुण्टः स्यादौषधं तु भिषग्जितम्।
त्वक्पुष्पिका किलासं स्याच्छ्लीपदं पादगण्डिरः ॥ १३ ॥
योन्यर्शः कन्दसंज्ञः स्यात्किणः शुष्कव्रणोऽपि च।
अजीर्णे वायुगण्डोऽन्तर्वमिश्चपलताशयः ॥ १४ ॥
पापरोगो रक्तवटी मसूर्यथ तमोव्रणः।
वल्मीकोऽथातिसारोऽन्नगन्धिः स्यादुदरामयः ॥ १५ ॥
कुरण्डवृद्धः सिङ्घाणशेटौ स्कन्दनरेचने।
गर्भण्डो नाभिगुडकोऽभिमन्थो लोचनामये ॥ १६ ॥
युवगण्डोऽवगण्डः स्यात्पित्तं मायुः पलङ्करः।
श्लेष्मा बलाशो मांसं तु जरूथमथ शोणितम् ॥ १७ ॥
पलक्षारोऽथ मस्तिष्को मस्तलुङ्गोऽप्यथ स्नसा।
वस्नसाऽथोऽधरमधु क्लीबे वक्रासवः पुमान् ॥ १८ ॥

स्कारस्य उन्नयनमुद्भावनम्। इति त्रीणि **संस्काराणाम् एकैकमेकैकस्य** ॥ खल्लीटः खलितिः "खलतिः" इति द्वे **खल्लाटस्य** ॥ कल्लः बधिरः इति द्वे **बधिरस्य** ॥ खोरः खञ्जकः इति द्वे **खञ्जस्य** ॥ १२ ॥ दोर्गडुः बाहुकुण्टः इति द्वे **बाहुकुण्टस्य** ॥ औषधं भिषग्जितम् इति द्वे **औषधस्य** ॥ त्वक्पुष्पिका। त्वचि पुष्पमिव त्वचः पुष्पमिव वा। किलासम् इति द्वे **किलासस्य** ॥ श्लीपदम्। श्रीयुक्तं वृद्धियुक्तं पदमस्मात्। पादगण्डिरः "पादगण्डीरः" इति द्वे **श्लीपदस्य** ॥ १३ ॥ योन्यर्शः। योनौ अर्शः। कन्दसंज्ञः किणः शुष्कव्रणः। शुष्कश्चासौ व्रणश्च। इति चत्वारि **योन्यर्शसः** ॥ वायुगण्डः। वायोर्गण्डः। अन्तर्वमिः। अन्तः स्थित एव वामयति उद्गारशब्दं कारयति। चपलताशयः "पललाशयः" चपलतायाः चञ्चलतायाः आशयः। इति त्रीणि **अजीर्णस्य** ॥ १४ ॥ पापरोगः। पापश्चासौ रोगश्च। रक्तवटी रक्तवर्णा वटीव। मसूरी इति त्रीणि **वसन्तरोग इति ख्यातायाः मसूरिकायाः** ॥ तमोव्रणः वल्मीकः इति द्वे **वल्मीकस्य** ॥ अतिसारः अतीसारोऽप्यत्र। अन्नगन्धिः। अन्नस्य गन्ध इव गन्धो यस्य। उदरामयः। उदरस्यामं रोगं याति नयति। इति त्रीणि **अतिसारस्य** ॥ १५ ॥ कुरण्डवृद्धः सिङ्घानः सिङ्घाणोऽप्यत्र। शेटः "खेशः" इति त्रीणि **नासिकामलस्य** ॥ केचित् **कुरण्डस्य** इति वदन्ति। स्कन्दनं रेचनम् इति द्वे **विरेचनस्य** ॥ गर्भण्डः नाभिगुडकः इति द्वे **नाभिगुडस्य** ॥ अभिमन्थः इत्येकं **लोचनामयस्य नेत्ररोगस्य** ॥ १६ ॥ युवगण्डः। यूनां गण्डः। अवगण्डः इति द्वे **अवगण्डस्य** ॥ पित्तं मायुः पलङ्करः "पलज्वरः" इति त्रीणि **पित्तस्य** ॥ श्लेष्मा बलाशः "वलाशः" "रसाशः" इति द्वे **श्लेष्मणः** ॥ मांसं जरूथम् इति द्वे **मांसस्य** ॥ शोणितम् ॥ १७ ॥ पलक्षारः। पलस्य क्षारः। इति द्वे **रक्तस्य** ॥ मस्तिष्कः मस्तिं परिणतिभेदं मुष्कति। मस्तलुङ्गः "मस्तुलुङ्गः" इति द्वे **मस्तकस्थस्यस्नेहाकारद्रव्यस्य**

जिह्वामलं तु कुलुकं पिप्पिका दन्तजे मले ।
पिण्डोऽस्त्रियां कुलं क्षेत्रं शरीरं स्कन्धपञ्जरौ ॥ १९ ॥
शँस्तं बपुः पुद्गलं स्यादाङ्गमङ्गं तु कोमलम् ।
पायुस्तनुह्रदो मार्ग उच्चारस्तु पुरीषणः ॥ २० ॥
भगं गुह्यं वराङ्गं च कलत्रं जन्मवर्त्म च ।
स्मरागारं रतिँगृहमधोधस्थादिमेऽव्यये ॥ २१ ॥
ना सन्धिरधरोऽवाच्यदेशश्च स्मरकूपकः ।
संसारमार्गश्च रतिकुहरं प्रकृँतिः स्त्रियाम् ॥ २२ ॥
पुष्पापत्यपथौ चाथ नितम्बः स्यात्कटीरकः ।
लिङ्गं तु लाङ्गलं शेफः साधनं मदनांकुशः ॥ २३ ॥
स्मरस्तम्भश्च कन्दर्पमुषँलो ध्वज इत्यपि ।
स्त्रियां नागलता चाण्डकोषस्तु फलकोषकः ॥ २४ ॥
नाभिँर्द्वयोस्तुन्दकूपी तुन्दिँस्तुन्दीकरः पुमान् ।
अधोमर्मशकृद्द्वारमूरुः सक्थि च जाघनी ॥ २५ ॥

स्नसा वस्नसा । वस्नं त्वक् स्यति । इति द्वे **स्नायोः** ॥ अधरमधु । अधरे ओष्ठे सम्भूतं मधु । वक्त्रासवः ।वक्त्रे मुखे जातः आसवः । इति द्वे **अधरमधुनः** ॥ १८॥ जिह्वामलम् । जिह्वायाः मलम् । कुलुकम् इति द्वे **जिह्वामलस्य** ॥ पिप्पिका इत्येकं **दन्तजस्य मलस्य** ॥ पिण्डः कुलं क्षेत्रं शरीरं स्कन्धः पञ्जरः पिञ्जरोऽप्यत्र ॥ १९ ॥ शस्तं "जस्तं वपुः पुद्गलम् आङ्गम् इति दश **शरीरस्य**॥अङ्गम् इत्येकं **कोमलाङ्गस्य**॥पायुः तनुह्रदः मार्गः इति त्रीणि **गुदस्य** ॥ उच्चारः पुरीषणः इति द्वे **उच्चारस्य** ॥ २० ॥ भगं गुह्यं वराङ्गं कलत्रं जन्मवर्त्म । जन्मनो-वर्त्म । स्मरागारं।स्मरस्य अगारम् । रतिगृहम् "रतगृहम्"। रतेर्गृहम्।अधः अधस्थात् । एतौ द्वौ निपातौ स्याताम् ॥२१॥ सन्धिः अधरः अवाच्यदेशः स्मरकूपकः।स्मरस्य कूपकः।संसारमार्गः । संसारस्य मार्गः तत एव हि बहिर्निर्गमनम्।रतिकुहरं।रतेः कुहरम् । प्रकृतिः "पृकृतिः" ॥२२॥ पुष्पपथः । पुष्पस्य ऋतुरुधिरस्य पथः । अपत्यपथः । अपत्यस्य पथः मार्गः इत्यष्टादश **स्त्री-चिह्नस्य** ॥ नितम्बः कटीरकः इति द्वे **नितम्बस्य** ॥ लिङ्गं लाङ्गलं शेफः साधनं मदनाङ्कुशः । मदनस्य कामस्य अङ्कुश इव ॥ २३ ॥ स्मरस्तम्भः । स्मरस्य कामस्य स्तम्भः । कन्दर्पमुषलः । कन्दर्पस्य अनङ्गस्य मुषलः । "कन्दर्पमुसलः" "कन्दर्पमुशलः ध्वजः नागलता । नागाकारा लता । इति नव **लिङ्ग इति ख्यातस्य पुरुषचिह्नस्य** ॥ अण्डकोषः । अण्डयोः कोषः । फलकोषकः इति द्वे **पुंसोऽङ्गावयवस्य** ॥ २४ ॥ नाभिः। अयं तु नाभिशब्दः पुंस्त्रियोर्वर्त्तते । स्त्रियां वा ईङ् । "नाभी" तुन्दकूपी । तुन्दस्य कूपीव । तुन्दकूपिकाप्यत्र । तुन्दिः । "तुन्दिकः तुन्दी" अप्यत्र । क्वचित् "तुन्दः तुन्दिगडुः" ।

भुजा बाहा च बाहौ स्यात्कुलिर्हस्तो भुजादलः ।
कुचौ वक्षोरुहौ प्रोक्तौ हस्तपुच्छं तु कल्पुषम् ॥ २६ ॥
नखं पुनर्भवः कामाङ्कुशः स्यात्करकण्टकः ।
करेटुः करशूकश्च पुच्छटयङ्गुलिमोटनम् ॥ २७ ॥
स्यात्काकलं कण्ठमणिर्नसा नस्या च नासिका ।
गन्धनाली च नासिक्यं वाग्दलं दन्तवाससि ॥ २८ ॥
दन्तः खरुर्वक्रखुरो जम्भो हानुर्द्विजस्तथा ।
राजदन्तास्तु चत्वारो दशनानां पुरःस्थिताः ॥ २९ ॥
गोधिभालौ महाशङ्खो देवदीपस्तु लोचनम् ।
अम्बकं चाथ नेत्राम्बु बाष्पो ना लोतमस्त्रियाम् ॥ ३० ॥
कटाक्षकाक्षौ काकुस्तु जिह्वाऽथ प्रतिजिह्विका ।
सुधास्रवा च कर्णस्तु श्रोतः क्लीबे ध्वनिग्रहः ॥ ३१ ॥

तुन्दीकरः इति चत्वारि **नाभेः** ॥ अधोमर्म शकृद्वारम् इति द्वे **विष्ठामार्गस्य** ॥ ऊरुः सक्थि "शक्थि" जाघनी इति त्रीणि **ऊरोः**॥२५॥ भुजा बाहा "बाहः" "बाहोऽश्वभुजयोः पुमान्" इति दामोदरः। इति द्वे **भुजस्य** ॥ कुलिः हस्तः भुजादलः। भुजायाः दलः इति त्रीणि भुजादल इति ख्यातस्य **हस्तस्य**॥ कुचः वक्षोरुहः । वक्षसि रोहति । वक्षोजोप्यत्र । इति द्वे **स्तनस्य**॥हस्तपुच्छम् । हस्तस्य पुच्छमिव । कल्पुषम् "कल्मषम्" इति द्वे **हस्तपुच्छस्य**॥ हस्तपश्चाद्भागस्येत्यर्थः ॥ २६ ॥ नखं पुनर्भवः कामाङ्कुशः । कामस्य अङ्कुश इव । करकण्टकः । करस्य कण्टक इव । करेटुः "कारटः" करशूकः । करस्य शूक इव । इति षट् **नखानाम्**॥ पुच्छटी "पुच्छटिः" अङ्गुलिमोटनम् इति द्वे **अङ्गुलिमोटनस्य** ॥२७॥ काकलं । काकलकोऽप्यत्र । कण्ठमणिः । कण्ठे मणिरिव । इति द्वे **ग्रीवायामुन्नतप्रदेशस्य** ॥ नसा नस्या नासिका गन्धनाली । गन्धस्य नालीव । नासिक्यम् । नासिका एव । इति पञ्च **नासिकायाः** ॥ वाग्दलं । वाचो दलम् । इत्येकं दन्तवाससीतिख्यातस्य **ओष्ठस्य** ॥ २८ ॥ दन्तः खरुः वक्रखुरः । वक्रः खुरो यस्य । जम्भः हानुः द्विजः । द्विर्जायते । इति षट् **दन्तानाम्** ॥ राजदन्ताः । इत्येकं **पुरःस्थितानां चतुर्णां महादन्तानाम्** ॥ २९ ॥ गोधिः भालः महाशङ्खः "महाशङ्खम्" । इति त्रीणि **भालनेत्रस्य** ॥ देवदीपः । देवेषु इन्द्रियेषु दीप इव। लोचनम् अम्बकम् इति त्रीणि **लोचनस्य**॥ नेत्राम्बु । नेत्रस्य नेत्रयोर्वा अम्बु । बाष्पः "बास्पः" लोतम् इति त्रीणि **अश्रुणः** ॥ अत्र बाष्पशब्दः पुँल्लिङ्गे लोतशब्दः पुंनपुंसकयोः स्यादेव ॥ ३० ॥ कटाक्षः काक्षः इति द्वे **कटाक्षस्य** ॥ ईषद्दर्शनस्याक्षिण इत्यर्थः । काकुः जिह्वा इति द्वे **जिह्वायाः** ॥ प्रतिजिह्विका सुधास्रवा । सुधां स्रवति । "सुधाश्रवा" इति द्वे **जिह्वामूलस्थमांस-**

स्याच्छब्दाधिष्ठानमथ कबरः केशगर्भकः ।
कबरी जूटकश्चाथ कौटीरः स्याज्जटा सटा ॥ ३२ ॥
करारोटोऽङ्गुलीकः स्यात्ताडङ्कः कर्णदर्पणः ।
अन्दुकः पादकटकोऽभिषेकः स्नानमित्यपि ॥ ३३ ॥
पटच्चरो जीर्णवस्त्रं सिचयप्रोथशाटकाः ।
पटवापः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥ ३४ ॥
खरग्रहः खरगृहं कुंवा तु स्थूलशाटकः ।
चोलोण्डुकः शिरोवेष्टे त्रिरिङ्गिन्यवगुण्ठिका ॥ ३५ ॥
पाठी यवनिका सूर्यरक्तसंज्ञं तु कुङ्कुमम् ।
जागुडं दीपनं घस्रं सौरभं सुघृणं च तत् ॥ ३६ ॥
स्याद्रङ्गमातृका लाक्षा गन्धकाष्ठं तु गोङ्गकम् ।
कपिचञ्चलतैलाख्यः सिह्लोऽथ सरलद्रवः ॥ ३७ ॥

पिण्डस्य ॥ कर्णः श्रोतः । श्रोतः शब्दः क्लीबे नपुंसके स्यात् । ध्वनिग्रहः ॥ ३१ ॥ शब्दाधिष्ठानम् । शब्दानाम् अधिष्ठानं स्थितिः । इति चत्वारि **कर्णस्य** ॥ कबरः केशगर्भकः । केशानां गर्भकः केशाः गर्भे यस्य वा । कबरी जूटकः "कूटकः" इति चत्वारि **केशपाश इति ख्यातायाः कबर्याः ॥ केशविन्यासस्य** इत्यन्ये । कौटीरः जटा सटा इति त्रीणि **व्रतिनां केशसङ्घात इति ख्यातायाः जटायाः** ॥३२॥ करारोटः अङ्गुलीकः 'अङ्गुलीटः' इति द्वे **अङ्गुलीयकस्य**॥ताडङ्कः कर्णदर्पणः इति द्वे **ताडङ्कस्य**॥ अन्दुकः पादकटकः इति द्वे **पादकटकस्य** ॥ अभिषेकः स्नानम् इति द्वे **स्नानस्य** ॥३३॥ पटच्चरः जीर्णवस्त्रम् इति द्वे **जीर्णवस्त्रस्य** ॥ सिचयः प्रोथः शाटकः इति त्रीणि **शाटकस्य** ॥ पटवापः पटमयं दूष्यं वस्त्रगृहम् । वस्त्रेण निर्मितं गृहम् । स्थलम् । पटकुटी पटगृहादयोऽप्यत्र । इति पञ्च **वस्त्रगृहस्य** ॥ ३४ ॥ खरग्रहः खरगृहम् इति द्वे **खरगृहस्य**॥ कुंवा "श्विञ्चा" स्थूलशाटकः । स्थूलशाटिकादयोऽप्यत्र । इति द्वे **स्थूलवस्त्रस्य सुगहनावृतेश्च** ॥ चोलोण्डुकः "चेलोण्डुकः" इत्येकम् **उष्णीष इति ख्यातस्य शिरोवेष्टस्य** ॥ त्रिरिङ्गिनी "निरिङ्गिनी" अवगुण्ठिका ॥ ३५ ॥ पाठी "पटा" यवनिका "जवनिका" अप्यत्र । इति चत्वारि **जवनिकेति प्रसिद्धायाः तिरस्करिण्याः** ॥ सूर्यरक्तसंज्ञं सूर्यपर्य्यायनामानि रक्तपर्य्यायनामानि च । रक्तं शोणितं रविरप्यत्र । कुङ्कुमं जागुडं दीपनं घस्रं सौरभं सुघृणम् । "सुघृणैर्यत्र जलाशयोदरे" इति नैषधम्।इति सप्त कुङ्कुमस्य॥३६॥ रङ्गमातृका लाक्षा इति द्वे **लाक्षायाः** ॥ गन्धकाष्ठं । गन्धयुक्तं काष्ठम् । गोङ्गकम् इति द्वे **अगरुचन्दन इति ख्यातस्य अगरुकाष्ठस्य** ॥ कपिचञ्चलं "कपिचन्दनं" तैलं

दधिक्षीरघृताह्वः स्याद्धूनको वह्निवल्लभः ।
शालवेष्टः सर्जमणिः कस्तूरी गन्धचेलिका ॥ ३८ ॥
मदाँह्वश्चाथ सञ्चारी धूपो गन्धपिशाचिका ।
रेणुसारस्तु कर्पूरश्चन्द्रभस्म हिमाह्वयः ॥ ३९ ॥
वेधको मालयस्तु स्याच्छ्रीखण्डो रौहिणश्च सः ।
विच्छित्तिस्तु कषायः स्यात्समालम्भनमित्यपि ॥ ४० ॥
ललाटिका शङ्खचरी विष्टरः पीठमस्त्रियाम् ।
निषद्या खट्टिका सन्दी चातुरस्तु मसूरकः ॥ ४१ ॥
प्रतियत्नस्तु रचना कटकोलः पतद्ग्रहः ।
पूगपीठं च दीपस्तु स्नेहाशः कज्जलध्वजः ॥ ४२ ॥
दशेन्धनो गृहमणिर्दोषातिलक इत्यपि ।
शिखातरुर्दीपवृक्षो ज्योत्स्नावृक्षोऽथ लोचकः ॥ ४३ ॥

सिह्नः इति त्रीणि **सिह्लकस्य** ॥ सरलद्रवः ॥ ३७ ॥ दधि क्षीरं घृतम् इति चत्वारि **सरलद्रवस्य** ॥ धूनकः वह्निवल्लभः । वह्नेर्वल्लभ उद्दीपकत्वात् । शालवेष्टः । शालस्य वेष्ट इव । सर्जमणिः। सर्जस्य शालस्य मणिरिव।इति चत्वारि **धूनक इति प्रसिद्धस्य सर्जरसस्य** । केचित्तु धूनकः वह्निवल्लभः इति द्वे **धूनकस्य** ॥ शालवेष्टः सर्जमणिः इति द्वे **शालवेष्टस्य** ॥ इति वदन्ति । कस्तूरी गन्धचेलिका । गन्धः चेलस्य यस्मिन् सा ॥ ३८ ॥ मदः "मदाढ्यः" इति त्रीणि **कस्तूर्याः** ॥ संचारी धूपः गन्धपिशाचिका । गन्धः पिशाचानां यस्मिन् सा । इति त्रीणि **धूपस्य**॥रेणुसारः"वेणुसारः" रेणुरिव सारोऽस्य । रेणुसारकोऽप्यत्र । कर्पूरः । कर्पूरं नपुंसकलिङ्गे च । चन्द्रभस्म । चन्द्र इव शुभ्रं भस्म यस्य । अथवा चन्द्रपर्यायनामकाः चन्द्रः शीतरश्मिः शीतांशुरित्यादयश्च।हिमाह्वयः हिमपर्यायनामकाः हिमः शिशिरः इत्यादयश्च ॥३९॥ वेधकः इति पञ्च **कर्पूरस्य** ॥ मालयः । मलये तन्नामकपर्वते भवः । श्रीखण्डः श्रियः शोभायाः खण्ड इव यत्र । रौहिणः इति त्रीणि **चन्दनस्य** ॥ विच्छित्तिः कषायः समालम्भनम् इति त्रीणि **कषायस्य** ॥ ४० ॥ ललाटिका । ललाटे आबध्यते । शङ्खचरी । शङ्खे ललाटास्थ्नि चरतीति।इति द्वे **ललाटभूषणस्य ललाटस्थस्य चिह्नस्य वा** ॥ विष्टरः । "ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः" इति । "ग्रामावृत्तिस्तु विष्टरः" इति च । पीठम् इति द्वे **पीठस्य** ॥ निषद्या खट्टिका सन्दी इति त्रीणि **खट्वायाः** ॥ "अष्टाभिः काष्ठखण्डैश्च कृता खट्वेति कथ्यते" इति । चातुरः मसूरकः इति द्वे **उपबर्हणस्य** ॥ ४१ ॥ प्रतियत्नः रचना इति द्वे **रचनायाः** ॥ कटकोलः पतद्ग्रहः । पतत् मुखादिभ्यः स्रवत् जलादि गृह्णाति । पूगपीठम् । पूगस्य इव पीठमस्य । इति त्रीणि **पतद्ग्रह इति ख्यातस्य पात्रभेदस्य** ॥ दीपः स्नेहाशः । स्नेहमश्नाति । कज्जलध्वजः । कज्जल एव ध्वजोऽस्य ॥ ४२ ॥ दशेन्धनः । दशा वर्तिकैव इन्धनं यस्य । गृहमणिः । गृहस्य

कज्जले स्यादिरिंपके कन्दुकश्चोदनागुडः ।
निश्चुक्कणं दन्तशाणं पिष्टातो धूलिगुच्छकः ॥ ४४ ॥

इति मनुष्यवर्गः ॥ ६ ॥

वंश्यः कुल्यश्च वीज्यः स्याद्ब्रह्मचारी वटुः समौ ।
स्याद्वटूकरणन्तूपनयनं गृहमेधिनि ॥ १ ॥
ज्येष्ठाश्रमी गृही वानप्रस्थो वैखानसोऽग्रहः ।
वक्त्रजस्त्वनमो विप्रो वर्णज्येष्ठः कठो द्विजः ॥ २ ॥
मैत्रः पुनरुक्तजन्मा स्यादथ ब्राह्मणायनः ॥
शुद्धसन्तानजो विप्रः श्रौत्रं श्रोत्रियतां विदुः ॥ ३ ॥

मणिरिव । दोषातिलकः । दोषायाः तिलक इव । इति षट् **प्रदीपस्य ॥** शिखातरुः । शिखायाः दीपशिखायास्तरुरिव । दीपवृक्षः । दीपश्चासौ वृक्षश्च । दीपस्याधारो वृक्षो वा । ज्योत्स्नावृक्षः इति त्रीणि **दीपवृक्षस्य ॥** लोचकः ॥ ४३ ॥ इत्येकं **कज्जलस्य ॥** स्यादित्यन्वयः । कन्दुकः चोदनागुडः । चोदनायै गुड इव । इति द्वे **इरिपकस्य ॥** क्वचित् गिरिपके इति पाठः । कन्दुकस्येत्यर्थः । निश्चुक्कणं दन्तशाणम् इति द्वे **दन्तशाणस्य ॥** पिष्टातः धूलिगुच्छकः "धूलिगुत्सकः" । धूलिप्रचुरः गच्छः अस्य । इति द्वे **पटवासनार्थं कृतस्य चूर्णगन्धद्रव्यस्य** ॥ ४४ ॥ इति मनुष्यवर्गः ॥ ६ ॥ वंश्यः कुल्यः । कुले भवः कुलाय हितो वा । वीज्यः । विशेषेण इज्यः । इति त्रीणि **वंश्यस्य ॥** क्वचित् **कुलीनस्य ॥** च । "कुल्यः कुलीनोऽभिजातः कौलेय कमहाकुलौ । जात्यो गोत्रं तु सन्तानोऽन्ववायोऽभिजनः कुलम् । अन्वयो जननं वंश" इति हैमः । ब्रह्मचारी वटुः इति द्वे **ब्रह्मचारिणः ॥** वटूकरणम् उपनयनम् इति द्वे **उपनयनस्य** ॥ १ ॥ ज्येष्ठाश्रमी गृही इति द्वे **गृहिणः गृहमेधिनश्च ॥** यो गृहे दारैर्मेधते संगच्छते स गृहमेधी तस्य । वानप्रस्थः । वने वनसमूहे प्रतिष्ठतीति वनप्रस्थः । स एव वानप्रस्थः । "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । पुत्रेषु दारान्निक्षिप्य वनं गच्छेत्सहैव वा," इति । वैखानसः "वैखानशः" । "वैखानसेभ्यः श्रुतरामवार्ता" इति भट्टिः । अग्रहः "अगृहः" । नास्ति ग्रहः परिग्रहः अस्य । इति त्रीणि **वानप्रस्थ इति ख्यातस्य तापसभेदस्य ॥** वक्त्रजः । वक्त्रात् मुखाज्जायते । अनमः विप्रः वर्णज्येष्ठः । वर्णेषु वर्णानां वा ज्येष्ठः प्रथममुत्पन्नत्वात् । केचित्तु वर्णज्येष्ठः क्षत्रिय एवेति पठन्ति । कठः । कठ इति प्रोक्तायाः ऋग्वेदशाखायाः अध्यायकत्वात् । द्विजः । द्विर्जायते । प्रथमं मातृगर्भाद्द्वितीयमुपनयनसंस्कारादिति वचनात् ॥ २ ॥ मैत्रः पुनरुक्तजन्मा इत्यष्टौ **विप्रस्य ॥** ब्राह्मणायनः इत्येकं **शुद्धकुलोत्पन्नस्य विप्रस्य ॥** श्रौत्रं श्रोत्रियता इति द्वे **वेदाध्ययनानुरतस्य ब्राह्मणस्य** ॥ तदुक्तम्,- "एकां शाखां

स्यादक्षरमुखः कालाक्षरिकः शिक्षिताक्षरः ।
काव्यस्य-कर्ता भविनी गुणनी शीलनं स्मृतम् ॥ ४ ॥
क्रियाकरो नवच्छात्रः कार्पटिकः स मर्मवित् ।
पर्षत्परिषदो गोष्ठी राजसूयो नृपाध्वरः ॥ ५ ॥
क्रतूत्तमश्चाऽथ चान्द्रायणमिन्दुव्रतं स्मृतम् ।
हवनी होमकुण्डं स्यान्महावीरो मखानलः ॥ ६ ॥
होमधूमस्तु निगणो होमभस्म तु वैष्टुभम् ।
आर्यकं पिण्डदानादिपितृकार्यमथो हविः ॥ ७ ॥
होत्रं हविष्यं सान्नाय्यं पाठको धर्मभाणकः ।
सभ्यास्तु प्राश्निका देवद्रोणी यात्रा दिवौकसाम् ॥ ८ ॥
इष्टापूर्तं तदेकोक्त्या यागखातादि कर्म्म यत् ।
यज्ञद्रव्यन्तु पात्रीयं प्राघुणस्त्वतिथिर्द्वयोः ॥ ९ ॥

सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" इति ॥३॥ अक्षरमुखः । अक्षराणि मुखे यस्य । कालाक्षरिकः । काले अक्षराण्यधीयते । शिक्षिताक्षरः । शिक्षितानि अक्षराणि येन । काव्यस्य-कर्ता । इति चत्वारि **शिक्षिताक्षरस्य** ॥ भविनी "भविनः" गुणनी शीलनम् इति त्रीणि **पाठनिश्चयस्य** ॥ ४ ॥ क्रियाकरः । क्रियां करोति । नवच्छात्रः । नवश्चासौ छात्रश्च । इति द्वे **नवच्छात्रस्य**॥ कार्पटिकः । कर्पटेन काषायवस्त्रेण चरति । मर्मविद् । मर्म जानाति । इति द्वे **कर्पटिकस्य तीर्थयात्रोद्यतस्य** ॥ पर्षद् परिषदः । परितः सीदति गच्छति । गोष्ठी । गावोऽनेका वाचः तिष्ठन्त्यत्र । इति त्रीणि **सभायाः** ॥ राजसूयः । राज्ञा सूयते । नृपाध्वरः । नृपाणाम् अध्वरः ॥ ५ ॥ क्रतूत्तमः "क्रतुतमः" इति त्रीणि **राजमात्रकर्तव्ययज्ञभेदस्य**॥ चान्द्रायणम् । चान्द्रस्य चन्द्रलोकस्यायनं यस्मात् । इन्दुव्रतम् । इन्दोश्चन्द्रलोकगमनं व्रतमस्य । इति द्वे **चान्द्रायण इति प्रसिद्धस्य व्रतस्य** ॥ स्मृतं ज्ञातम् । हवनी । हूयतेऽस्याम् । होमकुण्डम् । होमार्थं कुण्डं पात्रं स्थानं वा । इति द्वे **यज्ञकुण्डस्य** ॥ महावीरः । महांश्चाऽसौ वीरश्च । मखानलः । मखस्य यज्ञस्य अनलः । इति द्वे **यज्ञाग्नेः** ॥ स्यादित्यन्वयः ॥ ६ ॥ होमधूमः । होमे जातः धूमः । निगणः इति द्वे **होमधूमस्य** ॥ होमभस्म । होमे जातं भस्म । वैष्टुभम् इति द्वे **होमभस्मनः** ॥ आर्यकम् इत्येकं **पिण्डदानादिपितृकार्यस्य** ॥ हविः ॥ ७ ॥ होत्रं हविष्यं सान्नाय्यम् इति चत्वारि **हविषः** ॥ पाठकः धर्मभाणकः । धर्मं भणति । इति द्वे **पाठकस्य** ॥ सभ्याः प्राश्निकाः इति द्वे **सभ्यानाम्** ॥ देवद्रोणी । देवानां द्रोणी । इत्येकं **देवयात्रायाः** ॥ ८ ॥ इष्टापूर्तम् । इष्टं च पूर्तं च द्वयोः समाहारः पूर्वपददीर्घः । यागखातादि यत् कर्म भवेत् तत् एकोक्त्या एकवचनेन

कौशली कुशलप्रश्नः समीची वन्दना मता ।
उपोषणन्तूपवासो रोगाद्यैर्लङ्घनं च तत् ॥ १० ॥
द्व्यन्तरे त्र्यन्तरे भुक्तमाहुः षष्ठान्नकालकम् ।
राद्धं सिद्धमथो चारुव्रता मासोपवासिनी ॥ ११ ॥
स्याद्गायत्री तु सावित्री ब्रह्मारण्यं तु पाठभूः ।
पवित्रं यज्ञोपवीतं ब्रह्मसूत्रं द्विजायनी ॥ १२ ॥
कच्छा कच्छटिका कक्षापटी कौपीनमित्यपि ।
बैडालव्रतिकः सर्वाभिसन्धी छद्मतापसः ॥ १३ ॥
कमण्डलुश्चैत्यमुखो जोतिण्टा तु महाव्रती ।
उरस्कटः पञ्चवटो बालयज्ञोपवीतकम् ॥ १४ ॥
भाले तिस्रो भस्मरेखास्त्रिपुण्ड्रकमथर्षयः ।
शापास्त्राः सत्यवचसो व्यासाद्यास्तु महर्षयः ॥ १५ ॥

इष्टापूर्तमिति कथ्यते । पूर्त यथा—"वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते" इति । इत्येकम् **अग्निहोत्रादेरिष्टकर्मणः** ॥ यज्ञद्रव्यम् । यज्ञस्यार्थं द्रव्यम् । पात्रीयम् इति द्वे **यज्ञद्रव्यस्य** ॥ प्राघुणः अतिथिः इति द्वे **अतिथेः** ॥ कौशली कुशलप्रश्नः इति द्वे **कुशलप्रश्नस्य** ॥ समीची वन्दना इति द्वे **वन्दनायाः** ॥ मता ज्ञातेत्यर्थः ॥ ९ ॥ उपोषणम् उपवासः इति द्वे **अहोरात्राभोजन इति ख्यातस्य उपवासस्य** ॥ लङ्घनम् इत्येकं **रोगोपवासस्य** ॥ १० ॥ षष्ठान्नकालकम् । षष्ठे दिवसे भक्ष्यान्नकालो यत्र । षष्ठान्नकालोऽप्यत्र । कचित् "षष्ठाह्नकालकम्" । राद्धं सिद्धम् इति त्रीणि **द्व्यन्तरत्र्यन्तरभुक्तस्य व्रतभेदस्य** ॥ चारुव्रता । चारु व्रतमस्याः।मासोपवासिनी । मासे उपवासोऽस्याः । इति द्वे **मासोपवासिन्याः** ॥ ११ ॥ गायत्री सावित्री इति द्वे **गायत्र्याः** ॥ स्यादित्यन्वयः । ब्रह्मारण्यम् । ब्रह्मणः आरण्यम् । पाठभूः । पाठस्य भूः भूमिः । इति द्वे **वेदपाठभुवः** ॥ पवित्रं यज्ञोपवीतं ब्रह्मसूत्रं द्विजायनी इति चत्वारि **यज्ञोपवीतस्य ब्रह्मप्रतिपादकस्य शारीरिकसूत्रस्य च** ॥ १२ ॥ कच्छा कच्छटिका कक्षापटी "कक्षाघटी" कौपीनम् इति चत्वारि **कौपीनस्य व्रतस्य** ॥ बैडालव्रतिकः । बिडालव्रतमस्त्यस्य । सर्वाभिसन्धी । सर्वत्र आचरणे अभिसन्धाऽस्त्यस्य । छद्मतापसः । छद्मना छलेन तापसः । इति त्रीणि **लोकप्रतारणार्थं तापसताख्यापनाय तापसलिङ्गधारिणः छद्मतापसस्य** ॥ १३ ॥ कमण्डलुः । मण्डनं मण्डः कस्य जलस्य मण्डं लाति । चैत्यमुखः । चैत्यमिव मुखं यस्य। इति द्वे **कमण्डलोः**॥ जोतिण्टा "जोतिण्टाः" महाव्रती । महत् व्रतमस्याम् । उरस्कटः । उरः कव्यते आव्रियतेऽनेन । पञ्चवटः । पञ्च वटाः यत्र । बालयज्ञोपवीतकम् इति पञ्च **उरस्कटस्य** ॥ १४ ॥ त्रिपुण्ड्रकम् । त्रयाणां पुण्ड्राणाम् इक्षु-

परमर्षयस्तु भेलाद्या देवर्षयः कणादयः ।
ब्रह्मर्षयो वसिष्ठाद्याः सुश्रुताद्याः श्रुतर्षयः ॥ १६ ॥
ऋतर्पणादयो राजर्षयः काण्डर्षयस्त्वमी ।
जैमिन्याद्या नारदस्तु कपिवक्रो विधातृभूः ॥ १७ ॥
देवब्रह्मा देवलश्च दुर्वासास्तु कुसारणिः ।
प्राचेतसस्तु वाल्मीकिः कविज्येष्ठः कुशीवशः ॥ १८ ॥
अपि वल्मीकवाल्मीकौ कृतकोटिस्तु काश्यपः ।
कृष्णद्वैपायनो वेदव्यासः स्यात्सत्यभारतः ॥ १९ ॥
पाराशरिः सात्यवतो माठरो बादरायणः ।
वसिष्ठा रुन्धतीनाथौ विश्वामित्रस्तु गाधिजः ॥ २० ॥
गौतमस्तु शतानन्दः कणादः काश्यपः समौ ।
धन्वन्तरिर्दिवोदासः काशिराजः सुधोद्भवः ॥ २१ ॥
पालकाख्यो गणपतिकरेणुरुचिरासुतः ।
विष्णुगुप्तस्तु कौण्डिण्यश्चाणक्यो द्रोमिणोऽङ्गुलः ॥ २२ ॥

वदाकाराणां समाहारः । स्वार्थे कन् । त्रिपुण्ड्रमप्यत्र । "वक्राः ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकम्" इति । इत्येकं **भाले ललाटे तिसृणां भस्मरेखाणाम् ॥** ऋषयः शापास्त्राः । शाप एवास्त्रं येषाम् । सत्यवचसः । सत्यानि वचांसि येषाम् । इति त्रीणि **ऋषीणाम् ॥** व्यासाद्याः इत्येकं **महर्षीणाम् ॥** १९ ॥ भेलाद्याः इत्येकं **परमऋषीणाम् ॥** कणादयः इत्येकं **देवऋषीणाम् ॥** वसिष्ठाद्याः इत्येकं **ब्रह्मऋषीणाम् ॥** सुश्रुताद्याः इत्येकं **श्रुतऋषीणाम् ॥** १६ ॥ ऋतर्पणादयः "ऋतुपर्णादयः" इत्येकं **राजर्षीणाम् ॥** जैमिन्याद्याः इत्येकं **काण्डर्षीणाम् ॥** नारदः कपिवक्रः विधातृभूः इति त्रीणि **नारदस्य** ॥ १७ ॥ देवब्रह्मा देवलः इति द्वे **देवल इति ख्यातस्य ऋषेः ॥** दुर्वासाः कुसारणिः इति द्वे **अत्रिपुत्रस्य दुर्वाससः ॥** प्राचेतसः वाल्मीकिः कविज्येष्ठः कुशीवशः ॥ १८ ॥ वल्मीकः वाल्मीकः । "वाल्मिकिः" अप्यत्र । इति षट् **वाल्मीकऋषेः ॥** कृतकोटिः काश्यपः इति द्वे **काश्यपऋषेः ॥** कृष्णद्वैपायनः वेदव्यासः सत्यभारतः ॥१९॥ पाराशरिः सात्यवतः माठरः बादरायणः इति सप्त **व्यासऋषेः॥** वसिष्ठः अरुन्धतीनाथः इति द्वे **वसिष्ठऋषेः॥** विश्वामित्रः गाधिजः इति द्वे **विश्वामित्रऋषेः** ॥२०॥ गौतमः शतानन्दः इति द्वे **गौतमऋषेः॥** कणादः काश्यपः इति द्वे **कणादऋषेः॥** धन्वन्तरिः दिवोदासः काशिराजः सुधोद्भव इति चत्वारि **धन्वन्तरेः** ॥ २१ ॥ पालकाख्यः "पालकाप्यः" गणपतिसुतः "गणवतीसुतः" करेणुसुतः रुचिरासुतः इति चत्वारि **पालकादेः॥** प्रत्येकं द्वयं द्वयं च । विष्णुगुप्तः कौण्डिण्यः "कौटिल्यः" चाणक्यः द्रोमिणः "द्रामिलः"

वात्स्यायनो मल्लनागः पक्षिलस्वामिनावपि ।
उपवर्षो हलभृतिः कृतकोटिरयाचितः ॥ २३ ॥
पाणिनिस्त्वाहिको दाक्षीपुत्रः शालङ्किपाणिनौ ।
शालोत्तुरीयोऽथ व्याडिर्विन्ध्यस्थो नन्दिनीसुतः ॥ २४ ॥
मेधावी चाऽथ मेधाजित्कात्यः कात्यायनश्च सः ।
पुनर्वसुर्वररुचिर्गोनर्दीयः पतञ्जलिः ॥ २५ ॥
चूर्णिकृद्भाष्यकारश्च हरिर्भर्तृहरिः स्मृतः ।
रघुकारः कालिदासो मेधारुद्रश्च कोटिजित ॥ २६ ॥
भारविः शत्रुलुम्पः स्याद्भवभूतिस्तु विस्मृतः ।
भूगर्भोऽप्यऽथ यः प्रातः स्मर्यते शुभकाम्यया ॥ २७ ॥
स सुगृहीतनामा स्यात्पैण्डिन्यं भैक्षजीविका ।
पाषाण्डकौलिकौ खञ्जनरतं यतिमैथुनम् ॥ २८ ॥
अभावादङ्गनात्यागस्तुरगब्रह्मचर्यकम् ।
मुखघण्टा हुलहुली नागवीटस्तु टात्कॅरः ॥ २९ ॥

अंशुलः "अङ्गुलः" ॥ २२ ॥ वात्स्यायनः . मन्दनागः "मल्लनागः" पक्षिलः स्वामी इति नव **चाणक्यस्य ॥** उपवर्षः हलभृतिः । हलेन भृतिः पोषणं यस्य । कृतकोटिः अयाचितः इति चत्वारि **उपवर्षस्य** ॥ २३ ॥ पाणिनिः । पणनं पणः ततः अस्त्यर्थे इनिः । तदपत्यम् अण् प्रत्ययः । तस्य छात्रः इनुप्रत्ययश्च । आहिकः दाक्षीपुत्रः । दाक्ष्याः पुत्रः । शालङ्की । शालङ्क्यां भवः । पाणी शालोत्तुरीयः । शालोत्तुरे ग्रामे भवः । इति षट् **पाणिनिऋषेः ॥** व्याडिः विन्ध्यस्थः नन्दिनीसुतः । नन्दिन्याः सुतः पुत्रः ॥ २४ ॥ मेधावी इति चत्वारि **व्याडेः ॥** मेधाजित् कात्यः कात्यायनः पुनर्वसुः वररुचिः इति पञ्च **कात्यायनस्य ॥** गोनर्दीयः । गोनर्दे तन्नामकपर्वतसमीपे देशे भवः । "गोनन्दीयः" पतञ्जलिः । पतन् अञ्जलिर्यस्मै ॥ २५ ॥ चूर्णीकृत । चूर्णिं महाभाष्यं करोतीति । भाष्यकारः इति चत्वारि **पतञ्जलिमुनेः ॥** हरिः भर्तृहरिः इति द्वे **भर्तृहरिकवेः ॥** रघुकारः कालिदासः मेधारुद्रः । मेधया रुद्रः । कोटिजित् इति चत्वारि **कालिदासकवेः** ॥ २६ ॥ भारविः शत्रुलुम्पः "शतपुष्पः" । शतं पुष्पाणि यस्य । इति द्वे **भारविकवेः ॥** भवभूतिः विस्मृतः भूगर्भः इति त्रीणि **भवभूतिकवेः** ॥ २७ ॥ सुगृहीतनामा इत्येकं **शुभकाम्यया प्रातःस्मरणीयस्य पूण्यकीर्तनस्य जनस्य॥** पैण्डिन्यं भैक्षजीविका इति द्वे **भिक्षाजीविनः॥** पाषाण्डः "पाखण्डः" इत्यपि। कौलिकः इति द्वे **वेदाचारत्यागिनः पाषाण्डस्य॥** खञ्जनरतं यतिमैथुनम् इति द्वे **यतिगोप्यरतेः** ॥ २८ ॥ तुरगब्रह्मचर्यकम् इत्येकम् **अभावात् स्त्रीत्यागस्य॥**मुखघण्टा हुलहुली इति द्वे **मुखघण्टायाः॥**नागवीटः "नागरीटः"

खटकस्त्यक्षरश्चाऽथ दारकर्म करग्रहः ।
वाधुक्यं च विवाहः स्यात्कुहलिः पूगपुष्पिका ॥ ३० ॥
नान्दीको तोरणस्तम्भो सुरतं त्वभिमानितम् ।
धर्षितं सम्प्रयोगो ना रतं चाब्रह्मचार्यकम् ॥
उपसृष्टं त्रिभद्रं च क्रीडारत्नं महासुखम् ॥ ३१ ॥

इति ब्रह्मवर्गः ॥ ७ ॥

द्विजलिङ्गी नृपः क्षत्रः क्षत्रियोऽथ प्रजेश्वरः ।
राजाधिपौ मण्डलेश एकजन्मा भयापहः ॥ १ ॥
स्कन्धावारस्तु कटकः शिबिरं तु बलस्थितिः ।
आदिराजः पृथुर्वैन्यः काकुत्स्थस्तु पुरञ्जयः ॥ २ ॥
यौवनाश्वस्तु मान्धाता खट्वाँङ्गस्तु दिलीपराट् ।
रामो दाशरथिः कौशल्यायनिर्दशकण्ठजित् ॥ ३ ॥
मैथिली जानकी सीता वैदेही भूमिजा च सा ।
रामपुत्रौ कुशलवावेकयोक्त्या कुशीलवौ ॥ ४ ॥

टात्करः "टाङ्करः" ॥ २९ ॥ खटकः त्यक्षरः इति चत्वारि **नागवीटस्य** ॥ दारकर्म । दारौपयिकं दारसम्पादकं कर्म । करग्रहः । करस्य वधूकरस्य वरेण ग्रहो ग्रहणं यत्र । वाधुक्यं विवाहः इति चत्वारि **विवाहस्य** ॥ कुहलिः । कुत्सितं हलति । पूगपुष्पिका इति द्वे **विवाहपुष्पादेः** ॥ ३० ॥ नान्दीकः तोरणस्तम्भः इति द्वे **मङ्गलस्तम्भस्य** ॥ सुरतम् अभिमानितं धर्षितं सम्प्रयोगः । पु० । रतम् अब्रह्मचर्यकम् उपसृष्टं त्रिभद्रं क्रीडारत्नं महासुखम् इति दश **सुरतस्य** ॥ ३१ ॥ इति ब्रह्मवर्गः ॥ ७ ॥ द्विजलिङ्गी नृपः क्षत्रः क्षत्रियः इति चत्वारि **क्षत्रियस्य** ॥ प्रजेश्वरः । प्रजानाम् ईश्वरः । राजा अधिपः इति त्रीणि **राज्ञः** ॥ मण्डलेशः । मण्डलस्य ईशः स्वामी । एकजन्मा भयापहः इति त्रीणि **मण्डलेशस्य** ॥ १ ॥ स्कन्धावारः कटकः इति द्वे **युद्धार्थमुद्युक्तसैन्यानां स्थापनस्य** ॥ शिबिरं बलस्थितिः इति द्वे **सैन्यनिवासस्थानस्य** ॥ आदिराजः पृथुः वैन्यः । वेनस्य दक्षिणबाहुमन्थनेन जातः । इति त्रीणि **सूर्यवंश्यस्य नृपस्य** । काकुत्स्थः पुरञ्जयः इति द्वे **सूर्यवंश्यस्य काकुत्स्थस्य नृपस्य** ॥ २ ॥ यौवनाश्वः । युवनाश्वस्य राज्ञः अपत्यम् । मान्धाता । माम् इन्द्रियं धयति । "मामयं धास्यतीत्यस्मात् मान्धाताऽसौ प्रकीर्तितः" इति । इति द्वे **युवनाश्वराजपुत्रस्य मान्धातृनृपस्य** ॥ खट्वाङ्गः "खट्वाङ्गः", दिलीपराट् इति द्वे **दिलीपस्य नृपस्य** ॥ रामः दाशरथिः । दशरथस्यापत्यम् । कौशल्यायनिः । कौशल्यायाः अपत्यम् । कौसल्यायनिरप्यत्र । दशकण्ठजित् । दशकण्ठं रावणं जयति । इति चत्वारि **दशरथपुत्रस्य रामस्य** ॥ ३ ॥ मैथिली जानकी सीता वैदेही

सौमित्रिर्लक्ष्मणो मेघनादजिच्चाथ रावणः ।
राक्षसेन्द्रो दशमुखो लङ्केशो धनदानुजः ॥ ५ ॥
मन्दोदरीशः पौलस्त्यो मेघनादस्तु शक्रजित् ।
हनूमान्हनुमानाञ्जनेयो योगचरानिली ॥ ६ ॥
हिडिम्बारमणो रामदूतश्चैवार्जुनध्वजः ।
ऐन्द्रिस्तु बाली बालिश्च सुग्रीवो रविनन्दनः ॥ ७ ॥
ऐलः पुरूरवो बौधिरुर्वशीवल्लभश्च सः ।
ययातिर्नाहुषिः शाकुन्तलेयो भरतः स्मृतः ॥ ८ ॥
दौष्मन्तिः सर्वदमनोऽर्जुनो बाहुसहस्रभृत् ।
हैहयः कार्तवीर्यश्च पुण्यश्लोकस्तु बाहुकः ॥ ९ ॥
नलोऽश्वविन्नैषधश्च महाभिष्मस्तु शान्तनुः ।
प्रातीपोऽस्य प्रिया काली दासेयी च झषोदरी ॥ १० ॥

भूमिजा इति पञ्च **सीतादेव्याः** ॥ कुशः लवः इति द्वे **रामपुत्रयोः प्रत्येकमेकैकमेकैकस्य** ॥ कुशीलवौ । कुशश्च लवश्चेति द्वन्द्वः । निपातनात् ईकारः । इत्येकम् एकयोक्त्या **रामपुत्रयोः** ॥ ४ ॥ सौमित्रिः । सुमित्रायाः अपत्यम् । लक्ष्मणः मेघनादजित् इति त्रीणि **रामभ्रातुर्लक्ष्मणस्य** ॥ रावणः । रवणस्यापत्यम् राक्षसेन्द्रः।राक्षसानाम् इन्द्रः । दशमुखः। दश मुखानि यस्य। अत्र मुखशब्दः उपाये वर्तते । लङ्केशः। लङ्कायाः ईशः।धनदानुजः। धनदस्य कुबेरस्य अनुजः कनीयभ्राता ॥ ५ ॥ मन्दोदरीशः पौलस्त्यः । पुलस्तस्यापत्यम् । इति सप्त **रावणस्य** ॥ मेघनादः । मेघस्येव नादो यस्य । शक्रजित् इति द्वे **मेघनादस्य** ॥ हनूमान् हनुमान् आञ्जनेयः । अञ्जना नाम वानरी तस्या अपत्यम् । योगचरः आनिलिः ॥ ६ ॥ हिडिम्बारमणः । हिडिम्बा राक्षसी तस्या रमणः पतिः । रामदूतः । रामस्य दूतः । अर्जुनध्वजः इत्यष्टौ **हनुमतः** ॥ ऐन्द्रिः । इन्द्रस्य अपत्यम् । बाली । बालिः । क्वचित् "वाली" "वालिः" इति त्रीणि **इन्द्रपुत्रस्य कपिराजस्य**॥ सुग्रीवः । सुष्ठु ग्रीवाऽस्य। रविनन्दनः। रवेः नन्दनः पुत्रः । इति द्वे **सूर्यपुत्रस्य वानरराजस्य** ॥ ७ ॥ ऐलः । इलायाः तन्नामिकायाः देव्या अपत्यम् । पुरूरवः बौधिः ।बुधस्य तन्नाम्नः चन्द्रवंशीयनृपस्य अपत्यम् । उर्वशीवल्लभः । उर्वश्याः वल्लभः प्रियः । इति चत्वारि **पुरूरव इति ख्यातस्य चन्द्रवंशीयनृपस्य**॥ ययातिः। नाहुषिः। नहुषस्याऽपत्यम्। इति द्वे **ययातिरिति ख्यातस्य नृपस्य** ॥ शाकुन्तलेयः । शकुन्तलाया अपत्यम् । भरतः ॥ ८॥ दौष्मन्तिः । दुष्मन्तस्यापत्यम् । सर्वदमनः । सर्वान् दाम्यति । इति चत्वारि **दुष्मन्तपुत्रस्य भरतनृपस्य** ॥

अर्जुनः । बाहुसहस्रभृत्। हैहयः । हैहयानां तन्नामकदेशविशेषाणाम् अधिपः । हैहयेश्वरोऽप्यत्र । कार्तवीर्यः । इति चत्वारि **कार्तवीर्य इति ख्यातस्य पाण्डवनृपस्य**॥ पुण्यश्लोकः । बाहुकः ॥९॥ नलः । अश्ववित् । नैषधः । निषधानां जनपदानामधिपतिः । इति पञ्च **चन्द्र-**

विचित्रवीर्या चित्राङ्गदसूर्योजनगन्धिका।
व्यासमाता सत्यवती गाङ्गेयो गान्दिनीसुतः॥ ११॥
देवव्रतः शान्तनवो गाङ्गो गाङ्गायनिश्च सः।
भीष्मः कौणपदन्तश्च स्वेच्छामृत्युः पुरावसुः॥ १२॥
धृतराष्ट्रस्त्वाम्बिकेयः पाण्डुर्माद्री पृथापतिः।
दुर्योधनस्तु कुरुराड्गान्धारेयः सुयोधनः॥ १३॥
धर्मपुत्रोऽजमीढः स्यात्कर्णानुजयुधिष्ठिरौ।
अजातशत्रुः काङ्कोऽथ भीमसेनः कटव्रणः॥ १४॥
वीररेणुर्नागबलो गुणकारो वृकोदरः।
बककीचककिर्मीरजरासन्धहिडिम्बजित॥ १५॥
पार्थः किरीटी गाण्डीवी गुडाकेशो बृहन्नलः।
अर्जुनः फाल्गुनो जिष्णुर्विजयश्च धनञ्जयः॥ १६॥

वंशीयनृपस्य नलस्य॥ महाभीष्मः शान्तनुः प्रातीपः "प्रतीपः" इति त्रीणि **चन्द्र-वंशीयप्रतीपराजपुत्रस्य शान्तनोः॥** काली दासेयी झषोदरी॥ १०॥ विचित्र-वीर्या। विचित्रमाश्चर्य्यं वीर्यमस्याः। चित्राङ्गदसूः योजनगन्धिका। योजनं गन्धः अस्याः। व्यास-माता सत्यवती इत्यष्टौ **व्यासमातुः सत्यवत्याः॥** गाङ्गेयः गान्दिनीसुतः। गान्दिन्याः सुतः॥ ११॥ देवव्रतः। देवम् इन्द्रियसंयमनं व्रतमस्य। शान्तनवः। शान्तनोरपत्यम्। गाङ्गः गाङ्गायनिः। गङ्गाया अपत्यम्। भीष्मः कौणपदन्तः स्वेच्छामृत्युः पुरावसुः इति दश **कुरुवंश्यस्य शान्त-नुसुतस्य भीष्मनृपस्य॥** १२॥ धृतराष्ट्रः आम्बिकेयः। अम्बिकायाः अपत्यम् इति द्वे **चन्द्र-वंशीयस्य दुर्योधनपितुर्धृतराष्ट्रस्य नृपस्य॥** पाण्डुः माद्री पृथापतिः। पृथायाः पतिः स्वामी। इति त्रीणि **पाण्डु इति ख्यातस्य चन्द्रवंशीयस्य नृपस्य॥** दुर्यो-धनः कुरुराट् गान्धारेयः सुयोधनः इति चत्वारि **धृतराष्ट्रनृपतेर्ज्येष्ठपुत्रस्य दुर्योधन-नृपस्य॥** १३॥ धर्मपुत्रः। धर्मस्य पुत्रः। अजमीढः कर्णानुजः। कर्णस्य अनुजः। युधि-ष्ठिरः। युधि युद्धे स्थिरः।। "गवियुधिभ्यां स्थिर" इति षत्वम्। अजातशत्रुः। जातस्य जन्तुमात्रस्य न शत्रुः॥ अश्राद्धभोजीत्यादिवत् नञो व्यवहितेन शत्रुशब्देना-न्वयात् असमर्थसमासः। अथवा अजात एव शत्रुः। काङ्कः इति षट् **पाण्डवश्रेष्ठस्य युधिष्ठिरनृपस्य॥** भीमसेनः कटव्रणः॥ १४॥ वीररेणुः नागबलः। नागस्य हस्तिनः बलं शक्तिर्यस्य सः। गुणकारः वृकोदरः। वृकस्येव उदरं यस्य। अत्र जिच्छब्दो बका-दिभिः शब्दैरन्वेति। बकजित् कीचकजित् किर्मीरजित् जरासन्धजित् हिडिम्बजित्। वकजित् व्रकान्तकादयोऽप्यत्र। इत्येकादश **युधिष्ठिरानुजस्य भीमसेनस्य॥** १५॥ पार्थः किरीटी गाण्डीवी गुडाकेशः बृहन्नलः बृहन्नडोऽप्यत्र। अर्जुनः फाल्गुनः जिष्णुः विजयः धन-

सव्यसाची सुभद्रेशः शब्दभेदी कपिध्वजः ।
वार्तघ्नश्चाऽपि बीभत्सुर्द्रौपदी पाण्डुशर्मिला ॥ १७ ॥
पाञ्चाली पार्वती कृष्णा चेदिजा नित्ययौवना ।
याज्ञसेन्यथ राधेयो वसुसेनोऽर्कनन्दनः ॥ १८ ॥
घटोत्कचान्तकः कर्णश्चम्पेशः सूतपुत्रकः ।
द्रोणस्तु गुरुराचार्योऽश्वत्थामा तु कृपीसुतः ॥ १९ ॥
द्रौणायनोऽथ राजर्षिर्जनमेजयसंज्ञकः ।
पारीक्षितोऽप्यथ जरत्कारुर्यायावरो मतः ॥ २० ॥
प्रियाऽस्य मनसादेवी जरत्कारुरथैतयोः ।
आस्तीकनामा तनयो विरोचनसुतो बलिः ॥ २१ ॥
बाणो विन्ध्याबलिसुतस्त्वाष्ट्रो वृत्रोऽप्यहिश्च सः ।
दमघोषसुतश्चैद्यश्चेदिराट् शिशुपालकः ॥ २२ ॥

चयः ॥ १६ ॥ सव्यसाची सुभद्रेशः शब्दभेदी कपिध्वजः वार्तघ्नः बीभत्सुः इति षोडश **मध्यमपाण्डवस्य अर्जुनस्य** ॥ द्रौपदी पाण्डुशर्मिला ॥ १७ ॥ पाञ्चाली पार्वती कृष्णा चेदिजा नित्ययौवना याज्ञसेनी इत्यष्टौ **द्रुपदराजदुहितुः द्रौपद्याः** ॥ राधेयः । राधायाः अपत्यम् पुत्रत्वेन परिग्रहणेन तत्पालितत्वात् । वसुसेनः "वसुषेणः" अर्कनन्दनः ॥ १८ ॥ घटोत्कचान्तकः कर्णः चम्पेशः । चम्पायाः ईशः । सूतपुत्रकः । सूतस्य पुत्रकः । इति सप्त **अङ्गदेशाधिपस्य पृथात्मजस्य कर्णस्य** ॥ द्रोणः गुरुः आचार्यः इति त्रीणि **द्रोण इति ख्यातस्य राजगुरुविप्रस्य** ॥ अश्वत्थामा कृपीसुतः । कृप्याः द्रोणाचार्यपत्न्याः सुतः ॥ १९ ॥ द्रौणायनः । द्रोणस्यापत्यम् । इति त्रीणि **अश्वत्थाम्नः द्रोणाचार्यपुत्रस्य** ॥ राजर्षिः जनमेजयः । जन्मेजयोऽप्यत्र । पारीक्षितः इति त्रीणि **परीक्षितराजपुत्रस्य जनमेजयस्य नृपस्य** ॥ जरत्कारुः यायावरः इति द्वे **मनसादेवीवल्लभस्य मुनेर्जरत्कारोः** ॥ २० ॥ मनसादेवी जरत्कारुः इति द्वे **अस्य जरत्कारोः प्रियायाः मनसादेव्याः** ॥ आस्तीकः इत्येकम् **एतयो जरत्कारुमनसादेव्योः पुत्रस्य** ॥ विरोचनसुतः । विरोचनस्य सुतः । बलिः । "येन बद्धो बली राजा दानवेन्द्रो महाबली" इति द्वे **विरोचनपुत्रस्य बलेः** ॥ २१ ॥ बाणः । बाणोऽप्यत्र । बिन्ध्यासुतः । विन्ध्यासुतोऽप्यत्र । बलिसुतः इति त्रीणि **बलिपुत्रस्य बाणस्य** ॥ त्वाष्ट्रः वृत्रः अहिः इति त्रीणि **त्वष्टृपुत्रस्य वृत्रस्य** ॥ दमघोषसुतः । दमघोषस्य सुतः । चैद्यः । चेदीनां जनपदानामयम् । चेदिराट् । चेदीनां जनपदानां राजा । शिशुपालकः । शिशुपालकोऽप्यत्र । इति चत्वारि **दमघोषात्मजस्य चेदिदेशीयराजस्य शिशु-**

बार्हद्रथिर्जरासन्धः कंसः स्यादुग्रसेनजः ।
कर्णीसुतो मूलदेवो मूलभद्रः कलाङ्कुरः ॥ २३ ॥
मन्त्री ग्रन्थिहरोऽमात्यो द्वाःस्थितो वेत्रधारकः ॥
द्वोःसाधिको वर्तरूको गर्वाटो दण्डवासिनिः ॥ २४ ॥
सहपांशुकिलः स्नेही वयसोऽप्यथ वार्त्तिकः ।
वार्त्तायनः प्रवृत्तिज्ञो मौहूर्तो दैवलेखकः ॥ २५ ॥
चित्तोक्तिः पुष्पशकटी दैवप्रश्न उपश्रुतिः ।
लेखको मसिपण्यः स्याद्वोलकः किरिकोऽपि सः ॥ २६ ॥
मसिधानी मसिमणिर्मेलान्धुर्वर्णकूपिका ।
मसिजलं तु मेला स्यात्पत्राञ्जनं मसिर्द्वयोः ॥ २७ ॥
लेखनी वर्णतूली स्याल्लेखो वाचिकहारकः ।
वर्णदूतः स्वस्तिमुखः काचनं तन्निबन्धनम् ॥ २८ ॥
लेखस्थानं ग्रन्थकुटी मुद्रा प्रत्ययकारिणी ।
यातुर्गन्तुश्च पथिको हारिः पथिकसन्ततिः ॥ २९ ॥

पालस्य ॥ २२ ॥ बार्हद्रथिः जरासन्धः । "जरायाः सन्धितो यस्मात् जरासन्धस्ततोऽभवत्" इति । द्वे **जरासन्धस्य नृपस्य** ॥ कंसः उग्रसेनजः । उग्रसेनात् जायते । कर्णीसुतः । कर्ण्याः सुतः पुत्रः । मूलदेवः मूलभद्रः कलाङ्कुरः इति षट् **उग्रसेनपुत्रस्य कंसस्य नृपस्य** ॥ २३ ॥ मन्त्री ग्रन्थिहरः अमात्यः । अमा सह समीपे वा भवः । "अमान्तिकसहार्थयोः" इति कोषान्तरम् । अव्ययात्त्यप् च । इति त्रीणि **अमात्यस्य** ॥ द्वाःस्थितः । "द्वास्थितः द्वास्थः द्वारस्थः द्वाःस्थादयः" अप्यत्र । वेत्रधारकः द्वोःसाधिकः "दौःसाधिकः" वर्तरूकः गर्वाटः दण्डवासिनिः । द्वारी द्वारपादयोऽप्यत्र । इति षट् **द्वारपालस्य** ॥ २४ ॥ सहपांशुकिलः स्नेही वयसः इति त्रीणि **वयस्यस्य** ॥ वार्त्तिकः वार्त्तायनः प्रवृत्तिज्ञः "प्रवृत्तज्ञः" इति त्रीणि **प्रवृत्तिविदस्य** ॥ मौहूर्त्तः दैवलेखकः इति द्वे **गणकस्य** ॥ २५ ॥ चित्तोक्तिः पुष्पशकटी दैवप्रश्नः उपश्रुतिः इति चत्वारि **आकाशवाण्याः** ॥ लेखकः मसिपण्यः वोलकः "वोरकः" किरिकः इति चत्वारि **लेखकस्य** ॥ २६ ॥ मसिधानी । मसिधानमप्यत्र । मसिमणिः मेलान्धुः वर्णकूपिका इति चत्वारि **मसिद्रव्यस्थापनभाजनस्य** ॥ मसिजलं मेला इति द्वे **लेखनद्रव्यस्य** ॥ पत्राञ्जन मसिः इति द्वे **कज्जल्याः** ॥ २७ ॥ लेखनी वर्णतूली इति द्वे **लेखनसाधनस्य कलमस्य** ॥ लेखः वाचिकहारकः वर्णदूतः स्वस्तिमुखः इति चत्वारि **लेखनस्य** ॥ काचनम् "कचेलम्" इत्येकं **पत्रनिबन्धनस्य लाक्षाद्रव्यस्य**॥२८॥लेखस्थानं ग्रन्थकुटी इति द्वे **लेखस्थानस्य** ॥ मुद्रा प्रत्ययकारिणी इति द्वे **मुद्रायाः** । यातुः

सन्देशः प्राभृतं कौशल्युत्कोचस्तूपदानकम् ।
जनान्तिकं त्वप्रकाशो लुण्डी स्यान्न्यायसारिणी ॥ ३० ॥
ताम्बूलदो वाग्गुलिकः संवाहकोऽङ्गमर्दकः ।
चामरं रोमगुत्सं च केशरं चावचूलकम् ॥ ३१ ॥
कुठेरुर्मन्थरुः प्रोतोत्सादनं वस्त्रकुट्टिमम् ।
छत्रं पुटोटजं राजशृङ्गं कनकदण्डकम् ॥ ३२ ॥
हस्ती महामृगः पीलुः सिन्धुरो दीर्घमारुतः ।
राजीवो जलकाङ्क्षश्च निर्झरः करटी कटी ॥ ३३ ॥
विलोमजिह्वान्तःस्वेदपिण्डपादलतालकाः ।
वराङ्गः पुष्करी शूर्पकर्णसामजपेचिलाः ॥ ३४ ॥
करिणी वासिता गम्भीरवेद्यङ्कुशदुर्धरः ।
चालकव्यालकौ राजवाह्यो विजयकुञ्जरः ॥ ३५ ॥

गन्तुः पथिकः इति त्रीणि **देशान्तरगमनाय गृहान्निःसृत्य पथि गन्तुः ॥** हारिः पथिकसन्ततिः इति द्वे **पथिकसङ्घस्य** ॥२९॥ सन्देशः प्राभृतं कौशली इति त्रीणि **सन्देशस्य ॥** उत्कोचः उपदानकम् इति द्वे **उत्कोचस्य ॥** जनान्तिकम् । जनानाम् अन्तिकं सामीप्यवत् । अप्रकाशः इति द्वे **अप्रकाशस्य ॥** लुण्डी न्यायसारिणी "न्यायसारणी" इति द्वे **न्यायसारिण्याः** ॥ ३० ॥ ताम्बूलदः वाग्गुलिकः इति द्वे **ताम्बूलदातुः ॥** संवाहकः "सवाहकः" अङ्गमर्दकः । अङ्गं मर्दयति । अङ्गमर्दोऽप्यत्र । इति द्वे **अङ्गमर्दकारकस्य सेवकस्य ॥** चामरम् । चमरस्य विकारं तत्पुच्छनिर्मितत्वात् । रोमगुत्सं रोमगुच्छमप्यत्र । केशरम् अवचूलकम् इति चत्वारि **चमरपुच्छकृतस्य व्यजनस्य** ॥ ३१ ॥ कुठेरुः "कुठेरः" मन्थरुः "तन्मरुः" इति द्वे **चामरवातस्य ॥** प्रोतोत्सादनम् । प्रोतेन निर्मितम् उत्सादनं यत्र । वस्त्रकुट्टिमम् । वस्त्रनिर्मितं कुट्टिमम् । इति द्वे **वस्त्रनिर्मितस्य ॥** छत्रं पुटोटजम् । पुटनिर्मितम् उटजं यत्र । इति द्वे **छत्रस्य ॥** राजशृङ्गं कनकदण्डकम् । कनकेन निर्मितं दण्डं यस्य । इति द्वे **सुवर्णदण्डच्छत्रस्य** ॥३२॥ हस्ती महामृगः पीलुः सिन्धुरः । सिन्धुर्मदजलमस्यास्ति । "मदान्धसिन्धुरघटे" इति । दीर्घमारुतः दीर्घः मारुतो यस्य । राजीवः जलकाङ्क्षः निर्झरः "निर्जूरः" करटी । करटः गजगण्डोऽस्त्यस्य । कटी ॥ ३३ ॥ विलोमजिह्वः । विलोमा विपरीता जिह्वा यस्य । अन्तःस्वेदः । अन्तः स्वेदो मदस्यन्दनं घर्मजलं यस्य । पिण्डपादः । पिण्डं पादं यस्य । लतालकः वराङ्गः पुष्करी शूर्पकर्णः । शूर्पे इव कर्णौ यस्य । सामजः पेचिलः । पेचमस्त्यस्य । इत्येकोनत्रिंशतिः **हस्तिनः** ॥ ३४ ॥ करिणी वासिता इति द्वे **हस्तिन्याः ॥** गम्भीरवेदी । गम्भीरवेदितोऽप्यत्र । "त्वग्भेदात् शोणितस्रावात् मांसस्य कथनादपि । आत्मानं यो न जानाति स स्याद्गम्भीरवेदित इति । अङ्कुशदुर्धरः चालकः व्यालकः इति चत्वारि **अङ्कुशावेतर्दु-**

ईषादन्तो महादन्तः कर्णास्फाले झलज्झला ।
मदप्रयोगो व्यस्तारः विक्कस्तु करिशावकः ॥ ३६ ॥
आरक्षः कुम्भसन्धिः स्यात्सन्दानोऽष्ठीवतोरधः ।
नासापूर्वं स्थूलहस्तं दन्तमूले करीरिका ॥ ३७ ॥
शङ्खः कटो दन्तमध्यं प्रवेष्टः पृष्ठतल्पने ।
आयस्कारः प्रजङ्घाग्रे प्रोहश्चरणपर्वणि ॥ ३८ ॥
न ना गात्रावरे नाली कर्णारा कर्णवेधनी ।
आलानं शङ्कुरक्षोभः प्रारब्धिर्गजबन्धनी ॥ ३९ ॥
प्राची तु शृङ्खला हिञ्जीरोऽस्त्री स्यादन्दुकश्च सः ।
पित्तज्वरः पाकलोऽस्य कूटपूर्वस्त्रिदोषजः ॥ ४० ॥
अश्वः किण्वी हरिक्रान्तः शालिहोत्रश्च मुद्गभुक् ।
श्रीपुत्रश्चामरी हेषी राजस्कन्धो मरुद्रथः ॥ ४१ ॥
वातायनश्चैकशफो यस्तु पचाङ्गपुष्पितः ।
स पञ्चभद्रः सूर्याश्वे वाताटहरितौ समौ ॥ ४२ ॥

दान्तहस्तिनः ॥ राजवाह्यः विजयकुञ्जरः । विजयाय कुञ्जरः । इति द्वे **विजयगजस्य** ॥ ३५ ॥ ईषादन्तः । ईषेव दन्तौ यस्य । इत्येकम् **ईषादीर्घदन्तस्य हस्तिनः** ॥ महादन्तः । महान्तौ दन्तौ यस्य । इत्येकं **महादन्तस्य हस्तिनः** ॥ झलज्झला इत्येकं **हस्तिकर्णचालनस्यं** ॥ मदप्रयोगः व्यस्तारः इति द्वे **मदप्रयोगस्य** ॥ विक्कः करिशावकः । करिणः शावकः । "करिशाबकः" इति द्वे **करिशावकस्य** ॥ ३६ ॥ आरक्षः कुम्भसन्धिः इति द्वे **कुम्भसन्धेः** ॥ सन्दानः इत्येकं **गजस्याष्ठीवतोरधोभागस्य** ॥ नासापूर्वं स्थूलहस्तम् इति द्वे **नासापूर्वभागस्य**॥ करीरिका । करीराऽप्यत्र । इत्येकं **हस्तिदन्तमूलस्य** ॥३७॥ शङ्खः कटः "कूटः" दन्तमध्यम् इति त्रीणि **हस्तिदन्तमध्यस्य**॥ प्रवेष्टः इत्येकं **गजपृष्ठतल्पनस्य** ॥ आयस्कारः इत्येकं **प्रजङ्घाग्रस्य** ॥ प्रोहः इत्येकं **चरणपर्वणः** ॥ ३८ ॥ गात्रम् इत्येकं **हस्तिनः पूर्वजङ्घादिदेशस्य**॥ अवरम् इत्येकं **पश्चाज्जङ्घादिदेशस्य**॥ इमौ शब्दौ न ना पुँल्लिङ्गे न स्याताम् । नाली "नीली" कर्णारा कर्णवेधनी इति त्रीणि **कर्णवेधन्याः** ॥ आलानं शङ्कुः अक्षोभः प्रारब्धिः गजबन्धनी इति पञ्च **हस्तिबन्धनस्तम्भस्य** ॥ ३९ ॥ प्राची "पारी" शृङ्खला हिञ्जीरः इति त्रीणि **शृङ्खलायाः**॥ अन्दुकः इत्येकं **हस्तिपादबन्धननिगडस्य** ॥ कचित् अङ्कुशः इत्येकं **हस्तिचालनोपयोगिनः वक्राग्रलौहास्त्रस्य** ॥ पाकलः इत्येकं **हस्तिनः पित्तज्वरस्य** ॥ कूटपूर्वः इत्येकं **हस्तिनः त्रिदोषजज्वरस्य** ॥ ४० ॥ अश्वः किण्वी "किल्वी" हरिक्रान्तः शालिहोत्रः मुद्गभुक् श्रीपुत्रः। श्रियाः पुत्रः । चामरी । चामरमिव पुच्छमस्यास्ति। हेषी राजस्कन्धः मरुद्रथः॥४१॥वातायनः।वातस्येव शीघ्रमयन गतिर्यस्य । एकशफः ।

यायावरोऽश्वमेधीयः पारसीकः परादनः ।
आरट्टजश्च चोस्कस्तु सिन्धुवारो हयोत्तमः ॥ ४३ ॥
वाताश्वजात्याजानेयो वेशरोऽश्वतरः खरः ।
श्रीवृक्षोऽस्य हृदावर्तो रोचमानो गलोद्भवः ॥ ४४ ॥
ऊर्ध्वस्थितिः पुरुषिकं विक्रान्तिस्तु पुलायितम् ।
पुलासन्नाहप्रखरौ कवियं कविकोच्यते ॥ ४५ ॥
ग्रीवाघण्टा घर्घरा स्याद्रश्मिः प्रवयणं च तत् ।
प्रतोदोऽथ खुरो विङ्खः पुटो लुण्टनवेल्लने ॥ ४६ ॥
वल्गा दन्तालिका पल्ययनं पर्याणमस्य तु ।
वङ्क्काग्रभागः स्यादश्ववारो वल्लभपालकः ॥ ४७ ॥

एकः शफोऽस्य । इति द्वादश **वाजिनः**॥ यस्य अश्वस्य पञ्चसु शरीरावयवेषु पुष्पमस्ति सः । पञ्चभद्रः । पञ्चसु देहस्थानेषु भद्रः । तथोक्तम्–"पञ्चभद्रस्तु हृत्पृष्ठे मुखपार्श्वेषु पुष्पितः" इति । इत्येकं **पञ्चभद्र इति ख्यातस्य वाजिनः** ॥ वाताटः हरित् इति द्वे **सूर्याश्वस्य** ॥ ४२ ॥ यायावरः देशाद्देशान्तरं याति । अश्वमेधीयः । अश्वमेधाय हितः । इति द्वे **अश्वमेधाङ्गस्य अश्वस्य** ॥ पारसीकः । "पारसीकांस्ततो जेतुम्" इति रघुः । परादनः आरट्टजः "आवटजः" । क्वचित् "आवट्टजः" । इति त्रीणि **पारसीकदेशीयाश्वस्य** ॥ चोस्कः सिन्धुवारः इति द्वे **सिन्धुदेशीयाश्वस्य** ॥ हयोत्तमः । हयानां हयेषु वा उत्तमः श्रेष्ठः ॥ ४३ ॥ वाताश्वजाती । वाताश्वः वातहयः अप्यत्र । आजानेयः इति त्रीणि **कुलीनाश्वस्य** ॥ वेशरः । वेशं राति । वेसरोऽप्यत्र । अश्वतरः खरः इति त्रीणि **अश्वतरस्य**॥ श्रीवृक्षः "श्रीवृक्षकः" । श्रियः शोभायाः वृक्ष इव । हृदावर्त्तः । हृदि आवर्त्तः । इति द्वे **अश्वहृदयस्थस्य श्वेतरोमावर्तभेदस्य** ॥ रोचमानः इत्येकम् **अश्वगलोद्भवस्य रोमावर्तस्य** ॥४४॥ पुरुषिकम् इत्येकम् **अश्वस्योर्ध्वस्थितरोमावर्तस्य**॥ विक्रान्तिः पुलायितम् इति द्वे **अश्वगतेः** ॥ पुलासन्नाहः प्रखरः । प्रकृष्टः खरः । प्रादिसमासः । इति द्वे **हयसज्जीकरणस्य**॥ कवियं कविका इति द्वे **अश्वमुखस्थायाः लौहमयायाः कविकायाः** ॥ उच्यते कथ्यते इत्यर्थः ॥ ४५ ॥ ग्रीवाघण्टा घर्घरा इति द्वे **ग्रीवाघण्टायाः** ॥ रश्मिः प्रवयणम् "प्रवपणम्" इति द्वे **अश्वादिदाम्नः** ॥ प्रतोदः इत्येकम् **अश्वादिताडनदण्डस्य** ॥ खुरः विङ्खः पुटः इति त्रीणि **अश्वखुरस्य** ॥ लुण्टनम् । लुटनमप्यत्र । वेल्लनम् इति द्वे **अश्वादेर्भूम्यादौ श्रमापनयनार्थं पुनःपुनरङ्गचालनस्य** ॥४६॥ वल्गा दन्तालिका इति द्वे **अश्वमुखस्थस्य रज्जुभेदस्य** ॥ पल्ययनं पर्यायणम् । पर्याणमप्यत्र । वङ्क्काग्रभागः इति त्रीणि **अश्वसज्जीकरणविशेषस्य** ॥ अश्ववारः । अश्वं वारयति । वल्लभपालकः । वल्लभं पालयति । इति द्वे **अश्वपालस्य** ॥४७॥

नन्दीघोषोऽर्जुनरथो नीतिघोषस्तु गीष्पतेः ।
चङ्कुरं धोरणं यानमात्रे चक्रं त्वरि स्मृतम् ॥ ४८ ॥
लघ्वी त्वाष्ट्री रथी कालवलनं त्वङ्कवर्मणी ।
मेठो मेण्डो हस्तिपके जङ्घात्राणं तु मङ्खुणम् ॥ ४९ ॥
स्यान्नायकाग्रेसरिकौ नासीरं दर्प ऊष्मणि ।
शस्त्रमायुधमुद्घातः स्थावरं तु धनुर्गुणी ॥ ५० ॥
शरावापो धनुः स्त्री स्यात्तृणता त्रिणतापि च ।
व्यधस्तु प्रतिकायः स्याज्जीवा स्याद्भारवं गुणः ॥ ५१ ॥
शस्त्राभ्यासश्च खुरली बाणः स्यादस्त्रकण्टकः ।
स्थूलक्ष्वेडो विपाटश्च चित्रपुङ्खः शरः सरः ॥ ५२ ॥
पत्रवाहो विकर्षोऽथ तीरं विज्जालसायके ।
लोहनालस्तु नाराचः प्रसरः काण्डगोचरः ॥ ५३ ॥
ऋष्टिः खड्गः तरवारिः शस्त्रो भद्रात्मजश्च सः ।
धाराविषो विशसनो न्युब्जखड्गः कटीतलः ॥ ५४ ॥

नन्दीघोषः इत्येकम**र्जुनरथस्य** ॥ क्वचित् पार्थरथेति पाठः । नीतिघोषः इत्येकं **बृहस्पतिरथस्य** ॥ चङ्कुरं धोरणम् इति द्वे **यानमात्रस्य** ॥ चक्रम् आरि इति द्वे **चक्रस्य**॥ स्मृतं ज्ञातम् ॥ ४८ ॥ लघ्वी त्वाष्ट्री रथी इति त्रीणि **लघुरथस्य** ॥ कालवलनम् "कालववनम" अङ्कक वर्म्म इति त्रीणि **सन्नाह इति ख्यातस्य वर्मणः**॥ मेठः "मेढः" मेण्डः इति द्वे **हस्तिपालस्य** ॥ जङ्घात्राणं मङ्खुणम् इति द्वे जङ्घात्राणस्य ॥ ४९ ॥ नायकः अग्रेसरिकः इति द्वे **नायकस्य** ॥ नासीरं दर्पः इति द्वे **दर्पस्य** ॥ शस्त्रम आयुधम् उद्घातः "उद्घात:" इति त्रीणि **शस्त्रस्य** ॥ स्थावरं धनुः गुणी ॥ ५० ॥ शरावापः । शराः आवाप्यन्तेऽत्र । शरारोपोऽप्यत्र । धनुः तृणता त्रिणता इमे द्वे स्त्रियां स्याताम् । इति सप्त **धनुषः**॥ व्यधः "व्यध्य:" प्रतिकायः जीवा भारवं "मारवं" गुणः इति पञ्च धनुर्गुणस्य ॥ ५१ ॥ शस्त्राभ्यासः खुरली इति द्वे **शस्त्राभ्यासस्य** ॥ बाणः अस्त्रकण्टकः । अस्त्रं कण्टक इव । स्थूलक्ष्वेडः । स्थूलः क्ष्वेडः विषः यस्य । विपाटः चित्रपुङ्खः शरः सरः ॥ ५२ ॥ पत्रवाहः । पत्रस्य वाहः । विकर्षः इति नव **बाणस्य** ॥ तीरं विज्जालं सायकम् । शायकमप्यत्र । इति त्रीणि **सायकस्य** ॥ लोहनालः । लोहेन कृतं नालं यस्य । नाराचः प्रसरः काण्डगोचरः । काण्ड गोचरं यस्य । इति चत्वारि **नाराचस्य** ॥५३॥ ऋष्टिः खड्गः तरवारिः । तरं शत्रूणां गतिं वारयति । शस्त्रः भद्रात्मजः धाराविषः बिशसनः । विशस्यतेऽनेन । "असिर्विशसनः खड्गः" इति खड्गस्तोत्रम् । इति सप्त **खड्गस्य** ॥ न्युब्जखड्गः । न्युब्जश्चाऽसौ खड्गश्च ।

स्यादट्टनं चक्रफलं पर्शुः परशुरित्यपि ।
दीर्घायुधं शलः कुन्तः शल्यः शङ्कुर्विषाङ्कुरः ॥ ५५ ॥
शूलोऽस्त्री सीसकं लग्नाः प्रातर्गेयाः स्तुतिव्रताः ।
भोगावली वन्दिपाठो वसुकीटस्तु याचकः ॥ ५६ ॥
वातकेतुः क्षितिकणः स्यात्पांशुर्मेदिनीद्रवः ।
सम्भारः सर्वपूर्णत्वं पताका व्योममण्डलम् ॥ ५७ ॥
कदली कन्दली चीनमक्षंवाटस्तु मल्लभूः ।
भीरुस्तु भेलो हरिणहृदयः स्यात्पलङ्कटः ॥ ५८ ॥
विद्रवस्तु शृगाली स्यादाघातस्तु वधस्थली ।
कदनं मारणं मन्थः सौप्तिकं रात्रिमारणम् ॥ ५९ ॥
निपातो भूमिलाभश्च मृत्युरप्यथ मारकः ।
मरको मारिरुत्पातः शवस्तु क्षितिवर्धनः ॥ ६० ॥
पञ्चावस्थः कटः स्थाणुः श्मशानं तु शतानकम् ।
रुद्राक्रीडो दाहसरः संस्क्रिया सत्क्रिया समे ॥ ६१ ॥

कटीतलः । कट्यां तलमास्पदमस्य । इति द्वे **वक्रखड्गस्य** ॥५४॥ अट्टनं "अत्तनं" चक्रफलम् इति द्वे **चक्रफलस्य** ॥ पर्शुः परशुः इति द्वे **परशोः** ॥ दीर्घायुधम् । दीर्घं च आयुधं च । शलः कुन्तः शल्यः शङ्कुः विषाङ्कुरः इति षट् **कुन्त इति ख्यातस्य प्रासा-ख्यायुधस्य** ॥५५॥ शूलः सीसकम् इति द्वे **सुतीक्ष्णस्य अयःफालस्य**॥लग्नाः प्रातर्गेयाः स्तुतिव्रताः इति त्रीणि **स्तुतिपाठकानाम्**॥ भोगावली वन्दिपाठः इति द्वे **स्तुतिग्रन्थस्य**॥वसुकीटः याचकः "याचितः" इति द्वे **याचकस्य**॥५६॥वातकेतुः। वातस्य केतुः । क्षितिकणः । क्षितेः कणः । पांशुः मेदिनीद्रवः । मेदिन्याः द्रवः । इति चत्वारि **पांशोः** ॥ सम्भारः सर्वपूर्णत्वम् इति द्वे **सम्भारस्य** ॥ पताका व्योममण्डलम् । व्योम्नः मण्डलम् । क्वचित् व्योममञ्जरमिति ॥ ५७ ॥ कदली कन्दली चीनम् इति पञ्च **पताकायाः** ॥ अक्षंवाटः । क्वचित् "अक्षवाटः" । मल्लभूः इति द्वे **बाहुयुद्धभूमेः** ॥ भीरुः भेलः हरिणहृदयः । हरिणस्येव भीतं हृदयमस्य । पलङ्कटः इति चत्वारि **भीरोः** ॥ ५८ ॥ विद्रवः । विद्रावोऽप्यत्र । शृगाली । शृगालस्तत्पलायनं सादृश्येनास्त्यस्य । इति द्वे **पलायनस्य** ॥ आघातः वधस्थली इति द्वे **वधस्थानस्य** ॥ कदनं मारणं मन्थः इति त्रीणि **मारणस्य**॥ सौप्तिकम् । सुप्तिकाले रात्रौ भवम् । रात्रिमारणम् । रात्रौ मारणम् । इति द्वे **रात्रिमारणस्य** ॥ ५९ ॥ निपातः भूमिलाभः । भूम्याः भूमौ वा लाभः । मृत्युः "मृत्करः" इति त्रीणि **मृत्योः** ॥ मारकः मरकः "मरणः" मारिः । मारीत्यप्यत्र । "मारीभये राजभये" इति बहुरूपस्तवः । उत्पातः इति चत्वारि **मारिकभयस्य** ॥ शवः क्षितिवर्धनः । क्षितिं भूमिं वर्धयति स्वदेहस्थपार्थिवांशोपचयेन ॥ ६० ॥ पञ्चावस्थः । पञ्च अवस्थाः यस्य । कटः

चिता काष्ठमटी चैत्यं चिताचूडकमिष्यते ।
चितं चाऽथान्तशय्यायां खटिर्वारुठ इत्यपि ।
उपग्रहस्तु ग्राहः स्याद्वन्दी करमँरीत्यपि ॥ ६२ ॥

इति क्षत्रियवर्गः ॥ ८ ॥

तृष्णा धनपिशाची स्याद्वार्धुष्यं धान्यवर्धने ।
प्रामार्ज्यमृणमर्थानां प्रयोगः स्यान्मलाँम्लिका ॥ १ ॥
ऋणमुक्तिर्विगणनं क्षेत्रं वारटमुच्यते ।
हलिर्बृहद्धले मुद्गो हरिनामा वनाखुकः ॥ २ ॥
वासन्तश्चाऽथ मसुरो मसूरो व्रीहिकाञ्चनः ।
सर्षपः स्यात्सरिषपः कटुस्नेहश्च तन्तुभः ॥ ३ ॥
प्रवेटः सितशूकः स्याद्गोधूमो म्लेच्छभोजनः ।
ताम्रवृन्तः कुलत्थः स्यान्निःस्नेहश्चण्डिकाऽतसी ॥ ४ ॥

स्थागः "स्थालः" इति पञ्च **शवस्य ॥** श्मशानम् । श्मानः शवाः शेरतेऽत्र । यतः, "श्मशब्देन शवः प्रोक्तः शानं तत्स्थानमुच्यते" इति निरुक्तेः । शतानकं रुद्राक्रीडः । रुद्रस्य आक्रीडा यत्र । दाहसरः । दाहस्य सरः । इति चत्वारि **श्मशानस्य ॥** संस्क्रिया "संस्त्रिया" सत्क्रिया इति द्वे **संस्कारस्य** ॥ ६१ ॥ चिता काष्ठमटी चैत्यं चिताचूडकं चितम् इति पञ्च **शवदाहार्थं कृतायाः काष्ठचुल्ल्याः ॥** इष्यते काम्यते । बुधैरिति शेषः । खटिः वारुठः । अपि शब्देन शवरथः शववाहनं शवयानमित्यादयः सङ्गृह्यन्ते । अत्र शववाहनशवयानशब्दाभ्यां मृतदेहवाहनं तल्पमपि कथ्यते । इति द्वे **शवरथस्य ॥** उपग्रहः ग्राहः वन्दी " वन्दिः " करमरी । अपिशब्दात् करिमरिरप्यत्र । इति चत्वारि **कारावद्धमनुष्यादेर्वन्द्याश्च** ॥ ६२ ॥ इति क्षत्रियवर्गः ॥ ८ ॥ तृष्णा धनपिशाची । धने पिशाचीव इति । द्वे **तृष्णायाः ॥** वार्धुष्यम् । वार्धुषेर्भावः । इत्येकं **धान्यादेर्वर्धनोपायस्य ॥** प्रामार्ज्यम् "प्रामित्यम्" ऋणम् इति द्वे **ऋणस्य ॥** मलाम्लिका "कलाम्बिका" । कचित् "कलम्बिका" इत्येकम् **अर्थानां प्रयोगस्य** ॥ १ ॥ ऋणमुक्तिः । ऋणात् मुक्तिः । विगणनम् । विशेषेण गणनम् । ऋणशोधनार्थं सङ्ख्यागणनमित्यर्थः । इति द्वे **ऋणमुक्तेः** ॥ क्षेत्रं वारटम् इति द्वे **क्षेत्रस्य ॥** उच्यते कथ्यते । बुधैरिति शेषः । हलिः इत्येकं **बृहद्धल इति ख्यातस्य महालाङ्गलस्य ॥** मुद्गः हरिनामा । हरेर्नाम तदाख्यानं वा । वनाखुकः । कचित् "वनाखुकः" । वनाखाकोऽप्यत्र ॥ २ ॥ वासन्तः । वसन्ते भवः । इति चत्वारि **मुद्गस्य ॥** मसुरः मसूरः व्रीहिकाञ्चनः । व्रीहिषु काञ्चनं तद्रूपमस्त्यस्य । इति त्रीणि **मसूरस्य व्रीहिभेदस्य ॥** सर्षपः सरिषपः कटुस्नेहः । कटुः स्नेहः तैलादिरूपो निर्यासो यस्य । कचित् "कटुस्नेहा । तन्तुभः" । तन्तुना सन्तत्या भाति । इति चत्वारि **सर्षपस्य** ॥ ३ ॥ प्रवेटः सितशूकः । सितः तीक्ष्णः शूको यस्य ।

मूर्खः पुरीषलो माषो राजमाषस्तु वर्वटः ।
फुल्लपालः शूर्पवाते न स्त्री तितउ चालनी ॥ ५ ॥
कण्डन्युदूखलं प्रस्थः पालिः सूदः प्रचेलकः ।
कुशूलो स्त्री व्रीह्यगारं कन्दुरग्निष्ठ उच्यते ॥ ६ ॥
आलिञ्जरो ना नन्दा स्त्री मृत्सा भाण्डकमृष्टिका ।
वारासनं वाःसदनं कणनो हण्डिकासुतः ॥ ७ ॥
कलशी गर्गरी तुल्या स्याच्छरावस्तु मार्त्तिकः ।
शालाजिरः पार्थिवश्च मृत्कांस्यमथ लोहिका ॥ ८ ॥
खरसोल्लः खरपात्रं शिङ्घाणं काचभाजनम् ।
काष्ठलोही तु वातर्दिर्जीरको दीप्यकः स्मृतः ॥ ९ ॥

इति द्वे **यवस्य** ॥ गोधूमः म्लेच्छभोजनः । म्लेच्छैर्भुज्यते । इति द्वे **गोधूमस्य** ॥ ताम्रवृन्तः । ताम्रं वृन्तमस्य । कुलत्थः इति द्वे **कुलत्थस्य** ॥ निःस्नेहः चण्डिका अतसी इति त्रीणि **अतस्याः** ॥ ४ ॥ मूर्खः पुरीषलः "पुरीषमः" माषः इति त्रीणि **माषस्य** ॥ राजमाषः वर्वटः इति द्वे **राजमाषस्य** ॥ फुल्लपालः इत्येकं **शूर्पवातस्य** ॥ एतत् स्त्रियां न स्यात् । तितउ चालनी इति द्वे **चालन्याः** ॥ ५ ॥ कण्डनी उदूखलम् । उलूखलमप्यत्र । इति द्वे **उदूखलस्य** ॥ प्रस्थः पालिः सूदः प्रचेलकः इति चत्वारि **चतुष्कुडवात्मकस्य-धान्यादेः परिमाणभेदस्य** ॥ कुशूलः "कुसूलः" व्रीह्यगारम् । व्रीहीनाम् अगारम् । इति द्वे **इष्टकादिनिर्मितस्य धान्यादिस्थापनार्हगृहस्य** ॥ कन्दुः अग्निष्ठः । अग्नौ स्थातुमर्हति । इति द्वे **वह्निस्थितियोग्यस्य लौहमयकटादिपात्रस्य तण्डुलादिभर्जनपात्रस्य स्वेदनीपात्रस्य च** । "कन्दुपक्वं तैलपकम्" इति स्मृतिः ॥ ६ ॥ आलिञ्जरः । अलिञ्जर एव । अयं तु पुँल्लिङ्गकः । नन्दा । इयं स्त्रियामेव । इति द्वे **जाला इति ख्यातस्य मृन्मयजलपात्रभेदस्य** ॥ केचित्तु मणिक इति पठंति । मृत्सा "मृत्स्ना" भाण्डकमृष्टिका । भाण्डकाय कृता मृष्टिका । क्वचित् "भाण्डकमुष्टिका" इति द्वे **प्रशस्तमृत्तिकायाः,आढकीति ख्यातस्य भाण्डभेदस्य वा** ॥ वारासनं वाःसदनम् इति द्वे **जलाधारस्य** ॥ कणनः हण्डिकासुतः । हण्डिकायाः सुतः । इति द्वे **क्षुद्रमृत्पात्रस्य** ॥ ७ ॥ कलशी "कलशिः" । "कलशिमुदधिगुर्वीम्" इति माघः । गर्गरी । गर्ग इति शब्दं राति । इति द्वे **कलश्याः** ॥ इयं तुल्या समाना स्यात् । शरावः मार्त्तिकः। मृत्तिकया निर्मितः। शालाजिरः पार्थिवः मृत्कांस्यम् । इति पञ्च **शरावस्य** ॥ लोहिका ॥ ८ ॥ खरसोल्लः "खरसोन्दः" खरपात्रम् । खरं च तत् पात्रं च । इति त्रीणि **लोहपात्रस्य**॥क्वचित् "करपात्रम्" । कर एव पात्रं जलनिक्षेपपात्रं यत्र। तत् हस्ताभ्यामुत्क्षिप्य

[1] न स्त्रीत्वस्य मध्यमणिन्यायेन पूर्वत्रवत् उत्तरत्रापि सम्बन्धः ।

कटुभङ्गस्तु शुण्ठी स्यात्काञ्जिकं तु तुषोदकम् ।
गृहाम्लं सिद्धसलिलं रक्षोघ्नं धातुनाशनम् ॥ १० ॥
गृहिणी मधुरा हिङ्गु शूलहृत्सूपधूपनम् ।
वर्षिणी हेमरागिण्यो हरिद्रा पीतवालुका ॥ ११ ॥
गण्डोलं स्याद्गुडः स्वादुः पिप्यटा गुडशर्करा ।
महाश्वेता तु मधुजा प्रयस्तं स्यात्सुसंस्कृतम् ॥ १२ ॥
चिपिटो धान्यचमसश्चित्रापूपश्चरुव्रणः ।
आलिम्पना तर्पणा दीपनं मण्डोदकं च तत् ॥ १३ ॥
वटकः पिष्टपूरः स्याद्व्रतोपायनवायने ।
प्रहेणकं चाऽथ पोली पूपाली चर्पटी च सा ॥ १४ ॥
सक्तुश्चूर्णक आपूप्यो भक्तं कुरुः प्रसादनः ।
मण्डो ज्येष्ठाम्बु खदिका लाजाः पारी तु दोहनी ॥ १५ ॥
निपानं स्त्री गवी तुम्बा निलिम्पा रोहिणी च सा ।
गव्यं श्रेष्ठं पुंसवनं स्याद्दोहापनयः पुमान् ॥ १६ ॥

परस्परजलदानक्रीडनस्य हस्तरूपपात्रस्य च॥ शिङ्घाणं काचभाजनम्। काचेन निर्मितं भाजनम्। इति द्वे **काचभाजनस्य** ॥ काष्ठलोही वातर्दिः इति द्वे **काष्ठलोह्याः**॥ जीरकः दीप्यकः इति द्वे **जीरकस्य** ॥ स्मृतः ज्ञातः । सुधीभिरिति शेषः ॥ ९ ॥ कटुभङ्गः शुण्ठी इति द्वे **शुण्ठ्याः**॥काञ्जिकं तुषोदकं गृहाम्लम् । गृहे आम्लमिव। सिद्धसलिलम्। सिद्धं च तत् सलिलं च । रक्षोघ्नं धातुनाशनम् । धातून् नाशयति॥१०॥ गृहिणी मधुरा इत्यष्टौ **काञ्जिकस्य** ॥ हिङ्गु शूलहृत् सूपधूपनम्। सूपो धूप्यतेऽनेन । इति त्रीणि **हिङ्गुनः** ॥ वर्षिणी हेमरागिण्यः हरिद्रा पीतवालुका।पीता वालुकेव चूर्णनात् । इति चत्वारि **हरिद्रायाः**॥११॥गण्डोलं गुडः स्वादुः इति त्रीणि **गुडस्य** ॥ पिप्यटा "पिप्पटा"गुडशर्करा । गुडः शर्करेव । इति द्वे **शर्करायाः** ॥ महाश्वेता मधुजा इति द्वे **सितायाः** ॥ प्रयस्तं सुसंस्कृतम् इति द्वे **तैलसंस्कृतस्य**॥१२॥चिपिटः धान्यचमसः इति द्वे **पृथुकस्य**॥चित्रापूपः चरुव्रणः इति द्वे **पूपविशेषस्य**॥आलिम्पना तर्पणा इति द्वे **तृप्तेः**॥दीपनं मण्डोदकम्।मण्ड इव उदकम्।इति द्वे **मण्डोदक इति ख्यातस्य आतपतण्डुलचूर्णमिश्रितजलस्य** ॥ १३ ॥ वटकः पिष्टपूरः । पिष्टानां तण्डुलचूर्णानां पूरो यस्य । इति द्वे **वटक इति ख्यातस्य खाद्यभेदस्य** ॥ व्रतोपायनं वायनं "वाचनम्" प्रहेणकम् इति त्रीणि **वायन इति प्रसिद्धस्य भक्षणभेदस्य** ॥ पोली । क्वचित् पौलीति पाठः। पूपाली चर्पटी इति त्रीणि **पोल्याः ईषत्पक्वस्य कलापयवादेश्च** ॥ १४ ॥ सक्तुः चूर्णकः इति द्वे **सक्तोः** ॥ आपूप्यः भक्तं कुरुः । "कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि नीवृतौ" इति मेदिनी । क्वचित् "कुरम्" "कूरः" । प्रसादनः इति चत्वारि **ओदनस्य** ॥ मण्डः ज्येष्ठाम्बु इति द्वे **मण्डस्य** ॥ खदिकाः लाजाः इति द्वे **लाजानाम्** ॥ पारी दोहनी ॥ १५ ॥ निपानं गवी तुम्बा निलिम्पा रोहिणी इति

अवदोहः पयः क्षीरं प्राग्गाढं श्रीधनं दधि ।
कद्वरं तु दधिस्नेहो जग्धिर्भोजनभक्षणे ॥ १७ ॥
देहयात्रा विष्वणनं भुक्तं प्रत्यवसानवत् ।
कल्यवर्तः प्रातराशः प्रातर्भोजनमित्यपि ॥ १८ ॥
अनड्वाञ्शाङ्करो गन्धमैथुनः शक्वरिर्वृषः ।
ककुद्मान्पुङ्गवश्चाऽथ कण्ठाला जालगोणिका ॥ १९ ॥
दोग्धा शकृत्करिर्वत्सस्तेषामाटीकनं क्रमः ।
गवादिकं जीवधनं पलिक्नी बालगर्भिणी ॥ २० ॥
करकं गोमयच्छत्रे गोग्रन्थिः शुष्कगोमयम् ।
करीषश्छगणो हम्भा रेभणं च गवां ध्वनौ ॥ २१ ॥
नैचिकं गोः शिरोदेशो वन्दनीया तु रोचना ।
मन्थानमन्थतक्काटाः स्यादुष्ट्रः कण्टकाशनः ॥ २२ ॥
लम्बोष्ठाध्वगवासन्तकुलनाशमरुद्विपाः ।
भोलिर्बहुकरो वक्रग्रीवो मेषस्तु रोमशः ॥ २३ ॥

सप्त **दोहन्याः** ॥ एते गवीत्यादयः शब्दाः स्त्रीलिङ्गे स्युः । गव्यं श्रेष्ठं पुंसवनं "प्रस्रवणं" दोहापनयः इति चत्वारि **गव्यस्य** ॥ अत्र दोहापनयशब्दस्तु पुंलिङ्गकः स्यात् । शेषाः क्लीबलिङ्गकाः ॥ १६ ॥ अवदोहः पयः क्षीरम् इति त्रीणि **दुग्धस्य** ॥ प्राग्गाढम् "प्राग्राटम्" श्रीधनम् इति द्वे **दध्नः**॥कद्वरं दधिस्नेहः "दधिस्वेदः" । दध्नः स्नेहः । इति द्वे **दधिस्नेहस्य** ॥ जग्धिः भोजनं भक्षणम् ॥ १७ ॥ देहयात्रा । देहस्य यात्रा प्रवर्तनं यस्याः । विष्वणनं भुक्तं प्रत्यवसानम् । वच्छब्देन अभ्यवहरणादयो गृह्यन्ते । इति सप्त **भोजनस्य** ॥ कल्यवर्तः । कल्ये प्रभाते वर्तः भोजनम् । प्रातराशः । प्रातः अश्यते भुज्यते । अथवा प्रातः प्रभाते आशो भोज्यम् । प्रातर्भोजनम । अपिशब्देन प्रभाताशः प्रभातभोजनमित्यादयोपि गृह्यन्ते । इति त्रीणि **प्रातर्भोजनस्य** ॥१८॥ अनडान शाङ्करः "शाक्करः" गन्धमैथुनः । गन्धो मैथुने यस्य । शक्वरिः वृषः ककुद्मान् पुङ्गवः इति सप्त **वृषस्य** ॥ कण्ठाला जालगोणिका इति द्वे **कण्ठालायाः** ॥ १९ ॥ दोग्धा शकृत्करिः । शकृतं किरति । वत्सः इति त्रीणि **वत्सस्य**॥ आटीकनम् इत्येकं **तेषां वत्सानां क्रमस्य गमनस्य** ॥ जीवधनम् । जीवस्य धनम् । इत्येकं **गवादिकस्य धनस्य** ॥ पलिक्नी बालगर्भिणी इति द्वे **बालगर्भिण्या गोः** ॥ २० ॥ करकम् "कवाकम्" इत्येकं **गोमयच्छत्रस्य शिलीन्ध्रस्य** ॥ गोग्रन्थिः।गोर्ग्रन्थिरिव,गवां ग्रन्थिः पङ्क्तिर्यत्र वा। शुष्कगोमयम् इति द्वे **शुष्कगोमयस्य** ॥ करीषः छगणः इति द्वे **करीषस्य** ॥ हम्भा रेभणम् इति द्वे **गवां ध्वनेः** ॥ २१ ॥ नैचिकम् इत्येकं **गोः शिरोदेशस्य** ॥ वन्दनीया रोचना इति द्वे **गोरोचनायाः** ॥ मन्थानः मन्थः तक्काटः इति त्रीणि **मन्थनदण्डस्य** ॥ स्यादिति पृथगन्वयः । उष्ट्रः कण्टकाशनः । कण्टकमश्नाति ॥ २२ ॥ लम्बोष्ठः । लम्बः ओष्ठो यस्य । अध्वगः वासन्तः

संस्फालहुडुमेढाश्च मेषी स्याज्जालकिन्यविः।
वर्करस्तु लम्बकर्णश्छागो बस्तः शिवाप्रियः॥ २४॥
अल्पायुर्लघुकायश्च मेनादः पर्णभोजनः।
परिक्रमसहो बुक्को देवानांप्रिय इत्यपि॥ २५॥
छागी सञ्जा चुलम्पा स्याच्छङ्कुकर्णस्तु गर्दभः।
स्मरस्मर्यश्चिरमेही ग्राम्याश्वो रेणुरूषितः॥ २६॥
पशुश्चरिः शुद्धजङ्घो रत्नं चारुशिला मणिः।
स्वाध्यायी पत्तनवणिग्घोटाबुक्कोश्वविक्रयी॥ २७॥
सर्वमूल्यं द्यूतबीजं हिरण्यं च कपर्दकः।
वराटकः पणास्थि स्याद्भासुरः स्फाटिकोपलः॥ २८॥
शालिपिष्टं धौतशिलं गल्वर्कश्च मुसारवत्।
अश्मसारस्त्विन्द्रनीलो वैदूर्यं बालवायजम्॥ २९॥
बालसूर्यमथो रक्तकन्दलो विद्रुमश्च सः।
लतामणिः प्रवालः स्याद्राजभट्टो विराटजः॥ ३०॥

कुलनाशः मरुद्विपः। मरौ वालुकाभूमौ द्विपः। मोलिः बहुकरः वक्रग्रीवः। वक्रा ग्रीवा यस्य। इति दश **उष्ट्रस्य**॥ मेषः रोमशः "लोमशः"॥ २३॥ संस्फालः हुडुः मेढः। मेढ्रोऽप्यत्र। इति पञ्च **मेषस्य**॥ मेषी जालकिनी अविः इति त्रीणि **मेष्याः**॥ वर्करः लम्बकर्णः। लम्बौ कर्णौ यस्य। छागः बस्तः "वस्तः" शिवाप्रियः। शिवायाः प्रियः॥२४॥ अल्पायुः। अल्पम् आयुर्यस्य। लघुकायः लघुः कायो यस्य। मेनादः। मे इति नादो यस्य। पर्णभोजनः। पर्णानि भोजनानि यस्य। परिक्रमसहः। परिक्रमं पादगमनं सहत इति। बुक्कः देवानांप्रियः इति द्वादश **छागस्य**॥ २५॥ छागी सञ्जा चुलम्पा इति त्रीणि **छाग्याः**॥ शङ्कुकर्णः। शङ्कुरिव कर्णौ अस्य। गर्दभः स्मरस्मर्यः। स्मरस्य स्मर्यो यस्य। चिरमेही ग्राम्याश्वः रेणुरूषितः। रेणुभिः रूषितः धूलिमिश्रितः॥ २६॥ पशुश्चरिः शुद्धजङ्घः। शुद्धाः जङ्घाः यस्य। इत्यष्टौ **गर्दभस्य**॥ रत्नं चारुशिला। चारुश्च सा शिला च। मणिः इति त्रीणि **रत्नस्य**॥ स्वाध्यायी पत्तनवणिक्। पत्तने वणिक्। इति द्वे **पत्तनवणिजः**॥ घोटाबुक्कः। क्वचित् "घेडाबुक्कः"। अश्वविक्रयी इति द्वे **अश्वविक्रयिणः**॥२७॥ सर्वमूल्यम्। सर्वस्मिन् मूल्यम्। द्यूतबीजम्। द्यूतस्य बीजम्। हिरण्यं कपर्दकः। कपर्दिकाप्यत्र। वराटकः "वराटः" पणास्थि इति षट् **कपर्दकस्य**॥ तत्र केचित् वराटः वराटकः इति द्वे **क्षुद्रकपर्दकस्य**॥ इति वदन्ति। भासुरः स्फाटिकोपलः॥२८॥ शालिपिष्टं धौतशिलम्। धौतं शिलेव। इति चत्वारि **स्फटिकस्य**॥ गल्वर्कः इत्येकं **रक्तखदिरसदृशस्य मणिविशेषस्य**॥ अश्मसारः "मसारः"। अश्मस्य सारः। इन्द्रनीलः। इन्द्रस्येव नीलो यस्य। इन्द्र इव नीलो वा। इति द्वे **इन्द्रनीलस्य**॥ वैदूर्यं "वैडूर्य" बलिवायजम्॥२९॥ बालसूर्यम्। इति त्रीणि **वैदूर्यस्य**॥ रक्तकन्दल। रक्तकन्दोऽस्त्यस्य। विद्रुमः विशिष्टो द्रुमः।

कुरुविन्दः पद्मरागो दधीच्यस्थि तु हीरकम् ।
स्वर्णं लोहवरं चाऽग्निबीजं चाम्पेयमित्यपि ॥ ३१ ॥
रूप्ये श्वेतं रङ्गबीजमिन्दुकान्ते मणीचकम् ।
ताम्रकं तु लोहितायः सूर्याह्वं मुनिपित्तलम् ॥ ३२ ॥
कंसे तु कंसं कंसास्थि ताम्रार्धमथ मौक्तिकम् ।
रसोपलं शुक्तिबीजं सिन्दूरं रक्तवालुकम् ॥ ३३ ॥
पारदः सिद्धधातुः स्याद्धरबीजं च सूतकम् ।
रङ्गं सुरेभं मृद्वङ्गं कुसुम्भं ग्राम्यकुङ्कुमम् ॥ ३४ ॥
हरिताले तु कर्बूरं गोदन्तो नटसंज्ञकः ।
दारदं तु हिङ्गुलु स्याद्धिङ्गुलं रक्तपारदम् ॥ ३५ ॥

लतामणिः प्रवालः इति चत्वारि **विद्रुमस्य॥** राजपट्टः । राज्ञः पट इव । विराटजः । विराटे तदाख्यदेशे जायते । इति द्वे **विराटजस्य मणेः॥**३०॥ कुरुविन्दः "कुरुविल्लः" पद्मरागः। पद्मस्येव रागो रक्तवर्णो यस्य । इति द्वे **पद्मरागस्य॥**दधीच्यस्थि । दधीचिनः अस्थि ।दधीचास्थि अप्यत्र । दधीचस्य अस्थि । हीरकम् इति द्वे **वज्र इति ख्यातस्य हीरकस्य॥** स्वर्णं लोहवरम् । लोहानां वरम् । अग्निबीजम्। अग्नेर्बीजम् । "अग्निबीजम्" चाम्पेयम् । चम्पायां तन्नामकायां नगर्यां भवम्। अपिशब्देन चाम्पेयकं गृह्यते । इति चत्वारि **स्वर्णस्य**॥३१॥ श्वेतं रङ्गबीजम् । रङ्गस्य बीजम् । "रङ्गबीजम्" इति द्वे **रूप्यस्य ॥** मणीचकम् । मणीनां चकं भ्रांतिर्यस्य । इत्येकं **चन्द्रकान्तमणेः ॥** केचित्तु **चन्द्रवर्णरूप्यस्य ॥** इति वदन्ति । ताम्रकं लोहितायः । लोहितवर्णमेति । सूर्याह्व "सूर्याङ्ग" ख्यादयोऽप्यत्र । मुनिपित्तलम् । इति चत्वारि **ताम्रस्य** ॥ ३२ ॥ कंसं कंसास्थि ताम्रार्धम् । ताम्रस्य अर्धम् । इति त्रीणि **काँस इति ख्यातस्य ताम्ररङ्गमिश्रितस्य उपधातोः ॥** यथाह—"उपधातुर्भवेत्कांस्यं द्वयोस्तरणिरङ्गयोः" इति । मौक्तिकं रसोपलम् । रसः पारदमिव उपलीयते । शुक्तिबीजम् इति त्रीणि **मौक्तिकस्य ॥** सिन्दूरं रक्तवालुकम् । रक्तं च तद्वालुकं च । "रक्तवालकम्" इति द्वे **सिन्दूरस्य** ॥ ३३ ॥ पारदः "पारतः" सिद्धधातुः । सिद्धः प्रसिद्धश्चासौ धातुश्च। हरबीजम् । हरस्य शङ्करस्य बीजम्। "धरबीजम्" सूतकम् इति चत्वारि **पारदस्य॥**रङ्गं सुरेभं मृद्वङ्गम् इति त्रीणि **रङ्गस्य धातुभेदस्य॥**कुसुम्भं ग्राम्यकुङ्कुमम्।ग्राम्यं च तद् कुङ्कुमं च इति द्वे **पुष्पप्रधानवृक्षस्य कुसुम्भस्य ॥** यथाह—"कुसुम्भं नालिकाशाकं वातीकुम्" इति स्मृतिः ॥ ३४ ॥ कर्बुरम् इत्येकं **हरितालस्य ॥** गोदन्तः । गोर्दन्त इवास्रवो यस्य । नटः इति द्वे **गोदन्त इति ख्यातस्य हरितालस्य ॥** दारदं हिङ्गुलु हिङ्गुलं रक्तपारदम् । रक्तं च तत् पारदं च । "रक्तपारदः" इति चत्वारि **हिङ्गुलस्य॥**३५॥

रसगन्धो गन्धरसो गान्धारं मसिवर्धनम् ।
क्षारस्तु स्याद्यवक्षारो यवशूकश्च रेचकः ॥
शिलाजतु शिलाव्याधिस्तृफला त्रिफलाऽपि च ॥ ३६ ॥

इतिवैश्यवर्गः ॥ ९ ॥

शूद्रः स्यात्पादजो दासो ग्रामकूटो महत्तरः ।
मालिकः पुष्पलावः स्यात्कुम्भकारस्तु मृत्करः ॥ १ ॥
दण्डभृत्पलगण्डस्तु सुधाजीवी च लेपकः ।
कायस्थे कूटकृत्पञ्जीकरौ चित्रकरे कृणुः ॥ २ ॥
चर्मरुः कुरटः पादुकृत्कलादस्तु गौञ्जिकः ॥
नाडिन्धमः स्वर्णकारो वात्सीपुत्रस्तु नापितः ॥ ३ ॥
चन्द्रिलो नखकुट्टश्च रजकः कर्मकीलकः ।
कन्यापालः पालवणिग्देवलस्त्वमराद्विजः ॥ ४ ॥

रसगन्धः । रसे गन्धोऽस्य । रसगन्धकोऽप्यत्र । गन्धरसः । गन्धो रसोऽस्य । गान्धारम् । [illegible] सौरभमृच्छति । गन्धारमप्यत्र । मसिवर्धनम् इति चत्वारि **गन्धक इति ख्यातस्य रसगन्धस्य** ॥ क्षारः यवक्षारः । यवानां क्षारः । यवशूकः । यवानां शूकः । रेचकः इति चत्वारि **यवक्षारस्य**॥ शिलाजतु । शिलाजातं । जतु शिलाव्याधिः । शिलायाः व्याधिरिव । इति द्वे **शिलाजतु इति ख्यातस्य पर्वतजातस्य उपधातुभेदस्य** ॥ तृफला । त्रयाणां फलानां समाहारः । त्रिफला । त्रयाणां फलानां समाहारः । अपिशब्देन त्रिफलीं फलत्रयमादयोऽप्यत्र गृह्यन्ते । इति द्वे **त्रिफलायाः** ॥ ३६॥ इति वैश्यवर्गः॥९॥ शूद्रः पादजः । ब्रह्मणः पादाभ्यां जायते । दासः इति त्रीणि **शूद्र इति ख्यातस्य चतुर्थवर्णस्य** ॥ ग्रामकूटः । ग्रामस्य कूट इव । महत्तरः । अतिशयेन महान् । इति द्वे **अतिशयवृद्धिप्राप्तस्य** ॥ मालिकः । माला तन्निर्माणशिल्पमस्य । पुष्पलावः । पुष्पं लुनाति । इति द्वे **मालाकारस्य** ॥ कुम्भकारः । कुम्भं करोति । मृत्करः । मृदा मृत्तिकया भाजनविकृतिं करोति ॥ १ ॥ दण्डभृत् । दण्डं बिभर्ति । इति त्रीणि **कुम्भकारस्य** ॥ पलगण्डः । पलं मांसं गण्डति गण्डमिव करोति । सुधाजीवी । सुधां लेपनद्रव्यमाजीवति । लेपकः इति त्रीणि **लेपनकरस्य** ॥ कूटकृत् । कूटं मिथ्याभूतं करोति । पञ्जीकरः इति द्वे **कायस्थ इति ख्यातस्य लिपिकरवृत्तेः** ॥ कृणुः इत्येकं **चित्रकारस्य**॥ २ ॥ चर्मरुः कुरटः पादुकृत् । पादुकां करोति । इति त्रीणि **चर्मकारस्य** ॥ कलादः । कलामंशमादत्ते तेन हि अलङ्कारघटनार्थं गृहीतधनस्यांशोऽपह्रीयते । गौञ्जिकः नाडिन्धमः । नाडीं वंशनलीं [illegible]ति । स्वर्णकारः "स्वर्णताल:" । स्वर्णं स्वर्णमयालङ्कारादिकं करोति । इति चत्वारि **स्वर्णकारस्य** ॥ वात्सीपुत्रः नापितः ॥ ३ ॥ चन्द्रिलः नखकुट्टः । नखान् कुट्टयति । इति चत्वारि **क्षुरकर्मकारकस्य** ॥ रजकः कर्मकीलकः इति द्वे **वस्त्रादेः रागकारकस्य** ॥ कन्यापालः "कल्यपालः" । कन्यां पालयति । पालवाणिक

अजाजीवस्तु जावालो निष्कश्चण्डाल उच्यते ।
कुक्कुरे दीर्घसुरतो वान्तादरसनालिहौ ॥ ५ ॥
रतव्रणो ग्राममृगस्तथेन्द्रमहकामुकः ।
कपिलो वक्रपुच्छश्च शयालुररपत्रपः ॥ ६ ॥
शुन्याः शुन्यं शुनीरं स्याच्चौरः शङ्कितवर्णकः ।
स्यात्कुम्भिलश्च प्रचुरपुरुषोऽथ कुजम्भिलः ॥ ७ ॥
सुरुङ्गोऽहिवधश्चोरे वन्दीकारस्तु माचलः ।
प्रसह्यचोरश्चिल्लाभः स्त्रीचोरो रतहिण्डकः ॥ ८ ॥
काव्यचोरश्चन्द्ररेणुः कुडयच्छेद्यं तु खानिकम् ।
सन्धिः सुरङ्गा तद्भेदाः श्रीवत्सगोमुखादयः ॥ ९ ॥
कपाललासिका तर्कुस्तर्कुशाणस्तु झामकः ।
वर्तनी तर्कुपीठी स्यात्पिञ्जनं तूलकार्मुकम् ॥ १० ॥

"पाणवणिक्"। पालस्य रक्षकस्य वणिक् । इति द्वे **कन्यापालकस्य॥** देवलः अमरद्विजः । अमरपूजकः द्विजः । इति द्वे **देवलस्य** ॥४॥ अजाजीवः । अजैस्तद्रक्षणपोषणादिना तत्क्रयविक्रयादिना वा आजीवति । जावालः इति द्वे **छागपालकस्य छागक्रयविक्रयाभ्यामाजीविनश्च ॥** निष्कः चण्डालः "चाण्डालः" इति द्वे **चण्डालस्य ॥** दीर्घसुरतः । दीर्घं सुरतं रतिक्रीडा यस्य । वान्तादरः । वान्तः आदरो येन । सनालिहः । सदा लिह्यते । अत्र सनाव्ययं सदेत्यर्थः ॥ ५ ॥ रतव्रणः । रते मैथुने व्रणं यस्य । ग्राममृगः । ग्रामे मृगः । इन्द्रमहकामुकः । इन्द्रमहं कामयते । कपिलः वक्रपुच्छः । वक्रं पुच्छं यस्य । शयालुः अरतत्रपः । नास्ति रते मैथुने त्रपा यस्य । इति दश **कुक्कुरस्य** ॥ ६ ॥ शुन्यं शुनीरम् इति द्वे **शुनीसङ्घस्य ॥** क्वचित्तु सुनारः शुनीरम् इति **शुनीक्षीरे ॥** दृश्यते । चौरः शङ्कितवर्णकः । शङ्कितो वर्णो यस्य । कुम्भिलः । कुम्भोऽस्त्यस्य । प्रचुरपुरुषः । प्रचुरश्चाऽसौ पुरुषश्च । इति चत्वारि **चौरस्य ॥** कुजम्भिलः "कुजम्भिरः" ॥ ७ ॥ सुरुङ्गः अहिवधः "अहिरधः" इति त्रीणि **वधचोरस्य ॥** वन्दीकारः "वन्दीकालः" माचलः प्रसह्यचोरः । प्रसह्य बलात्कारेण चोरः । चिल्लाभः इति चत्वारि **प्रसह्यचोरस्य ॥** स्त्रीचोरः । स्त्रियाः चोरः । रतहिण्डकः । रतस्य हिण्डकः । इति द्वे **स्त्रीचोरस्य ॥** ८ ॥ काव्यचोरः । काव्यस्य चोरः । चन्द्ररेणुः इति द्वे काव्यचोरस्य । कुडयच्छेद्यम् । "कुडयच्छेद्यः" कुडयं छेद्यं यस्य । खानिकम् । क्वचित् खानक इति च पाठः । संधिः । "संधिं कृत्वा तु चौर्यम्" इति स्मृतिः । सुरङ्गा । क्वचित् सुरुङ्गा सुरङ्गं सुरङ्गमिति च । इति चत्वारि **सन्धिचोरस्य ॥** श्रीवत्सः गोमुखः । गोरिव मुखमस्य । इत्येकैकं **चोरादिकृतसन्धिभेदयोः ॥** आदिना अतो विसदृशाकारा अपि गृह्यन्ते ॥ ९ ॥ कपाललासिका "कर्पासनालिका" "कपालनालिका" । कपालानां लासिका । तर्कुः इति द्वे **तर्कुरिति ख्यातस्य यन्त्रभेदस्य ॥** तर्कुशाणः झामकः इति द्वे **तर्कुशाणस्य ॥** अन्यत्र तर्कुलासकः

तूलः पिचुः पिचुतूलं पिञ्जिका तूलनालिका ।
त्रिषु द्वारापणं सूत्रपर्णं यत्तेन वेष्ट्यते ॥ ११ ॥
निर्वेटनं नाडिचीरमेकाष्टी तूलशर्करा ।
तन्त्रकाष्ठं तुरी स्त्री स्याद्ग्रीष्महासेन्द्रतूलके ॥ १२ ॥
पन्नध्री पादुका प्राणिहिता पदरथीत्यपि ।
कावारी जङ्गमुकुटी भ्रमत्कुट्यथ खर्परः ॥ १३ ॥
वारित्रा मूर्धखोलश्च सैव पत्रपिशाचिका ।
वासी तु तक्षणी न स्त्री क्रकचः पत्रदारकः ॥ १४ ॥
मद्यं त्वरिष्टं मैरेयं कत्तोयं कापिशायनम् ।
माध्वी च मधु माध्वीकं कपिशीका च मालिका ॥ १५ ॥

लासकः इति द्वौ **तर्कुचालकयन्त्रस्य** ॥ दृश्येते । वर्तनी तर्कुपीठो इति द्वे **तर्कुपीठ्याः** ॥ पिञ्जनं तूलकार्मुकम् इति द्वे **तूलधनुषः** ॥ १० ॥ तूलः पिचुः पिचुतूलम् । इति त्रीणि **तूलस्य** ॥ पिञ्जिका तूलनालिका । तूलनिर्मिता नाली । स्वार्थे कन् । इति द्वे **पिञ्जिकायाः** ॥ द्वारापणं सूत्रपर्णम् इति द्वे **सूत्रवेष्टनस्य** ॥ ११ ॥ निर्वेटनं नाडिचीरम् इति द्वे **नाडिचीरस्य** ॥ एकाष्टी तूलशर्करा इति द्वे **पिचुशर्करायाः** ॥ तन्त्रकाष्ठम् तन्त्रवायस्य काष्ठम् । तुरी "तुरिः" इति द्वे **वयनसाधनस्य काष्ठस्य**॥ तुरीशब्दोऽत्र स्त्रीलिङ्गकः । ग्रीष्महासम् । ग्रीष्मे हास इव । इन्द्रतूलकम् । इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वादिन्द्रस्वामिकत्वं यस्य । इति द्वे **इन्द्रतूलस्य कर्पासस्य** ॥ १२ ॥ पन्नध्री । पाद् नह्यतेऽनया । पादुका प्राणिहिता "प्राणहिता" प्राणिनां हिता । पदरथी । पदयोः रथ इव । इति चत्वारि **पादुकायाः चर्ममयस्य पदाच्छादनस्य च** ॥ अपिशब्देन पादुः उपानदादयोऽप्यत्र गृह्यन्ते । कावारी "कारावी" जङ्गमुकुटी भ्रमत्कुटी । इति त्रीणि **तृणादिकृतच्छत्रस्य** ॥ खर्परः ॥ १३ ॥ वारित्रा । वारिणस्त्रायते । मूर्धखोलम् । मूर्ध्नि खोलमस्य । पत्रपिशाचिका। पत्रमेव पिशाचो यस्याः। इति चत्वारि **वारित्राण इति ख्यातस्य छत्रस्य** ॥ वासी तक्षणी इति द्वे **तक्षण्याः** ॥ क्रकचः । क्र इति कचति शब्दायते । पत्रदारकः । पत्राकारः दारकः । इति द्वे **क्रकच इति ख्यातस्य करपत्रस्य** ॥ अयं तु न स्त्री स्त्रीलिङ्गे न स्यात् । पुंनपुंसकयोः स्यादेव ॥ १४ ॥ मद्यम् अरिष्टं मैरेयम् । मिरायां देशभेदे औषधिभेदे वा भवम् । "मैरेयं धातकीपुष्पगुडधानाम्लसम्भवम्" इति माधवः । अस्य गुडधानाम्बुसंहितमिति क्वचित् पाठः । कत्तोयम् । कुत्सितमीषद्वा तोयं यत्र । कापिशायनम् । कपिशस्य मद्यभेदस्यायनं स्थानम् । "कापिशायनी" माध्वी मधु "गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम्" इति चण्डी । माध्वीकम् । मधुना मधूकपुष्पेण निर्वृत्तम् । कपिशीका ।

वीरा दैत्या प्रसन्ना च माधवी गन्धमादनी ।
गौडी च वाल्कली मध्वासवपक्करसौ नरि ॥ १६ ॥
नलिनी नारिकेलस्य सुरा तालस्य तालिनी ।
स्मरासवो मुखसुरं पारी स्त्री पानभाजनम् ॥ १७ ॥
शुण्डापानं मदस्थानं द्यूतकृत्कृष्णकोहलः ।
देवसभ्यस्तु सभिको लग्नकस्तृणमत्कुणः ॥ १८ ॥
चुञ्चुरी तिन्तिडी द्यूते पञ्चाली शारिशृङ्खला ।
अष्टकाङ्गं नयपीठी नयस्तु जतुपुत्रकः ॥ १९ ॥

इति शूद्रवर्गः ॥ १० ॥

इति त्रिकाण्डशेषकोषस्य द्वितीयः काण्डः समाप्तः २.

"कपिशी अप्यत्र । मालिका ॥ १९ ॥ वीरा दैत्या प्रसन्ना माधवी गन्धमादनी । गन्धेन मदयति । इति पञ्चदश **मद्यस्य** ॥ तानि मद्यानि द्वादशविधानि भवन्ति । यथाह—"माध्वीकं पानसं द्राक्षं खार्जूरं तालमैक्षवम् । मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव तु" इति । गौडी । गुडस्य विकारः । वाल्कली इति द्वे **गुडेन कृतायाः सुरायाः** ॥ मध्वासवः । मधुना पुष्परसेन कृतः आसवः । पक्करसः "यक्षरसः" पक्कानां रसः । इति द्वे **मधुद्रुमपुष्पजातस्य मद्यस्य** ॥ इमौ द्वौ पुँल्लिङ्गौ ॥ १६ ॥ नलिनी इत्येकं **नारिकेलजातसुरायाः** ॥ तालिनी । तालेन तन्निर्यासेन निर्वृत्ता । "ताली" अप्यत्र । स्मरासवः । स्मरस्य आसवः । मुखसुरम् इति त्रीणि **तालजातसुरायाः** ॥ पारी । पारमस्यास्ति । पानभाजनम् इति द्वे **पानभाजनस्य** ॥ ॥ १७ ॥ शुण्डापानं मदस्थानम् इति द्वे **मद्यपानगृहस्य** ॥ कचित् शुण्डापानमिति पृथगपि "शुण्डा पानगृहे मता।अप्यम्बुहस्तिनी वेश्या हस्तिहस्तसुरासु च" इति मेदिनी। "शुण्डापि जलहस्तिन्यां मदिराकरिहस्तयोः" इति विश्वः । "पानं पीतिभाजनरक्षणे" इति मेदिनी । द्यूतकृत् । द्यूतं करोति। द्यूतकारोऽप्यत्र।कृष्णकोहलः इति द्वे **द्यूतकृतः** ॥ देवसभ्यः सभिकः। सभीकोऽप्यत्र । इति द्वे **द्यूतकारकस्य** ॥ लग्नकः तृणमत्कुणः इति द्वे **प्रतिभुवः**॥१८॥ चुंचुरी तिंतिडी इति द्वे **द्यूतस्य**॥ पञ्चाली । "पञ्चनी" पञ्च प्रपञ्चमलति पर्याप्नोति । शारिशृङ्खला । शारेः शृंखला । इति द्वे **शारिशृङ्खलेति ख्यातायाः वस्त्रकृतपुत्तलिकायाः** ॥ अष्टकाङ्गम् । अष्टकानि अङ्गानि यस्य । नयपीठी । नयानां द्यूतभेदानां पीठमस्याः। इति द्वे **नयपीठीति ख्यातस्य शारिफलकस्य**॥ नयः जतुपुत्रकः।जतोः पुत्रकः इति द्वे **द्यूतक्रीडासाधनपाशकस्य** ॥ १९ ॥ इति शूद्रवर्गः॥ १० ॥ इत्याचार्यश्रीशीलस्कन्धस्थविरविरचितायां सारार्थचन्द्रिकाख्यायां त्रिकाण्डशेषटीकायां द्वितीयः काण्डः समाप्तः ॥

इति सटीकत्रिकाण्डशेषकोषस्य द्वितीयः काण्डः समाप्तः २.

अथ

सटीकत्रिकाण्डशेषकोषस्य-

तृतीयः काण्डः ।

क्षेमङ्करोऽरिष्टतातिः स्यान्मद्रङ्करशङ्करौ ।
आमुष्यायणविज्ञातौ पुत्रान्नादः कुटीचकः ॥ १ ॥
स्थपुटं विषमं सञ्चारजीवी शरणार्थकः ।
अभिपन्नः शरणार्थी पाण्डुपृष्ठस्त्वलक्षणः ॥ २ ॥
उद्भटोड्डामरोऽत्ताला आविष्टः प्रेतवाहितः ।
प्रेङ्खोलितस्तरलितस्तृषितस्तर्षितः सतृट् ॥ ३ ॥
ऊर्ध्वस्थोर्ध्वदमौ तुल्यौ ग्राम्यो ग्रामेयकः स्मृतः ।
पराचीनः प्रतीपः स्यात्समीचीनः समञ्जसः ॥ ४ ॥

क्षेमङ्करः । क्षेमं निर्भयं करोति । अरिष्टतातिः मद्रङ्करः "भद्रङ्करः" । भद्रं मङ्गलं करोति । शङ्करः । शं सुखं मङ्गलं वा करोति । इति चत्वारि **निर्भयकरस्य शुभङ्करस्य वा ॥** आमुष्यायणः । अमुष्याः प्रत्यक्षीकृतस्यापि सद्वंशत्वेन सच्चरितत्वेन च प्रख्यातस्याऽपत्यम् । विज्ञातः "विज्ञातः" इति द्वे **सद्वंशोद्भवस्य ॥** पुत्रान्नादः । पुत्रस्य अन्नमाददाति । कुटीचकः । कुटिचकोऽप्यत्र । कुट्यां कुटौ वा चकति तृप्यति । कुटीचरोऽप्यत्र । कुट्यां कुटौ वा चरति । इति द्वे **पुत्रान्नादस्य यतिभेदस्य** ॥ १ ॥ स्थपुटम् । "स्थपुटगतमपि क्रव्यमव्यग्रमत्ति" इति मालतीमाधवम् । इत्येकं **विषमस्थानसञ्चारजीविनः ॥** शरणार्थकः । शरणमर्थयते । "शरणापकः" अभिपन्नः शरणार्थी । शरणमर्थयते । इति त्रीणि **शरणार्थिनः, शरणगतस्य वा ॥** पाण्डुपृष्ठः । पाण्डुवर्णं पृष्ठं यस्य । अलक्षणः । नास्ति लक्षणमनुमापकं सुचिह्नं वा यस्य । इति द्वे **दुर्लक्षणस्य ॥ २ ॥** उद्भटः उड्डामरः उत्तालः इति त्रीणि **अत्यन्तप्रचण्डस्य ॥** आविष्टः प्रेतवाहितः । इति द्वे **भूतादिग्रस्तस्य, आवेशयुक्तस्य च ॥** प्रेङ्खोलितः तरलितः । तरल इवाचरति । इति द्वे **कम्पितस्य ॥** तृषितः तर्षितः सतृट् इति त्रीणि **पिपासायुक्तस्य** ॥ ३ ॥ ऊर्ध्वस्थः ऊर्ध्वदमः इति द्वे **ऊर्ध्वस्थितस्य ॥** ग्राम्यः । ग्रामे भवः ग्रामेयकः । ग्रामे जातः । इति द्वे **ग्रामजातस्य ॥** स्मृतः ज्ञातः । पराचीनः । पराग्भवः । प्रतीपः इति द्वे **पराङ्मुखस्य ॥** स्यादित्यन्वयः । समीचीनः सम्यग्भवः । समञ्जसः । सम्यक् अञ्ज औचित्यं यत्र । इति द्वे **यथार्थस्य उचितस्य**

स्वस्थानस्थः परान्द्वेष्टि यः स गोष्ठश्च उच्यते ।
दाता तु दारुर्मुचिरः स्याद्विदग्धस्तु नागरः ॥ ५ ॥
षिड्गो व्यलीकः षट्प्रज्ञः कामकेलिर्विदूषकः ।
पीठकेलिः पीठमर्दो भविलश्छिदुरो विटः ॥ ६ ॥
प्रघटाविच्छास्त्रगण्डो मेधावी मेधिरः समौ ।
युक्तं परिमिते भीमं त्वाऽभीले प्रश्लथः श्लथः ॥ ७ ॥
शिथिलोवोद आर्द्रः स्याच्चिरस्थो नायकः स्मृतः ।
स्यादायःशूलिकस्तीक्ष्णकर्माशोचोनहङ्कृतिः ॥ ८ ॥
कुसृत्या विभवान्वेषी पार्श्वकः सन्धिजीवकः ।
वाक्याभिधायी पुरुषः पृष्ठमांसाद उच्यते ॥ ९ ॥
भार्याटः स्वस्त्रियो दाताऽन्नार्थं दूषकपांसनौ ।
धृष्णुर्धृष्णुग्दधृग्धृष्टो दशेरः सुतघातुकः ॥ १० ॥

वा ॥ ४ ॥ गोष्ठः । गावस्तिष्ठन्त्यत्र । इत्येकं **गवांस्थान इति ख्यातस्य गोष्ठस्य** ॥ यः स्वस्थानस्थः स्वकीये स्थाने स्थितः सन् परान् शेषान् द्वेष्टि द्वेषं करोति स गोष्ठ इति उच्यते कथ्यत इति व्यङ्गस्यार्थः । दाता दारुः मुचिरः इति त्रीणि **दानशीलस्य** ॥ विदग्धः नागरः इति द्वे **पण्डितस्य** ॥ ५ ॥ षिड्गः व्यलीकः षट्प्रज्ञः । षट्सु प्रज्ञा यस्य । "धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि। षट्सु प्रज्ञा तु यस्याऽसौ षट्प्रज्ञः परिकीर्तितः" इति । कामकेलि कामे रतौ केलिर्यस्य । विदूषकः पीठकेलिः।पीठे केलिर्यस्य। पीठमर्दः। पीठे मर्दो यस्य । भविलः छिदुरः विटः इति दश **कामुकस्य** ॥६॥ प्रघटावित् शास्त्रगण्डः। शास्त्रेषु गण्डो यस्य । इति द्वे **शास्त्राभिसक्तचित्तस्य** ॥ मेधावी । मेधा अस्त्यस्य। मेधिरः । मेधा अस्त्यस्य । इति द्वे **मेधाविनः**॥ युक्तम् इत्येकं **कृतपरिमाणस्य**॥भीमम् । बिभेत्यस्मात् । इत्येकं **भयानकस्य** ॥ प्रश्लथः श्लथः शिथिलः इति त्रीणि **शिथिलस्य दुर्बलस्य वा** ॥ ७ ॥ अवोदः आर्द्रः इति द्वे **सजलस्य** ॥ चिरस्थः नायकः इति द्वे **नायकस्य** ॥ स्मृतः ज्ञात इत्यर्थः। आयःशूलिकः। अयःशूलेनार्थानन्विच्छति । तीक्ष्णकर्मा तीक्ष्णं कर्म यस्य।इति द्वे **तीक्ष्णोपायेनाभीष्टसाधकस्य**॥ स्यादित्यन्वयः । अशोचः अनहङ्कृतिः इति द्वे **अहङ्कारविरहितस्य गर्वविहीनस्य वा** ॥ ८॥ सन्धिजीवकः । सन्धिं जीवति । इत्येकं **शाठ्येन-परार्थहारकस्य** ॥ यः कुसृत्या शाठ्येन विभवान्वेषी सम्पत्तिगवेषणशीलः पार्श्वकः समीपवर्ती स सन्धिजीवक इत्युच्यते इत्यर्थः । पृष्ठमांसादः । पृष्ठे मांसमत्ति । इत्येकं **पृष्ठमांसभक्षकस्य** ॥ यः पुरुषः सम्मुखे वाक्येन मधुरवचनेन अभिधायी भाषणशीलः पराङ्मुखे दोषं आविष्करोति सः पृष्ठमांसाद उच्यते कथ्यते इत्यर्थः॥९॥ भार्याटः इत्येकम् **अन्नार्थं स्वभार्योपजीवकस्य** ॥ यः अन्नार्थम् आहारपर्येषणप्रयोजनाय स्वस्त्रियः निजभार्याया अपि दाता

देशकः शासिता शास्ता शिक्कुरव्यवसायवान् ।
चकितः शङ्कितो भीतः प्रतियत्नः प्रयत्नवान् ॥ ११ ॥
आधार्मिकोऽधार्मिकः स्यात्प्रसृतान्तरितौ समौ ।
कृपणो दृढमुष्टिः स्याद्देवयुर्धार्मिकः सुकृत् ॥ १२ ॥
मनःस्मयो मनोज्ञः स्याच्चक्षुष्यः प्रियदर्शनः ।
लडहं भद्रकं न्युब्जवं लगडं चारुबन्धुरः ॥ १३ ॥
भट्टारो भगवान्पूज्यः शक्रप्रतिबलौ समौ ।
पटुः पाटविको धूर्तः स्थगस्तीक्ष्णस्तु राजघः ॥ १४ ॥
सम्बन्धी गुणवान्संयुङ्मित्रयुर्मित्रवत्सलः ।
धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि ॥ १५ ॥
षट्सु प्रज्ञाऽस्ति यस्योच्चैः स षट्प्रज्ञ इति स्मृतः ।
मध्यस्थस्तु निसृष्टः स्याद्धर्मपृष्ठस्तु सम्मुखः ॥ १६ ॥

दानशीलः भवति परेभ्यः इति शेषः।सः मार्याट इति कथ्यते।दूषकः पांसनः इति द्वे **दूषकस्य।** धृष्णुःधृष्णुग् दधृग् धृष्टः इति चत्वारि **प्रगलभस्य निर्लज्जस्य वा ॥** दशेरः सुप्तघातुकः । सुप्तं शयनं हन्ति । इति द्वे **निद्रानाशकस्य** ॥ १० ॥ देशकः शासिता शास्ता इति त्रीणि **शासनकर्तुः ॥** शिक्कुः "शिक्नुः" अव्यवसायवान् इति द्वे **उद्यमविहीनस्य॥** चकितः शङ्कितः भीतः इति त्रीणि **भययुक्तस्य॥**प्रतियत्नः प्रयत्नवान् इति द्वे **उत्साहयुक्तस्य**॥ ११॥ आधार्मिकः। अधर्मं चरति सततमनुशीलयति।अधार्मिकः इति द्वे **अधर्मशीलस्य॥**प्रसृतः अन्तरितः अन्तरं व्यवधानं करोति। इति द्वे **व्यवधानं गतस्य॥** कृपणः दृढमुष्टिः।दृढा अशिथिला मुष्टिर्यस्य। इति द्वे **अदानशीलस्य ॥** देवयुः धार्मिकः।धर्मं चरति सततमनुशीलयति।सुकृत् इति त्रीणि **धार्मिकस्य** ॥१२॥ मनःस्मयः "मनआपः" मनोज्ञः चक्षुष्यः । चक्षुषे हितः । प्रियदर्शनः । प्रियं दर्शनमस्य । लडहं "लखण्डं" भद्रकं न्युब्जवं लगडं चारुबन्धुरः इति नव **प्रियदर्शनस्य** ॥ १३ ॥ भट्टारः । भट्टं स्वामित्वमृच्छति । भगवान् पूज्यः इति त्रीणि **पूज्यस्य॥** शक्तः प्रतिबलः इति द्वे **प्रतिबलस्य ॥** पटुः पाटविकः धूर्तः स्थगः इति चत्वारि **धूर्तस्य ॥** तीक्ष्णः राजघः इति द्वे **तीक्ष्णस्य** ॥ १४ ॥ सम्बन्धी गुणवान् इति द्वे **सम्बन्धिनः ॥** संयुग् मित्रयुः । मित्रं याति । मित्रवत्सलः । मित्रे वत्सलः । इति त्रीणि **मित्रवत्सलस्य** ॥ १५ ॥ षट्प्रज्ञः । षट्सु प्रज्ञा यस्य सः।इत्येकं **धर्मार्थाद्यभिज्ञस्य ॥** केष्वपि षट्स्विति चेत्? धर्मार्थकाममोक्षेषु धर्मश्च अर्थश्च कामश्च मोक्षश्चेति द्वन्द्वः।एते प्रसिद्धाः। एतेषु चतुर्वर्गेषु च । तथा लोकतत्त्वार्थयोः । लोकतत्त्वं लोकस्वभावः अर्थः धनोपार्जनं च । एषु षट्सु यस्य उच्चैः महती अत्यर्थं वा प्रज्ञा अस्ति सः षट्प्रज्ञः इति स्मृतः ज्ञातः । सुधीभिरिति शेषः । अपिशब्देन इतराणि हितसाधनानि च गृह्यन्ते । मध्यस्थः । मध्ये तिष्ठति ।

स्यात्कथङ्कथिकः प्रष्टा विचक्षुर्विमनाः स्मृतः ।
प्रतारितो व्यंसितः स्यात्प्रोथस्तु प्रथितो मतः ॥ १७ ॥
माशब्दिकः प्रतिषेद्धा जडमातृसुखौ समौ ।
प्राणं पुराणं भिन्नं तु व्यवच्छिन्नं विशेषितम् ॥ १८ ॥
विनाकृतं विरहितं मुक्तं निर्व्यूढमुच्यते ॥
तिक्तः कषायः सुरभिः कक्खटो निर्भरो दृढः ॥ १९ ॥
निःसन्धिश्च निवातश्च समूढं शोधितं समे ।
स्यादागन्तुकमाहार्यं समे पक्त्रिमपाकिमे ॥ २० ॥
कोमलं पेलवं पापे त्वधमापसदौ धवः ।
रोमाञ्चितो हृष्टरोमा अजानेयस्तु निर्भयः ॥ २१ ॥
अन्यासाधारणं त्वावेशिकं प्रातिस्विकं च तत् ।
भिन्नकः क्षपणोऽह्रीको बौद्धो वैनायकः स्मृतः ॥ २२ ॥

निसृष्टः इति द्वे **मध्यस्थस्य** ॥ भग्नपृष्ठः "भुग्नपृष्ठः" । भग्नं पृष्ठं यस्य । सम्मुखः इति द्वे **सम्मुखस्य** ॥ १६ ॥ कथङ्कथिकः प्रष्टा इति द्वे **प्रष्टुः** ॥ विचक्षुः विमनाः इति द्वे **विमनसः** ॥ प्रतारितः व्यंसितः इति द्वे **प्रतारितस्य** ॥ प्रोथः प्रथितः इति द्वे **प्रथितस्य** ॥ १७ ॥ माशब्दिकः प्रतिषेद्धा इति द्वे **प्रतिषेधकारकस्य** ॥ जडः—जलति घनी भवति । लस्य डः । मातृसुखः इति द्वे **इष्टानिष्टाभिज्ञस्य जडस्य** ॥ प्राणं "प्रीणं" पुराणम् इति द्वे **पुराणस्य** ॥ भिन्नं व्यवच्छिन्न विशेषितम् इति त्रीणि **विशेषितस्य** ॥ ॥ १८ ॥ विनाकृतं विरहितं मुक्तं नीव्यूढम् इति चत्वारि **त्यक्तस्य** ॥ उच्यते कथ्यते । बुधैरिति शेषः । तिक्तः । "तिक्तो रससुगन्धयोः" इति मेदिनी । कषायः । "कषायो रसभेदेऽपि निर्यासे च विलेपने। अङ्गरागे च न स्त्री स्यात् सुरभे लोहिते त्रिषु" इति मेदिनी । सुरभिः इति त्रीणि **सुगन्धेः** ॥ कक्खटः निर्भरः "निर्वहः" दृढः ॥ १९ ॥ निःसन्धिः । निर्गतः सन्धिर्यस्मात् । निवातः । निवृत्तो निरुद्धो वा वातोऽस्मात् । इति पञ्च **दृढस्य** ॥ समूढं शोधितम् इति द्वे **शोधितस्य** ॥ आगन्तुकम् आहार्यम् इति द्वे **आगन्तुकस्य** ॥ अत्र स्यादित्यन्वयः । पक्त्रिमं पाकिमम् इति द्वे **पाकनिर्वृत्तस्य** ॥ २० ॥ कोमलं पेलवम् इति द्वे **कोमलस्य** ॥ अधमः अपसदः धवः । "धवः पुमान् नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च" इति मेदिनी । क्वचित् ध्रुवः । इति त्रीणि **पापस्य नीचस्य वा** ॥ रोमाञ्चितः । रोमाञ्चः जातोऽस्य । हृष्टरोमा । हृष्टमिव जाताङ्कुरं रोम यस्य । इति द्वे **रोमाञ्चितस्य** ॥ अजानेयः । अजेऽपि विक्षेऽपि आनेयो यथास्थानं प्रापणीयो आरोहो येन । आजानीयशब्दोऽपि दृश्यते । तस्यार्थोऽत्र । "शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः" इति । निर्भयः इति द्वे **उत्तमाश्वस्य, निर्भयस्य वा** ॥ २१ ॥ अन्यासाधारणम्

और्ध्वश्रोतसिकः शैवः कौल आन्वयिकः स्मृतः।
पञ्चार्थिकः पाशुपतश्चिद्रूपः स्फूर्तिमान्मतः॥ २३॥
प्राज्ञ उद्घटितज्ञः स्याच्छंयुशंवशुभंयवः।
गौरवितास्त्वार्यमिश्राः श्लाघ्यास्तत्राभवन्मुखाः॥ २४॥
स्याद्देवानांप्रियः क्षेपे हतको बन्धुदग्धवत्।
अणुः कनीयानलिपष्ठः पिण्डितं गुणितं हतम्॥ २५॥
खट्वारूढोविनीतः स्यान्मरालमसृणे समे।
प्राञ्जलः प्रगुणोऽजिह्मः प्रणाय्यः साध्वनिन्दितौ॥ २६॥
त्वं त्वद्भिन्नं चान्यतरदपष्ठुलमपष्ठु च।
करम्बितं च खचितं रूषितं त्ववगुण्ठितम्॥ २७॥

आवेशिकम्। आवेशे गृहे भवः। प्रातिस्विकम्। प्रतिस्वे एकैकस्मिन् भवः। इति द्वे **असाधारणस्य**॥ भिक्षुकः क्षपणः। क्षपयति विषयरागम्। क्षपणकोऽप्यत्र। अह्रीकः। नास्ति ह्रीः लज्जा अस्य। इति त्रीणि **निर्ग्रन्थ इति ख्यातस्य तीर्थविशेषस्य**॥ बौद्धः। बुद्धो देवतास्य। वैनायकः। विनायकः सम्बुद्धो देवतास्य। क्वचित्तु वैनायिक इति दृश्यते। तत्र विनायं खण्डनमधिकृत्य कृतो ग्रन्थः। उपचारात् तदभिज्ञेऽपि वर्तते। इति द्वे **बौद्धस्य**॥ २२॥ और्ध्वश्रोतसिकः। उर्ध्वमुपरि श्रोतः इन्द्रियं शिवधर्मावलम्बनज्ञानमिति यावत् अस्त्यस्य। शैवः। शिवो देवताऽस्य। इति द्वे **शैवस्य**॥ कौलः। कुले सत्कुले भवः। आन्वयिकः। अन्वये प्रशस्तकुले भवः। इति द्वे **प्रशस्तकुलजातस्य**॥ स्मृतः ज्ञातः। पण्डितैरिति शेषः। पञ्चार्थिकः पाशुपतः चिद्रूपः। चिदेव रूपमस्य। स्फूर्तिमान्। स्फूर्तिरस्त्यस्य। इति चत्वारि **पाशुपताख्यस्य शैवभेदस्य**॥ २३॥ प्राज्ञः उद्घटितज्ञः इति द्वे **प्रज्ञाविशेषस्य**॥ शंयुः। शमस्त्यस्य। शंवः। शमस्त्यस्य। क्वचित् "शबः"। शुभंयुः। शुभमस्त्यस्य। इति त्रीणि **शुभान्वितस्य**॥ एते शब्दाः त्रिषु लिङ्गेषु वर्तन्ते। गौरविताः। गौरवं जातमेषाम्। आर्यमिश्राः। आर्याणां श्रेष्ठाचाराणां मिश्राः श्रेष्ठाः। इति द्वे **पूज्यस्य**॥ श्लाघ्याः इत्येकं **श्लाघनीयस्य**॥ ये तत्र तेषु मुखाः प्रधानाः ते श्लाघ्याः अभवन्निति सम्बन्धः। उभय त्र श्रेष्ठार्थद्योतनार्थं बहुवचनप्रयोगः॥२४॥ देवानांप्रियः। अलुक्समासः। इत्येकं **क्षेपकोक्तेः मूर्खस्य वा**॥ हतकः। हत इव नष्टप्रायत्वात्। कन् प्रत्ययः। इत्येकं **नष्टप्रायस्य**॥ अणुः कनीयान्। अयमनयोरतिशयेनाल्पः। अलिपष्ठः। अयमनयोरतिशयेनाल्पः। इति त्रीणि **अल्पतरस्य**॥ पिण्डितं गुणितं हतम् इति त्रीणि **गुणितस्य**॥ २५॥ खट्वारूढः अविनीतः इति द्वे **अविनीतस्य प्रमादितस्य वा**॥ मराल मसृणम् इति द्वे **स्निग्धस्य**॥ प्राञ्जलः प्रगुणः अजिह्मः इति त्रीणि **ऋजुभावयुक्तस्य**॥ प्रणाय्यः साधुः अनिन्दितः इति त्रीणि **साधोः**॥ २६॥ त्वम् त्वत् भिन्नम्

स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः ॥ २८ ॥

इति विशेष्यनिघ्नवर्गः ॥ १ ॥

विधिर्विधानं कर्मास्त्री क्रिया कृत्या विधा कृतिः ।
व्याप्यं तु साधनं कर्म्मयुताज्ञेय्ये तु सङ्गतम् ॥ १ ॥
अङ्गारितं पलाशानां कलिकोद्गमने स्मृतम् ।
जलयन्त्रगृहं धीरैः समुद्रगृहमुच्यते ॥ २ ॥
जलहं तु विदुः स्वल्पे सोमालं कुसुमाकरे ।
स्तनाभोगः स्तनभरः परभागः स्वसम्पदि ॥ ३ ॥
आलिङ्गनं त्वङ्कपालिः श्लिषा खट्टिस्त्वसद्ग्रहः ।
स्यादज्ञेऽनेडकः सग्धिः सहभोजनमित्यपि ॥ ४ ॥

अन्यतरत् इति चत्वारि **भिन्नस्य अन्यार्थस्य वा** ॥ अपष्ठुलम् अपष्ठु इति द्वे **विपरीतस्य** ॥ करम्बितम् । करम्बो मिश्रणं जातोऽस्य । खचितं रूषितम् अवगुण्ठितम् "गुरुगुण्डितम्" इति चत्वारि **मिश्रितस्य** ॥२७॥ पात्रेसमितः । पात्रे भोजनपात्रासादनकाले एव समितः सङ्गतः । इत्येकं **भोजनादन्यत्र अनुपस्थितस्य कार्यदक्षस्य** ॥ यः भोजनात् अन्यत्र न मिलितः न सङ्गतः स पात्रेसमित इत्यर्थः ॥ २८ ॥ इति विशेष्यनिघ्नवर्गः ॥ १ ॥ विधिः विधानं कर्म । इमे शब्दाः स्त्रीलिङ्गभिन्नाः पुन्नपुंसकाः स्युः । क्रिया कृत्या विधा कृतिः इति सप्त **कर्मणः** ॥ इमे स्त्रीलिङ्गकाः । वाप्यं साधनम् इति द्वे **साधनस्य** ॥ सङ्गतम् इत्येकं **कर्मयुक्ताज्ञेय्यस्य मिलितस्य** ॥ १ ॥ अङ्गारितम् । अङ्गारमिवाचरति । इत्येकं **पलाशकलिकोद्गमस्य** ॥ पलाशानां स्वनामाख्यातानां वृक्षाणाम् कलिकानां कोरकाणाम् उद्गमने ऊर्ध्वगमने उत्पन्ने इत्यर्थः । स्मृतं ज्ञातम् । अथवा सामान्यवृक्षेषु पल्लवोद्गमनेऽपि अङ्गारितशब्दो दृष्ट इति केचित् । "नवपलाशपलाशवनम्" इति माघः । समुद्रगृहम् । समुद्र इव प्रचुरजलं गृहम् । इति द्वे **जलयन्त्रयुक्तगृहस्य** ॥ जलयन्त्रगृहं जलवहनयन्त्रयुक्तं मन्दिरं समुद्रगृहमिति धीरैः उच्यते इत्यर्थः ॥२॥ जलहम् इत्येकं **स्वल्पजलयन्त्रस्य** ॥ सोमालं "समाली" इत्येकं **कुसुमाकरस्य** ॥ स्तनाभोगः । स्तनस्य आभोगः परिपूर्णभावः । स्तनभरः । स्तनस्य भरः इति द्वे **स्थूलस्तनभारस्य तदाभोगस्य वा** ॥ परभागः । भज्यते सेव्यतेऽनेन भागः । परश्चासौ भागश्च परेषां भागो वा । इत्येकं **स्वसम्पदः** ॥ ३ ॥ आलिङ्गनम् अङ्कपालिः । अङ्कस्य पालिरिव । वा अङ्गपालिः । अङ्गं पाल्यते सम्बध्यतेऽत्र । श्लिषा इति त्रीणि **प्रीतिपूर्वकमन्योन्यदेहसंश्लेषणस्य** ॥ खट्टिः असद्ग्रहः । असति अविद्यमाने वस्तुनिग्रहः आग्रहः । इति द्वे **बालादीनाम् आवदार इति ख्यातस्य आग्रहमैत्रस्य** ॥ अनेडकः इत्येकम् **अज्ञस्य** ॥ सग्धिः "सन्धिः" सहभोजनम् इति द्वे **एकत्रभो-**

धार्मिकाणां तु सम्भूय भोजनं गणचक्रकम् ।
क्रीडाक्रीडकयोर्देश्च सेवायां सेवके च सेः ॥ ५ ॥
दानं दायोऽथ दुर्जातं दुःषमं चासमञ्जसम् ।
कलञ्जौ तौ विषास्त्रेण हतौ यौ मृगपक्षिणौ ॥ ६ ॥
छेकोक्तिर्वक्रभणितं गोमुखं तूपलेपनम् ।
हर्षायणाप्तं यत्पूर्णपात्रं पूर्णानकं च तत् ॥ ७ ॥
थुत्थुको विक्रियामात्राडुद्धटायनमुच्यते ।
बुद्धद्रव्यं स्तौपिकं स्यात्सत्त्वं द्रव्यं च वस्तु च ॥ ८ ॥
लेशस्तूपपदं गन्धोऽनुबन्धेषत्करावपि ।
छेदः खण्डोऽस्त्रियां गालिः शपनं शमनं शमः ॥ ९ ॥
वप्रस्तु धूलिकेदारः प्सा वीतिर्भक्षणं च सा ।
मैत्रेयिका मित्रयुद्धं पर्यङ्कस्त्ववसक्थिका ॥ १० ॥

जनस्य ॥ ४ ॥ गणचक्रम् इत्येकं **धार्मिकसहभोजनस्य** ॥ धार्मिकाणां धर्मशीलानां बहूनां सम्भूय एकत्र सन्निपतित्या भोजनम् अदनं गणचक्रमिति कथितमित्यर्थः । देः इत्येकं **क्रीडाक्रीडकयोः**॥सेः इत्येकं **सेवासेवकयोश्च** ॥५॥ दानं दायः इति द्वे **दानस्य** ॥ दुर्जातम् । दुष्टं जातम्, दुष्टु जातमस्य वा । दुःषमम् । दुष्टं सममत्र । असमञ्जसम् । न समञ्जसं युक्तियुतम् । इति त्रीणि **असङ्गतस्य, असमञ्जसस्य वा** ॥ कलञ्जः इत्येकं **विषास्त्रेण हतस्य मृगस्य,पक्षिणश्च** ॥ ''न कलञ्जं भक्षयेत्'' इति श्रुतिः । यौ मृगपक्षिणौ विषास्त्रेण विषयुक्तेन शस्त्रेण हतौ विनाशितौ तौ मृगपक्षिणौ कलञ्जाविति व्यस्ता-वित्यर्थः ॥ ६ ॥ छेकोक्तिः । छेकायाः विदग्धायाः उक्तिः। वक्रोक्तिरप्यत्र क्वचित् ''छेदोक्तिः'' वक्रभणितम् । वक्रस्य भणितम् वक्रं च तद्भणितं च वा । इति द्वे **काकुवचनस्य** ॥ ''वक्रोक्तिर्वाक्यजीवितम्'' इति अलङ्कारोक्तेः काव्याङ्गमस्य । गोमुखम् । गोरिव मुखमस्य । उपलेपनम् इति द्वे **लेपनस्य**॥पूर्णपात्रम् । पूर्णं च तत् पात्रं च ।पूर्णानकम् ''पूर्णालकम्'' । पूर्णं च तत् आलकं च। इति द्वे **हर्षकाले पुत्रजननोत्सवजहर्षात् आकृष्य वस्त्रा-देर्ग्रहणस्य** ॥ यत् वस्त्रादिकं वस्तु हर्षायणे हर्षयुक्तकाले आप्तं लब्धं तत् पूर्णपात्रमिति कथितमित्यर्थः। क्वचित् वार्धापनाप्तं वर्धापनार्थमिति च पाठः ॥ ७ ॥ थुत्थुकः इत्येकं **विक्रि-यामात्रतः उद्धटायनस्य** ॥ बुद्धद्रव्यम् । बुद्धस्य दत्तं द्रव्यम् । स्तौपिकम् ।स्तूपस्य दत्तं वा । इति द्वे **बुद्धायत्तद्रव्यस्य** ॥ सत्त्वं द्रव्यं वस्तु इति त्रीणि **द्रव्यस्य** ॥ ८ ॥ लेशः उपपदं गन्धः अनुबन्धः ईषत्करः इति पञ्च **लेशस्य, अणुमात्रस्य च** ॥ छेदः खण्डः इति द्वे **खण्डस्य** ॥ एतौ स्त्रियां न स्तः । गालिः शपनम् इति द्वे **शापस्य, आक्रो-शस्य वा**॥शमनं शमः इति द्वे **शमनस्य** ॥ ९ ॥ वप्रः धूलिकेदारः इति द्वे **क्षेत्रस्य** ॥

अथ हेतुरुपादानं प्रत्ययाः सहकारिणः ।
अनुमा त्वनुमानं स्याद्व्याप्यं लिङ्गं च साधनम् ॥ ११ ॥
प्रत्यक्षोऽपाक्षमध्यक्षं धन्धो धान्ध्यमपाटवम् ।
बोधो बोधिः समन्तात्तु ज्ञानं स्यात्समुदागमः ॥ १२ ॥
ऋषिः शास्त्रकृदाचार्यः शास्त्रं तु स्मृतिरागमः ।
साङ्ख्यं समीक्षं स्याद्दिव्यदोहदं तूपयाचितम् ॥ १३ ॥
करिणो रूपमिच्छन्ति कर्णास्फाले झलज्झला ।
रामेण रावणवधो रामायणमथोच्चयः ॥ १४ ॥
वस्त्रग्रन्थिश्च नीवी स्यान्मणितं रतकूजितम् ।
श्वभ्रोऽवपातो हल्लेखस्तर्कश्शीर्णं तु शीलितम् ॥ १५ ॥

प्सा वीतिः भक्षणम् इति त्रीणि **भक्षणस्य** ॥ मैत्रेयिका । मित्रेण कृता । मित्रयुद्धम् । मित्रस्य युद्धम् । इति द्वे **मित्रयुद्धस्य** ॥ पर्यङ्कः अवसक्थिका इति द्वे **पर्यङ्कस्य** ॥ १० ॥ हेतुः उपादानम् इति द्वे **कार्यजननार्थमुपादीयमानस्य कार्यान्वितस्य कारणस्य** ॥ प्रत्ययाः सहकारिणः । सह सम्भूय करोति कार्यम् । इति द्वे **सहकारिणः** ॥ अनुमा अनुमानम् इति द्वे **व्याप्तिदर्शनेन व्यापकनिश्चयस्य अनुमानस्य** ॥ व्याप्यं लिङ्गं साधनम् । इति त्रीणि **अनुमितिसाधनस्य व्याप्तस्य** ॥ ११ ॥ प्रत्यक्षम् । प्रतिरूपमक्षणः । अपाक्षम् । अध्यक्षम् इति त्रीणि **प्रत्यक्षस्य** ॥ धन्धः धान्ध्यम् । अपाटवम् इति त्रीणि **पटुताभिन्नस्य** ॥ बोधः । बोधकोऽप्यत्र । बोधिः इति द्वे **बोधकस्वरूपस्य ज्ञानस्य** ॥ समुदागमः इत्येकं **समन्तात् ज्ञानस्य** ॥ कश्चित् समन्तादित्यत्र समज्ञा इति पाठः ॥ १२ ॥ ऋषिः शास्त्रकृत् । शास्त्रकर्ताप्यत्र । आचार्यः इति त्रीणि **शास्त्रद्रष्टुर्मुनेः** ॥ शास्त्रम् । शिष्यतेऽनेन । स्मृतिः आगमः इति त्रीणि **शास्त्रस्य** ॥ साङ्ख्यं समीक्षम् इति द्वे **साङ्ख्यस्य** ॥ दिव्यदोहदं "दिव्यदोहनम्" । दिव्यस्य दोहदम् "यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये । उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः" इति । उपयाचितम् । उपयाचितकमप्यत्र । इति द्वे **अभीष्टार्थसिद्धये देवेभ्यो देयस्य द्रव्यस्य** ॥ १३ ॥ झलज्झला । जलन्तं जलति । पृषोदरादित्वात् साधु । इत्येकं **हस्तिकर्णास्फालनस्य** ॥ करिणः हस्तिनः कर्णास्फाले कर्णचालने रूपं स्वभावं झलज्झलेति इच्छन्ति । बुधाः इति शेषः रामायणम् । रामस्यायनं चरितमधिकृत्य कृतो ग्रन्थः । इत्येकं **रामचरितप्रतिपादकस्य बाल्मीकिकृतकाव्यभेदस्य** ॥ रामेण श्रीकृष्णेन रावणवधः तन्नामकराक्षसहननम् तत्कथामधिकृत्य कृतो ग्रन्थस्तदुपचारवशात् रामायणं कथितमिति व्यङ्ग्यस्यार्थः । उच्चयः ॥ १४ ॥ वस्त्रग्रन्थिः । वस्त्रस्य ग्रन्थिः । नीवी "नीवीं प्रति प्रणिहिते तु करे" इति साहित्यम् । नीविरप्यत्र । इति त्रीणि **कटीवस्त्रबन्धनस्य** ॥ मणितं रतकूजितम् । रते कूजितम् । इति

एकीया एकपक्षाः स्युः सहायाः सहभाविनः ॥
कुलीरास्त्र्ये गविर्जानपदा राष्ट्रनिवासिनः ॥ १६ ॥
प्रत्यक्षी व्यक्तदृष्टार्थश्चाऽथ कर्तनतर्कुटे ॥
चिरकालं दीर्घरात्रमामिक्षा मस्तु वाजिनम् ॥ १७ ॥
तदात्वं प्रमुखं राजमल्ल उत्सिक्त उद्धतः ।
द्वैधं विवाद आरम्भ आदराडम्बरार्थकः ॥ १८ ॥
रभसो गमकारित्वं कौमुदी कार्तिकोत्सवे ।
आवेशाटोपसंरम्भाः प्रियवाक्चटु चाटुनी ॥ १९ ॥
प्रतिरूपं प्रतिच्छन्दः संवेशनरतिक्रिये ।
अभ्यासः खुरली योग्या निर्वर्णननिभालने ॥ २० ॥
शालिनीकरणं न्यग्भावनं गन्धनसूचने ।
भावः पदार्थो धर्मः स्यात्सत्त्वं तत्त्वं च वस्तु च ॥ २१ ॥

रतिकाले स्त्रीणामव्यक्तशब्दभेदस्य ॥ श्वभ्रः अवपातः इति द्वे **गर्तस्य, छिद्रस्य वा** ॥ हल्लेखः । हृदयं लिखति स्पृशति । तर्कः इति द्वे **तर्कस्य** ॥ चीर्णं शीलितम् इति द्वे **अभ्यस्तस्य** ॥ १५ ॥ एकीयाः एकपक्षाः सहायाः सहभाविनः इति चत्वारि **सहायानाम्** ॥ गविः इत्येकं **कुलीरशिशोः** ॥ जानपदाः।जनपदे भवाः, तत आगता वा।राष्ट्रनिवासिनः इति द्वे **देशनिवासिनाम्**॥१६॥प्रत्यक्षी"प्रत्यक्षः"व्यक्तदृष्टार्थः।व्यक्तेन दृष्टाः अर्थाः येन। इति द्वे **साक्षिणः**॥कर्तनम् "वर्तनं" तर्कुटम्। तर्कुरप्यत्र।इति द्वे **छेदनयन्त्रभेदस्य**॥ चिरकालं।कालस्य चिरम्,चिरः कालोऽस्य वा।दीर्घरात्रम्।रात्रेः दीर्घम्, दीर्घारात्री अस्य वा।इति द्वे **चिरकालस्य**॥ आमिक्षा । आमिष्यते सिच्यते । मस्तु वाजिनम् । "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतिः । इति त्रीणि **दधियोगजायाः विकृतेः आमिक्षानिःसृतजलस्य च** ॥ १७ ॥ तदात्वम् । तदेत्यस्य भावः । प्रमुखम् । प्रकृष्टं मुखमारम्भः । इति द्वे **तत्कालस्य** ॥ राजमल्लः उत्सिक्तः उद्धतः इति त्रीणि **उद्धतस्य** ॥ द्वैधम् विवादः इति द्वे **विवादस्य** ॥ आरम्भः आदरः आडम्बरः इति त्रीणि **आरम्भस्य, दर्पस्य च** ॥ १८ ॥ रभसः गमकारित्वम् इति द्वे **पौर्वापर्याविचारस्य**॥ कौमुदी इत्येकं **कार्तिकोत्सवस्य** ॥ आवेशः आटोपः संरम्भः इति त्रीणि **संरम्भस्य** ॥ प्रियवाक् चटु चाटुनी इति त्रीणि **प्रियवाक्यस्य** ॥ १९ ॥ प्रतिरूपं प्रतिच्छन्दः इति द्वे **प्रतिरूपस्य** ॥ संवेशनं रतिक्रिया इति द्वे **रतिक्रियायाः** ॥ अभ्यासः खुरली योग्या । इति त्रीणि **शास्त्राभ्यासस्य शराभ्यासस्य वा**॥ निर्वर्णनं निभालनम् इति द्वे **दर्शनस्य** ॥ २० ॥ शालिनीकरणं न्यग्भावनम् इति द्वे **अधःकरणस्य** ॥ गन्धनं सूचनम् इति द्वे **सूचनस्य प्रकाशनस्य**॥भावः पदार्थः धर्मः सत्त्वं तत्त्वं वस्तु इति षट् **वस्तुनः**॥२१॥

सन्दर्भस्तु प्रबन्धः स्याद्ग्रन्थो द्वात्रिंशदक्षरी ।
सर्गबन्धो महाकाव्यं महारूपकनाटके ॥ २२ ॥
अथ वाङ्मयभेदाः स्युश्चम्पूः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥ २३ ॥
सन्दानमनिरुद्धं च प्रकीर्णं गुत्सकस्तथा ।
सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसङ्ग्रहाः ॥ २४ ॥
उच्छ्वासः परिवर्तश्च पटलः काण्डमस्त्रियाम् ।
स्थानं प्रकरणं पर्वाह्निकं च ग्रन्थसन्धयः ॥ २५ ॥
प्रज्ञप्तिः परिभाषाशैलीसङ्केतसमयकाराश्च ।
प्रतिवाणी प्रतिवचनं समुदाचारस्त्वभिप्रायः ॥ २६ ॥
अप्रतिरूपकथा स्यात्सङ्गणिका छोरणं परित्यागः ।
स्यादुद्धर्धनमन्तर्हासस्त्रिषु पिण्डमाहारः ॥ २७ ॥
अवसर्गः प्राकाम्यं स्वाच्छन्द्यानुमननमित्यपि च ।
आकल्पक उत्कण्ठा चिन्ताकर्मण्यथास्त्यानम् ॥ २८ ॥

सन्दर्भः प्रबन्धः इति द्वे **सन्दर्भस्य** ॥ ग्रन्थः द्वात्रिंशदक्षरी इति द्वे **ग्रन्थस्य** ॥ सर्गबन्धः महाकाव्यम् इति द्वे **महाकाव्यस्य** ॥ तल्लक्षणं साहित्यदर्पणे षष्ठाध्याये विस्तरतो निरूपितम् इच्छद्भिस्तत्रावलोकनीयम् । महारूपकं नाटकम् इति द्वे **नाटकस्य** ॥ २२ ॥ चम्पूः खण्डकथा कथा आख्यायिका परिकथा इति पञ्च **एकैकवाङ्मयभेदस्य** ॥ तल्लक्षणमपि साहित्यदर्पणे षष्ठाध्याये प्रकाशितम् । कलापकः विशेषकः इति द्वे **कलापकस्य** ॥ तल्लक्षणं "कलापकं चतुर्भिश्च" इति साहित्यम् ॥ २३ ॥ सन्दानम् अनिरुद्धम् इति द्वे **काव्यबन्धनविशेषस्य** ॥ "सन्दानितकं त्रिभिरिष्यते" इति साहित्यम् । प्रकीर्णं गुत्सकः इति द्वे **मिश्रकाव्यस्य** ॥ सर्गः वर्गः परिच्छेदः उद्घातः । क्वचित्तु उद्योत इति च । आध्यायः अङ्कः संग्रहः ॥ २४ ॥ उच्छ्वासः । उल्लासोऽप्यत्र । परिवर्तः इति नव **कथापरिच्छेदानाम् एकैकमेकैकस्य** ॥ पटलः काण्डम् । पुं वा । स्थानं प्रकरणं पर्व आह्निकम् इति षट् **ग्रन्थसन्धीनाम् एकैकमेकैकस्य** ॥ २५ ॥ प्रज्ञप्तिः परिभाषा शैली । "आचार्याणामियं शैली यत्सामान्येनाभिधाय विशेषेण विवृण्वन्ति इति प्राञ्चः । सङ्केतः समयकारः इति पञ्च **सङ्केतस्य** ॥ प्रतिवाणी "प्रतिवाणिः" प्रतिवचनम् इति द्वे **प्रतिवचनस्य** ॥ समुदाचारः अभिप्रायः इति द्वे **अभिप्रायस्य** ॥ २६ ॥ सङ्गणिका इत्येकम् **अप्रतिरूपकथायाः** ॥ स्यादित्यन्वयः । छोरणं परित्यागः इति द्वे **परित्यागस्य** ॥ उद्धर्धनम् 'उद्वर्तनम्' अन्तर्हासः इति द्वे **अन्तर्हासस्य** ॥ पिण्डम् । [illegible] आहारः इति द्वे **आहारस्य** ॥ २७ ॥ अवसर्गः । क्वचित् अभ्यसर्ग इति । प्राका-

आक्षेपोऽत्याकारः स्वाध्यायः स्यान्निरन्तराभ्यासः ।
हर्षस्वनः किलकिला सदृशस्यन्दस्तु निःस्यन्दः ॥ २९ ॥
अवसानं तु विरामोऽमध्यमथो मण्डलं चक्रम् ।
यादारम्भः प्रस्तावना तदामुखमपि ज्ञेयम् ॥ ३० ॥

इति सङ्कीर्णवर्गः ॥ ५ ॥

अथ नानार्थः ।

स्वरकाद्यादिकाद्यन्तक्रमान्नानार्थसङ्ग्रहम् ।
विहायाऽमरकोषोक्तमकार्षीत्पुरुषोत्तमः ॥ १ ॥

म्यम् "प्राकाम्यं ते विभूतिषु" इति कुमारः । स्वाच्छन्द्यानुमननम् । अपिशब्दात् स्वाच्छन्द्यानुमतिरप्यत्र । इति त्रीणि **स्वाधीनतानुमतेः॥** आकल्पकः उत्कण्ठा इति द्वे **औत्सुक्य इति ख्यातस्य चिन्ताकर्मणः ॥** आख्यानम् ॥ २८ ॥ आक्षेपः । आक्षेपकोऽप्यत्र । अत्याकारः इति त्रीणि **निन्दायाः, अपवादस्य वा ॥** स्वाध्यायः । स्वः स्वकीयत्वेन विहितः अध्यायः । "स्वाध्यायोऽध्येतव्यः" इति श्रुतिः । निरन्तराभ्यासः इति द्वे **स्वाध्यायस्य द्विजैः पाठ्यवेदभागभेदस्य वा ॥** हर्षस्वनः किलकिला इति द्वे **हर्षकारकशब्दस्य ॥** सदृशस्यन्दः "सदृशस्पन्दः" निःस्यन्दः "निस्पन्दः" इति द्वे **समानक्षरणस्य ॥ २९ ॥** अवसानं विरामः अमध्यम् इति त्रीणि **अवसानस्य ॥** मण्डलं चक्रम इति द्वे **चक्रस्य ॥** आरम्भः "नटी विदूषको वापि" इत्यादि साहित्यम् । प्रस्तावना आमुखम् " आमुखं तद्विजानीयाद्बुधैः प्रस्तावना मता " इति साहित्यम् । इति त्रीणि **प्रस्तावनायाः ॥ ३० ॥** इति सङ्कीर्णवर्गः ॥ २ ॥ अनन्तरमिहाऽनेकार्थशब्दा उच्यन्ते । किमर्थमत्र अनेकार्थशब्दा उच्यन्त इति ? प्रागुक्तेषु वर्गेषु तेषामनेकार्थवतां शब्दानां प्रायोऽभिहितत्वात् । ननु तत्र तेषामेकैकार्थ एव पर्यायेण समुद्दिष्टः । ततोऽत्र तेषां नानार्था विशेषतः प्रचक्ष्यन्ते । तर्हि कुतस्ते नानार्थाः ? प्रागुक्ता इत्यत आह—अथ नानार्थ इति। अत्र वक्ष्यमाणेषु कान्तादिवर्गेष्वेव केऽपि नानार्थाः पृथक्पृथगुक्ताः न तु प्रागुक्तेषु पर्यायशब्देषु । तेऽपि नानार्थशब्दाः प्रागुक्तेषु वर्गेषूक्ता अपि अत्रानेकार्थवर्गे प्रायस्तेषां शब्दानां नानार्थतैवोच्यते इति भावः । तत्रादौ नानार्थवर्गे तावत् पुरुषोत्तमः पुरुषोत्तमदेवनामा सुधीः अमरकोषे अमरकोषाभिधाने अभिधानशास्त्रे उक्तम् आचार्यामरसिंहेन भूयः कथितम् । तत्र येयेऽनेकार्थशब्दा भूरिप्रयोगवशादुक्ता इति भावः।तत्र कथितं तत् विहाय परित्यक्त्वा।स्वरकाद्यादिकाद्यन्तक्रमात् स्वराः अकारादयः । आदिशब्देनाकारेकारोकाराश्च । तेषां कादीनां च आद्यन्तक्रमात् आदिक्रमेण अन्तक्रमेण च । आदिपर्यवसानानां वर्णानां यथानुयोगवशेनेति भावः । नानार्थं नाम अनेकार्थवाचिनां शब्दानाम् सङ्ग्रहं सङ्कलनम् । बह्वर्थकवाचकानामेकत्र सङ्ग्रह–

शक्रार्कपर्णयोश्चाऽर्कोऽभीकस्त्वभयकामिनोः ।
रूपकान्तिकयोश्चाङ्कोऽलिमकौ भेककोकिलौ ॥ २ ॥
अन्तिकं निकटे चुल्ल्यां नाट्योक्तौ चाग्रजान्तिका ।
अनीकोऽस्त्री रणे सैन्ये गौर्यां मातरि चाम्बिका ॥ ३ ॥
स्यादश्मन्तकमुद्धाने मल्लिकाच्छदनेऽपि च ।
आह्निकं दिननिर्वर्त्ये तत् क्लीबं नित्यकर्मणि ॥ ४ ॥

करणमित्यर्थः । अकार्षीत् यथावत् कारयामास । पूर्वोक्तप्रयोगमनुगम्य अर्थावबोधनेन विरचयामासेति यावत्॥१॥अथ कान्तानाह । शक्रे इन्द्रे।अर्कपर्णे मन्दारे च। **अर्कः** इत्येक ककारान्तं नाम वर्तते । अर्चत इति अर्कः।पु०। अर्च—पूजायाम् कर्मणि घञ्प्रत्ययः।कत्वम्।"अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ" इति मेदिनी ॥ अभये निर्भये । कामिनि कामुके च। **अभीकः** इति शब्दो वर्तते । अभिकामयते इति अभीकः। पु०। अभिपूर्वककम—वाञ्छायाम्। निपातनात् साधुः। "अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ"इति मेदिनी।"अभीको निर्भये कम्रे"इति हैमः॥ रूपे शरीरे । कान्तिके शोभान्विते च! **अङ्कः**इति शब्दो वर्तते । वर्तत इति अतः परं वक्ष्यमाणेषु शब्देषु सर्वत्रैवान्वयः । अङ्कयति अङ्कयते वेत्यङ्कः । पु० । अङ्क—सङ्ख्याकरणे । घञ् प्रत्ययः । केचित्तु अङ्कापयति अङ्कापयते इति च वदन्ति । "अङ्को रूपकभेद ागश्चिह्नरेखाजिभूषणे। रूपकांशान्तिकोत्सङ्गे स्थाने" इति मेदिनी ॥ भेकः मण्डूकः । कोकिलः परभृतः। तयोश्च **आलिमकशब्दः** । पु०। "अलिमकः पिके भेके मधूके पद्मकेशरे" इति विश्वः॥२॥ निकटे समीपे । चुल्ल्यां पाकार्थमग्निस्थापनस्थाने च । **अन्तिकम्** । न० । अन्त्यते सम्बध्यते सामीप्येन । अन्त—बन्धने । घञ् प्रत्ययः । स्वार्थे ठन् ॥ नाट्योक्तौ नाटकविषयवचने । अग्रजायां ज्येष्ठभगिन्यां च। **अन्तिका** । स्त्री०। "अन्तिकं निकटे वाच्यलिङ्गं स्त्री सातलौषधौ । चुल्ल्यां ज्येष्ठभगिन्यां च नाट्योक्त्यां कथ्यतेऽन्तिका" इति मेदिनी । "अन्तिकं पुनः । पार्श्वेऽन्तिका तु चुल्ल्यां स्यात् सातलाख्यौषधेऽपि च । नाट्योक्तौ ज्येष्ठभगिनी अन्तिका प्रोच्यतेऽपि सा" इति हैमः।रणे युद्धे। सैन्ये सेनासमुदाये च।**अनीकः**।पु०।न०।अन—जीवने। ईकन्।"अनीकोऽस्त्री रणे सैन्ये" इति मेदिनी। "अनीकं रणसैन्ययोः" इति हैमः॥ गौर्यां पार्वत्याम् । मातरि जनन्यां धृतराष्ट्रराजमातरि च। **अम्बिका** । स्त्री० ॥ अम्बैव स्वार्थे के ह्रस्वे अत इत्वम्।"अम्बिका पार्वतीमात्रोर्धृतराष्ट्रस्य मातरि" इति मेदिनी"अम्बिका पार्वती पाण्डुजनन्योरपि मातरि।अम्बिका कैतवे मिश्रे सर्वप्यामपि कीर्त्यते" इति विश्वः । "अम्बिकोमापाण्डुमात्रोर्दैवताभिदि मातरि" इति हैमः॥३॥उद्धाने चुल्ल्याम् उद्धृते वा।मल्लिकाच्छदने मल्लिकापत्रे मल्लिकारचिते पिधाने च, दीपाधारच्छादने वा । **अश्मन्तकं** स्यात् । पु०।न०। अश्मानमन्तयति। अन्त—बन्धने । ण्वुल् प्रत्ययः । अश्मनोऽन्तोऽस्याम् । स्वार्थे को वा । "स्यादश्मन्तकमुद्धाने मल्लिकाच्छदनेऽपि च" इति मेदिनी ॥ दिननिर्वर्त्ये दिनसाध्ये । नित्यकर्मणि नित्यक्रियायाम् ।

स्यादाच्छुरितकं हासविशेषे च नखक्षते ।
उदर्क एष्यत्कालीयफले मदनकण्टके ॥ ५ ॥
स्त्रियामुत्कलिका हेलोत्कण्ठासलिलवीचिषु ।
कोशज्ञे कौशिको विश्वामित्रे गौर्यां च कौशिकी ॥ ६ ॥
कृष्णत्वे च हिमान्यां च गौरीकाल्योश्च कालिका ।
वर्षोपले स्त्री करका करङ्के करकोऽस्त्रियाम् ॥ ७ ॥

आह्निकं स्यात् । न० । अह्ना साध्यम् । ठञ् प्रत्ययः । "आह्निकं दिननिर्वर्त्ये त्रिलिङ्गमथ न द्वयोः । नित्यक्रियाभोजनयोर्वृन्दे प्रकरणस्य च" इति मेदिनी । "आह्निकं स्यात्पुनरहर्निर्वर्त्ये नित्यकर्मणि । भोजने ग्रन्थभागे च" इति हैमः ॥ ४ ॥ हासविशेषे हास्यभेदे । "ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितम् । अवेक्षितं द्विजद्वारमुत्तमानां स्मितं भवेत्" इति । नखक्षते नखाघातव्रणे च **आच्छुरितकम्** । न० । आपूर्वच्छुर—छेदने, रञ्जने वा । क्तप्रत्ययः । पुनः स्वार्थे कश्च । "स्यादाच्छुरितकं हासनखराघातभेदयोः" इति मेदिनी । "स्यादाच्छुरितकं हासनखाघातप्रभेदयोः" इति विश्वः ॥ एष्यत्कालीयफले उत्तरकालभाविफले शुभाशुभे । मदनकण्टके च **उदर्कः** ॥ पु० । उद्—अर्क—उपतापे, अर्च—पूजायां वा । घञ् प्रत्ययः । "उदर्क एष्यत्काले तत्फले मदनकण्टके" इति मेदिनी । "उदर्कस्तूत्तरकालफले मदनकण्टके" इति हैमः ॥ ५ ॥ हेला स्त्रीणां शृङ्गारभावजा चेष्टा । तथोक्तम्—"प्रौढेच्छायातिरूढानां नारीणां सुरतोत्सवे" इति । उत्कण्ठा इष्टालाभे कालासहनरूपा । सलिलं जलम् । वीचिस्तरङ्गः । तत्र च । **उत्कलिका** स्यात् । स्त्री० । उत्पूर्वकल—सङ्ख्याने । वुन् प्रत्ययः । "कथितोऽत्कलिकोत्कण्ठाहेलासलिलवीचिषु" इति मेदिनी । कोशज्ञे कोषाध्यक्षे । क्वचित्तु कोषाङ्गे बहुमूलवृक्षविशेषे इत्यर्थः । विश्वामित्रे तन्नामकमुनौ । **कौशिकः** । पु० । कुशिकस्य गोत्रापत्यम् । ऋष्यण् प्रत्ययः ॥ गौर्यां पार्वत्याम् । **कौशिकी** । स्त्री० । "कौशिको नकुले व्यालग्राहे गुग्गुलुशक्रयोः । कोशज्ञोलूकयोश्च स्याद्विश्वामित्रे मुनावपि । कौशिकी चण्डिकायां च नदीभेदे च योषिति" इति मेदिनी । तथा विश्वः । "कौशिकः शक्रघूकयोः । कोशज्ञे गुग्गुलावाहितुण्डिके नकुले मुनौ । कौशिकी चण्डिकानद्योः" इति हैमः ॥ ६ ॥ कृष्णत्वे कार्ष्ण्ये । हिमान्यां हिमसमूहे । गौरी पार्वती । काली तन्नामिका देवी । तयोश्च । **कालिका** । स्त्री० । कालं कृष्णवर्णमनुचरति । ठक्प्रत्ययः । कालो वर्णोऽस्त्यस्याः । ठन् प्रत्ययो वा । "कालिका चण्डिकाभेदे कार्ष्ण्यवृश्चिकपत्रयोः । क्रमदेये वस्तुमूल्ये धूसरी नवमेघयोः । पटोलशाखारोमालीमांसीकाकीशिवासु च । मेघावलौ च" इति मेदिनी । "कालिका योगिनीभिदि । स्वर्णादिदोषे मेघाल्यां सुरागौर्योर्नवाम्बुदे । क्रमदेय वस्तुमूल्ये कार्ष्ण्यवृश्चिकपत्रयोः । रोमाल्यां धूसरीकाम्योः काकीपटोलशाखयोः" इति हैमः ॥ वर्षोपले घनोपले । **करका** । स्त्री० । कृ—करणे । वुन् प्रत्ययः ॥ करङ्के नारिकेलास्थ्नि कमण्डलौ वा । **करकः** । पु० । न० ॥ ७ ॥

कुसुम्भे दाडिमे पक्षिभेदे च करकः पुमान् ।
करमध्याङ्गुलौ च स्यात्कर्णिका च द्रुमान्तरे ॥ ८ ॥
द्विके धृष्टे च काकः स्यात्कौतुकं मङ्गलेच्छयोः ।
भोग्येप्यथ स्यात्कुलकं श्लोकैकार्थपटोलयोः ॥ ९ ॥
कुलकौ नाककाकेन्दू क आत्मा च सुखं च कम् ।
पेचके स्त्रीजिते काकरुको कौलेयकः शुनि ॥ १० ॥

कुसुम्भे दाडिमे पक्षिभेदे च **करकः** । पु० । कृ करणे । वुन् प्रत्ययः । "करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च । द्वयोर्वर्षोपले न स्त्री करङ्के च कमण्डलौ" इति मेदिनी । "करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ । पक्षिभेदे करे चापि करका च घनोपले" इति विश्वः । "करको दाडिमे पक्षिभेदे करकमण्डलौ । लट्वाकरञ्जयोर्वर्षोपले च" इति हैमः॥ करमध्याङ्गुलौ हस्तस्य मध्यमाङ्गुलौ।द्रुमान्तरे वृक्षविशेषे च।**कर्णिका** स्यात्।स्त्री०।कर्ण-भेदने। ण्वुल् प्रत्ययः। कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि।क्रमुकादिच्छटांशेऽब्जवराटे कर्णभूषणे" इति मेदिनी । तथा विश्वः । "कर्णिका कर्णभूषणे । बीजकोषे सरोजस्य करमध्याङ्गुलावपि। कुट्टिन्यां हस्ति-हस्ताग्रे कणिका सूक्ष्मवस्तुनि । अग्निमन्थे" इति हैमः ॥ ८ ॥ द्विके काके । द्वौ कौ ककारौ यत्र द्विकः । "द्विकः काके च कोके च" इति विश्वः । धृष्टे निर्लज्जे, प्रगल्भे च । धृष्टे इत्यत्र क्वचित् अदृष्टे इति पाठः । तस्यार्थः दर्शनायोग्ये इति **काकः** स्यात् । पु० । कै शब्दे । कन् प्रत्ययः । तस्य नेत्वम् । "काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि । शिरोऽवक्षाने मान-प्रभेदे दीपभेदयोः" इति मेदिनी । तथा विश्वः ॥ मङ्गले प्रशस्ते अभीष्टार्थसिद्धौ वा । इच्छा-याम् अभिलाषे । भोग्ये भोगार्हे च।"योग्ये"इति क्वचित् पाठः। **कौतुकम्**॥न० । कुतुक-मेवेति प्रज्ञादित्वात् स्वार्थे अण् प्रत्ययः । "कौतुकन्त्वभिलाषे स्यादुत्सवे नर्महर्षयोः । तथा पर-म्परायाते मङ्गले च कुतूहले । विवाहसूत्रगीतादिभोगयोरपि न द्वयोः" इति मेदिनी । "कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि । पारम्पर्यागतख्याते मङ्गलोद्वाहसूत्रयोः । गीतादौ भोगकाले च" इति हैमः ॥ श्लोकैकार्थः एकवाक्यतापन्नस्य पञ्चादिकश्लोकसमुदायार्थः । पटोलः स्वनामा-ख्यातः लताभेदः । तयोश्च । **कुलकम्** । न० । कुल–बन्धे । अच्प्रत्ययः। संज्ञायां कन् ॥९॥ नाकः स्वर्गः । काकेन्दुः कटुतिन्दुकः । तयोः **कुलकः** स्यात् । पु० । कुलकं तु ॥ पटोले स्यात्सम्बन्धश्लोकसंहतौ । पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते" इति मेदिनी । "कुलकं पञ्चादिश्लोकसमन्वये पटोलके । कुलकः कुलप्रधाने वल्मीके काकतिन्दुके" इति हैमः ॥ आत्मा देहः । तत्र च **कः** । पु० ॥ सुख प्रसिद्धं तस्मिंश्च **कम्** । न० । अत्र चकारात् ब्रह्मणि वायौ यमे "दक्षप्रजापतौ सूर्ये अग्नौ विष्णौ काले कामग्रन्थौ राजनि मयूरे धने प्रकाशे शब्दे च ।तथा शिरसि जले रोगे च कम् । कै–शब्दे । कचदीप्तौ वा । डप्रत्ययः । "को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । कामग्रन्थौ चक्रिणि च पतत्रिणि च पार्थिवे । मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु

कुलीने चाथ कनकं धुस्तूरे नागकेशरे।
चम्पके किंशुके हेम्नि कृषकौ फालकर्षकौ ॥ ११ ॥
रोमाञ्चे क्षुद्रशत्रौ च द्रुमाङ्गे कण्टकोऽस्त्रियाम्।
राजधान्यां नितम्बेऽद्रेर्वलये कटकोऽस्त्रियाम् ॥ १२ ॥
वेणौ ना कार्मुकं चापे गुणवृक्षेऽपि कूपकः।
कल्को विभीतके तैलादिशेषे चाथ कञ्चुकः ॥ १३ ॥

कम्'' इति मेदिनी। ''को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च । पावके च मयूरे च सुखशीर्ष-जलेषु कम्'' इति विश्वः। पेचकः उलुकः । स्त्रीजितः स्त्रीपराजितः।तयोः **काकरुकः**।पु० । काकस्य रुकः ध्वनिरिव ध्वनि यस्य।''काकरुको नग्नदम्भस्त्रीजितोलूकभीरुषु'' इति मेदिनी॥शुनि कुक्कुरे ॥ कुलीने सत्कुलोद्भवे श्रेष्ठहये वा । **कौलेयकः** । पु० । कुले भवः । ढकञ् प्रत्ययः । कुत्रचित् ''कोलेयकः'' इति पाठः ॥ धुस्तूरे तन्नामख्याते वृक्षे । नागकेशरे चम्पके किंशुके हेम्नि स्वर्णो च **कनकम्** । न० । कन–प्रीतौ, गतौ वा । वुन् प्रत्ययः । ''कनकं हेम्नि पुंसि स्यात् किंशुके नागकेशरे । धुस्तूरे काञ्चनारे च कालीये चम्पकेऽपि च'' इति मेदिनी । ''कनकं हेम्नि कनको नागकेशरे । धूस्तूरे चप्पके काञ्चनारकिंशुकयोरपि'' इति हैमः ॥ फालम् लाङ्गलमुखस्थः लौहभेदः । कर्षकः कृषीवलः । तयोः **कृषकः**।पु० । कृषआकर्षणे । क्वुन् प्रत्ययः। ''कृषकः पुंसि फाले स्यात् कर्षके त्वभिधेयवत्''इति मेदिनी ॥ १० ॥ ११ ॥ रोमाञ्चे रोमहर्षे । क्षुद्रशत्रौ नीचजातिकरिपौ । द्रुमाङ्गेवृक्षावयवे । तथा सूच्यग्रे मत्स्याद्यस्थ्नि ज्योतिषोक्ते लग्ने ततः चतुर्थसप्तमदशमस्थानेषु च **कण्टकः** । पु० न० । कटि–भेदे । ण्वुल् प्रत्ययः ।''कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे । नैयायिकादिदोषोक्तौ स्याद्रोमाञ्चद्रुमाङ्गयोः'' इति मेदिनी ॥ राजधान्याम् अद्रेर्नितम्बे मेखलाख्ये पर्वतमध्यभागे । वलये च **कटकः** । पु० न० । कट–वृतौ, वर्षणो वा । वुन् प्रत्ययः । कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनां दन्तमण्डले । सामुद्रलवणे राजधानीवलययोरपि'' इति मेदिनी ॥१२॥ वेणौ वंशे । चापे धनुषि च । **कार्मुकम्** । पु० न० । कर्मणे प्रभवति । उकञ् प्रत्ययः । ''कार्मुकं धनुषि स्यान्ना वेणौ कर्मक्षमेन्यवत्'' इति मेदिनी । ''अथ कार्मुकः । वंशे कार्मुकमिष्वासे कर्मठे'' इति हैमः ॥ गुणवृक्षे नौकाकर्षकदामाद्याधारे काष्ठे । अपिशब्दात् जलाधारे गर्ते च । **कूपकः** । पु० । कुत्सिता ईषद्वा आपो यत्र । स्वार्थे कः। अथवा कुवन्ति मण्डूकाः अस्मिन् । कु–शब्दे-पक्प्रत्ययः दीर्घश्च । कूपोऽप्यत्र । कूपको गुणवृक्षे स्यात्तैलपात्रे कुकुन्दरे'' इति मेदिनी । तथा हैमः। ''कूपको गुणवृक्षे स्यात्तैलपात्रे कुकुन्दरे । उदपाने चितायां च'' इति विश्वः ॥ विभीतके विभीतकवृक्षे। तैलादिशेषे घृततैलादिशेषे च। **कल्कः** ॥ पु० न० । कल–गतौ । कप्रत्ययः । तस्य नेत्वम् । आदिशब्दात् दम्भे विष्ठायां तुरुष्कनामगन्धद्रव्ये घृततैलादिपाके देये औषधिद्रव्ये च । तदुक्तम् ''द्रव्यमात्रं शिलापिष्टं शुष्कं वा जलमिश्रितम् । तदेव सूरिभिः पूर्वैः कल्कमित्य-

निर्मोके चोलके वारबाणोऽथ कुशिको मुनौ ।
शाले किष्कुः प्रकोष्ठेऽपि व्याख्याश्लोकेऽपि कारिका ॥ १४ ॥
खगे यमे छद्मविप्रे कङ्कः सूच्यां च कूर्चिका ।
क्रमुको भद्रमुस्तेऽपि कोकश्चक्रे वृकेऽपि च ॥ १५ ॥

भिधीयते'' इति । चात् शाठ्ये पापे।''कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके । विट्किट्ट-योश्च पापे च त्रिषु पापाशये पुनः।'' इति मेदिनी । ''त्रिषु,पापाशये कल्कोऽस्त्री विट्किट्टभद-न्तयोः'' इति विश्वः ॥ निर्मोके सर्पकञ्चुके । चोलके स्त्रीणां कञ्चुकाख्ये आप्रपदने वस्त्रे पुंसां वस्त्रभेदे वा । वारबाणे कवचे । **कञ्चुकः** । पु० ॥ कचि-बन्धने, दीप्त्यां वा । उकन्प्रत्ययः । ''कञ्चुको वारबाणे स्यान्निर्मोके कवचेपि च । अर्धापकगृहीताङ्गस्थितवस्त्रे च चोलके'' इति मेदिनी ॥ मुनौ जमदग्निपितरि विश्वामित्रस्य पितरि च । मुनिभेदे, शाले सर्जवृक्षे च। **कुशिकः** । पु० । कुशोऽस्त्यस्येति ठन् प्रत्ययः, इवार्थे इकन् प्रत्ययो वा । ''कुशिकः स्यान्मुनौ तैलशेषे सर्जाक्षवृक्षयोः'' इति विश्वः। ''कुशिको'' मुनिभेदे स्यात् फाले सर्जे विभी-तके'' इति हैमः ॥ प्रकोष्ठे कूर्परस्याधोभागस्थे मणिबन्धपर्यन्ते हस्तावयवे।**किष्कुः**।पु० स्त्री० । किष्क-वधे । उप्रत्ययः । अपिशब्दात् द्वादशाङ्गुलपरिमाणे हस्तपरिमाणे च । ''किष्कुर्वितस्तौ हस्ते च प्रकोष्ठे कुत्सितेऽपि च'' इति विश्वः । ''किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठे करेऽपि च'' इति कोषान्तरम् ॥ व्याख्याश्लोके स्वल्पाक्षरवति बहुलार्थबोधके श्लोके । **कारिका** । स्त्री० । कृ-करणे । ण्वुल्प्रत्ययः । अपिशब्दात् क्रियायां नटयोषिति शिल्पे च ''कारिका नटयोषिति। कृतौ विवरणश्लोके शिल्पयातनयोरपि'' इति मेदिनी । ''कारिका यातनानटी । कृतिर्विवरण-श्लोको नापितादिककर्म च'' इति हैमः ॥१३॥१४॥ खगे पक्षिभेदे। यमे कृतान्ते।छद्मविप्रे कपट-ब्राह्मणे । लोकप्रतारणार्थं ब्राह्मणताख्यापनाय ब्राह्मणलिङ्गधारिणि च । **कङ्कः** । पु० । ककि-गतौ । अच् प्रत्ययः । कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोः'' इति मेदिनी । तथा विश्वः ॥ सूच्यां सूचिकायाम् । सूचिरत्र तुन्नवायसाधनार्थं लोकव्यवहारिता लोहमयी सूचिका । चकारात् दुग्धविकारे तूलिकायां कुड्मले कुञ्चिकायां तृणगुच्छे च।**कूर्चिका** स्यात् स्त्री० ।कूर्च श्मश्रु अस्त्यस्येति ठन्प्रत्ययः । ''कूर्चिका सूचिकायां च तूलिकायां ज कुड्मले । कवाटकुट्टके क्षीरविकृतावपि योषिति''इति मेदिनी । ''कूर्चिका क्षीरविकृतौ कुञ्चिकाया च कुड्मले। आलेख्य-कूर्चिकासूच्योः'' इति हैमः ॥ भद्रमुस्ते नागरमुस्तके । अपिशब्दात् ब्रह्मदारुणि गुवाके पट्टिका-लोध्रे च **क्रमुकः** । पु० । क्रम-गतौ । उन् प्रत्ययः । ततः संज्ञायां कन् च । ''क्रमुकः पट्टि-कालोध्रे भद्रमुस्तकपूगयोः'' इति विश्वः । ''क्रमुको भद्रमुस्तके । गुवाके पट्टिकालोध्रे'' इति हैमः॥ चक्रे चक्रवाके । वृके कुक्कुराकारे हरिणघातकव्याघ्रभेदे । अपिशब्दात् ज्येष्ठ्यां खर्जूरिवृक्षे दर्दुरे विष्णौ च **कोकः** । पु० । कुक-आदाने । अच्प्रत्ययः । ''कोकश्चक्रवृकज्येष्ठीखर्जूरी-द्रुमदर्दुरे'' इति मेदिनी । ''कोकश्चक्रे वृके ज्येष्ठ्यां खर्जूरीद्रुमभेकयोः'' इति विश्वः ॥ १५ ॥

पुनर्नवाकारवेल्लपर्णासेषु कठिल्लकः।
कृकवाकुर्मयूरेऽपि वंशे दैत्ये च कीचकः॥ १६॥
नीचेऽपि क्षुल्लको मूर्धत्राणौ नाकौ च खोलकः।
चौरोन्दुरू च खनकौ गोलकौ मणिजारजौ॥ १७॥
खगे नग्ने च गोरङ्कुः सङ्ख्याभेदेऽपि गण्डकः।
शृङ्ग्यां च ग्रामयुद्धे च ग्राममद्गुरिका स्त्रियाम्॥ १८॥

पुनर्नवा वर्षाभूः सा च स्वनामख्यातः शाकभेदः। कारवेल्लः लताभेदः। पर्णासः तुलसी।तत्र च **कठिल्लकः**। पु०। कठ—गतौ। इल्लप्रत्ययः। स्वार्थे कन् च। "कठिल्लकस्तु पर्णासे वर्षाभूकारवेल्लयोः" इति मेदिनी। तथा विश्वः॥ मयूरे नीलग्रीवे। अपिशब्दात् कुक्कुटे सरटे च **कृकवाकुः**। पु०। कृकेण वक्ति। वच—परिभाषणे। ञुणप्रत्ययः कश्च। "कृकवाकुर्मयूरेऽपि सरटे चरणायुधे" इति मेदिनी॥ वंशे वेणौ। "कीचका नाम ते वंशा ये स्वनन्त्यनिलाहताः" इत्युक्ते वेणुभेदे। दैत्ये असुरे। चकारात् विराटराजश्याले केकयाधिपे नृपभेदे च **कीचकः**। पु०। कीत्यव्यक्तं चकति। चक—तृप्त्यादौ। अच्प्रत्ययः। "कीचको दैत्यभिद्वाताहतसस्वन-वंशयोः" इति मेदिनी। "कीचको ध्वनिमद्वंशे दैत्यभेदे द्रुमान्तरे" इति हैमः॥ १६॥

नीचे निम्ने। अपिशब्दात् अल्पे पामरे च। **क्षुल्लकः**। त्रि०। क्षुधा लक्यते। लक—आस्वादने। घञर्थे कप्रत्ययः। "क्षुल्लकस्त्रिषु नीचेऽल्पे" इति मेदिनी। क्वचित् "**खुल्लक**" इति। "खुल्लकः स्वल्पनीचयोः" इति हैमः॥ मूर्धत्राणे शिरस्त्राणे। नाकौ वल्मीके। चकारात् पाके पूगकोषे च। **खोलकः**। पु०। खोल—गतिवैकल्ये। वुन्प्रत्ययः। "खोलकः पाकवल्मीकपूगकोषशिरस्त्रके" इति विश्वः। तथा मेदिनी। "खोलकः पूगकोषे स्याच्छिरस्त्रे नाकुपाकयोः" इति हैमः॥ चौरः सन्धिचौरः। उन्दुरुः मूषिकः तयोः। क्वचित् "उन्दरुः"। चकारात् भूमिदारके च **खनकः**। पु०। खन—विदारणे वुन्प्रत्ययः। "खनको नोन्दरौ सन्धिचोरे त्रिष्ववदारके" इति मेदिनी। "खनकः सन्धितस्करे। मूषके भूमिवित्तज्ञे" इति हैमः॥ मणिः मणिकः। जारजः मृते भर्तरि जारजातः पुत्रः। तयोः। तथा गुडे पिण्डे गन्धरसे कलाये च। **गोलकः**। पु०। गुड—वेष्टने, रक्षणे च। घञ् प्रत्ययः। डलयोरैक्यम्। "गोलको विधवापुत्रे जारात्स्यान्मणिके गुडे" इति मेदिनी। तथा विश्वः। "गोलकस्तु जारतो विधवासुते। अलिञ्जरे गुडे पिण्डे" इति हैमः॥ १७॥ खगे पक्षिभेदे। नग्ने विवस्त्रे। क्वचित् "लग्ने" इति च पाठः। "विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च। एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः" इति। चकारात् प्रतिभुवि च **गोरङ्कुः**। पु०। गवि आकाशे रङ्कति। रकि—गतौ। उप्रत्ययः। "गोरङ्कुः स्यात्पुमान्पक्षिभेदे नग्नकवन्दिनोः" इति मेदिनी। तथा विश्वः। "गोरङ्कुर्नग्नवन्दिनोः। खगे च" इति हैमः॥ सङ्ख्याभेदे गणनाविशेषे। अपिशब्दात् स्वनामख्याते पशौ अन्तराये अवच्छेदे च **गण्डकः**।

गान्धिको लेखकेऽपि स्याद्गुह्यकश्छेकनिघ्नयोः ।
वेश्यायूथ्योश्च गणिका चषकं सरकेऽपि च ॥ १९ ॥
ग्रन्थिकौ पार्थदैवज्ञौ ग्रन्थिपर्णे च न द्वयोः ।
कण्ठालङ्कारखद्योतविद्युत्सु चिलिमीलिका ॥ २० ॥
चारको भोजके बन्धे नाटकाङ्गेऽपि चूलिका ।
चित्रकं चित्रके क्लीबं व्याघ्रैरण्डौ च चित्रकौ ॥ २१ ॥

पु० । गडि—सन्निचये । अच् प्रत्ययः । स्वार्थे कन् च । "गण्डकः पुंसि खड्गे स्यात्सङ्ख्याविद्याप्रभेदयोः । अवच्छेदेऽन्तराये च" इति मेदिनी । "गण्डको विघ्ने विद्यायां सङ्ख्यावच्छेदखड्गिषु । गण्डकी तु सरिद्भेदे" इति हैमः ॥ शृङ्ग्यां शृङ्गीमत्स्ये । ग्रामयुद्धे ग्रामजातकोलाहले च । **ग्राममद्गुरिका** स्यात् । स्त्री० । ग्रामे मद्गुर इवास्य । "ग्राममद्गुरिका शृङ्ग्यां ग्रामयुद्धे च कीर्त्यते" इति विश्वः । क्वचित् "**ग्राममङ्गुरिका**" इति पाठः । "ग्राममङ्गुरिका ग्रामयुद्धे शृङ्गिझषे स्त्रियाम्" इति मेदिनी ॥ १८ ॥ लेखके लिपिकारे । अपिशब्दात् गन्धवणिजि च **गान्धिकः** । पु० । गन्धेन जीवति । ठक्प्रत्ययः । "गान्धिको लेखकेऽपि स्यात्सुगन्धिव्यवहारिणि" इति मेदिनी । तथा विश्वः । "गान्धिको लेखके गन्धवणिजे" इति हैमः ॥ छेकः दक्षः । निघ्नः अधीनः, गुणितो वा । तयोः **गुह्यकः** स्यात् । पु० । गुह्यं कं सुखं यस्य । गुह्यं कुत्सितं कायति । कै—शब्दे । कप्रत्ययो वा । अच् च । "गुह्यको निघ्नके छेके" इति मेदिनी ॥ वेश्या प्रसिद्धा । यूथी यूथिका पुष्पप्रधानवृक्षजातिः । तयोः **गणिका** । स्त्री० । गणः समूहोऽस्त्यस्याः । भर्तृत्वेन ठन्प्रत्ययः । "गणिका यूथिवेश्येभीतर्कारीषु ना तु दैवज्ञे" इति मेदिनी । "गणिकेभ्यां यूथिकायां तर्कार्यां पण्ययोषिति" इति हैमः ॥ सरके मद्यपानपात्रे । अपिशब्दात् मधुनि मद्यभेदे च **चषकम्** । न० पु० । चष—भक्षे । करणे क्वुन् प्रत्ययः । कर्मणि क्वुन् प्रत्ययो वा । "चषकोऽस्त्री पानपात्रे मधुमद्यप्रभेदयोः" इति मेदिनी । "चषकं तु सुरापात्रे मधुमद्यप्रभेदयोः" इति विश्वः ॥ १९ ॥ पार्थः । पृथापुत्रः युधिष्ठिरादिः । दैवज्ञः ज्योतिर्विद् । तयोः । ग्रन्थिपर्णे चोरनामगन्धद्रव्ये । स तु न द्वयोः स्त्रीपुंसोर्न स्यात् । चकारात् पिप्पलीमूले गुग्गुले करीरे च **ग्रन्थिकः** । पु० न० । पार्थ इत्यत्र क्वचित् "पाण्ड" इति पाठः । ग्रन्थोऽस्त्यस्य । ठन्प्रत्ययः । "ग्रन्थिकं पिप्पलीमूले गुग्गुलग्रन्थिपर्णयोः । करीरे पुंसि दैवज्ञे सहदेवाख्यपाण्डवे" इति मेदिनी । "ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णकभेषजे । ग्रन्थिको गुग्गुलौ दैवज्ञे माद्रेयकरीरयोः" इति हैमः ॥ कण्ठलङ्कारः कण्ठभूषणम् । खद्योतः कीटभेदः । विद्युत् सौदामिनी । तत्र च **चिलिमीलिका** स्यात् । स्त्री० । चिलिमीलमस्त्यस्याः । क्वचित् "**चिलमीलिका**" इति च पाठः । "चिलमीलिका तु कण्ठीभेदे खद्योतविद्युतोः" इति मेदिनी । तथा विश्वः ॥ २० ॥ भोजके भोजनकारके । बन्धे च **चारकः** । पु० । चर—गमने । ण्वुल्प्रत्ययः । "चारकः पालकेऽश्वादेः

गृहासक्ते पक्षिमृगे छेको नागरिके त्रिषु।
कम्बौ जलकरङ्कः स्यान्नारिकेलफलेऽपि च॥ २२॥
जैवातृकः कृशे चन्द्रे दीर्घायुषि च स त्रिषु।
जालिका वस्त्रभित्कूटकृत्कैवर्ते च जालिकः॥ २३॥
जङ्घायामद्रिभित्तौ च खनित्रे ग्रावदारणे।
कपित्थे चास्त्रियां टङ्कष्टुण्टुकावल्पशोणकौ॥ २४॥

स्यात्सञ्चारकबन्धयोः" इति मेदिनी। "चारकोऽश्वादिपाले स्याद्बन्धे सञ्चारकेऽपि च" इति हैमः॥ नाटकाङ्के नाटकाङ्गभेदे। अपिशब्दात् हस्तिकर्णमूले च **चूलिका**। स्त्री०। चुल–समुच्चये। ण्वुल्प्रत्ययः। पृषोदरादित्वात् दीर्घः। "चूलिका नाटकस्याङ्गे कर्णमूले च दन्तिनाम्" इति विश्वः। "चूलिका नाटकाङ्गके।करिणः.कर्णमूले च" इति हैमः॥ चित्रके चित्रकवृक्षे। व्याघ्रः द्वीपिविशेषः। एरण्डः तयोः। चकारात् लेख्ये अद्भुते तिलके आकाशे कुष्ठभेदे नानावर्णे च **चित्रकम्**। न०पु०। चित् त्रायते। त्रै–पालने। कप्रत्ययः। वा तलोपः। चित्र–चित्रीकरणे। अच्प्रत्ययो वा। "चित्रकं तिलके ना तु व्याघ्रभिचञ्चुपाठिषु" इति मेदिनी। "चित्रकस्तु चित्रकारे द्रुमौषधिविशेषयोः" इति हैमः॥ २१॥ गृहासक्ते गृहेषु दारेषु वा गेहे आसङ्गयुक्ते। पक्षिमृगे पक्षिणि मृगे च। नागरिके नागरे च। त्रि०। **छेकः**। पु०। छो–छेदने। इकन्प्रत्ययः। "छेको गृहाश्रितमृगे पक्षिणोर्नागरे त्रिषु" इति मेदिनी। छेको विदग्धे विश्वस्ते मृगनीडकयोरपि" इति हैमः। कम्बौ शङ्खे। नारिकेलफले तन्नामकफलविशेषे। अपिशब्दात् मेघे जललतायां च **जलकरङ्कः**। पु०। जलस्य करङ्क इवाधारः, जले करङ्क इव वा। "अथो जलकरङ्कः स्यान्नालिकेरफलेऽम्बुजे। शङ्खे जललतायां च वारिवाहे च कीर्तितः" इति मेदिनी॥ २२॥ कृशे अल्पे, सूक्ष्मे च। चन्द्रे दीर्घायुषि दीर्घायुष्के। त्रि०। चकारात् औषधे कर्पूरे च **जैवातृकः**। पु०। जीव–प्राणधारणे। आतृच्प्रत्ययः। ततः कण्। वृद्धिश्च। "जैवातृकः पुमान् सोमे दीर्घायुः कृशयोस्त्रिषु" इति मेदिनी॥ वस्त्रभित् वस्त्रभेदः। कूटकृत् दम्भभेदः॥ तयोः **जालिका**। स्त्री०। "आनाये दम्भभेदे च वस्त्रभेदे च जालिका" इति विश्वः। कैवर्ते धीवरे। कैवर्ताविति क्वचित् पाठः। चकारात् वागुरिके जालजीविनि मर्कटके च **जालिकः**। पु०। जालेन चरति। जालात् ठक्प्रत्ययः। "जालिको वाग्ययद्रामजालिजालोपजीविनोः" इति मेदिनी॥ २३॥ जङ्घायाम् अद्रिभित्तौ पर्वतभित्तौ खनित्रे अस्त्रभेदे। ग्रावदारणे पाषाणभेदने, अस्त्रे च। कपित्थे नीलकपित्थे। चकारात् कोपे कोषे खड्गे चतुर्माषकरूपे परिमाणे दर्पे च **टङ्कः**। पु० न०। टकि–गतौ। घञ्प्रत्ययः, अच् वा। "टङ्को नीलकपित्थे च खनित्रे टङ्कणेऽस्त्रियाम्। जङ्घायां स्त्री पुमान् कोपे कोपासिग्रावदारणे" इति मेदिनी॥ अल्पः क्षुद्रः। शोणकः शोणकवृक्षः। तयोः **टुण्टुकः** स्यात्। पु०। टुटु–गतौ। उप्रत्ययः। स्वार्थे कन् च। "टुण्टुकः शोणकाल्पयोः" इति मेदिनी॥ २४॥

तिलकं चित्रके क्लोम्नि ना तरौ तिलकालके ।
गृहदारौ तण्डकोऽस्त्री समासप्रायवाचि च ॥ २५ ॥
तुरुष्कः सिह्लके देशे प्राण्यङ्गे त्रितये त्रिकम् ।
कूपाङ्गे स्त्री तिक्तशाकः खदिरे वरुणद्रुमे ॥ २६ ॥
दैत्ये ना कर्णधारे च तारकं दृशि भे न ना ।
द्विकौ काकचक्रवाकौ पृश्न्यां कुन्दे दलाढकः ॥ २७ ॥

चित्रके नानावर्णे । क्लोम्नि बाह्वोर्मध्ये स्थानभेदे । तदुक्तम् । "अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति । जलवाहिशिरामूलं तृष्णास्थानं मतं बुधैः" इति । तरौ वृक्षे । तिलकालके च । पु० । तथा नासादौ धार्ये चन्दनादिविशेषके । पु० न० । प्रधाने । त्रि० । "रघुकुलतिलकः" इति नाटकम् । **तिलकम्** । न० । तिल-स्नेहे । क्वुन्प्रत्ययः । इवार्थे स्वल्पार्थे वा कन् । "तिलको द्रुमरोगाश्वभेदेषु तिलकालके। क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके" इति मेदिनी। "तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके । तिलकं रुचके क्लोम्नि" इति हैमः॥ गृहदारौ गृहदारुणि । क्वचित् "गृहकारौ" । समासप्रायवाचि समासबहुलवाक्ये । चकारात् खञ्जने फेने तरुस्कन्धे मायाबहुले उपघातके जने परिष्कारे च **तण्डकः** । पु० न० । तडि-आघाते । ण्वुल्प्रत्ययः । "तण्डकः खञ्जने फेने समासप्रायवाचि च । गृहदारुतरुस्कन्धमायाबहुलकेष्वपि" इति मेदिनी। "तण्डकस्तु समस्तपदजातके । तरुस्कन्धे वेश्मदारुमायाबहुलयोरपि । फेनखञ्जनयोश्च" इति हैमः ॥२५॥ सिह्लके वृकधूपाख्ये गन्धद्रव्ये। देशे देशविशेषे च । **तुरुष्कः** । पु० । तुर-वेगे । उसिक्प्रत्ययः । स्वार्थे कन् च । इसुसोरिति षत्वम् । "तुरुष्कः सिह्लके म्लेच्छजातौ देशान्तरेपि च" इति मेदिनी। "तुरुष्कस्तु देशे श्रीवाससिह्लयोः" इति हैमः ॥ प्राण्यङ्गे पृष्ठवंशाधोभागे, कटीभागे च। त्रितये त्रित्वसङ्ख्यायाम्। कूपाङ्गे कूपस्य नेमौ च । स्त्री० । तथा त्रिफलायाम् त्रिकटुनि-वातादिषु मिलितेषु गोक्षुरवृक्षे च । **त्रिकम्** । न० । त्रयाणां समूहः । कन्प्रत्ययः । त्रिषु कायति । कै-शब्दे । कप्रत्ययश्च । "त्रिकं पृष्ठाधरे त्रये" इति मेदिनी । त्रिका कूपस्य नेमौ स्यात्त्रिके पृष्ठाधरे त्रये इति हैमः ॥ खदिरे वरुणद्रुमे वरुणवृक्षे च। **तिक्तशाकः** । पु०। तिक्तः शाकोऽस्य । "तिक्तशाकस्तु खदिरे वरुणे पत्रसुन्दरे" इति मेदिनी। तथा विश्वः। "तिक्तशाकस्तु पत्रसुन्दरे। वरुणे खदिरे" इति हैमः ॥ २६॥ दैत्ये तन्नामके असुरे। कर्णधारे नाविके च । पु० । दृशि नेत्रे भे नक्षत्रे च । न० स्त्री०। **तारकम्** । न० । तारयति । तॄ-तरणे । णिच् । ण्वुल्प्रत्ययः । "तारको दैत्यभित्कर्णधारयोर्न द्वयोर्दृशि । कनीनिकायामृक्षे च न पुमान् त्रातरि त्रिषु" इति मेदिनी ॥ काकः प्रसिद्धः । चक्रवाकः स्वनामख्यातः खगः । तयोश्च । द्वित्वसङ्ख्यायाम् तद्वति च । न०। "एकं द्विकं त्रिकं च" इति काशिका । **द्विकः** । पु० । द्वौ कौ ककारौ यत्र । "द्विकः काके च कोके च" इति [illegible] । "द्विकः स्यात्काककोकयोः" इति हैमः ॥ पृश्न्यां खर्वदुर्बलास्थिके । कुन्दे पुष्पवृक्ष-

नरको निरये दैत्ये नौवाहे स्यान्नियामकः।
सभ्ये गुरौ च नवफलिका नवरजस्यपि ॥ २८ ॥
नालीकौ पद्मनाराचौ वृन्देऽपि पेटकोऽस्त्रियाम्।
सौभाग्येऽपि पताका स्यात्पङ्कोऽस्त्री कर्दमांहसोः ॥ २९ ॥
पञ्चालिका वस्त्रकृतपुत्रिकागीतभेदयोः।
मणिदोषे शिलाभेदे पुलको लोमहर्षणे ॥ ३० ॥

भेदे च। तथा स्वयञ्जाततिलवृक्षे नागकेशरे शिरीषे करिकर्णे फेने खातके गैरिके च **दलाढकः**।पु०। दलेनाढक इव। "दलाढकः स्वयञ्जाततिले पृश्न्यां च गैरिके। फेनखातकयोर्नागकेशरे च महत्तरे"इति मेदिनी। दलाढकस्तु कुन्दे स्यात्कारिकर्णशिरीषयोः। स्वयञ्जाततिले फेने खातके नागकेशरे। वात्यायां पृश्निकायां च गैरिके च महत्तरे" इति विश्वः।हैमेऽप्येवम् ॥२७॥ निरये पापानां दुःखभोगस्थानभेदे, सञ्जीवप्रभृतौ च। तेषां भेदा बौद्धसमये बहुधा प्रपञ्चिताः। दैत्ये असुरे। **नरकः**। पु०। नॄ—नये। वुन्प्रत्ययः। "नरकः पुंसि निरये देवारातिप्रभेदयोः" इति मेदिनी। तथा विश्वहैमौ ॥ नौवाहे पोतवाहे, नियन्तरि च। त्रि०। **नियामकः**। पु०। निपूर्वयम—परिवेषणे। ण्वुल्प्रत्ययः। "नियामकः कर्णधारे पोतवाहे नियन्तरि" इति मेदिनी। तथा विश्वहैमौ ॥ सभ्ये सामाजिके, विश्रब्धे च। गुरौ नवरजसि नवजातरजोङ्गनायाम्। अपिशब्दात् नूतने रक्तपुनर्नवायां च **नवफलिका**। स्त्री०। नवफलमस्त्यस्य। ठन् प्रत्ययः। "नवफलिका स्त्रीनव्ये नवजातरजोङ्गनायां च" इति मेदिनी। तथा विश्वः ॥ २८ ॥ पद्मं पद्मषण्डम्। नाराचः शरभेदः। तयोः। तथा शरीरे च **नालीकः**। पु०। न०। नाल्या कायति। कै—शब्दे, क—शब्दे वा। अच् प्रत्ययः। "नालीकः शरशल्यास्त्रेऽप्यब्जषण्डे नपुंसकम्" इति मेदिनी। "नालीकं शरखण्डेऽब्जे नालीकः शरशल्ययोः" इति विश्वः। "नालीकोऽङ्गे शरे शल्ये नालीकं पद्मवर्धने" इति हैमः ॥ वृन्दे समूहे, कलहे वा। अपिशब्दात् पुस्तकादीनां स्थापनार्थं वेत्रादिनिर्मिते पदार्थे समूहे च **पेटकः**। पु० न०। पिट—सङ्घाते। ण्वुल्प्रत्ययः।"पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके" इति विश्वमेदिन्यौ। "पेटकस्त्रिषु वृन्देपि" इति कोषान्तरम् ॥ सौभाग्ये प्रियत्वे। अपिशब्दात् वंशोपरि देये त्रिकोणाकारे वस्त्रखण्डे। नाटकाङ्गे अङ्गे केतौ छन्दोग्रन्थोक्तलघुगुरुव्यक्तिज्ञानार्थं चक्रभेदे च **पताका** स्यात्। स्त्री०। पत्यते बोध्यते योधादिभेदोऽनया। पत—गतौ। आकन् प्रत्ययः। "पताका वैजयन्त्यां च सौभाग्यनाटकाङ्कयोः" इति मेदिनी। "पताकाङ्के ध्वजे केतौ सौभाग्ये नाटकांशके" इति हैमः॥ कर्दमः जम्बालः। अंहस् पापम्। तयोश्च **पङ्कः**। पु० न०। पचि—विस्तारे। घञ् प्रत्ययः।कुत्वम्। "पङ्कः कर्दमपापयोः" इति विश्वः। "पङ्कोऽघे कर्दमे" इति हैमः ॥२९॥ वस्त्रकृतपुत्रिका वस्त्रेण कृता पुत्तलिका। गीतभेदः गायनविशेषः। तयोश्च **पञ्चालिका**। स्त्री०। पञ्चं प्रपञ्चमलति पर्याप्नोति। अल—निवा-

पर्यस्त्यामपि पल्यङ्कः प्रियको मृगनीपयोः ।
पुष्पकं कङ्कणेऽपि स्यात्पराको व्रतखड्गयोः ॥ ३१ ॥
चामरे ग्रन्थभेदे च विस्तरेऽपि प्रकीर्णकम् ।
सितच्छत्राब्जयोः पुण्डरीकं पुंसि तु दिग्गजे ॥ ३२ ॥
व्याघ्रे च कोषकारे च पाकौ पचनशावकौ ।
पुष्यलको गन्धमृगे कीलके क्षपणेऽपि च ॥ ३३ ॥

रणे, भूषणे वा । अण्प्रत्ययः, कश्च । "पञ्चालिका भवेद्वस्त्रपुत्रिकागीतिभेदयोः" इति विश्वः॥ मणिदोषे मणिजातदोषे । शिलाभेदे पर्वतभेदे । लोमहर्षणे लोमोद्गमे च। तथा कृमिभेदे हरिताले गजान्नपिण्डे गन्धर्वे च **पुलकः** । पु० । पुल—महत्त्वे । कप्रत्ययः। ततः स्वार्थे कन् वा-। "पुलकः कृमिभेदे प्रस्तरभेदे च मणिदोषे । रोमाञ्चे हरिताले गजान्नपिण्डे च गन्धर्वे" इति मेदिनी ॥ ३० ॥ पर्यस्त्यां शय्यायाम् । अपिशब्दात् मञ्चे पर्यङ्के वृष्यां च **पल्यङ्कः** । पु०। परिगतोऽङ्कम् । रस्य लः । "पल्यङ्को मञ्चपर्यङ्कवृषीपर्यास्तिकासु च" इति मेदिनी ॥ मृगः हरिणः । नीपः कदम्बः। तयोश्च । तथा भ्रमरे कुङ्कुमे असनवृक्षे च **प्रियकः** । पु०। प्रियात् संज्ञायां कन्प्रत्ययः। "प्रियकः प्रीतशालके। नीपे चित्रमृगे चालौ प्रियङ्गौ कुसुमेऽपि च" इति मेदिनी । "प्रियकस्तु चञ्चरीके नीपे कश्मीरजन्मनि । प्रियङ्गौ चित्रहरिणे पीतचालतरावपि" इति हैमः ॥ कङ्कणे करभूषणे, भूषणमात्रे वा । अपिशब्दात् कुवेरस्य विमाने नेत्ररोगभेदे रसाञ्जने लौहकांस्ये मृदङ्गारयोः शकट्यां कासीसे च **पुष्पकं** स्यात् । न० । पुष्प—विघसने । अच्प्रत्ययः । स्वार्थे कन् च । पुष्पकं रीतिकानेत्ररोगयो रत्नकङ्कणे । कुवेरस्य विमाने च कासीसे च रसाञ्जने। लौहकांस्ये मृदङ्गारशकट्यां च नपुंसकम्।" इति मेदिनी । तथा हैमः ॥ व्रतं पुण्यसाधनम् उपवासादिनियमभेदः, द्वादशाहोपवाससाध्यः, प्रायश्चित्तरूपो व्रतभेदो वा। "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । व्रतं पराको नाम"इति। खड्गः असिः । तयोश्च **पराकः** स्यात् । पु० । "पराकस्तु व्रते खड्गे" इति मेदिनी ॥३१॥ चामरे चमरपुच्छकृतव्यजने । ग्रन्थ भेदे विस्तरे। अपिशब्दात् विक्षिप्ते भिन्नजातीयैर्मिश्रिते अश्वे च **प्रकीर्णकम्**। न०। प्रपूर्वकृ—क्षेपणे । भावे कर्मणि वा क्तप्रत्ययः । स्वार्थे कन् । "प्रकीर्णकं ग्रन्थभेदे चामरे विस्तरे हये" इति विश्वः । प्रकीर्णकं चामरे स्याद्विस्तारे ना तुरङ्गमे" इति मेदिनी । सितच्छत्रं श्वेतच्छत्रम् । अब्जं पद्मम्। तयोः । दिग्गजे अग्निकोणस्थे दिग्भागे॥३२॥ व्याघ्रे कोषकारे शब्दादिसमूहकारके च । पु० । **पुण्डरीकम्** न०। पुडि—उत्सर्गे । ईकन् प्रत्ययः । "पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे । पुंसि व्याघ्रेऽग्निदिग्भागे कोषकारान्तरेऽपि च" इति मेदिनी । तथा अजयः ॥ पचनम् अन्नपचनम् । शावकः शिशुः । तयोश्च । तथा क्लेदने क्लेदनेन निष्पत्तौ परिणामे स्थाल्यादौ पेचके राष्ट्रादिभङ्गे भये च **पाकः** । पु० । पच—पाके । भावे घञ्प्रत्ययः । पा—पाने। कप्रत्ययो वा । "पाकः परिणतौ शिशौ । केशस्य रजसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च इति

कपर्दे रज्जौ राजीवे बीजकोशे वराटकः ।
वृन्दारकौ सुरश्रेष्ठौ गिरिमेघौ बलाहकौ ॥ ३४ ॥
पिञ्जे ना सिकताकर्णभूषाकन्यासु बालिका ।
शिवमल्ल्यां बकः कह्वे राज्ञि भट्टारकः सुरे ॥ ३५ ॥
भूमिका रचनायां च मूर्त्यन्तरपरिग्रहे ।
मधुको वल्लिभेदे च बर्हिचन्द्रे च मेचकः ॥ ३६ ॥

मेदिनी । "पाकः पचने शिशुदैत्ययोः" इति हैमः ॥ गन्धमृगे गन्धप्रधाने मृगविशेषे । "सीम्नि पुष्यलको हतः" इति । कीलके स्तम्भे, गवां दोहनार्थं बन्धनस्तम्भे, गवां कण्डूयनार्थं स्तम्भे वा । क्षपणे निर्ग्रन्थे च । अपिशब्दात् संन्यासिनि च **पुष्यलकः** । पु० । पुष—पोषणे । इन् प्रत्ययः । पुषिः पुष्टिस्तस्यै अलति पर्याप्नोति । अल—गतौ । ण्वुल्प्रत्ययः । "अथ पुष्यलको गन्धमृगे क्षपणकीलयोः" इति मेदिनी। क्वचित्तु "**पुष्कलक**" इति पाठः । "स्मृतः पुष्कलको गन्धमृगे क्षपणकीलयोः" इति विश्वः । तथा हैमश्च ॥ ३३ ॥ कपर्दः कपर्दकः । रज्जुः रश्मिः । राजीवं पद्मम् । बीजकोशः पद्मबीजाधारः । तत्र च **वराटकः** । पुं० । वरमल्पमटति । अट—गतौ । ण्वुल्प्रत्ययः । "वराटकः पद्मबीजकोशे रज्जौ कपर्दके" इति मेदिनी । तथा हैमः । "वराटकः स्थूलरज्जौ पद्मबीजे कपर्दके" इति विश्वः । "वराटकानां दशकद्वयं यत्" इति लीलावती ॥ सुरः देवः । श्रेष्ठः अतिशयेन प्रशस्तः मुख्यो वा । तयोः । तथा मनोहरे च । त्रि० । **वृन्दारकः** । पु० । वृन्दशब्दात् शृगवृन्दाभ्यामारकन्निति आरकन् प्रत्ययः। "वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु" इति मेदिनी । गिरिः पर्वतः । मेघः जलधरः । तयोः । बकपक्षिणि च । स्त्रियां टाप् । **बलाहकः** । पु० । वारि वहति । पृषोदरादित्वात् साधुः । "बलाहको गिरौ मेघे दैत्यनागविशेषयोः" इति मेदिनी ॥ ३४ ॥ पिञ्जे बले । पु० । सिकता वालुका । कर्णभूषा कर्णालङ्कारविशेषः । कन्या दशवर्षानारी । तत्र च **बालिका** । स्त्री० । बल—समृद्धौ । अण्प्रत्ययः । स्वार्थे कन् च । "अङ्गुरीकह्वीबेरवलये पुंसि बालिका । बालायां वालुकापत्रकाहले कर्णभूषणे" इति मेदिनी । "बालिका कर्णभूषणे । बालिका वालुका बाला पिञ्जोलायां" इति हैमः ॥ शिवमल्ल्यां बकवृक्षे । कह्वे च । तथा भीमसेनहतराक्षसभेदे श्रीकृष्णहतदैत्यभेदे कुबेरे स्वनामाख्यातविहगे च **बकः** । पु० । बकि गमने । अच्प्रत्ययः । पृषोदरादित्वात् नलोपः। "बकस्तु बकपुष्पे स्यात् कह्वे शीदे च रक्षसि" इति मेदिनी ॥ राज्ञि नृपे । सुरे देवे । अथवा सूरे सूर्ये । **भट्टारकः** । पु० । भट—भाषणे । क्विप् । तॄ तरणे । णिच्ण्वुल्प्रत्ययौ । "भट्टारको नृपे नाट्यवाचि देवे तपोधने" इति मेदिनी ॥ ॥ ३५ ॥ रचनायां मूर्त्यन्तरपरिग्रहे । "अन्यरूपैर्यदन्यस्य प्रवेशस्तत्र भूमिका इत्युक्ते" नाटये अभिनेयपात्रादिवेशान्तरग्रहणे। चकारात् ग्रन्थे वक्तव्यकथोद्घाते। कक्षायां च। **भूमिका**। स्त्री०।

हारभेदे माणवको बाले कुपुरुषे वटौ ।
मयूरकोऽपामार्गे च हंसभेदेपि मल्लिकः ॥ ३७ ॥
युतकं वस्त्रभेदे च यौतके संशयेऽपि च ।
यमकं संयमे शब्दालङ्कारे यमजे त्रिषु ॥ ३८ ॥
याज्ञिको याजके दर्भे बिले रोकं रुचौ पुमान् ।
राका दृष्टरजःकन्या कच्छपूर्णेन्दुपूर्णिमाः ॥ ३९ ॥

भूमिरिव कायति। कै–शब्दे। क प्रत्ययः।"भूमिका रचनायां स्याद्देशान्तरपरिग्रहे" इति मेदिनी। "भूमिका तु रचनायां रूपान्तरपरिग्रहे" इति हैमः ॥ वल्लिभेदे लताविशेषे। चकारात् यष्टिमधौ मधुपर्णीवृक्षे च। **मधुका**। स्त्री०। मध्विव।मधुका इवार्थे कन्प्रत्ययः।"मधुका मधुपर्ण्यां स्त्री" इति मेदिनी।"मधुर्यष्टिश्च मधुको वल्लिश्चीवदपक्षिणोः" इति हैमः।बर्हिचन्द्रे मयूरचन्द्रके। चकारात् अन्धकारे स्रोतोऽञ्जने मेघे श्यामवर्णे च **मेचकः** । पु० । मच–कल्कने । वुन्प्रत्ययः । पृषोदरादित्वात् साधुः । "मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान् । यदुक्ते वाच्यवत् क्लीबं स्रोतोऽञ्जनान्धकारयोः" इति मेदिनी । "मेचकः श्यामले कृष्णे तिमिरे बर्हिचन्द्रिके" इति हैमः ॥ ३६ ॥ हारभेदे मुक्तावलिविशेषे। बाले कुपुरुषे कुत्सितपुरुषे नीचजने वा । वटौ ब्रह्मचारिणि च। **माणवकः** । पु०। मनोरपत्यम्। अण्प्रत्ययः । अल्पार्थे णत्वम् ।पुनः स्वार्थे कन् च । "**माणवको** हारभेदे बाले कुपुरुषे वटौ" इति मेदिनी ॥ अपामार्गे स्वनाम्ना ख्याते वृक्षे । चकारात् मयूरशिखावृक्षे । पु० । तुत्थाञ्जने च । न० । **मयूरकः** । पु० । मी–गमने, बोधने वा । ऊरन्प्रत्ययः । स्वार्थे कन् च । "मयूरकोऽप्यपामार्गे क्लीबं तुत्थाञ्जने पुनः" इति मेदिनी । मयूरकोऽप्यपामार्गे तुत्थके तु मयूरकम् इति विश्वः । तुत्थके इत्यत्र क्वचित् तुच्छके इति पाठः ॥ हंसभेदे धृतराष्ट्र इति ख्याते हंसविशेषे । धृतराष्ट्रहंसस्तु कृष्णवर्णदेहः आलोहितचञ्चुचरणः तत्र । पु० । अपिशब्दात् मल्लिकायां च । स्त्री० । **मल्लिकः** । पु० । मल्ल–धृतौ । इन्प्रत्ययः। संज्ञायां कन् च। "मल्लिको हंसभिद्यपि । मल्लिका तृणशून्येऽपि मीन-मृत्पात्रभेदयोः" इति मेदिनी ॥ ३७ ॥ वस्त्रभेदे स्त्रीवसनाञ्चले । यौतके विवाहकाले लब्धे धने । संशये सन्देहे । अपिशब्दात् युगे चरणाग्रे मैत्रीकरणे संश्रवे शूर्पाग्रे च । न० । संयुक्ते। त्रि० । **युतकम्** । यु–मिश्रणे । क्तप्रत्ययः । युत–भासौ । कप्रत्ययो वा । "युतकं संशये युगे । नारिवस्त्राञ्चले युक्ते चरणाग्रे च यौतके" इति मेदिनी। "युतकं तु यौतके युग्मयुक्तयोः। संशये चरणाग्रे स्त्री वस्त्रभेदे पटाञ्चले" इति हैमः ॥ संयमे व्रताङ्गतया पूर्वदिनकर्तव्ये नियम-भेदे, इन्द्रियनिग्रहे वा । शब्दालङ्कारे स्वनामाख्याते अलङ्कारविशेषे । तल्लक्षणमुक्तम्–"स-त्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः । क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते" इति । यमजे एकदा एकत्र गर्भजातयोश्च । त्रि० । **यमकम्** । न० । यम–उपरतौ । ण्वुल् प्रत्ययः । "यमकं यमजे शब्दालङ्कारे पुंसि संयमे" इति मेदिनी । "यमको यमजे व्रते । यमकं वागलङ्कारे" इति हैमः ॥ ३८ ॥ याजके यागकर्तरि । दर्भे कुशे । तथा चात् खदिरे पलाशे ऋत्विगादौ च

नीलवस्त्रेऽक्षितारायां लोचको निर्मितौ त्रिषु ।
नगरीशाखयोर्लङ्का करिण्यामपि बन्धकी ॥ ४० ॥
गुरावनाथे गरुडे जिने विघ्ने विनायकः ।
वृषाङ्कौ शिवभल्लातौ वञ्चकौ धूर्तफेरवौ ॥ ४१ ॥

याज्ञिकः । पु० । यज्ञाय हितः, यज्ञः प्रयोजनमस्य वा । ठक्प्रत्ययः । "याज्ञिको याजके कुशे" इति विश्वः। "याज्ञिकः याजके च कुशे च" इति मेदिनी ॥ बिले छिद्रे, गर्ते वा।न०। रुचौ दीप्तौ । पु० । तथा नौकायाम् क्रयभेदे च **रोकम्** न० । रु—गतौ । कन्प्रत्ययः । रुच—दीप्तौ । घञ् प्रत्ययः । निपातनात् कुत्वं च । "तन्मे रोकं च शोकं च" इति स्मृतिः । "रोको दीप्तौ बिले रोकं नौकाक्रयणभेदयोः" इति विश्वः । **रोकस्तु** क्रयभि-दीप्त्यो रोकं ना विमले बिले" इति मेदिनी । "रोकं कृपणभेदे ना विमले च **बिले** चरे । रोकौंशौ" इति हैमः ॥ दृष्टरजःकन्या नवजातरजस्का कन्या । कच्छः जलप्रान्तः । पूर्णेन्दुः प्रतिपद्युक्ता पौर्णमासी । पूर्णिमा पूर्णचन्द्रयुक्ता तिथिः । तत्र च **राका** । स्त्री० । रा—दाने, ग्रहणे वा । कप्रत्ययः । "राका नद्यन्तरे कच्छे नवजातरजःस्त्रियाम् । सम्पूर्णेन्दु-तिथौ" इति मेदिनी । "राका कच्छे दृष्टरजःकन्यायां सरिदन्तरे । पूर्णेन्दुपूर्णिमायां च" इति हैमः ॥ ३९ ॥ नीलवस्त्रे नील्या रञ्जिते वस्त्रे । अक्षितारायां नेत्रमध्यस्थकनीनिकायाम् । निर्मितौ रचनायाम् । तथा मांसपिण्डे कज्जले स्त्रीणां ललाटाभरणे कर्णपूरे कदल्यां मूर्वायां सर्पकञ्चुके च **लोचकः** । त्रि० । लोच—दर्शने । ण्वुल्प्रत्ययः । "लोचको मांसपिण्डेऽक्षि-तारकायां च कज्जले । ललाटाभरणे स्त्रीणां कदलीनीलवस्त्रयोः । निर्बुद्धौ कर्णपूरे च मौर्व्यां भ्रूश्लथचर्मणि" इति मेदिनी । "लोचको नीलवाससि कज्जले मांसपिण्डेक्षितारे स्त्रीभालभूषणे । निर्बुद्धौ कर्णिकामोचाज्यासु प्रश्लथचर्मणि" इति हैमः ॥ नगरी स्वनामाख्याता पुरी । शाखा लता । तयोः । तथा शाकिन्याम् । कुलटायां च । **लङ्का** । स्त्री० । लक—आस्वादे । अच् प्रत्ययः । मुम् च । "लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च" इति मेदिनी ॥ करिण्यां हस्तिन्याम् । अपिशब्दात् पुंश्चल्यामसत्यां स्त्रियां च । बन्धकी।स्त्री०बन्ध—बन्धने।ण्वुल्प्रत्ययः । ङीप्। "पुंश्चल्यां स्यातु **बन्धकी**" इति मेदिनी ॥ ४० ॥ गुरौ अनाथे अशरणे । गरुडे जिने बुद्धे । विघ्ने तथा चात् गणेशे विनययुक्तं च **विनायकः** । पु० । विपूर्वनी—प्रापणे । ण्वुल् प्रत्ययः । "विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ"इति मेदिनी॥ शिवः शङ्करः । भल्लातः स्वनामाख्यातवृक्षः । तयोः । तथा षण्डे च **वृषाङ्कः** । पु० । वृषः अङ्कोऽस्य । "वृषाङ्कः शङ्करे साधौ भल्लातकमहोक्षयोः" इति मेदिनी । "वृषाङ्कः साधुभल्लातशङ्करेषु महल्लके" इति विश्वः ॥ धूर्तः खलः । फेरवः शृगालः । तयोः । तथा गृहबभ्रौ प्रतारे च **वञ्चकः** । पु० । वञ्चु वञ्चने णिच्ण्वुल्प्रत्ययौ । "वञ्चकस्तु खले धूर्ते गृहबभ्रौ च जम्बुके" इति

वैदेहको वाणिजके वैश्यायामपि शूद्रजे।
वैलक्ष्याकार्ययोः क्लीबं व्यलीकं त्रिषु नागरे॥ ४२॥
वाहीकं बाह्लिकं धीरहिङ्गुनोर्नाऽश्वदेशयोः।
विपाकः परिणामेऽपि तिलकेऽपि विशेषकः॥ ४३॥
शङ्कुः कीलकसङ्ख्यास्त्रजलजन्तुषु दृश्यते।
शिशुकः शिशुमारेऽपि शुकं ग्रन्थिशिरीषयोः॥ ४४॥

मेदिनी ॥ ४१ ॥ वाणिजके वणिग्जने। वैश्यायां शूद्रजे, शूद्रायां वैश्याज्जाते च। अपिशब्दात् विदेहराजे जनके नृपे च **वैदेहकः**। पु०। विदेहे भवः। अण् प्रत्ययः। ततः कन् च। वैदेहिकोऽप्यत्र। "वैदेहको वाणिजके शूद्राद्वैश्यासुतेऽपि च" इति मेदिनी ॥ वैलक्ष्यं लज्जास्वभाववैलक्षण्यम्। अकार्यमपराधः। तयोः। न०। नागरे च त्रि०। व्यलीकम्। विपूर्व अल–भूषणे। ईकक् प्रत्ययः। "व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने। ना नागरे" इति मेदिनी। "व्यलीकं व्यङ्गवैलक्ष्याप्रियाकार्येषु पीडने" इति हैमः॥ ४२ ॥ धीरः पण्डितः। हिङ्गु रामठम। तयोः। न०। अश्वः तुरङ्गमः। देशः स्वनामाख्यातदेशभेदः। तयोश्च। पु०। **वाहीकम्**। न० पु०। **वाह्लिकम्** अप्यत्र। वह प्रापणे। लिण्प्रत्ययः। स्वार्थे कन् च। "वाह्लीकं। वाह्लिकं धीरहिङ्गुनोः। द्वावेतौ पुंसि देशस्य प्रभेदे तुरगान्तरे" इति मेदिनी। "बाह्लिकः। देशभेदेऽश्वभेदे च बाह्लिकं हिङ्गुकुङ्कुमम्" इति हैमः॥ परिणामे प्रकृतेरन्यथाभावे विकारे। कर्मफलपरिणामे जात्यायुर्भोगरूपे पदार्थे। अपिशब्दात् पचने खेदे अर्थालङ्कारभेदे च **विपाकः**। पु०। विपूर्वपच–पाके। भावे घञ्प्रत्ययः। कर्मणि घञ्प्रत्ययो वा। "विपाकः पचने खेदे कर्मणो विसदृक्फले" इति मेदिनी। "विपाकः परिणामे च दुर्गतिस्वादुनोरपि" इति हैमः॥ तिलके ललाटकृते तिलके। अपिशब्दात् विशेषकर्तरि। त्रि०। "त्रिभिर्ज्ञेयं विशेषकम्" इत्युक्ते एकवाक्यतापन्ने श्लोकत्रये च। न०। **विशेषकः**। पु० न०। विपूर्वशिष–परिशेषीकरणे। णिच्ण्वुल्प्रत्ययौ। "विशेषकोऽस्त्री तिलके विशेषयितरि त्रिषु" इति मेदिनी "विशेषकः स्यात्तिलके विशेषावहकेऽपि च" इति हैमः॥ ४३ ॥ कीलकः गवां दोहनार्थं बन्धनस्तम्भः गवां कण्डूयनार्थं निहितः स्तम्भो वा। "अर्काङ्गुला तु सूच्यग्रा काष्ठा द्व्यङ्गुलमूलिका। शङ्कुसंज्ञा भवेत्" इति। सङ्ख्या दशकोटिसङ्ख्या। अस्त्रं शल्यास्त्रम्। जलजन्तुः जलस्थो ग्राहादिप्राणिविशेषः, मत्स्यभेदो वा। तत्र च। तथा मेढ्रे महादेवे कलुषे पत्रशिराजाले च शङ्कुः। पु०। दृश्यत इत्यन्वयः। शकि–शङ्कौ। उण्प्रत्ययः। "शङ्कुः सङ्ख्यास्त्रयादोभित्कीलेशकलुषेषु ना" इति मेदिनी। शिशुमारे जलजन्तुभेदे। अपिशब्दात् बालके स्वल्पे च **शिशुकः**। पु०। शिशुरिवेति इवार्थे कन्प्रत्ययः। "शिशुकः शिशुमारे स्याद्बालकोलूपिनोरपि" इति मेदिनी। "शिशुकः पादपे बाले शिशुमारे" इति हैमः॥ ग्रन्थिः ग्रन्थिपर्णः। शिरीषः स्वनामाख्यातो वृक्षः, शौनक-

कीरे रावणपात्रे ना वचाऽपि शतपर्विका ।
शल्कश्चूर्णेऽपि शूकस्तु स्यादनुक्रोशशृङ्गयोः ॥ ४५ ॥
शिलाटको विलेपेऽट्टे शुल्को यौतकदानयोः ।
श्वाविध्वृक्षौ च शल्लक्यौ मणौ खड्गे च सस्यकः ॥ ४६ ॥
शीधौ च शीधुपाने च सरकोऽस्त्र्यथ जन्मनि ।
सूतकं पारदेऽप्यऽस्त्री सूचकौ खलकुक्कुरौ ॥ ४७ ॥

वृक्षश्च । तयोः **शुकम्** । न० ॥ ४४ ॥ कीरे कीरपक्षिणि । रावणपात्रे च । पु० । शुक-गतौ । कप्रत्ययः । "शुको व्याससुते कीरे रावणस्य च मन्त्रिणि । ग्रन्थिपर्णे शिरीषे च **शुकं** स्याच्छोणके क्वचित्" इति विश्वः ॥ वचा स्वनामाख्यातं द्रव्यम् । तत्र च अपिशब्दात् कटुकायां दूर्वायां च । स्त्री० । वंशे इक्षुभेदे यवे च । पु० । **शतपर्विका** । स्त्री० । शतं पर्वाणि ग्रन्थयो यस्याः । कन्प्रत्ययः । आप् च । "शतपर्विका दूर्वायां वचाया-मपि योषिति" इति मेदिनी ॥ चूर्णे पेषणजाते रजसि, धूलौ वा । पु० । अपिशब्दात् खण्डे वृक्षवल्कले मत्स्यत्वचि च । न० । **शल्कः** । पु० । शल--गतौ । कप्रत्ययः । कस्य नेत्त्वम् । "शल्कं तु शकले वल्के" इति मेदिनी ॥ अनुक्रोशः दया । शृङ्गं तीक्ष्णाग्रः, शिखा वा । तयोः **शुकः** । स्यात् । पु० न० । शो—तीक्ष्णे । ऊकन्प्रत्ययः । "शूकोऽस्त्री शृङ्ग-दययोः" इति मेदिनी ॥ ४५ ॥ विलेपे गात्रानुलेपनद्रव्ये । अट्टे प्रासादस्योपरि गृहे, प्राचीरो[1]-परिस्थसैन्यगृहे वा । तत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते इति प्राञ्चः । अति-शये च **शिलाटकः** । पु० । शिलया अटति भ्रमतीति । शिलाशब्दपूर्वक अट—गतौ । ण्वुल् प्रत्ययः । "शिलाटकः पुमानट्टे विलेपे परिकीर्तितः" इति मेदिनी ॥ यौतकं विवाहकाले लब्धं धनम् । क्वचित् यौतुकं वा । दानं प्रसिद्धं तयोः । तथा राजग्राह्यकरभेदे वरपक्षात् कन्यापक्षीयैः ग्राह्ये धने स्त्रीधनभेदे। "भगिनीशुल्कं सोदराणाम्" इतिः स्मृतिः। स्त्रीभ्यः सम्भोगार्थं देये धने। "अशुल्कोपहृतानां तु पिण्डदा वोढुरेव ते" इति स्मृतिः।पणे च शुल्कः। पु०न०। शुल्क—कथने । शुल्क्यते अतिसृज्यते इति । कर्मणि घञ्प्रत्ययः । "शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" इति मेदिनी॥श्वाविध् शल्यकम् । वृक्षः प्रसिद्धः । तयोः **शल्लकी** । स्त्री० । शल--गतौ। ण्वुल्-प्रत्ययः ङीप् च । "छत्रादिकाष्ठीशरयोः शल्लकी पशुवृक्षयोः" इति मेदिनी ॥ मणौ माणि-क्यभेदे । खड्गे च **सस्यकः** । पु० । सस--हिंसने । यत्प्रत्ययः । पुनः कन् च । "सस्यको मणिभेदे" इति मेदिनी ॥ ४६ ॥ शीधौ इक्षुरसजाते, मद्यभेदे च । "इक्ष्वोः पक्-रसैः सिद्धः सीधुरित्यभिधीयते" इति । शीधुपाने तन्मद्यपाने तत्पात्रे च सरकः । पु० न० । सृ—गतौ । वुन्प्रत्ययः । "सरकोऽस्त्री सीधुपाने सीधुपात्रेऽक्षुसीधुनोः" इति मेदिनी ॥ जन्मनि प्रसूताशौचे । पारदे रसराजे च । अपिशब्दात् अशौचमात्रे च **सूतकम्** । पु०

1 प्राचीरोनाम—"गजैरभेद्या मनुजैरलङ्घ्याः प्राचीरखण्डा नृपतेर्भवन्ति" इत्यत्रोक्तः ।

युग्मे सङ्घाटिका कुट्टन्यां च गद्येऽपि हारकः । वाद्यभेदे हुडुक्कः स्याद्दात्यूहे च मदोत्कटे ॥ ४८ ॥

इति कान्ताः ॥

इन्दुलेखा गुडूच्यां च पूः सुखं स्वर्नभश्च खम् । गोमुखं लेपने वाद्यभाण्डे सर्पेऽपि दुर्मुखः ॥ ५० ॥

त्रिशिखं स्यात्त्रिशूलेऽपि न्युङ्खः साम्नि मनोहरे । नखं शुक्तौ कररुहे कूर्मे पञ्चनखो गजे ॥ ५० ॥

न० । क्वचित्तु "सुतकम्" इति च । सू—प्रसवे भावे । क्तप्रत्ययः । पुनः कन् च । "ओतौ काके सूतकोऽस्त्री पारदे न द्वयोर्जनौ" इति मेदिनी ॥ खलः दुर्जनः । कुक्कुरः प्रसिद्धः । तयोः **सूचकः** । त्रि० । सूच—पैशून्ये, अन्तर्दाहे वा । ण्वुल्प्रत्ययः । "सूचकः सीवनद्रव्ये बोधके पिशुने शुनि" इति मेदिनी ॥ ४७ ॥ युग्मे युगले । कुट्टन्यां परपुरुषेण सह परस्त्रियाः समागमकारयित्र्याम । चकारेण जलकण्टके च **सङ्घाटिका** । स्त्री० । संपूर्वघट—सङ्घटने । णिच्ण्वुल्प्रत्ययौ । "सङ्घाटिका स्त्रियां युग्मे कुट्टिन्यां जलकण्टके" इति मेदिनी ॥ गद्ये कथनीये, पद्यभिन्ने कविकृते अपादे पदसमूहे वा । न० । अपिशब्दात् चौरे कितवे शाखोटकभेदे भाजकाङ्के च । पु० ।हरणकर्तरि । त्रि० । **हारकः**।पु० । हृ—हरणे । ण्वुल्प्रत्ययः । "हारकः कितवे चौरे गद्यविज्ञानभेदयोः" इति मेदिनी ॥ वाद्यभेदे मदङ्गादिवादनीयविशेषे । दात्यूहे कालकण्ठके पक्षिभेदे। मदोत्कटे,मदोद्धटेचा। हुडुक्कः स्यात्।पु०।हुड—राशीकरणे।उकन्प्रत्ययः । कन् च । "हुडुक्को वाद्यभेदे च मत्तदात्यूहपक्षिणि"इति मेदिनी॥४८॥ इति ककारान्ताः समाप्ताः । अथ खान्तानाह॥ गुडूच्यां स्वनामाख्यातायां लतायाम् । चकारात् चन्द्रकलायां तदंशनाम्न्यां सोमलतायां यमानिकायां च । **इन्दुलेखा** । स्त्री० । इन्दोर्लेखेव ।"इन्दुलेखाऽमृतासोमलताशशिकलासु च" इति मेदिनी ॥ पूः पुरम् । स्वर्नाकः । तत्र च **सुखं** स्यात् । न० । सुख—सम्पादने । घञ्प्रत्ययः । "सुखं शर्मणि नाके च सुखा पुर्यां प्रचेतसः" इति मेदिनी ॥ नभः आकाशः तत्र नभसि । चकारात् सूर्ये । पु० । इन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ संवेदने देवलोके शर्मणि च **खं** स्यात् । न० । खर्व—गतौ । डप्रत्ययः । "खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि । संवेदने देवलोके शर्म्मण्यपि नपुंसकम्" इति मेदिनी ॥ लेपने लेप इति ख्याते व्यापारे, तुरुष्कनामगन्धद्रव्ये च । वाद्यभाण्डे **गोमुखम्** । न० । गोरिव मुखमस्य । "गोमुखं कुटिलाकारे वाद्यभाण्डे च लेपने । पुंसि मातलिपुत्रे च महादेवगणान्तरे" इति मेदिनी ॥ सर्पे नागभेदे । अपिशब्दात् अश्वे वानरे दैत्यभेदे अप्रियवादिनि च । त्रि० । **दुर्मुखः** । पु० । दुष्टं मुखमस्य । "दुर्मुखः कपिभिन्नागभिदोर्ना मुखरे त्रिषु" इति मेदिनी ॥ ४९ ॥ त्रिशूले स्वनामाख्याते अस्त्रभेदे । अपिशब्दात् बिल्वे राक्षसभेदे । पु० । [illegible]न्तरे । न० । शिखात्रयवति माणवकादौ च । त्रि० । **त्रिशिखं** । स्यात् । न० ।

आदौ प्रधाने प्रमुखं वैशाखो मन्थमासयोः।
काण्डे ना विशिखा रथ्या विशाखा भे गुहे पुमान् ॥ ५१ ॥
लेखो देवेऽपि पङ्क्तौ स्त्री शिखा चूडाग्रयोरपि।
शाखा वेदविभागेऽपि सखा मित्रसहाययोः ॥ ५२ ॥

तिस्रः शिखाः प्रतिपत्राण्यस्य। "त्रिशिखो राक्षसे क्लीबं त्रिशूले मण्डलान्तरे" इति मेदिनी ॥ साम्नि सामवेदाङ्गे। मनोहरे अतिप्रिये च। **न्युङ्खः**। पु०। निपूर्वउङ्ख–गमने, प्राप्तौ वा। अच्प्रत्ययः। "न्युङ्खः सम्यङ्मनोज्ञे च साम्नः षट्प्रणवेऽपि च" इति मेदिनी॥ शुक्तौ जलजन्तु-भेदे शङ्खे वा। कररुहे नखे च। **नखम्**। पु० न०। नखं छिद्रमत्र। "नखी स्त्री क्लीबयोः शुक्तौ नखरे पुन्नपुंसकम्" इति मेदिनी ॥ कूर्मे कच्छपे। गजे हस्तिनि च। **पञ्चनखः**। पु०। पञ्च नखाः यस्य "शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान्पञ्चनखेष्वाहुः" इति मनुः। "पञ्चनखो गजे कूर्मे" इति विश्वः ॥ ९० ॥ आदौ प्रथमे। प्रधाने श्रेष्ठे च। **प्रमुखम्**। न०। प्रकृष्टं मुखमारम्भो यस्य। "प्रमुखः प्रथमे श्रेष्ठे" इति मेदिनी। "प्रमुखं प्रथमे मुख्ये" इति हैमः ॥ मन्थः मन्थनदण्डः। मासः स्वनामाख्यातो मासः। तयोश्च **वैशाखः**। पु०। विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी। सा यत्र मासे। पुनः अण् च। "वैशाखो मा-सभेदे स्यान्मन्थाने च प्रकीर्तितः" इति मेदिनी ॥ काण्डे शरे, तोमरे वा। पु०। रथ्या रथी। तस्यां रथ्यायां तथा शरे च। पु०। **विशिखा**। स्त्री०। विशिष्टा विगता वा शिखा यस्याः। "विशिखा तु खनित्र्यां च रथ्यानालिकयोरपि" इति मेदिनी। "विशिखा खनित्रिकायां रथ्यायां विशिखः शरे" इति हैमः ॥ भे नक्षत्रे। गुहे स्कन्दे च। पु०। **विशाखा** स्त्री०। विशाखानक्षत्रे भवः। अण् प्रत्ययः। "विशाखस्तर्कके स्कन्दे स्त्रियामृक्षे कटिल्लके" इति मेदिनी। "विशाखो यावके स्कन्दे विशाखा भे कटिल्लके" इति हैमः ॥ ९१ ॥ देवे सुरे। पङ्क्तौ सजातीयसन्ततौ। स्त्री०। अपिशब्दात् लेखने लेख्ये आधारे पत्रे लिपौ च। **लेखः**। पु०। लिख–लिखने। कर्मणि घञ्प्रत्ययः ॥ चूडा मयूरशिखा, मस्तकमध्यस्थकेश-गुच्छो वा। अग्रः प्रधानः, उत्तमो वा। तयोः। अपिशब्दात् अग्निज्वालायां च। **शिखा**। स्त्री०। शी–शयने। खक्प्रत्ययः। खस्य नेत्त्वम्। "शिखा शाखा बर्हिचूडा लाङ्गलिक्यग्र-मात्रके। चूडामात्रे शिखायां च ज्वालायां प्रपदेऽपि च" इति मेदिनी ॥ वेदविभागे वेदस्य अंशे, काण्डे वा। अपिशब्दात् पक्षान्तरे बाहौ द्रुमाङ्गे च। **शाखा**। स्त्री०। शाख–व्याप्तौ। अच्-प्रत्ययः। "शाखा पक्षान्तरे बाहौ वेदभागद्रुमाङ्गयोः" इति मेदिनी ॥ मित्रं स्नेहान्वितः सुहृद्। सहायः अनुकूलः। तयोश्च। **सखा**। त्रि०। सह समानं ख्यायते। ख्या–कथने। इन्। निपातनात् साधुः। "सखा मित्रे सहाये ना वयस्यायां सखी मता" इति मेदिनी ॥ ९२ ॥

सुमुखस्तार्क्ष्यपुत्रे च शोभनास्यगणेशयोः ।
सुमुखी शोभनास्या इति खान्ताःऽथाऽपवर्गस्त्यागमोक्षयोः ५३
शरीरोपायाप्रधानेष्वङ्गं पुंभूम्नि नीवृति ।
सम्बोधनेऽङ्गाऽव्ययं स्यादयोगो विधुरेऽपि च ॥ ५४ ॥
शपथेऽप्यभिषङ्गः स्यादनङ्गः खे स्मरे पुमान् ।
पूर्णत्वयत्नावाभोगावायोगो व्यापृतावपि ॥ ५५ ॥

तार्क्ष्यपुत्रे गरुडसुते । शोभनास्यं सुवदनम् । गणेशः स्वनामाख्यातो देवः तयोः । चकारात् पण्डिते शाकभेदे नागभेदे सितार्जके वर्वरे वनवर्वरिकायां च । मनोहरे च । त्रि० । **सुमुखः**। पु० । सुष्ठु मुखमस्मात् अस्य वा । "सुमुखस्तार्क्ष्यतनये शाकनागप्रभेदयोः" इति मेदिनी ॥ शोभनास्या सुप्रसन्नमुखी तस्याम् **सुमुखी** ॥ स्त्री० ॥ खकारान्ताः समाप्ताः ॥ अथ गान्तानाह ॥ त्यागः वितरणम् । मोक्षः निर्वाणम् । तयोश्च,तथा फलसाधने समाप्तौ च। **अपवर्गः**। पु०। अप-पूर्व वृज वर्जने । घञ्प्रत्ययः । "स्यादपवर्गस्त्यागे मोक्षे कार्यावसानासाफल्ये" इति मेदिनी ॥ ५३ ॥ शरीरं देहः । उपायः रिपुनिराकरणादीनां हेतूनां साधनम् । अप्रधानः प्रधानभिन्नः । तत्र च । न० । भूम्नि नीवृति स्वनामाख्याते देशे, जनपदे वा । पु० । तथा अवयवे मनसि च । न० । अङ्ग-चिह्नयुक्तकरणे । अच्प्रत्ययः । "अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति।क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवत्ति चान्तिके" इति मेदिनी ॥ सम्बोधने सम्यग्ज्ञापने । "स्थितस्याभिमुखीभावमात्रं सम्बोधनं विदुः । प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति व्याकरणोक्तिः । अव्यये च । अङ्ग स्यात् । "अङ्ग सम्बोधनेऽव्ययम्" इति विश्वः ॥ विधुरे विश्लेषे । कूटे योगाभावे कुयोगे वियोगे न० । कठिनोद्यमे च । **अयोगः** । पु० न० । युज-युतौ । घञ्प्रत्ययः । नञ्तत्पुरुषः, बहुव्रीहिश्च । "अयोगो विधुरे कूटे विश्लेषे कठिनोद्यमे" इति मेदिनी ॥ ५४ ॥ शपथे सत्यताकरणाय दिव्यभेदकरणे । यथा । "एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यात्" इत्यादिशपने च । अपिशब्दात् पराभवे आक्रोशे व्यसने च **अभिषङ्गः** । पु० । अभिपूर्वसञ्ज-सङ्गे । घञ्प्रत्ययः । "अभिषङ्गः पुँल्लिङ्गः पराभवाक्रोशशपथेषु" इति मेदिनी ॥ खे आकाशे । स्मरे कन्दर्पे । **अनङ्गः** । पु० । नास्ति अङ्गमाकारो यस्य । "अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि" इति मेदिनी ॥ पूर्णत्वं परिपूर्णता । यत्नमुत्साहः । तयोश्च । तथा वरुणस्य छत्रे कवीनामाख्यापने च **आभोगः** । पु० । भुज-वक्रीकरणे, भक्षणे वा । भावे आधारे वा । घञ्प्रत्ययः । "आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि" इति मेदिनी ॥ व्यापृतौ व्यापारयुक्ते । अपिशब्दात् गन्धमाल्योपहारे रोधे च **आयोगः** । पु० । आपूर्व युज-युतौ।घञ्प्रत्ययः।"आयोगो व्यापृतौ गन्धमाल्योपहाररोधसोः"इति मेदिनी ॥५५॥

जङ्गमेङ्गितयोरिङ्गो नाट्य ईहामृगो वृके ।
फलं पूगस्य चोद्वेगमुत्सर्गो न्यायदानयोः ॥ ५६ ॥
सामान्येऽप्युपरागस्तु ग्रहेऽर्केन्द्वोश्च दुर्नये ।
हस्तच्छेदे तु सस्यानां कटभङ्गो नृपात्यये ॥ ५७ ॥
कथाप्रसङ्गो वातूले विषवैद्येऽपि वाच्यवत् ।
देशे कलिङ्गो धूम्याटे कलिङ्गं कौटजे फले ॥ ५८ ॥
त्रिषु दक्षे विदग्धे च खड्गौ निस्त्रिंशगण्डकौ ।
स्वर्गे वज्रे च रश्मौ च बलिवर्दे च गौः पुमान् ॥ ५९ ॥

जङ्गमः गतिशक्तियुक्तः । इङ्गितम् अभिप्रायव्यञ्जकदैहिकचेष्टा । तयोश्च **इङ्गः** । पु० । इगि—गतौ घञ्प्रत्ययः । "इङ्गः स्याद्भुते ज्ञाने जङ्गमेङ्गितयोरपि" इति मेदिनी ॥ नाट्ये अलङ्कारशास्त्रलक्षिते नाटकभेदे । वृके कुक्कुराकारे हरिणघातके व्याघ्रभेदे च । **ईहामृगः** । पु० । ईहां मृगयते । मृग—अन्वेषणे, याचने च । अण्प्रत्ययः । ईहामृगो वृके जन्तौ प्रभेदे रूपकस्य च"इति विश्वः । "ईहामृगस्तु पुंसि स्यात्कोकरूपकभेदयोः"इति मेदिनी॥ पूगस्य फलं क्रमुकफलम् । तत्र च । न० । चकारात् व्याकुलचित्ततायाम् विरहजन्ये दुःखोद्गमे भये च । तथा निश्चले स्तिमिते । पु० । शीघ्रगामिनि च **उद्वेगम्** । न० । उद्पूर्व विज—भये, कम्पे च । घञ्प्रत्ययः । उद्गतो वेगो यस्मादिति बहुव्रीहिर्वा । "उद्वेगं क्रामुके फले" । उद्वेगोऽप्युद्राहुलकोद्वेजनाकोद्गमेषु च" इति विश्वः ॥ न्यायः नयोपायः, युक्तिमूलकदृष्टान्तभेदो वा । दानं त्यागः तयोः । सामान्ये व्याकरणे सम्यगभिधाने। अपिशब्दात् योगभेदे अपानवायोर्व्यापारे च। **उत्सर्गः**।पु०। उद्पूर्व सृज—गतौ।घञ्प्रत्ययः।"उत्सर्गः पुंसि सामान्ये न्याये च त्यागदानयोः" इति मेदिनी॥५६॥अर्केन्द्वोः ग्रहे रविचन्द्रयोर्ग्रहणे । ग्रहणन्तु राह्वधिष्ठितभूमिच्छायया चन्द्रस्य । चन्द्रमण्डलेन च रवेर्मण्डलाच्छादनमिति सिद्धान्तः । दुर्नये दुर्नीतौ।चकारात् ग्रहकल्लोले व्यसने च **उपरागः**।पु०।उपपूर्वरञ्ज—घञ्प्रत्ययः।"उपरागस्तु पुंसि स्याद्राहुग्रासेऽर्कचन्द्रयोः"। दुर्नये ग्रहकल्लोले व्यसनेऽपि निगद्यते" इति मेदिनी ॥ सस्यानां हस्तच्छेदे धान्यानां करच्छेदने । नृपात्यये सैन्यभङ्गद्वारा राजविनाशे च **कटभङ्गः** । पु० । भञ्ज—भङ्गे । घञ्प्रत्ययः । पुनः कटस्य भङ्ग इति षष्ठीतत्पुरुषः । "कटभङ्गस्तु सस्यानां हस्तच्छेदे नृपात्यये" इति मेदिनी॥५७॥ वातूले वातरोगयुक्ते उन्मत्ते वा । विषवैद्ये अपिशब्दात् गोष्ठीवचने च **कथाप्रसङ्गः** । पु० । वाच्यलिङ्गो वा । कथायां प्रसङ्गो यस्येति बहुव्रीहिः। "कथाप्रसङ्गेन जनैरुदीरितात्" इति भारविः । "कथाप्रसङ्गो वातूले विषवैद्येऽपि वाच्यवत्" इति मेदिनी ॥ देशे स्वनामाख्याते देशे । "जगन्नाथात्पूर्वभागे कृष्णातीरान्तरं शिवे ! कलिङ्गदेशः संप्रोक्तः" इति । "उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ" इति रघुः । धूम्याटे पक्षिभेदे । कौटजे—फले इन्द्रयवे, कुटजवृक्षे वा **कलिङ्गं** ॥ ५८ ॥ पु० न० । दक्षे शूरे । विदग्धे पण्डिते, निपुणे वा । त्रि० । चकारेण

स्त्रीबाणरोहिणीदृग्दिग्वाग्भूमिष्वप्सु भूम्नि च ।
वैधव्ये नृपनाशे च छत्रभङ्गः प्रकीर्तितः ॥ ६० ॥
अश्वगन्धाऽपि तुरगी तुङ्गौ पुन्नागसोच्छ्रयौ ।
दीर्घाध्वगः स्यादुष्ट्रेऽपि निषङ्गः सङ्गतूणयोः ॥ ६१ ॥
नागः श्रेष्ठेभसर्पेषु क्लीबं सीसकरङ्गयोः ।
वृक्षे स्यात्पुंसि पुन्नागः पतङ्गः शलभे रवौ ॥ ६२ ॥

पूतिकरञ्जे प्लक्षवृक्षे शिरीषवृक्षे योषिति त्रिवृतायां च **कालिङ्गः** । पु० । कलिं गच्छति । गम—गतौ । खच्प्रत्ययः । मुम् । डिच्च । "कलिङ्गः पूतिकरजे धूम्याटे भूम्नि नीवृति । न द्वयोः कौटजफले महिलायां तु योषिति" इति मेदिनी । निस्त्रिंशः असिः । गण्डकः गण्डकशृङ्गः । तद्वान् गण्डकपशुर्वा । तयोः **खड्गः** । पु० । खडि—भेदे । गप्रत्ययः । निपातनान्न लोपः । "खङ्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके" इति मेदिनी ॥ स्वर्गे स्वर्लोके । वज्रे हीरके । रश्मौ किरणे । बलिवर्दे वृषे । बाणे रोहिण्याम् दृष्टौ दिशि वाचि भूमौ अप्सु जले । भूम्नि बहुत्वे । चकारात् पशौ चन्द्रे वायौ सूर्ये ऋषभनामौषधे च । पु० । सौरभेय्याम् । स्त्री० । **गौः** । पु० । गम—गतौ । डो प्रत्ययः । "गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च" इति मेदिनी॥ वैधव्ये पतिविरहे । नृपनाशे चकारात् अस्वातन्त्र्ये च **छत्रभङ्गः** । पु० । प्रकीर्तितः कथितः । छत्रस्य भङ्गो यत्र "छत्रभङ्गोऽपि वैधव्येऽस्वातन्त्र्यनृपनाशयोः" इति मेदिनी॥५९॥६०॥ अश्वगन्धा स्वनामाख्यातः क्षुद्रवृक्षभेदः तत्र । अपिशब्दात् हययोषिति च **तुरगी** । स्त्री० । तुरगस्तुरगन्धोऽस्त्यस्याः । अच्प्रत्ययः । गौरादित्वात् ङीप् । "तुरगी चाऽश्वगन्धायाम्" इति मेदिनी ॥ पुन्नागः स्वनामाख्यातो वृक्षः । सोच्छ्रयः उच्चतायुक्तः, उच्चः, पर्वतो वा । तयोः **तुङ्गः** । पु० । तुरङ्ग—गमने । वन्प्रत्ययः । "तुङ्गः पुन्नागनगयोस्तुङ्गः स्यादुन्नतेऽन्यवत्" इति विश्वः । उष्ट्रे स्वनामाख्याते पशुभेदे अपिशब्दात् लेखहारे वाह्यरथे च **दीर्घाध्वगः** । पु० । दीर्घमध्वानं गच्छति । गम—गतौ । अच्प्रत्ययः । दीर्घोऽध्वगो यस्य वा । "दीर्घाध्वगः पुमानुष्ट्रे लेखहारेऽपि भेद्यवत्" इति मेदिनी॥ सङ्गः सम्बन्धः, विषयादिरागो वा । "ध्यायतो विषयान् पुंसः सङ्गस्तेषु प्रजायते" इति गीता । तूणः तुणीरः । तयोश्च **निषङ्गः** । पु० । निपूर्वसञ्ज—सङ्गे । घञ्प्रत्ययः । "निषङ्गः सङ्गे तूणे च" इति मेदिनी ॥ ६१ ॥ श्रेष्ठः प्रधानः । इभः हस्ती । सर्पः अहिः । तेषु च । पु० । सीसकः स्वनामाख्यातो धातुभेदः रङ्गः धातुभेदः । तयोश्च । न० । **नागः** । पु० । न गच्छति अगः । न अगः नागः । "नागं नपुंसके रङ्गे सीसके करणान्तरे । नागः पन्नगमातङ्गक्रूरचारिषु तोयदे । नागकेशरपुन्नागनागदन्तकमुस्तके । देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थिते" इति मेदिनी ॥ वृक्षे स्वनामाख्याते पुष्पप्रधाने वृक्षभेदे । तथा श्वेतोत्पले जातीफले पाण्डुवर्णहस्तिनि नरश्रेष्ठे च **पुन्नागः** स्यात् । पु० । पुमान् नाग इव श्रेष्ठः । "पुन्ना-

काकोदुम्बरिकायां स्त्री फल्गुस्त्रिषु निरर्थके।
पालनेऽभ्यवहारे च निर्वेशे पण्ययोषिताम् ॥ ६३ ॥
भोगः सुखे धने चाहेः शरीरफणयोरपि।
भगं वैराग्ययोनीच्छाज्ञानैश्वर्येषु चेष्यते ॥ ६४ ॥
तरङ्गभेदयोर्भङ्गो भङ्गा सस्ये शणाह्वये।
एकदेशांशयोर्भागो भृङ्गो धूम्याटकेऽपि च ॥ ६५ ॥

गस्तु सितोत्पले। जातीफले नरश्रेष्ठे पाण्डुनागे द्रुमान्तरे'' इति मेदिनी ॥ शलभे कीटविशेषे। रवौ सूर्ये। तथा खगे शालिभेदे मधूकवृक्षे च **पतङ्गः**। पु०। पतन् सन् गच्छति। गम–गतौ। खच्प्रत्ययः। डिच। ''पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः'' इति मेदिनी ॥ ६२ ॥ काकोदुम्बरिकायां स्वनामाख्यातायामौषधजात्याम्। काकोडुम्बरिकायामिति च पाठः। स्त्री०। निरर्थके निष्प्रयोजने। त्रि०। तथा रम्ये सारे बसन्तसमये मिथ्यावाक्ये च। पु०। गयातीर्थस्थनद्यां च। **फल्गुः**। पु०। फल–निष्पत्तौ, गतौ वा। उप्रत्ययः। गुक् च। ''फल्गुसारेऽभिधेयवत्। नदीभेदे मलप्वां स्त्री'' इति मेदिनी। ''फल्गुः प्रोक्ता मलप्वां च निःसारे फल्गुवाच्यवत्'' इति विश्वः ॥ पालने रक्षणे। अभ्यवहारे आहारे च। पण्ययोषितां–निर्वेशे वेश्यानां भाटकादिरूपे वेतने ॥ ६३ ॥ सुखे धने अहेः–शरीरफणयोः सर्पशरीरे सर्पफणे च। अपिशब्दात् माने ज्योतिषोक्तग्रहाणां तत्तद्राशिस्थितौ च **भोगः**। पु०। भुज–पालने, अभ्यवहरणे वा। कर्मादौ घञ्प्रत्ययः। ''भोगः सुखे धने चाहेः शरीरफणयोरपि। पालनेऽभ्यवहारे च योषितादिभृतावपि'' इति मेदिनी ॥ वैराग्यं विषयवासनाराहित्यम्। योनिः स्त्रीणामसाधारणचिह्नः। इच्छा अभिलाषः। ज्ञानं सामान्यविशेषरूपं बुद्धिमात्रम्। ऐश्वर्यम् अणिमाद्यष्टविधं तेषु। चकारात् सूर्ये यशसि श्रियां माहात्म्ये यत्ने धर्मे मोक्षे सौभाग्ये कान्तौ चन्द्रे च **भगम्**। पु० न०। भज–पाके, सेवायां वा। घप्रत्ययः। ''भगं स्त्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु। माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च ना रवौ'' इति मेदिनी ॥ ६४ ॥ तरङ्गः ऊर्मी। भेदः अन्यतो विशेषः। तयोः। तद्वत् पराजये खण्डे कौटिल्ये भये गमने पत्ररचनाभेदे जलनिर्गमे च **भङ्गः**। पु०। शणाह्वये सस्ये शण इति ख्याते द्रव्ये। तथा मातुल्यायां त्रिवृतायां च। **भङ्गा**। स्त्री। भञ्ज–पृथक्करणे। घञ्प्रत्ययः। ''भङ्गो जयविपर्यये। भेदरोगतरङ्गेषु भङ्गा सस्यान्तरे स्त्रियाम्'' इति मेदिनी ॥ एकदेशः अवयवः, प्रतीको वा। अंशः विभागः, राशित्रिभागो वा। ''त्रिंशांशकस्तथा राशेर्भागमित्यभिधीयते'' इति ज्योतिषोक्तिः। तयोः। **भागः**। पु०। भज–विभागे। भावे घञ्प्रत्ययः। भजने कर्मणि घञ् च। ''भागो रूपार्धके भाग्यैकदेशयोः'' इति मेदिनी ॥ धूम्याटके कलिङ्गविहगे। अपिशब्दात् भ्रमरे भृङ्गराजे जारे भृङ्गारे भृङ्गरोले च **भृङ्गः**। पु०। भृ–भरणे, धारणे वा। गन्प्रत्ययः। कित् नुट् च। ''भृङ्गो धूम्याटषिङ्गयोः। मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्व-

भुजङ्गो भुजगे षिङ्गे जामदग्न्यतटौ भृगुः ।
मृगोऽन्विष्टौ च मार्गस्तु मासान्वेषणवर्त्मसु ॥ ६६ ॥
योगश्चारेऽपूर्वलाभे सूत्रे विश्रब्धघातिनि ।
उपाये सङ्गतौ ध्यानौषधसन्नाहयुक्तिषु ॥ ६७ ॥
नृत्ये रणे खले रागे रङ्गः क्लीबे त्रपुण्यऽपि ।
रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु ॥ ६८ ॥
चक्रे रथाङ्गं कोके ना रक्ताङ्गो मङ्गलेपि च ।
व्यक्ते साङ्ख्योदिते लिङ्गं स्थाणौ शेफसि लक्षणे ॥ ६९ ॥

चि । इति मेदिनी ॥ ६५ ॥ भुजगे सर्पे । षिङ्गे कामुके, विटे वा । तद्वत् जारे आश्लेषानक्षत्रे च **भुजङ्गः**। पु०। भुजः सन् गच्छति। गम–गतौ। खच्प्रत्ययः । डिच।"भुजङ्गोऽही च षिङ्गे च" इति मेदिनी ॥ जामदग्न्यः मुनिभेदः । तटं नद्यादेः कूलम् । तयोः । तथा शिवे शुक्रग्रहे पर्वतसानौ उच्चप्रदेशे च **भृगुः** । पु०। भ्रस्ज–पाके।कुप्रत्ययः।पृषोदरादित्वात् साधुः । कचित् "भृगू" इति पाठः । "भृगुः पुमान् । मुनौ हरौ तटे शुक्रे" इति मेदिनी॥अन्विष्टौ अन्वेषणे। चकारात् पशुमात्रे हरिणे गजभेदे अश्विन्यत्रधिके पञ्चमे नक्षत्रे याचने यज्ञभेदे मृगमदे मकरराशौ च **मृगः** । पु० । मृग–अन्वेषणे । कप्रत्ययः । "मृगः पशौ कुरङ्गे च कारनक्षत्रभेदयोः । अन्वेषणे च याच्ञायां मृगी तु वनितान्तरे"इति मेदिनी॥मासः मार्गशीर्षः।अन्वेषणं पर्य्येषणम् । वर्त्म पथः । तत्र च **मार्गः**। पु०। मार्ग–अन्वेषणे । मृज–शुद्धौ वा । घञ्प्रत्ययः। "मार्गो मृगमदे मार्गशीर्षे चान्वेषणाध्वनोः" इति मेदिनी ॥६६ ॥ चारे ग्रहादीनां गमने । अपूर्वलाभे अपूर्वार्थसम्प्राप्तौ।सूत्रे विश्रब्धघातिनि विश्वस्तघातके।उपायः साम्यादिः । सङ्गतः मेलनम्। ध्यानं चित्तस्यैकतानप्रवाहः । "ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः । ध्यानशब्देन विख्याता परमानन्ददायिनी"इति वेदान्तः।औषधं भेषजम्।सन्नाहः प्रसिद्धः।युक्तिः न्यायादिः।तेषु च **योगः** पु०।युज–युतौ, समाधौ वा । भावादौ घञ्प्रत्ययः। "योगो पूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु । वपुःस्थैर्यप्रयोगेऽपि विष्कम्भादिषु भेषजे । विश्रब्धघातके द्रव्योपायसन्नाहनेष्वपि"इति मेदिनी ॥ ६७ ॥ नृत्ये नाट्यस्थाने, नृत्ये च । रणे युद्धभूमौ । खले दुर्जने । रागे च । पु० । त्रपुणि स्वनामाख्याते धातुभेदे । न० । अपिशब्दात् ठङ्कणे खदिरसारे च **रङ्गः** । पु० । रगि–गतौ । अच्–प्रत्ययः । रञ्ज–रागे । भावे घञ्प्रत्ययश्च । "रङ्गो ना रागे नृत्ये रणक्षितौ अस्त्री त्रपुणि" इति मेदिनी ।। क्लेशादिके रागादिक्लेशवस्तुनि । रक्ते रञ्जने । मात्सर्ये परगुणद्वेषे । "मात्सर्य-मुत्सार्य विचार्य" इति साहित्यम् । लोहितादिषु रक्तादिषु वर्णेषु । आदिशब्दात् तद्विशिष्टे लाक्षादौ च । "तेन रक्तं रागात्" इति पाणिनिसूत्रम् । तथा प्रीतौ अनुरागे नृपे चन्द्रे आधारे च **रागः** । पु० । रञ्ज–रागे । भावे घञ्प्रत्ययः । निपातनात् नलोपकुत्वे । "रागस्तु मात्सर्ये लोहितादिषु । क्लेशादावनुरागे च गान्धारादौ नृपेऽपि च" इति मेदिनी ॥६८॥ चक्रे

पुंस्त्वादौ च वराङ्गं तु गुडत्वचि गजे पुमान् ।
वल्गुश्छागेऽपि वेगस्तु महाकालफलेऽपि च ॥ ७० ॥
जलोत्क्षेपे समुत्सर्गे शृङ्गमुत्कर्षचिह्नयोः ।
शार्ङ्गं धनुर्विष्णुधनुः सम्भोगो रतभोगयोः ॥ ७१ ॥

इति गान्ताः ॥

ओघः स्याद्द्रुतनृत्ये च काचिघौ काञ्चनोन्दुरू ।
निदाघौ स्वेदतापौ च प्रतिघो रोषघातयोः ॥ ७२ ॥

रथावयवे । कोके चक्रवाके, वृके वा । पु० । **रथाङ्गम्** । न० । अङ्ग्यते गम्यतेऽनेनेति । अगि—गतौ । करणे घञ्प्रत्ययः । पुनः रथस्य अङ्गं रथाङ्गमिति षष्ठीतत्पुरुषः । "रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहङ्गमे" इति मेदिनी ॥ मङ्गले भूमिसुते । अपिशब्दात् कुङ्कुमे कम्पिल्ले प्रवाले । पु० न० । जीवन्त्यां मञ्जिष्ठायां च । स्त्री० । **रक्ताङ्गः** । पु० । रक्तमङ्गं यस्य,यस्माद्वा । "रक्ताङ्गस्तु महीसुते । कम्पिल्ले स्त्री तु जीवन्त्यां क्लीबं विद्रुमधीरयोः" इति मेदिनी ॥ व्यक्ते स्फुटे, प्रकाशिते वा । साङ्ख्योदिते साङ्ख्योक्ते प्रधाने । स्थाणौ शिवमूर्तिभेदे । शेफसि मेहने । पुंस्त्वादौ लक्षणे पुरुषस्य असाधारणे चिह्ने च **लिङ्गम्** । न० । लिगि—गतौ । अच्प्रत्ययः । "लिङ्गं चिह्नेऽनुमाने च साङ्ख्योक्तप्रकृतावपि । शिवमूर्तिविशेषे च मेहनेऽपि नपुंसकम्" इति मेदिनी ॥ ६९ ॥ गुडत्वचि (दारचिनि) गजे हस्तिनि । तथा मस्तके गुह्ये योनौ त्रिष्णौ कामदेवे । पु० । श्रेष्ठावयवयुक्ते । त्रि० । हरिद्रायाम् । स्त्री० । **वराङ्गम्** । न० । वृ—वरणे । अच्प्रत्ययः । वरं च तत् अङ्गम्,वरस्याङ्गं वेति समासः । "वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वचि" इति मेदिनी ॥ छागे अजे । अपिशब्दात् मनोहरे चारुणि सुन्दरे च । त्रि० । चन्दने वने पणे च । न० । **वल्गुः** । पु० । वल—संवरणे । उप्रत्ययः । गुक् च । "वल्गुः स्याच्छागले पुंसि सुन्दरे चाभिधेयवत्" इति मेदिनी ॥ महाकालफले स्वनामाख्याते फलविशेषे । "महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम्" इति तन्त्रम् ॥ ७० ॥ जलोत्क्षेपे समुत्सर्गे मूत्रविष्ठानिःसरणे । अपिशब्दात् प्रवाहे जीवे रेतसि न्यायोक्ते संस्कारभेदे च **वेगः** । पु० । विजि—चलने, कम्पने च । घञ्प्रत्ययः । "वेगो जवे प्रवाहे च महाकालफलेऽपि च" इति मेदिनी । उत्कर्षः अतिशयः, प्रभुत्वं वा । चिह्नं लक्षणम् । तयोः तथा पर्वतोपरिभागे प्राधान्ये कामोद्रेके पश्वादेर्विषाणे वाद्यभेदे च **शृङ्गम्** । न० शॄ—भेदे, वधे वा । गन्प्रत्ययः । पृषोदरादित्वात् ह्रस्वः । "शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोः" इति मेदिनी ॥ धनुः धनुर्मात्रम् । विष्णुधनुः विष्णोश्चापम् । तत्र शृङ्गजाते पदार्थे च **शार्ङ्गम्** । न० । शृङ्गस्य विकारः । अण्प्रत्ययः । "शार्ङ्गं कार्मुकमात्रेऽपि विष्णोरपि शरासने" इति मेदिनी । रतः सुरतः । भोगः धनम् । तयोः । तथा सम्यग्भोगे हर्षे केलिनागरे शृङ्गारस्यावस्थाभेदे जिनशासने च **सम्भोगः** । पु० । सम्पूर्वभुज—भक्षे, पालने च । घञ्प्रत्ययः । "सम्भोगस्तु पुमान् भोगे सुरते जिनशासने" इति मेदिनी ॥ ७१ ॥ इति गकारान्ताः समाप्ताः ॥ अथ घान्तानाह ॥ द्रुतनृत्ये चकारात् समूहे जलवेगे उपदेशे परम्प-

परिघो योगभेदेऽपि मेघो वारिदमुस्तयोः ।
महार्घस्तु महामूल्ये पुंसि लावकपक्षिणि ।
पृक्कायां स्त्री लघुः क्लीबं शीघ्रे कृष्णागुरुण्यपि ॥ ७३ ॥

इति घान्ताः ॥

प्रतिमापूजयोरर्चा क्रौञ्चः पक्ष्यद्रिभेदयोः ।
कूर्चमस्त्री भ्रुवोर्मध्ये श्मश्रुकैतवयोरपि ॥ ७४ ॥

रायां च । **ओघः** । पु० । स्यादित्यन्वयः । उच–समवेते । घञ्प्रत्ययः । पृषोदरादित्वात् घश्च । "ओघो वेगे जलस्य च । वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः" इति मेदिनी ॥ काञ्चनं स्वर्णम् । उन्दुरुः मूषिकः । तयोः **काचिघः** । पु० । "काचिघः काञ्चनेऽपि स्याच्छेमण्डे मूषिकेऽपि च" इति मेदिनी ॥ स्वेदः घर्मजलम् । तापः सन्तापः तयोः । चकारात् उष्णे घर्मे घर्मकाले (ज्येष्ठाषाढमासयोश्च) **निदाघः** । पु० । निपूर्वदह–भस्मीकरणे । घञ्प्रत्ययः । न्यङ्क्वादित्वात् कुत्वम् । "निदाघो ग्रीष्मकाले स्यादुष्मस्वेदाम्बुनोरपि" इति मेदिनी ॥ रोषः क्रोधः । घातः प्रहारः, मरणं वा । तयोश्च **प्रतिघः** । पु० । प्रतिपूर्वहन–हिंसायाम् । डप्रत्ययः । न्यङ्क्वादित्वात् कुत्वम् । "प्रतिघः प्रतिघाते स्यात्क्रोधेऽपि परिकीर्तितः" इति मेदिनी ॥ ७२ ॥ योगभेदे विष्कम्भावधिके ऊनत्रिंशतितमे योगे । अपिशब्दात् परिघातास्त्रे लोहमुद्गरादौ । यथा लोहमुखे लगुडे मुद्गरे शूले काचघटे गृहे च । **परिघः** । पु० । परिपूर्वहन–हिंसायाम् । कप्रत्ययः । निपातनात् साधुः । "परिघो योगभेदे स्याद्विशेषेऽर्गलघातके" इति मेदिनी ॥ वारिदः जलधरः । मुस्तः मुस्तकः । तयोः । तद्वत् राक्षसभेदे रागभेदे च **मेघः** । पु० । मिह–सेचने । घञ्प्रत्ययः । न्यङ्क्वादित्वात् कुत्वम् । "मेघो मुस्ताजलदयोः पुमान्" इति मेदिनी ॥ महामूल्ये अनर्घमूल्ये । लावकपक्षिणि स्वनामाख्याते पक्षिभेदे च । पु० । **महार्घः** । त्रि०।महानर्घो मूल्यं यस्य । "महार्घस्तु महामूल्ये त्रिषु स्याल्लावके पुमान्" इति मेदिनी । पृक्कायां स्वनामाख्याते औषधभेदे । स्त्री० । शीघ्रे विलम्बाभावे । कृष्णागुरुणि कालागुरुणि । न० । अपिशब्दात् वीरणमूले निःसारे लाघवगुणान्विते ह्रस्वे मनोहरे व्याकरणोक्ते लघुसंज्ञके अकारादौ वर्णे ज्योतिषोक्तेषु पुष्याश्विहस्ता लघुरित्युक्तेषु पुष्यादिनक्षत्रेषु लघ्ववस्थायां च **लघुः** । त्रि०। लघि–गतौ । कुप्रत्ययः । निपातनात् नलोपः । "लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत्क्लीबम् । शीघ्रे कृष्णागुरुणि च पृक्कानामौषधे तु स्त्री" इति मेदिनी ॥ ७३ ॥ इति घान्ताः समाप्ताः ॥ अथ चान्तानाह ॥ प्रतिमा प्रतिरूपम् । पूजा अर्चनं तयोः । **अर्चा** । स्त्री० । अर्च–पूजायाम् । आधारे अङ्प्रत्ययः । "अर्चा पूजाप्रतिमयोः" इति मेदिनी ॥ पक्षी कुररपक्षी, बकभेदो वा । अद्रिभेदः पर्वतविशेषः तयोः । तथा दैत्यभेदे क्षीरसागरेणावृते द्वीपभेदे च **क्रौञ्चः** । पु० । कुञ्च–गमने । स्वार्थे अण्प्रत्ययः । "क्रौञ्चो द्वीपविशेषे स्यात्पक्षिपर्वतभेदयोः" इति मेदिनी ॥ भ्रुवोर्मध्ये भ्रूमध्यस्थिते

इभ्यां स्त्री गुरुपुत्रे ना केशे शुष्कव्रणे कचः ।
देशभेदेऽपि काञ्ची स्यात्तथा स्थासकतर्कयोः ॥ ७५ ॥
चर्चिकायां च चर्चा स्यात्त्वक् स्त्री चर्मगुडत्वचोः ।
वामने पामरे नीचो नमुचिर्दितिजे स्मरे ॥ ७६ ॥
मरीचिर्मुनिभेदेऽपि चौरवह्नी मलिम्लुचौ ।
कक्कोलेऽपि च मारीचो मोचा शाल्मलिरम्भयोः ॥ ७७ ॥

लोमोच्चये । श्मश्रु प्रसिद्धम् । कैतवं दम्भः तयोः । अपिशब्दात् मयूरपुच्छे । कुशमुष्टौ अङ्ग्रौ शीर्षे आसनभेदे । तन्त्रोक्ते बीजभेदे च **कूर्चम्** । पु० न० । कुर—शब्दे । चट्प्रत्ययः । निपातनाद्दीर्घः । "कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे" इति मेदिनी ॥ ७४ ॥ इभ्यां हस्तिन्याम् । स्त्री० । गुरुपुत्रे बृहस्पतितनये । केशे चिकुरे । शुष्कव्रणे तथा मेघे बन्धे शोभायां च **कचः** । पु० । कच—बन्धे , दीप्तौ वा । अच्प्रत्ययः । "कचः केशे गुरोः सुते । बन्धे शुष्कव्रणे पुंसि करिण्यां तु कचा स्त्रियाम्" इति मेदिनी ॥ देशभेदे "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका" इत्यादौ नगरविशेषे । स्थासकः स्त्रीकटीबद्धः अलङ्कारः । "एकयष्टिर्भवेत्काञ्ची मेखला त्वष्टयष्टिका। वलयः षोडश ज्ञेयः" इत्युक्तलक्षणयष्टौ । जलबुद्बुदे च। तर्कः प्रसिद्धः तयोः। अपिशब्दात् गुञ्जायां च । **काञ्ची** । स्त्री० । काचि—दीप्तौ । करणे ल्युट्प्रत्ययः । ङीप् । "काञ्ची स्यान्मेखलादाम्नि प्रभेदे नगरस्य च" इति मेदिनी । क्वचित् "**काञ्चिः**" इत्यपि पाठः ॥ ७५ ॥ चर्चिकायां चन्दनादिना देहलेपने । चकारात् विचारे चिन्तायां च । **चर्चा** स्यात् । स्त्री० । चर्च—उक्तौ, भर्त्सने च । आप्रत्ययः । "चर्चा चिन्तास्थासकयोश्चर्चिकायां च योषिति" इति मेदिनी ॥ चर्म प्रसिद्धम् । गुडत्वक् इक्षुवल्कलं तयोः । **त्वक्** । स्त्री० । त्वच -संवरणे । क्विप्प्रत्ययः । "त्वक् स्त्री चर्मणि वल्के च गुडत्वचि विशेषयोः" इति मेदिनी ॥ वामने ह्रस्वे । पामरे मूर्खे, खले वा । **नीचः** । त्रि० । निकृष्टामीं लक्ष्मीं चमति । चम--अदने डप्रत्ययः । "नीचः पामरे वामनेऽपि च" इति मेदिनी ॥ दितिजे असुरभेदे । स्मरे पुष्पकार्मुके च । **नमुचिः** । पु० । नपूर्वमुच—मोचने । किप्रत्ययः । "नमुचिस्तु पुमान्दैत्यभेदे कुसुमकार्मुके" इति मेदिनी ॥ ७६ ॥ मुनिभेदे सप्तर्षीणामन्तरे ब्राह्मणे मानसे ज्येष्ठे पुत्रे मुनिविशेषे । अपिशब्दात् कृपणे च किरणे । पु० स्त्री० । **मरीचिः** । पु० । मृ—मरणे । ईचि प्रत्ययः । "मरीचिर्मुनिभेदे ना गभस्तावनपुंसके" इति मेदिनी ॥ चौरः प्रसिद्धः । वह्निः अग्निः तयोः । तथा मलीमसे वायौ च **मलिम्लुचः** । पु० । मली वैदिककर्मानर्हत्वेन दुष्टः सन् म्लोचति गच्छति । म्लुच--गमने । कप्रत्ययः । "मलिम्लुचो मासभेदे चौरज्वलनयोः पुमान्" इति मेदिनी ॥ कक्कोले गन्धद्रव्यभेदे । अपिशब्दात् तारकाराक्षसीपुत्रे रावणानुचरे राक्षसभेदे । याजकब्राह्मणे च **मारीचः** । पु० । मरीचस्यापत्यम् । "मारीचो राक्षसभेदे कक्कोले याजकद्विजे" इति मेदिनी ॥ शाल्मलिः प्रसिद्धः । रम्भा कदली तयोः । तद्वत् कदलिफले । शोभाञ्जने च । पु० ।

कुक्कुरे रतनारीचः शीत्कारे वरयोषिताम् ।
केतुग्रहे तु विकचो वीचिः सुखतरङ्गयोः ॥ ७८ ॥
स्वल्पेऽपि सारिकायां च वचा ग्रीष्मानलौ शुचिः ।
सूची नृत्यप्रभेदे च व्यधनीशिखयोरपि ॥ ७९ ॥

इति चान्ताः ॥

वाराही चीरिका कच्छा कच्छोऽनूपे द्रुमान्तरे ।
पिच्छा स्त्रीभक्तमण्डेऽपि लाङ्गुले पिच्छमस्त्रियाम् ॥ ८० ॥

इति छान्ताः ॥

नीलिवृक्षे च । स्त्री० । **मोचा** । स्त्री० । मुच–मोचने । अच्प्रत्ययः । "मोचः शोभाञ्जने पुंसि मोचा शाल्मलिरम्भयोः" इति मेदिनी ॥ ७७ ॥ कुक्कुरे शुनि । वरयोषितां शीत्कारे स्त्रीणां रतिकालवर्तिनि ध्वनिविशेषे । तथा स्मरे च **रतनारीचः** । पु० । "रतनारीचो नारीणां शीत्कारे च शुनि स्मरे" इति मेदिनी ॥ केतुग्रहे स्वनामाख्याते नभश्चरे । तथा क्षपणे संग्यासिभेदे ध्वजे केशशून्ये च त्रि० । **विकचः** । पु० । विगतः कचो यस्य । विपूर्व० कच–बन्धने । अच्प्रत्ययो वा । "विकचः क्षपणे केतौ नाऽकेशे स्फुटितेऽन्यवत्" इति मेदिनी ॥ सुखं प्रसिद्धम् । तरङ्गः ऊर्मी तयोः । स्वल्पे अत्यल्पे । अपिशब्दात् अवकाशे किरणे च **वीचिः** । पु० स्त्री० । वे तन्तुसन्ताने । डीच्प्रत्ययः । स्त्रीत्वे वा ङीप् । वीचिः स्वल्पे तरङ्गे स्यादवकाशे सुखे द्वयोः" इति मेदिनी ॥ सारिकायां स्वनामाख्याते पक्षिणि । चकारात् कीरे वचौषधे च **वचा** । स्त्री० । वच–व्यक्तायां वाचि । क्विप्प्रत्ययः । आप् च । "वचः कीरे वचौषधौ।सारिकायाञ्च" इति मेदिनी ॥ ग्रीष्मः प्रसिद्धः । अनलो वह्निः तयोः । तद्वत् चित्रवृक्षे ज्येष्ठमासे आषाढमासे श्वेतवर्णे शुद्धाचरणे शुद्धमन्त्रिणि ऋतौ च **शुचिः** । पु० । शुच–शोके । किन्प्रत्ययः ।"शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु"इति मेदिनी ॥ नृत्यप्रभेदे नृत्यविशेषे । व्यधनी सीवनसाधनी । शिखा प्रसिद्धा तयोः । अपिशब्दात् स्वनामाख्याते लौहमयपदार्थे च । **सूची** । स्त्री०।सूच–पैशून्ये, अन्तर्द्रोहे वा । इन्प्रत्ययः । ईप् च । **सूचिः** रप्यत्र।"सूची तु सीवनद्रव्येऽप्यङ्जिकाभिनयान्तरे" इति मेदिनी ॥ ७८॥७९॥ इति चकारान्ताः समाप्ताः॥अथ छान्तानाह । वाराह्यां वराहयोषिति अष्टमातृकामध्ये वराहशक्तौ । "वाराही नारसिंही च " इति श्यामास्तवः । चीरिकायां स्वनामाख्याते कीटभेदे च । **कच्छा** । स्त्री० ॥ अनूपे जलप्रायदेशे । द्रुमान्तरे पुन्नागवृक्षे । तथा तटे नौकाङ्गे च **कच्छः** । पु० । कच–बन्धे । छप्रत्ययः । केन जलेन छृणाति दीप्यते । छृ–दीप्तौ । डप्रत्ययो वा । "कच्छः स्यादनूपे तुन्नकद्रुमे । नौकाङ्गे पुंसि वाराह्यां चीरकायां च योषिति" इति मेदिनी ॥ भक्तमण्डे भक्तस्य निस्रावे । अपिशब्दात् मयूरपुच्छे चूडायां शाल्मलिवृक्षे पूगे परम्परायां कोषे मोचायां पङ्क्तौ शिंशपावृक्षे कोकिलायाम् अश्वचरणरोगे च

पद्मधन्वन्तरी चाऽब्जावण्डजः खगमीनयोः
निचुलेऽप्यम्बुजोऽजस्तु ब्रह्मविष्णुस्मरेष्वपि ॥ ८१ ॥
स्यादङ्गजः स्मरे केशे पुत्रे रक्ते नपुंसकम् ।
उत्साहकार्तिकावूर्जौ कम्बोजो देशशङ्खयोः ॥ ८२ ॥
नखे करञ्जे करजः कुब्जो न्युब्जे द्रुमान्तरे ।
खनौ सुरागृहे गञ्जो गुञ्जा पटहकृष्णले ॥ ८३ ॥

पिच्छा । स्त्री० ॥ लाङ्गुले च । **पिच्छम्** । पु० न० । पिच्छ—बाधे । अच्प्रत्ययः । "पिच्छा पूगच्छटाकोशमोचाशाल्मलिवेष्टके । भक्तसम्भूतमण्डे च पङ्क्तावश्वपदामये । स्त्रियां पुंसि तु लाङ्गूले न द्वयोर्बर्हिचूडयोः" इति मेदिनी ॥ ८० ॥ इति छान्ताः समाप्ताः ॥ अथ जान्तानाह ॥ पद्मं पङ्कजम् । धन्वन्तरिः विक्रमराजसभाऽऽस्थः स्वनामाख्यातः पण्डितः तयोः । तथा शतकोटिसङ्ख्यायाम् "अर्बुदमब्जं खर्वनिखर्व" इत्यादि भास्कराचार्योक्तेः । शङ्खे चन्द्रे च । पु० न० । **अब्जः** । पु० । अद्भ्यो जायते । जन—जनने डप्रत्ययः । "अब्जोऽस्त्री शङ्खे ना निचुले धन्वन्तरौ हिमकिरणे । क्लीबं पद्मे" इति मेदिनी ॥ खगः पक्षी।मीनः मत्स्यः तयोः । तथा सर्पे कृकलासे अण्डजातमात्रे मृगनाभिकस्तूर्यां च **अण्डजः** । पु०। अण्डात् डिम्बात् जायते । जन—जनने । डप्रत्ययः । "अण्डजो मृगनाभौ स्यात्सरटेऽहौ खगे झषे" इति मेदिनी ॥ निचुले हिज्जलवृक्षे ।"निचुलेज्जलहिज्जलौ" इति रभसः । अपिशब्दात् वेतसे पद्मे चन्द्रे शङ्खे । पु०न०। **अम्बुजः** । पु०। अम्बुनि जायते । जन—जनने।डप्रत्ययः। "अम्बुजो निचुले पुंसि कमले तु नपुंसकम्" इति मेदिनी ॥ ब्रह्मा विधाता । विष्णुः हरिः । स्मरः कामदेवः तत्र च । अपिशब्दात् हरे छागे मेषराशौ सूर्यवंशीयराजभेदे दशरथपितरि जन्मरहिते च **अजः** । पु० । न जायते । जन—जनने । डप्रत्ययः । नादितत्पुरुषः । "अजश्छागे हरिब्रह्मधातुस्मरहरे नृपे" इति मेदिनी ॥ ८१ ॥ स्मरे कामदेवे । केशे चिकुरे । पुत्रे रक्ते रुधिरे । न० । **अङ्गजः** । स्यात् । पु० अङ्गात् जायते । जन—जनने । डप्रत्ययः । अङ्गजं रुधिरेऽनङ्गकेशपुत्रगदेषु ना ।" इति मेदिनी ॥ उत्साहः उद्यमः । कार्त्तिकः स्वनामाख्यातो मासः तयोश्च। तथा बले प्राणने च **ऊर्जः** ।पु० । ऊर्ज—आधारे। घञ्प्रत्ययः ।"ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेऽपि च" इति मेदिनी ॥ देशः स्वनाम्ना प्रसिद्धः। "पञ्चनदं समारभ्य म्लेच्छाद्दक्षिणपूर्वतः कम्बोजदेशः" इति । शङ्खे शङ्खभेदे । तथा हस्तिभेदे च **कम्बोजः** । पु० । कबि--गतौ । ओज प्रत्ययः । "कम्बोजो हस्तिभेदेऽपि शङ्खभेदविशेषयोः" इति मेदिनी ॥ ८२ ॥ नखे व्याघ्रनखादिगन्धद्रव्ये । करञ्जे स्वनामाख्याते वृक्षविशेषे च । **करजः** । पु० । कं शिरः जलं वा रञ्जयति । रञ्ज--रागे । णिच्अण्प्रत्ययौ । निपातनात् साधुः । करजं स्याद्व्याघ्रनखे करञ्जे नखयोः पुमान्" इति मेदिनी ॥ न्युब्जे अधोमुखे कुब्जे । हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् । क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत्"

जघन्यजोऽनुजे शूद्रे जलजं शङ्खपद्मयोः ।
चिह्नशेफपताकासु खट्वाङ्गेऽपि ध्वजोऽस्त्रियाम् ॥ ८४ ॥
नीरजं कमले कुष्ठे पिञ्जा हिंसाहरिद्रयोः ।
भारद्वाजो गुरोः पुत्रे व्याघ्राटाख्ये च पक्षिणि ॥ ८५ ॥
बुधैः ख्यातो भारद्वाजो द्रोणाचार्ये मुनावपि ।
भृङ्गराजः खगौषध्योर्लङ्घने मुनिभेषजम् ॥ ८६ ॥

इत्युक्तलक्षणरोगवति । द्रुमान्तरे अपामार्गे । खड्गे च । **कुब्जः** । पु० । ईषत् उब्जमार्जवमस्य । शकन्ध्वादित्वात् पररूपम् ॥ खनौ आकरे, भूविदारणे च । सुरागृहे मदिरागृहे । स्त्री० । तथा अवज्ञायाम् आधारे भाण्डागारे कोष्ठागारे हट्टस्थाने पामरगृहे च **गञ्जः** । पु० । गजि--शब्दे, मत्ते च । घञ्प्रत्ययः । "गञ्जः स्यात्पुंसि रीढायां भाण्डागारे तु न स्त्रियाम्" इति मेदिनी ॥ पटहः ढक्कावाद्यम् । कृष्णला गुञ्जा तयोः । "तुल्या यवाभ्यां कथितात्र गुञ्जा" इति लीलावती । तथा चतुर्धान्यमाने गोधूमद्वयमाने । मदिरागृहे मधुरध्वनौ चर्चायां च । **गुञ्जा** । स्त्री० । गुजि--शब्दे । अच् प्रत्ययः । "गुञ्जा तु काकचिञ्चायां पटहे च कलध्वनौ" इति मेदिनी ॥ ८३ ॥ अनुजे कनिष्ठभ्रातरि । शूद्रे चतुर्थे वर्णे । शोकहेतुकगतियुक्ते । "अहहरे त्वा शूद्र" इति श्रुतिः । शुचा द्रवणात् क्षत्रियस्याऽपि शूद्रत्वमिति शारीरिकभाष्यम् । तथा अधमे चरमे गर्विते च **जघन्यजः** । पु० । जघन्ये चरमे जायते । जन-जनने । डप्रत्ययः । "जघन्यजः कनीयसि वृषले" इति मेदिनी ॥ शङ्खः स्वनामाख्यातः समुद्रजातः पदार्थः । पद्मं कमलं तयोः । तथा शैवले वानीरवृक्षे हिज्जलवृक्षे मत्स्ये ज्योतिषोक्तेषु कर्कटमीनमकरान्त्यार्धराशिषु क्षारभेदे जलजातमात्रे च **जलजम्** । पु० न० । जले जायते । जन-जनने । डप्रत्ययः । "जलजं कमले शङ्खे" इति मेदिनी ॥ चिह्नं लाञ्छनम् । शेफः शिश्नम्, अथवा मेढ्रम् । पताका वंशदण्डोपरिस्थितं चतुष्कोणाकारं वस्त्रखण्डं तासु । खट्वाङ्गे नरपञ्जरे, ईशायुधविशेषे च । अपिशब्दात् शौण्डिके सर्पे च । पु० न० । **ध्वजः** । पु० । ध्वज--गतौ अच् प्रत्ययः । "ध्वजः स्यात् शौण्डिके पुमान् । न स्त्रियां तु पताकायां खट्वाङ्गे मेण्ढ्रचिह्नयोः" इति मेदिनी ॥ ८४ ॥ कमले पद्मे । कुष्ठे कुष्ठौषधे । तथा मुक्तायां जलजन्तुभेदे जलजमात्रे च **नीरजम्** । नीरे जायते । जन--जनने । डप्रत्ययः । "नीरजं कुष्ठपद्मयोः" इति मेदिनी ॥ हिंसा वधः । हरिद्रा स्वनामाख्यातः औषधिभेदः तयोः । तथा बले कर्पूरभेदे । पु० । व्याकुले । त्रि० । तूले च **पिञ्जा** । स्त्री० । पिजि--वधे, दाने च । अच् प्रत्ययः । "पिञ्जा तूलहरिद्रयोः । बले क्लीबे वधे पुंसि त्रिषु" इति मेदिनी । गुरोः पुत्रे बृहस्पतिपुत्रे । व्याघ्राटाख्ये पक्षिणि विघ्राटविहगे । चकारात् गोत्रप्रवर्तके मुनिभेदे **भारद्वाजः** । पु० ॥ ८५ ॥ द्रोणाचार्ये अगस्त्यमुनौ अपिशब्दात् वनकार्पास्याम् । स्त्री० । **भारद्वाजः** । पु० । बुधैः पण्डितैः ख्यातः कथितः इत्यर्थः । **भारद्वाजी**त्यप्यत्र । भरद्वाजस्य गोत्रापत्यम् । अण्प्रत्ययः । "भारद्वाजो गुरोः पुत्रे व्याघ्राटाख्य-

अगस्त्ये च हरीतक्यां रुजा स्याद्रोगभङ्गयोः ।
मुस्तेऽपि वनजो बीजं रेतस्तत्त्वार्थहेतुषु ॥ ८७ ॥
व्याजः शाठ्येऽपदेशे च स्वेदरक्तात्मजाः स्वजाः ।
निसर्गे सहजः पुंसि सहोत्थे वाच्यलिङ्गकः ॥ ८८ ॥
सन्नद्धसम्भृतौ सज्जौ हिमजा पार्वती शची ।

इति जान्ताः ।

अज्ञस्त्रिषु जडे मूर्खे कृतज्ञः कुक्कुरेऽपि च ॥ ८९ ॥

विहङ्गमे । भार्ङ्गीजी वनकार्पास्यां ना द्रोणकृमिभेदयोः" इति मेदिनी । खगः पक्षी । ओषधी फलपाकान्तव्रीहियवादिः तयोः । **भृङ्गराजः** । पु० । भृङ्गान् रञ्जयति । रञ्ज-रागे । णिच्-कनिन्प्रत्ययौ । निपातनात् साधुः । अथवा भृङ्गानां राजा इति षष्ठीतत्पुरुषः । "अथ भृङ्गराज उक्तः पक्षिविशेषे, च मार्कवे भ्रमरे" इति मेदिनी ॥ लङ्घने आहाराभावे । अगस्त्ये स्वनामाख्याते मुनौ । हरीतक्यां च **मुनिभेषजम्** । न० । मुनीनां भेषजमिव । "मुनिभेषजमागस्त्ये हरीतक्यां च लङ्घने" इति मेदिनी ॥ रोगः व्याधिः । भङ्गः भेदः, खण्डो वा । तयोश्च **रुजा** । स्यात् । स्त्री० । रुज—भङ्गे, रोगे च । अङ्प्रत्ययः । टाप् च । "रुजा । रोगे च भङ्गे" इति मेदिनी ॥ मुस्ते मुस्तकभेषजे । अपिशब्दात् पद्मे वनसूरणे च । पु० । अश्वगन्धायां गन्धपत्रायां वनकार्पास्यां मुद्गपर्ण्याम् । स्त्री० । वनजातमात्रे । त्रि० । **वनजः** । पु० । वने जलेऽरण्ये वा जायते । जन—जनने । डप्रत्ययः । "वनजा मुद्गपर्ण्यां ना मुस्तके क्लीबमम्बुजे" इति मेदिनी॥ रेतः शुक्रम् । तत्त्वार्थः तत्त्वावधानम् । हेतुः कारणम् । तत्र च । तथा अंकुरे मज्जनि अव्यक्तगणितभेदे मन्त्रभेदे धान्यादेः फलादौ च । **बीजम्** । न० । वी—कान्तौ, जनने । क्विप्रत्ययः । जन—जनने । डप्रत्ययः । कर्मधारयः । "बीजमङ्कुरकारणे । हेतुतत्त्वाधानशुक्रे" इति मेदिनी ॥८६॥८७॥ शाठ्ये शठतायाम् । अपदेशे कारणान्तरेण प्रवृत्तस्य कारणान्तरेणोद्भवनरूपे च । **व्याजः** । पु० । विपूर्व अज—गमने, क्षेपणे च । घञ्प्रत्ययः । वीभावाभावः । "व्याजः शाठ्येऽपदेशे" इति मेदिनी । "व्याजः शाठ्यापदेशयोः" इति विश्वः ॥ स्वेदः घर्मजलं, पाकभेदो वा । रक्तः रुधिरः । आत्मजः पुत्रः तत्र च । तथा कन्यायाम् । स्त्री० । आत्मजाते च । त्रि० । **स्वजः** । पुं० न० । स्वस्मात् देहात् आत्मनो वा जायते । जन—जनने । डप्रत्ययः । "स्वजः प्रस्वेदपुत्रयोः । क्लीबं रक्ते" इति मेदिनी ॥ निसर्गे स्वभावे, स्वरूपे वा । सहोत्थे सहोदरे । त्रि० । तथा ज्योतिषोक्तजन्मलग्नात् तृतीये स्थाने च । **सहजः** । पु० । सह जायते । जन—जनने। डप्रत्ययः । "सहजस्तु निसर्गे ना सहोत्थे पुनरन्यवत्" इति मेदिनी ॥ ८८ ॥ सन्नद्धः कृतसन्नाहः, धृतवर्म वा । सम्भृतः सम्यक् पोषणं तयोः । तथा उद्युक्ते निभृते आयोजने वेशे च **सज्जः** । त्रि० । सज—गतौ । अच्प्रत्ययः। "सज्जः स्यात्सन्नद्धे सम्भृते त्रिषु" इति मेदिनी । पार्वती दुर्गा ।

संज्ञा सूर्यप्रियायां च सर्वज्ञः शङ्करे जिने ।

इति ज्ञान्ताः ॥

अरिष्टं सूतिकागारे तक्रेऽपि च पुमांस्त्वयम् ॥ ९० ॥

काके निम्बे च लशुने गर्त्ते कूपे खलेऽवटः ।

अत्यर्थक्षौमयोरट्टः क्रताविष्टं प्रिये त्रिषु ॥ ९१ ॥

शची इन्द्राणी तयोः । **हिमजा** । स्त्री० । हिमाज्जायते । जन—जनने । डप्रत्ययः । टाप् च । "हिमजा तु शचीगौर्योः पुंसि मैनाकपर्वते" इति मेदिनी ॥ इति जकारान्ताः समाप्ताः ॥ अथ ज्ञान्तानाह ॥ जडे इष्टानिष्टानभिज्ञे । मूर्खे ज्ञानशून्ये, मूढे च । **अज्ञः** । त्रि० । न जानाति । नञ्पूर्वज्ञा—बोधने । कप्रत्ययः । "अज्ञस्तु जडमूर्खयोः" इति विश्वः ॥ कुक्कुरे शुनि । पु० अपिशब्दात् कृतोपकारज्ञातरि प्रत्युपकारे च **कृतज्ञः** । त्रि० । कृतं कृतोपकारं जानाति । ज्ञा—बोधने । कप्रत्ययः । "कृतज्ञः कुक्कुरे पुंसि मर्यादिन्यभिधेयवत्" इति मेदिनी ॥ ८९ ॥ सूर्यप्रियायां सूर्यपत्न्याम् । तथा चेतानायां बुद्धौ आख्यायां हस्ताद्यैरर्थसूचने गायत्र्याम् । स्त्री० । तथा पीतकाष्ठे कालीयके गन्धद्रव्ये च । न० । **संज्ञा** । स्त्री० । सम्पूर्वज्ञा—बोधने । अङ्प्रत्ययः, कप्रत्ययश्च । "संज्ञा नामनि गायत्र्यां चेतनारवियोषितोः । अर्थस्य सूचनायां च हस्ताद्यैरपि योषिति" इति मेदिनी ॥ शङ्करे शिवे । जिने बुद्धे च । **सर्वज्ञः** । पु० । सर्वं जानाति । ज्ञा—बोधने । कप्रत्ययः । "सर्वज्ञः शिवबुद्धयोः" इति मेदिनी ॥ इति ज्ञान्ताः समाप्ताः ॥ अथ टान्तानाह ॥ सूतिकागारे सूतिकागृहे । तक्रे चतुर्थांशजलयोगेन मथिते दध्नि । पु० । काके वायसे । निम्बे स्वनामाख्याते वृक्षे । लशुने च । अपिशब्दात् निपुणे वृषभासुरे अचलभेदे कङ्कपक्षिणि फेणिलवृक्षे अशुभे मरणचिह्ने चक्षुर्जले मद्ये च **अरिष्टम्** । न० । पु० । रिष—वधे । क्तप्रत्ययः । नादिबहुव्रीहिः । "अरिष्टो लशुने निम्बे फेणिले काककङ्कयोः । अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने चारिष्टमादेशिते त्रिषु" इति मेदिनी ॥ गर्त्ते भूमिच्छिद्रे । कूपे स्वनामख्याते जलाधारे । खले नीचे, अधमे च । **अवटः** पु० । अव—रक्षणे । गमने वा । अटन्प्रत्ययः । "अवटः स्यात्खले गर्त्ते कूपे कुहकजीविनि" इति मेदिनी ॥ अत्यर्थः अतिशयः । क्षौमः अतसीवल्कलजातं वस्त्रं तयोः । तथा प्रासादस्योऽपरि गृहे प्राचीरोपरिस्थसैन्यगृहे च । **अट्टः** । पु० । अट्ट—अनादरे । घञ्प्रत्ययः । "अट्टं भक्ते च शुष्के ना क्षौमेऽत्यर्थे गृहान्तरे" इति मेदिनी ॥ क्रतौ पुरुषप्रयत्ने, कर्तृव्यापारे वा । अपरे तु "एकाग्निकर्मभवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते । अग्निहोत्रं तपः सत्यं वेदानां चार्थपालनम् । आतिथ्यं वैश्वदेवं च प्राहुरिष्टम्" इत्युक्ते लक्षणे धर्मकार्ये च वदन्ति । प्रिये वल्लभे । तथा पूजिते अभिलषिते च **इष्टम्** । त्रि० । इष—गतौ । क्तप्रत्ययः । यज्ञादौ कर्मणि एरण्डवृक्षे संस्कारे च । पु० । यज—देवपूजने, दाने, सत्कृतौ च । क्तप्रत्ययः । "इष्टमाशिसनेऽपि स्यात्पूजिते प्रेयसि त्रिषु । सप्ततन्तौ पुमान् क्लीबं संस्कारे क्रतु-

केशटः शोणके विष्णौ कृपीटमुदरे जले ।
पुंश्चले कुण्डकीटः स्याज्जाराच्च ब्राह्मणीसुते ॥ ९२ ॥
समये च क्रियाकारे किलिञ्जशरयोः कटः ।
कोटिः सङ्ख्याऽपि करटो वाद्यभाण्डकुविप्रयोः ॥ ९३ ॥
कुलीरे कर्कटो राशौ कृष्टिः कर्षे बुधे पुमान् ।
अप्रियेऽपि कटुः कुम्भे कुटो ना भवने द्वयोः ॥ ९४ ॥
सुरायां स्त्री कीकटस्तु निःस्वे देशे मितम्पचे ।
खेटः सिङ्घाणके हीने गृष्टिर्धेन्वौषधीभिदोः ॥ ९५ ॥

कर्मणि" इति मेदिनी । ॥ ९० ॥ ९१ ॥ शोणके शोणकवृक्षे । विष्णौ तथा वरुणे ह्रीबेरे दैत्यभेदे च **केशटः** । पु० । क्लिश—उपतापे । अच्प्रत्ययः । ललोपश्च । कस्य ईषो वा । "केशटो हर्यजौ कणे" इति मेदिनी ॥ उदरे कुक्षौ जले तोये च । **कृपीटम्** । न० । कृप—युतौ, चित्रीकरणे वा । कीटन्प्रत्ययः । "कृपीटमुदरे तोये" इति मेदिनी ॥ पुंश्चले असद्वृति पुरुषे । जाराच्च ब्राह्मणीसुते जारात् ब्राह्मणीजाते पुत्रे । तथा चार्वाकवचनाभिज्ञे च **कुण्डकीटः** स्यात् । पु० । कुण्डेन कीट्यते बध्यते । कीट—बन्धे, वने च । अच्प्रत्ययः । "कुण्डकीटस्तु चार्वाकवचनाभिज्ञपूरुषे । जारजब्राह्मणीपुत्रदासीकामुकयोरपि" इति विश्वः ॥ ९२ ॥ समये काले । क्रियाकारे क्रियाकारके । किलिञ्जः नडादिरचितम् आसनम् । शरः बाणः तयोः । तथा हस्तिगण्डस्थले कटिपार्श्वे अतिशये तृणे शवे शवरथे ओषधौ श्मशाने च **कटः** । पु० । कट—वृतौ, वर्षणे वा । अच्प्रत्ययः । कर्मणि घो वा । "कटः श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शरे । समये गजगण्डे च" इति मेदिनी ॥ सङ्ख्या शतलक्षमितसङ्ख्या करटो गजगण्डः, काको वा तयोः । वाद्यभाण्डः तूर्यभाण्डः । कुविप्रो गर्हितब्राह्मणः तयोः । अपिशब्दात् धनुषोऽग्रभागे वस्तुमात्रस्याऽग्रभागे प्रकर्षायां संशयस्यालम्बने वादे निर्णयार्थं कृते पूर्वपक्षे च । **कोटिः** । स्त्री० । कुट—कौटिल्ये । इन्प्रत्ययः । कोटीत्यप्यत्र । "कोटिः स्त्री धनुषोऽग्रेऽश्रौ सङ्ख्याभेदप्रकर्षयोः" इति मेदिनी ॥ ९३ ॥ कुलीरे जलजन्तुभेदे । राशौ मेषादितश्चतुर्थे राशौ । तथा क्षुद्रामलके कट्फले कर्करेटौ पक्षिणि शाल्मलिवृक्षे च **कर्कटः** । पु० । कर्क—हासे । सौत्रः अटन्प्रत्ययः । "कर्कटो विहगान्तरे । राशिभेदे कुलीरे स्त्री वालुङ्क्यां शाल्मलीफले" इति मेदिनी ॥ कर्षे षोडशमाषके :माने, तन्मिते स्वर्णे वा । बुधे पण्डिते । पु० । **कृष्टिः** । स्त्री० । कृष—कर्षणे । क्तिच्प्रत्ययः । "अथ कृष्टिः स्यादाकर्षे स्त्री बुधे पुमान्" इति मेदिनी ॥ अप्रिये प्रियशून्ये । अपिशब्दात् दूषणे दुष्टकार्ये रसभेदे । त्रि० । चम्पके चीनकर्पूरे पटोले कटुकीलतायां च । स्त्री० । **कटुः** । पु० । कट—आच्छादने,: वर्षणे वा । उप्रत्ययः । "कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुँल्लिङ्गो रसमात्रके । त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च" इति मेदिनी ॥ कुम्भे घटे । पु० । भवने गृहे ।

सूकरे पुंसि घृष्टिः स्यात्स्पर्द्धाघर्षणयोः स्त्रियाम् ।
घोण्टा तु बदरे पूगे देहांशे वर्णने चटुः ॥ ९६ ॥
निःश्वासे दशनोच्छिष्टश्चुम्बे दन्तच्छदेऽपि च ।
परिमाणमुदोर्दिष्टिर्दिष्टः कालोपदिष्टयोः ॥ ९७ ॥
धाराटौ चातकहयौ कपाटेऽपि च निष्कुटः ।
कोटरेऽप्यथ पट्टः स्यात्फलके नृपशासने ॥ ९८ ॥

पु० स्त्री० । सुरायाम् स्त्री० । तथा दुर्गे पर्वते वृक्षे शिलाकुट्टे अस्त्रे च **कुटः** । पु० । कुट—कौटिल्ये, वैकल्ये वा । अच्प्रत्ययः । "कुटः कोटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदास्यां च सुरायां चित्रगुच्छके" इति मेदिनी ॥ निःस्वे निर्धने । देशे मगधदेशे । मितम्पचे कृपणे, परिमितपाचके वा । त्रि० । तथा अश्वे च **कीटकः** । पु० । किञ्चित् कुत्सितं कटति । कट—गतौ । अच्प्रत्ययः । पृषोदरादित्वात् साधुः । "कीटकः कृपणे निःस्वे त्रिषु पुम्भूम्नि नीवृति" इति मेदिनी ॥ सिङ्वाणके कफे । हीने अधमे । तथा सूर्यादिग्रहे । "यस्मिन्नृक्षे स्थिताः खेटाः" इति ज्योतिषम् । ग्रामभेदे मृगयायाम् । पु० न० । चर्मणि तृणे च । न० । **खेटः** । पु० । खेट—भोजने, गतौ वा । अच्प्रत्ययः । "खेटः कफे ग्रामभेदे चर्मण्यस्त्रवति त्रिषु" इति मेदिनी ॥ धेनुः सकृत्प्रसूता गौः । औषधीभिद् बदरानाम औषधीविशेषः तयोः । तथा वराहकान्तायां काश्मर्यां च **गृष्टिः** । स्त्री० । सकृद्गर्भं गृह्णाति । ग्रह—उपादाने । क्तिच्प्रत्ययः । पृषोदरादित्वान्निपातनात् साधुः । "अथ गृष्टिः सकृत्सूतगवीबदरयोः स्त्रियाम्" इति मेदिनी ॥ ९४ ॥ ९५ ॥ सूकरे वराहे । पु० । स्पर्धा पराभिभवेच्छा, संहर्षो वा। घर्षणं वस्तुद्वयोः एकतः स्पर्शः तयोः।तथा विष्णुक्रान्तायां वराह्यां च **घृष्टिः** स्यात् । स्त्री० । घृष—संघर्षे क्तिच्प्रत्ययः ।"घृष्टिः स्त्रीघर्षणस्पर्धाविष्णुक्रान्तासु ना किरौ" इति मेदिनी ॥ बदरे स्वनामाख्याते वृक्षभेदे । पूगे क्रमुके च । **घोण्टा** । स्त्री० । घुण—ग्रहणे, भ्रमणे च टप्रत्ययः । तस्य नेत्त्वम् । "घोण्टा तु बदरीपूगवृक्षयोरपि योषिति" इति मेदिनी ॥ देहांशे उदरे । वर्णने प्रियवाक्ये । तथा व्रतिनामासनभेदे च **चटुः** । पु०। चट—भेदे,वधे च । कुप्रत्ययः । "चटुश्चाटौ पिचिण्डेऽथ व्रतिनामासने पुमान्"इति मेदिनी॥९६॥ निःश्वासे मुखनासाभ्यां निर्गते वायौ । चुम्बे अधरादिचुम्बने । दन्तच्छदे दन्तोच्छिष्टे च । क्वचित् दन्तच्छिदे" इति पाठः । **दशनोच्छिष्टः** । पु० न० । दशनेनोच्छिष्टं यत्र । "रेवतीदशनोच्छिष्टपरिपूतपुटे" इति माघः । "दशनोच्छिष्टः पुंसि स्यान्निःश्वासाधरचुम्बयोः" इति मेदिनी ॥ परिमाणं तु लाङ्गूलप्रस्थादिभिर्द्रव्यस्य परिच्छेदः । मुद् हर्षः तयोः । **दिष्टिः** । स्त्री० । दिश देशने । क्तिच्प्रत्ययः । 'दिष्टिर्मुत्परिमाणयोः' इति मेदिनी । कालः प्रसिद्धः । उपदिष्टः उपदेशदाता तयोः । तथा भाग्ये च **दिष्टः** । पु० न० ।दिश—देशने । क्तप्रत्ययः । "दिष्टं दैवे पुमान्काले" इति मेदिनी॥९७॥चातकः पक्षिविशेषः।हयः अश्वः तयोः।तथा मेघे मत्तमातङ्गे च **धाराटः** ।

प्रत्याख्याते प्रेषिते च प्रतिसृष्टं त्रिलिङ्गकम् ।
पर्कटी प्लक्षवृक्षे च पूगादेश्च नवे फले ॥ ९९ ॥
वटी त्रिषु गुणे पुंसि न्यग्रोधे च कपर्दके ।
बर्बटयौ व्रीहिभिद्वेश्ये नटौ भरतकामुकौ ॥ १०० ॥
मोरटं गोर्नवे क्षीरेऽङ्कोटपुष्पेक्षुमूलयोः ।
म्लिष्टं म्लाने कुवचने मर्कटी शूकशिम्ब्यपि ॥ १०१ ॥

पु० । धारार्थमटति । धारं धारया वा अटति । धारशब्दोपपद अट—गतौ । अच्प्रत्ययः । "धाराटश्चातकाश्वयोः" इति मेदिनी ॥ कपाटे द्वारावरणेन वातरोधके स्वनामाख्याते काष्ठादौ । कोटरे वृक्षस्थगह्वरे । अपिशब्दात् गृहसमीपस्थे उपवने क्षेत्रे राज्ञाम् अन्तःपुरे च **निष्कुटः** । पु० । निस्पूर्व कुट—कौटिल्ये छेदने वा । क प्रत्ययः । "निष्कुटस्तु गृहोद्याने स्यात्केदारकपाटयोः" । इति मेदिनी ॥ फलके अस्त्रभेदे । नृपशासने राजाज्ञायाम् । तथा नगरे चतुष्पथे राजादिलेख्यपत्रे पीठे राजसिंहासने कौशेये उत्तरीयवस्त्रे पेषणे पाषाणे च पट्टः स्यात् । पु० । न० वा । पट-गतौ । क्तप्रत्ययः । नेट् । ट वा । तस्य नेत्त्वम् । "**पट्टः** पेषणपाषाणे व्रणादीनां च बन्धने । चतुष्पथे तु राजादिशासनान्तरपीठयोः" इति मेदिनी ॥ ९८ ॥ प्रत्याख्याते निराकृते, दूरीकृते वा । प्रेषिते कृतप्रेषणे च । **प्रतिसृष्टम्** । त्रि० । प्रतिपूर्व सृज—विसर्गे । क्तप्रत्ययः । "प्रतिसृष्टः प्रेषिते स्यात्प्रत्याख्याते च वाच्यवत्" इति मेदिनी ॥ प्लक्षवृक्षे स्वनामाख्याततरुभेदे । पूगादेः क्रमुकादेश्च । नवे फले नूतने फले च । **पर्कटी** । पु० । स्त्री० वा । पृच—सम्पर्के । अटिनिप्रत्ययः निपातनात् कुत्वम् । "पर्कटी नूतनफले पूगादेः प्लक्षपादपे", इति मेदिनी ॥ ९९ ॥ गुणे गोलाकारे पदार्थे । त्रि० । न्यग्रोधे वटतरौ कपर्दके वराटके च । **वटी** । पु० स्त्री० वा । वट—वेष्टने । अच्प्रत्ययः । "वटी त्रिषु गुणे पुंसि स्यान्न्यग्रोधकपर्दयोः" इति मेदिनी ॥ व्रीहिभिद् व्रीहिभेदः, राजमाषो वा । वेश्या पण्ययोषित् । तयोश्च । **बर्बटी** । पु० । बर्ब—गतौ । अटिनिप्रत्ययः । क्वचित् "वर्वटी" इति पाठः । बर्बटी पण्ययोषायां व्रीहिभेदेऽपि योषिति" इति मेदिनी ॥ भरतः नाटकादिदृश्यकाव्याभिनयकर्ता मुनिः । कामुकः मैथुनकामयनातिशयवान् । तयोश्च । तथा नर्तकभेदे जायाजीविनि वर्णसङ्करभेदे अशोकवृक्षे शोणाकवृक्षे नले किष्कुपर्वणि गोदन्तहरिताले च **नटः** । पु० । नट—नृत्ये । अच्प्रत्ययः । "नटी नलौषधौ स्त्री स्याच्छैलूषाशोकयोः पुमान्" इति मेदिनी ॥ १०० ॥ गोर्नवे क्षीरे सप्तरात्रोषितक्षीरे । केचित्तु "नूतने क्षीरे" इति पठन्ति । अङ्कोटः पीतवर्णसारः गन्धयुक्तपुष्पः दीर्घकण्टयुक्तः रक्तवर्णफल इति ख्यातो वृक्षः तस्य पुष्पं । इक्षुमूलं प्रसिद्धं तयोः । तथा मूर्वालतायां च **मोरटम्** । न० । मुर—वेष्टने । अटन् प्रत्ययः । "मोरटं तु भवेदिक्षुमूलाङ्कोटप्रसूनयोः । सप्तरात्रात्परक्षीरे मूर्विकायां तु मोरटे" इति मेदिनी ॥ म्लाने मलिने म्लानयुक्ते वा । त्रि० । कुवचने गर्हितवचने, अविस्पष्टवाक्ये वा । **म्लिष्टम्** । न० । म्लेच्छ-

लाटोंऽशुके च देशे च व्युष्टं कल्ये त्रिषूषिते ।
पथि वास्तुनि वाटः स्याद्विकटं विकृतं बृहत् ॥ १०२ ॥
वर्कराटः कटाक्षे च स्त्रीणां स्तननखक्षते ।
भद्रप्रेषणयोर्विष्टिर्वर्णाटौ कामिगायनौ ॥ १०३ ॥
विटोऽद्रौ लवणे षिड्गे मूषिके खदिरेऽपि च ।
पाश्वलौहे श्रुतिकटः प्रायश्चित्तभुजङ्गयोः ॥ १०४ ॥

शब्दात् क्तप्रत्ययः । निपातनात् साधुः । "म्लिष्टं त्रिष्वव्यक्तवाचि म्लाने" इति मेदिनी ॥ शूकशिम्बी कपिकच्छू तस्याम् । अपिशब्दात् अपामार्गे अजमोदायां करञ्जभेदे वानरयोषिति च **मर्कटी** । स्त्री० । मर्कटोस्त्यस्याः । स्निग्धत्वेन अच्प्रत्ययः । गौरादित्वात् ङीप् । "अथ मर्कटी । करञ्जमिच्छूकशिम्ब्योः पुंसि वानरलूतयोः" इति मेदिनी ॥ १०१ ॥ अंशुके वस्त्रे । देशे स्वनामाख्याते देशभेदे । चकारात् जीर्णालङ्कारे विदग्धपुरुषे च **लाटः** । पु० । लट-संज्ञायाम् । घञ्प्रत्ययः । "लाटो देशान्तरे शुके" इति मेदिनी ॥ कल्ये प्रभाते । उषिते पर्युषिते । तथा फले दिवसे दग्धे च । न० । **व्युष्टम्** । त्रि० विपूर्व उष-दाहे । क्तप्रत्ययः । विपूर्ववस-निवासे । क्तप्रत्ययः । इड्भावो वा । "व्युष्टं कल्ये त्रिषूषिते" इति मेदिनी ॥ पथि मार्गे । वास्तुनि वास्तुभूमौ । स्त्री० । तथा वृतिस्थाने च **वाटः** स्यात् । पु० । वट-वेष्टने । घञ्प्रत्ययः । "वाटो मार्गे वृतिस्थाने स्यात्कुटीवास्तुनोः स्त्रियाम्" इति । मेदिनी ॥ विकृतं विकारयुक्तम् । बृहत् विशालं तत्र च । तथा विस्फोटके साकरुण्डवृक्षे सुन्दरे दन्तुरे च । त्रि० । **विकटम्** । न० । विपूर्वकट-गतौ । अच्प्रत्ययः । "विकटः सुन्दरे प्रोक्तो विशालविकारयोरपि" इति विश्वः ॥ १०२ ॥ कटाक्षे अपाङ्गदृष्टौ । स्त्रीणां नारीणां स्तननखक्षते पयोधरयोः भर्तुर्दन्तनखक्षते । चकारात् तरुणसूर्यकिरणे च । **वर्कराटः** । पु० । वृक-गतौ । अटन्प्रत्ययः । "वर्कराटः कटाक्षे स्यात्तरुणादित्यरोचिषि। नारीपयोधरोत्सङ्गकान्तदन्तनखक्षते" इति मेदिनी ॥ भद्रं मङ्गलम् । प्रेषणं प्रेरणं तयोः । तथा वेतनं विनाभारादिवहनजन्ये क्लेशे वेतने कर्मणि । वर्षेण तिथ्यर्धात्मककरणमध्ये सप्तमे करणे कर्मकरे भृत्ये वेतनं विना कर्मकरे च । पु० । **विष्टिः** । स्त्री० । विश-उपवेशने । क्तिन्प्रत्ययः । क्तिच् वा । "विष्टिः कर्मकरे भद्रे प्रेषणे वेतनेऽपि च" इति विश्वः । कामी कामवान् पुरुषः । गायनः गानोपजीवी । तयोश्च **वर्णाटः** । पु० । वर्णैनाटति । वर्णशब्दपूर्वक अट-गतौ । अच् प्रत्ययः । "वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने" इति मेदिनी ॥ ॥ १०३ ॥ अद्रौ पर्वतभेदे । लवणे लवणविशेषे । षिड्गे परस्त्रीषु लोलुपे । मूषिके उन्दुरौ । खदिरे स्वनामाख्याते वृक्षे। अपिशब्दात् जारे शृङ्गाररसनायकानुचरे धूर्ते नारङ्गवृक्षे च **विटः**। पु० । विट-आक्रोशे । कप्रत्ययः । "विटोऽद्रौ लवणे षिड्गे मूषिके खदिरेऽपि च" इति मेदिनी । तथैव विश्वः ॥ पाश्वलौहे लौहं धातुः तेषु पञ्चसु धातुषु । तदुक्तम् । "सुवर्णं रजतं

स्फुटिः स्फोटे च कर्कट्यां हृष्टः प्रतिहतेऽपि च ।
इति टान्ताः ॥
वैश्याद्द्विजन्मजेऽम्बष्ठः पाठायूथिकयोः स्त्रियाम् ॥ १०५ ॥
काष्ठा कालेऽपि कोष्ठस्तु स्वकीयेऽप्यथ सुध्वनौ ।
ग्रीवादेशेऽपि कण्ठः स्यात्कुष्ठं रोगौषधीभिदोः ॥ १०६ ॥
दात्यूहे कालकण्ठः स्याच्छिवखञ्जनयोरपि ।
ज्येष्ठो मासि च वृद्धे च ज्येष्ठा च गृहगोधिका ॥ १०७ ॥

ताम्रं रङ्गं नागं तथैव च । पञ्चलौहमिति प्रोक्तम्'' इति । "प्रायश्चित्तं पापक्षयसाधनत्वेन विधिबोधितं कर्मचान्द्रायणादि । तथा चाहुः प्राञ्चः । "प्रायो नामतपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्''इति । भुजङ्गः अहिः । तयोश्च **श्रुतिकटः।** पु० । श्रुतिं श्रवणं कटति । कट—गतौ, आच्छादने वा । अच्प्रत्ययः । केचित्तु " श्रुतिकटुः'' इति पठन्ति । "अथ श्रुतिकटः पाञ्चलौहेऽहौ पापशोधने'' इति मेदिनी ॥ १०४ ॥

स्फोटे पादस्फोटरोगे । कर्कट्यां स्वनामाख्यातफले च । **स्फुटिः** । स्त्री० । स्फुट—विकाशे:-हिंसे वा । इन्प्रत्ययः । वा ङीप् । "स्फुटिर्योषित्पादस्फोटामयेऽपि च । निर्भिन्नकर्कटीसस्ये'' इति मेदिनी ॥ प्रतिहते प्रतिघाते । अपिशब्दात् प्रीते जातहर्षे जातरोमाञ्चे विस्मिते च **हृष्टः।** त्रि० । हृष—हर्षे, चित्तोत्साहे वा । क्तप्रत्ययः । "हृष्टो रोमाञ्चितेऽपि च । जातहर्षे प्रहसिते विस्मितेऽप्यभिधेयवत्'' इति मेदिनी ॥ टकारान्ताः समाप्ताः॥ अथ ठान्तानाह ॥ वैश्यायां वैश्यकन्यायाम् । द्विजन्मजे विप्रात् जाते सङ्कीर्णवर्णे । पाठायां यूथिकायां च । स्त्री० । तथा चिकित्सके देशभेदे हस्तिपके च **अम्बष्ठः** । पु० । अम्बाय चिकित्सकशब्दाय तत्प्रख्यापनार्थं तिष्ठतेऽभिप्रेति । स्था—गतिनिरोधे । कप्रत्ययः । षत्वम् । "अम्बष्ठो देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च'' इति मेदिनी ॥१०५॥ काले अष्टादशनिमेषात्मके काले । अपिशब्दात् दिशि दारुहरिद्रायां स्थितौ पर्यवसानभूमौ उत्कर्षे सीमायां च **काष्ठा** स्त्री० । काश—दीप्तौ । क्थन्प्रत्ययः । "काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्'' इति मेदिनी ॥ स्वकीये आत्मीये । त्रि० । अपिशब्दात् गृहमध्ये उदरमध्ये धान्यादिस्थापने कुशूले च **कोष्ठः** । पु० । कुष—जनने, भेदने वा । थन्प्रत्ययः । "कोष्ठः कुशूले चात्मीये मध्ये कुक्षेर्गृहस्य च'' इति मेदिनी ॥ सुध्वनौ सुन्दररावे । ग्रीवादेशे ग्रीवापुरोभागे । अपिशब्दात् मदनवृक्षे समीपे होमकुण्डाद्बाह्येऽङ्गुलिमितस्थाने च **कण्ठः** स्यात् । पु० । कण—गतौ, निमीलने वा । ठप्रत्ययः । यस्य नेत्त्वम् । कठि—भेदने । अच्प्रत्ययो वा । "कण्ठो गले सन्निधाने ध्वनौ मदनपादपे'' इति मेदिनी ॥ रोगः स्वनामाख्यातरोगविशेषः । औषधिभिद् पुष्करम । तयोश्च **कुष्ठम्** । न० । कुष्णाति देहं रोगं वा कुष—निष्कर्षे । क्थन्प्रत्ययः । "कुष्ठं रोगे पुष्करेऽस्त्री'' इति मेदिनी ॥ १०६ ॥ दात्यूहे स्वनामाख्यातपक्षिणि ।

अम्ललोण्यां दन्तशठा ना जम्बीरकपित्थयोः ।
प्रकोष्ठौ बाहुगेहांशौ वरिष्ठं मरिचेऽपि च ॥ १०८ ॥
ताम्रे चोरुतरे चाऽथ मध्यस्थखलयोः शठः ।
शोठोऽलसे च मूर्खे च सूत्रकण्ठो द्विजन्मनि ॥ १०९ ॥
कपोतविहगेऽपि स्यात्प्रश्न्यां च प्रसभे हठः ।

इति ठान्ताः ॥

शिवः नीलकण्ठः । खञ्जनः स्वनामाख्यातो विहगः तयोः । अपिशब्दात् पीतसारे मयूरे कलविङ्के च **कालकण्ठः** । पु० । कालः कण्ठो यस्य । "कालकण्ठस्तु दात्यूहे कलविङ्के च खञ्जने । मयूरे पीतसारे च स्यात्खण्डपरशौ पुमान्" इति मेदिनी ॥ मासि चित्रावधिके तृतीये मासि । वृद्धे अतिवृद्धे । चकारात् श्रेष्ठे अग्रजे च **ज्येष्ठः** । पु० । अतिशयेन वृद्ध इति वृद्धशब्दात् इष्ठन्प्रत्ययः । ज्यादेशः । "ज्येष्ठः श्रेष्ठेऽतिवृद्धे च त्रिषु मासान्तरे पुमान्" इति मेदिनी । गृहगोधिका स्वनामाख्याता जन्तुविशेषेति प्रसिद्धा । (टिकटिकी) तस्याम् । चकारात् ज्येष्ठभगिन्यां । वयोज्येष्ठायां ज्येष्ठस्य पत्न्यां गङ्गायाम् अलक्ष्म्याम् । अश्विन्यधिके अष्टादशे नक्षत्रे च **ज्येष्ठा** । स्त्री० । अतिशयेन वृद्धेति वृद्धशब्दात् इष्ठन्प्रत्ययः । ज्यादेशः । "ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः" इति मेदिनी ॥१०७॥ अम्ललोण्याम् अमरुल इति ख्याते लताभेदे चाङ्गेर्यां वा । जम्बीरः प्रसिद्धः । कपित्थः स्वनामाख्यातो वृक्षः तयोः । तथा कर्मरङ्गे नारङ्गे च । पु० । **दन्तशठा** । स्त्री० । दन्तान् शठति छेदयति । शठ-छेदने । अच्प्रत्ययः। स्याद्दन्तशठो जम्बीरे कपित्थे कर्मरङ्गके। नागरङ्गेऽपि च पुमान्स्याच्चाङ्गेर्यांतु योषिति" इति मेदिनी॥ बाहुः कुर्परस्याऽधोभागस्थो मणिबन्धपर्यन्तो हस्तावयवः । गेहांशः गृहद्वारपिण्डः । तयोश्च **प्रकोष्ठः** । पु०। प्रगतः कोष्ठम । प्रादिसमासः ।"प्रकोष्ठो मणिबन्धस्य कर्पुरस्यान्तरेऽपि च । भूपकक्षान्तरेऽपि स्यात्" इति मेदिनी ॥ ताम्रे स्वनामाख्याते लोहे । उरुतरे अतिशयमहति उरुतमे । मरिचे स्वनामाख्याते वृक्षे । अपिशब्दात् तित्तिरिविहगे पु० । वरे । न०। आदित्यभक्तायाम् । स्त्री०। वरिष्ठम् त्रि० । अतिशयेन उरुः । इष्ठन्प्रत्ययः । वरादेशश्च।"वरिष्ठं मरिचेऽपि च । ताम्रे क्लीबं तित्तिरौ ना वरोरुतरयोरपि" इति मेदिनी मध्यस्थः मध्यस्थपुरुषः खलः धूर्तः तयोः । तथा तगरे कुङ्कुमे लौहे धुस्तूरे च **शठः** । पु० । शठ-दुष्टवचने, वधे वा । अच् प्रत्ययः । "शठो मध्यस्तपुरुषे धूर्तधुस्तूरयोरपि" इति मेदिनी॥ अलसे क्रियामन्दे । मूर्खे ज्ञानविरहिते च । **शोठः** । पु० । शुठ-गतिविघाते । घञ् प्रत्ययः। "शोठो मूर्खेऽलसेऽपि च" इति मेदिनी ॥ द्विजन्मनि विप्रे॥१०८॥१०९॥कपोतविहगे स्वनामाख्यातपक्षिणि।अपिशब्दात् खञ्जरीटे च **सूत्रकण्ठः**।पु०। सूत्रं कण्ठे यस्य।"सूत्रकण्ठः पुमान् विप्रे खञ्जरीटकपोतयोः" इति मेदिनी॥प्रश्न्यां कुम्भिकायाम् । प्रसभे बलात्कारे च **हठः**।पु०। हठ-बलात्कारे । प्लुतौ वा । अच्प्रत्ययः । "हठः स्यात्प्रसभे प्रश्न्याम्" इति मेनिदी ॥ इति

प्राण्यङ्गकोषयोरण्डं कुष्माण्डौ फलभिद्गणौ ॥ ११० ॥
कुण्डं खातोखयोर्जारजे ना कुण्डी कमण्डलौ ।
सिंहोक्तौ स्त्री विषे क्ष्वेडः पशौ क्रोडो न नोरसि ॥ १११ ॥
खण्डोऽस्त्री शकले नेक्षुविकारमणिदोषयोः ।
गण्डः कपोले पिटके श्रेष्ठे गण्डकयोगयोः ॥ ११२ ॥
चण्डौषधिः खरश्चण्डो दण्डौ सैन्यार्कपार्श्वगौ ।
व्यथा कृपा च पीडे द्वे पाण्डुः कुन्तीपतौ सिते ॥ ११३ ॥

ठकारान्ताः समाप्ताः॥अथ डान्तानाह ॥ प्राण्यङ्गं पुंसोऽङ्गावयवाः। कोषः पक्षिडिम्बः तयोः। तथा वीर्ये च **अण्डम्** । न० । अमन्ति संप्रयोगं यान्ति अनेन । अम्—गतौ । डप्रत्ययः । टवर्गादित्वेऽपि डस्य नेत्त्वम् ॥ फलभिद् स्वनामाख्यातफलविशेषः गणः । शिवस्य गणदेवताभेदः । तयोः । तथा ओषधौ उमायां । कर्कारौ च **कुष्माण्डः** । पु० । ईषत् उष्मा पित्तहेतुत्वात् अण्डेषु बीजेषु यस्य । शकन्ध्वादित्वात् पररूपम् । कुष्माण्डकोऽप्यत्र । कुष्माण्डीत्यप्यत्र लताभेदे । ऋग्वेदप्रसिद्धेषु ऋग्विशेषेषु । "कुष्माण्डीं पावमानीं च" इति स्मृतिः । "कुष्माण्ड्युमायां स्त्री पुंसि कर्कारौ च गणान्तरे । भ्रूणान्तरे" इति मेदिनी ॥ १०८—११०॥ खातः गर्तः, जलाशयो वा । उखा स्थाली तयोः । तथा मानभेदे पात्रे होमीयाग्निस्थापनस्थानभेदे च । पु० न० । **कुण्डम्** । न० । कुडयते । कुडि—भेदे, दाहे वा । घञ्प्रत्ययः । "कुण्डमग्न्यालये मानभेदे देवजलाशये" इति मेदिनी॥ जारजे जीवति भर्तरि जारात् जाते पुत्रे। पु० ।कमण्डलौ संन्यासिनां जलपात्रभेदे च । **कुण्डी** । स्त्री० । कुडि- भेदे,दाहे वा । घञ्प्रत्ययः । ङीप् च । "कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान्" इति मेदिनी ॥ सिंहोक्तौ सिंहनादे । स्त्री० । विषे वत्सनाभविषे, गरलमात्रे वा । तथा पीतघोषाद्रुमे वर्णात्मके ध्वनौ घोषातकीपुष्पे दुरासदे कुमिने च **क्ष्वेडः** । पु० । क्ष्विड—स्नेहे । अच्प्रत्ययः । "क्ष्वेडो ध्वनौ कर्णामये विषे । क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति" इति मेदिनी ॥ पशौ शूकरे । उरसि अश्वानामुरसि, भुजान्तरे वा । स्त्री०।तथा शनौ अङ्के राक्षसे वाराहीकन्दे। पु०स्त्री०। **क्रोडः** । पु० । क्रुड-बाल्ये । घञ्-प्रत्ययः । "क्रोडः शनौ शूकरे ना न पुमानङ्करक्षसोः" इति मेदिनी ॥ १११ ॥ शकले एकभागे । इक्षुविकारः खण्डशर्करा । मणिदोषः माणिक्यसञ्जातदोषः तयोः । तथा विड्लवणे च **खण्डः** । पु० । खडि-भेदेघञ्प्रत्ययः । "खण्डोऽस्त्री शकले नेक्षुविकारमणिदोषयोः" इति मेदिनी ॥ कपोले हस्तिकपोले, कपोलमात्रे वा । पिटके वंशपत्रादिनिर्मिते पात्रभेदे । श्रेष्ठे गण्डकः स्वनामाख्यातः पशुः अवच्छेदो वा । योगः ज्योतिषोक्तविष्कम्भादियोगभेदः तयोः। तथा चिह्ने हयभूषणे बुद्बुदे स्फोटके ग्रन्थौ त्याज्ये वैवाहिकजन्मलग्नस्थे अश्विन्यादितारादण्डभेदे च **गण्डः**। पु०। गडि—सन्निचये । अच्प्रत्ययः । "गण्डः स्यात्पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे" इति मेदिनी ॥ ११२ ॥ चण्डौषधिः तिन्तिडीवृक्षः । खरः तीक्ष्णः । तयोः ।

पिण्डः सान्द्रे गृहांशेऽङ्गे पण्डः षण्डे मतौ स्त्रियाम् ।
स्तम्बे शस्ते प्रकाण्डोऽस्त्री वरण्डो वदनामये ॥ ११४ ॥
समूहे चान्तरावेद्यां मण्डः स्यात्सारपिच्छयोः ।
एरण्डे मस्तुनि क्लीबे मार्तण्डौ खगदंष्ट्रिणौ ॥ ११५ ॥

तथा यमदूते दैत्यभेदे तीक्ष्णतावति अतिकोपने च । त्रि० । **चण्डः** । पु० । चडि-कोपे । अण्प्रत्ययः । "चण्डो ना तिन्तिडीवृक्षे यमकिङ्करदैत्ययोः" इति मेदिनी ॥ सैन्यः सेनासमुदायः । अर्कपार्श्वगः सूर्यानुचरः । तयोः । तथा लगुडे व्यूहभेदे प्रकाण्डे अश्वे कोणे मन्थनदण्डे षष्टिपलात्मके काले भूमिमानभेदे अर्थापहाररूपे राज्ञां चतुर्थोपाये यमे च **दण्डः** । पु० । न० । दण्ड-दण्डपातने । अच्प्रत्ययः । "दण्डोऽस्त्री लगुडे पुमान् । व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थनयोरपि । सैन्ये काले मानभेदे चण्डांशोः पारिपार्श्विके" इति मेदिनी ॥ व्यथा दुःखम् । कृपा दया तयोश्च । **पीडा** । स्त्री० । पीड—वधे, विलोडने वा । अप्रत्ययः । "पीडा कृपाशिरोमाल्यापमर्दसरलद्रुषु" इति मेदिनी ॥ कुन्तीपतौ कुन्ती युधिष्ठिरादिमाता शूरसेनराजस्य पृथुनाम्नी कन्या तस्याः पतिः चन्द्रवंशीयनृपतिः । तत्र च । सिते श्वेतवर्णे । तद्वत् । नागभेदे श्वेतहस्तिनि रोगभेदे पटोलवृक्षे च । पु० । माषपर्ण्याम् । स्त्री० । **पाण्डुः** । पु० । पडि—गमने । कुप्रत्ययः । निपातनाद्दीर्घः । "पाण्डुर्ना नृपतौ सिते" इति मेदिनी ॥ ११३ ॥ सान्द्रे संहते घने । गृहांशे गृहैकदेशे । अङ्गे देहैकदेशे । तथा सामगानां पितृभ्यो देये गोलाकारे अन्ने देहे गोले सिह्लके ओड्रू वृन्दे कवले गजकुम्भे मदनवृक्षे च । पु० । आजीवने लौहे यजुर्वेदिभिः पितृभ्यो देये श्राद्धे विल्वाकारे अन्ने च । न० । **पिण्डः** । त्रि० । पिडि—राशीकरणे । घञ्प्रत्ययः । अच् वा । "पिण्डो गोले बले सान्द्रे देहागारिकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । ओड्रूपुष्पे च पुंसि स्यात्क्लीबमाजीवनामयोः" इति मेदिनी ॥ षण्डे नपुंसके । पुं० । मतौ बुद्धौ । स्त्री० । तथा निष्फले च **पण्डः** । पु० । पण—व्यवहारे । डप्रत्ययः । तस्य नेत्त्वम् । "पण्डः षण्डे धियि स्त्री स्यात्" इति मेदिनी ॥ स्तम्बे वृक्षस्य मूलादारभ्य शाखान्ते भागे । शस्ते शंसनीये । न० । **प्रकाण्डः** । पु० । प्रकृष्टः काण्डः । प्रादिसमासः । "प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तरोः । शस्ते" इति मेदिनी ॥ वदनामये मुखरोगभेदे । समूहे राशौ । अन्तरावेद्यां मातङ्गयुद्धार्थं मध्यवेदौ च । **वरण्डः** । पु० । वृ—वरणे, सेवायां वा । अण्डच् प्रत्ययः । "वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः" इति मेदिनी ॥ सारं नवनीतं जलं वा । पिच्छः मयूरपुच्छः तयोः । एरण्डे स्वनामाख्याते वृक्षे । मस्तुनि दधिमण्डे । न० । तथा सर्वान्नानामग्ररसे आमलक्यां सुरायां शाकभेदे भूषायां च **मण्डः** । पु० । मन—बोधे, धृतौ वा । डप्रत्ययः । तस्य नेत्त्वम् । "मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि । आमलक्यां स्त्रियां मण्डोऽस्त्रियां सारपिच्छयोः" इति मेदिनी ॥ खगः सूर्यः, विहगो वा । दंष्ट्रिणी शूकरः, दंष्ट्रायुक्तो वा । तयोः । तथा मृताण्डजन्मनि मुनौ च । मार्तण्डः । पु० । मृते अण्डे भवः ।

राहौ दैत्यान्तरे मुण्डो मूर्ध्न्यस्त्री मुण्डिते त्रिषु ।
रण्डा स्याद्विधवौषध्योर्वितण्डा शाकभिद्यपि ॥ ११६ ॥
शिखण्डौ तु शिखाबर्हौ शुण्डा करिकरः सुरा ।

इति डान्ताः ॥

आषाढो व्रतिनां दण्डे मासे मलयपर्वते ॥ ११७ ॥
विचेष्टबालिशौ मूढौ राढा स्याद्दीप्तिदेशयोः ।
षण्डकञ्चुकिनौ षण्ढौ समूढः पुञ्जिते नवे ॥ ११८ ॥

अण्प्रत्ययः । शकन्ध्वादित्वात् पररूपम् । " मार्तण्डस्तपने क्रोडे " इति विश्वः । "मार्तण्डः क्रोडसूर्ययोः" इति मेदिनी ॥ ११४ ॥ ११५ ॥ राहौ राहुग्रहे । कचित्तु "बाहौ" इति पाठः । दैत्यान्तरे दैत्यभेदे । मूर्ध्नि मस्तके । पु० न०। मुण्डिते केशच्छेदिते । त्रि० । तथा नापिते बोले मुण्डायसे स्थाणुवृक्षे । पु० । महाश्रावणिकायां मुण्डरिकायां च । स्त्री० । **मुण्डः** । पु० । मुडि–केशादिच्छेदे, मर्दने वा । कर्मणि घञ्प्रत्ययः । " मुण्डो दैत्यान्तरे राहौ मूर्धमुण्डितयोरपि" इति विश्वः । "मुण्डो दैत्यान्तरे राहुग्रहे ना मुण्डिते त्रिषु । मुण्डा मुण्डीरिकायां स्यात् स्त्रियामस्त्री तु मूर्धनि" इति मेदिनी ॥ विधवा मृतपतिका स्त्री० । ओषधी मूषिकपर्णी तयोः । तथा धूर्ते विफले अर्द्धाङ्गविशिष्टतया छिन्नावयवे । त्रि । स्वार्थे कन् । अफलवृक्षादौ च **रण्डा** । स्यात् । स्त्री० । रण–गतौ, रवे वा । डप्रत्ययः । तस्य नेत्त्वम् । "रण्डा मूषिकपर्ण्यां च विधवायां च योषिति" इति मेदिनी ॥ शाकभिदि कलम्बीशाके । अपिशब्दात् स्वपक्षाव्यवस्थापनेन परपक्षमात्रनिराकरणे कथाभेदे शिलाह्वये करवीर्यां च । **वितण्डा** । स्त्री० । विपूर्वतडि–आहतौ । अप्रत्ययः । "वितण्डा वादभेदे स्यात्कचीशाके शिलाह्वये । करवीर्यामपि स्त्री स्यात्" इति मेदिनी ॥ ११६ ॥ शिखाचूडा । बर्हः बर्हं वा मयूरपिच्छम् । तयोश्च । **शिखण्डः** । पु० कचित् शिखाण्ड इति पाठः । शिखाममति । अम–गतौ । डप्रत्ययः । तस्य नेत्त्वम् । षष्ठीतत्पुरुषः । वा शकन्ध्वादित्वात् पररूपम् । "शिखण्डो बर्हचूडयोः" इति मेदिनी ॥ करिकरः हस्तिशुण्डः । सुरा मद्यः । तयोः । तथा मदनिर्झरे । पु० । मद्यपानगृहे । वेश्यायां सुरायां नलिन्यां कुट्टिन्यां जलहस्तिन्यां च । स्त्री० । **शुण्डा** । स्त्री० । शुण–गतौ । डप्रत्ययः । तस्य नेत्त्वम् । "शुण्डा पानगृहे मता । अप्यम्बुहस्तिनीवेश्याहस्तिहस्तसुरासु च" इति मेदिनी ॥ इति डकारान्ताः समाप्ताः ॥ अथ ढान्तानाह ॥ व्रतिनां–दण्डेव्रतधारिणां–दण्डे । मासे स्वनामाख्याते चतुर्थे मासे । मलयपर्वते दक्षिणस्थे पर्वतभेदे च । **आषाढः** । पु० । आषाढी पूर्णिमास्मिन् मासे । अण् प्रत्ययः । "आषाढो व्रतिनां दण्डे मासे मलयपर्वते" इति मेदिनी॥ ११७ विचेष्टः बालः । बालिशः मूर्खः, शिशुर्वा । तयोः । तथा जडे औरसे च **मूढः** । त्रि० । मुह–मोहे, वैचित्ये वा । क्तप्रत्ययः । ढत्वम् । "मूढस्तु तन्द्रिते बाले" इति मेदिनी ॥ दीप्तिः शोभा । देशः राढा इति ख्यातदेशभेदः तयोः । तथा पुरीभेदे "गौडं राष्ट्रमनुत्तमं निरुपमा

भुग्नेऽनुपप्लुतेऽप्येष वाच्यलिङ्ग उदीर्यते ।
इति ढान्ताः ॥
अरुणो भास्करेऽनूरौ मञ्जिष्ठातिविषारुणा ॥ ११९ ॥
त्रिष्वारक्ते व्याकुलेऽथ सूक्ष्मे व्रीह्यन्तरेऽप्यणु ।
कीलकाग्रयाश्रिसीमासु स्यादाणिवदणिर्द्वयोः ॥ १२० ॥
अभीक्ष्णं तु भृशे नित्ये स्यादिन्द्राणीन्द्रयोषिति ।
स्त्री बन्धे सिन्धुवारे च चक्षुर्दर्शनमीक्षणम् ॥ १२१ ॥

तत्राऽपि राढापुरी" इति प्रबोधचन्द्रोदयः । **राढा** । स्त्री० । रह-त्यागे । घञ्प्रत्ययः । ढत्वम् । "राढा स्त्री सूक्ष्मशोभयोः" इति मेदिनी ॥ पण्डः नपुंसकम् । कञ्चुकी राज्ञामन्तःपुराधिकारी, द्वारपालो वा । तयोश्च । **षण्ढः** । पुं० । "शण्ढः" इति क्वचित् पाठः । षण-दाने, संभक्तौ वा । डप्रत्ययः । तस्य नेत्त्वम् । पृषोदरादित्वात् षत्वम्, शत्वं वा । "षण्ढः स्यात्पुंसि गोपतौ । आकृष्टाण्डे वर्षवरे तृतीयाप्रकृतावपि" इति मेदिनी ॥ पुञ्जिते राशीकृते । नवे सद्यो जाते ॥ भुग्ने रोगादिना कुटिलीकृते । अनुपप्लुते अनुपद्रुते, उपपीडरहिते वा । क्वचित् "निरुत्प्लवे" इति पाठः । तथा दमिते कृतविवाहे शोधिते मूढसहिते च **समूढः** । त्रि० । वाच्यलिङ्गः अभिधेयलिङ्गः । उदीर्यते कथ्यते । सम्पूर्वऊह-वितर्के, वह-प्रापणे वा । क्तप्रत्ययः । "समूढः पुञ्जिते भुग्ने सद्योजातेऽनुपप्लुते" इति मेदिनी । इति ढकारान्ताः समाप्ताः ॥ अथ णान्तानाह ॥ भास्करे सूर्ये । अनूरौ सूर्यसारथौ । तद्वत् गुडे सन्ध्यारागे निःशब्दे दानवभेदे कुष्ठभेदे पुन्नागवृक्षे अव्यक्तरागे च । पु० । कुङ्कुमे सिन्दूरे च । न० । **अरुणः** । पु० । मञ्जिष्ठायाम् अतिविषायां तथा नदीभेदे श्यामाकायां कदम्बपुष्पायाम् । स्त्री० । आरक्ते कृष्णमिश्रितरक्ते वर्णे । पु० । तद्वति च । त्रि० । व्याकुले च **अरुणा** । स्त्री० । ऋ-गतौ । उनन् प्रत्ययः । "अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्टभेदे ना गुणिनि त्रिषु । अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासु च" इति मेदिनी ॥ सूक्ष्मे सूक्ष्मपरिमाणवति । व्रीह्यन्तरे चिनाकाडनीश्यामाप्रभृतिसूक्ष्मधान्ये । अपिशब्दात् क्षुद्रे लेशे च स्त्रियाम् अणवी च । **अणुः** । पु० । "अणुर्व्रीहिविशेषे स्यात्पुंसि सूक्ष्मेऽभिधेयवत्" इति मेदिनी ॥ कीलकः आरा इति ख्यातः रथचक्राग्रस्थितः कीलकः । अग्रीः अग्रभागः कोटिः । आश्रिः आश्रयः । सीमा अण्डकोषः, मर्यादा वा । तत्र च । आणिवत् **अणिः** स्यात् । पु० स्त्री० । अणति शब्दायते । अण-शब्दे । इन्प्रत्ययः । अत्रादेर्दीर्घतापीष्यते । तेन आणिः आणी च "आणिराणिवदक्षाग्रकीलाश्रिसीमसु द्वयोः" इति मेदिनी ॥ ११८-१२० ॥ भृशे अतिशये । नित्ये सतते । तद्वति द्रव्ये च । **अभीक्ष्णम्** । त्रि० । अभि क्ष्णौति । क्ष्णु-तेजने । अप्रत्ययः । दीर्घः । "अभीक्ष्णं भृशे नित्येऽथ तद्युक्तक्रिययोरपि" इति मेदिनी । एष अभीक्ष्णशब्दस्तु अव्ययश्च भवति । अजयस्तु अभीक्ष्णशब्दमनव्ययमप्याह । "अभीक्ष्णं तु

उन्मूलनेऽप्युद्धरणमुष्णं दक्षेऽपि नाऽऽतपे ।
साधने गीतनृत्यप्रभेदे कायस्थकर्म्मणि ॥ १२२ ॥
करणं पुंसि सङ्कीर्णे कल्याणं काञ्चने शुभे ।
कृष्णो वर्णे हरौ व्यासे कृष्णं मरिचलोहयोः ॥ १२३ ॥
पिप्पली द्रौपदी कृष्णा हस्तसूत्रेऽपि कङ्कणम् ।
श्रुतिराधेययोः कर्णः पिप्पल्यां जीरके कणा ॥ १२४ ॥

पौनःपुन्ये सर्वदार्थे च दृश्यते'' इति अनव्ययप्रकरणे पाठात् ॥ इन्द्रयोषिति शचीनाम्न्यामिन्द्रपत्न्याम्। स्त्रीबन्धे स्त्रीकरणे । सिन्धुवारे स्वनामाख्याते वृक्षे। चकारात् स्थूलैलायां सूक्ष्मैलायां गौर्यादिषु षोडशमातृकासु मध्ये आद्यायां मातृकायां च । **इन्द्राणी** । स्त्री० । इन्द्रस्य पत्नी । ङीप् । आनुक् च । "इन्द्राणी करणे स्त्रीणां पौलोमीसिन्धुवारयोः" इति मेदिनी ॥ चक्षुर्नेत्रम्" दर्शनं चक्षुःपथसम्मुखीकरणम् । तयोश्च । **ईक्षणम्** । न० । ईक्ष–दर्शने । भावे ल्युट्प्रत्ययः । "ईक्षणं दर्शने दृशि" इति मेदिनी ॥ १२१ ॥

उन्मूलने उत्पाटने, उद्धृतमूलकरणे वा । अपिशब्दात् मुक्तौ वमने ऋणशुद्धौ वान्तेऽन्नादौ च **उद्धरणम्** । न० । उद्पूर्वहृ–हरणे । भावे ल्युट्प्रत्ययः । "स्यादुद्धरणमुद्धारवान्तान्नोन्मूलनेष्वपि'' इति मेदिनी ॥ दक्षे आलस्यरहिते कुशले । त्रि० । आतपे सूर्याद्यालोके । अपिशब्दात् ग्रीष्मे ऋतौ पलाण्डौ नरकभेदे शीतभिन्ने स्पर्शे च । पु० । **उष्णम्** । न० । उष–दाहे, वधे वा । नक्प्रत्ययः । "उष्णो ग्रीष्मे पुमान्दक्षाशीतयोरन्यलिङ्गकः'' इति मेदिनी ॥ साधने क्रियानिष्पत्तौ साक्षात् अव्यवधानेन साधने व्याकरणोक्ते कारकभेदे । गीतं गानं, नृत्यं नर्तनं तयोः । प्रभेदे कायस्थकर्म्मणि कायकर्मादौ करणे। संकीर्णे शूद्राविशोः सुते शूद्रायामुत्पादिते जातिभेदे वा । पु० । तथा वर्णे हेतौ क्षेत्रे इन्द्रिये गात्रे ज्योतिषोक्तेषु बवबालवादिष्वेकादशसु तिथ्यर्धेषु च । **करणम्** । न० । कृ–करणे । ल्युट्प्रत्ययः ।"करणं हेतुकर्मणोः। बालवादौ हस्तलेपे नृत्यगीतप्रभेदयोः । क्रियाभेदेऽन्द्रियक्षेत्रकायसंवेशनेषु च । कायस्थे साधने क्लीबं पुंसि शूद्राविशोः सुते'' इति मेदिनी ॥ काञ्चने स्वर्णे । शुभे मङ्गले । तथा अक्षये । शुभयुक्ते । त्रि० । **कल्याणम्** । न० । कल्ये-प्रातः अण्यते शब्द्यते । अणशब्दे । घञ्प्रत्ययः । "कल्याणमक्षये स्वर्णे मङ्गलेऽपि नपुंसकम्'' इति मेदिनी ॥ वर्णे कालवर्णे । हरौ वासुदेवे । व्यासे वेदव्यासे । तथा "कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते'' इत्युक्ते परब्रह्मणि अर्जुने मध्यमपाण्डवे । काके कोकिले करमर्दके वृक्षे नीले कालागुरुणि अशुभकर्मणि च **कृष्णः** । पु० ॥ मरिचः प्रसिद्धः । लोहः धातुभेदः तयोः । तथा नीलाञ्जने च **कृष्णम्** । न०॥ १२२॥ १२३॥

पिप्पली कणा । द्रौपदी द्रुपदराजात्मजा । तयोः । तथा नीलीवृक्षे द्राक्षायां नीलपुनर्नवायां कृष्णजीरके गम्भार्यां कटुकायां राजसर्षपे पर्पटयां काकोल्यां सोमराज्यां च **कृष्णा** । स्त्री०।

कोणोऽस्त्रौ वाद्यलगुडे वधे हेतौ च कारणम् ।
ग्रहणं स्वीकृतौ हस्ते गुणः स्याद्रज्जुसूदयोः ॥ १२५ ॥
अङ्गुष्ठानामिकोन्माने गोकर्णोऽहौ मृगेऽपि च ।
नासिकाघ्रातयोर्घ्राणं चूर्णं गन्धयुतावपि ॥ १२६ ॥

कृष—आकर्षणे, विलेखने वा । नक्प्रत्ययः । "कृष्णः सत्यवतीपुत्रे वायसे केशवेऽर्जुने । कृष्णा स्याद् द्रौपदीनीलीकणाद्राक्षासु योषिति । मेचके वाच्यलिङ्गः स्यात्क्लीबं मरिचलोहयोः" इति मेदिनी ॥ हस्तसूत्रे करभूषणे । अपिशब्दात् भूषणमात्रे मण्डले च **कङ्कणम्** । न० । कं शुभं कणति । कंशब्दोपपदकण—गतौ । अच्प्रत्ययः । "कङ्कणं करभूषायां सूत्रमण्डलयोरपि" इति मेदिनी ॥ श्रुतिः श्रोत्रेन्द्रियम् । राधेयः राधया पुत्रत्वेन पालितः अङ्गदेशाधिपः पृथासुतः। तयोः। तथा अरित्रे केनिपातके सूर्यात्मजे त्रिभुजक्षेत्रे भुजकोटिभिन्नायां तिर्यग्रेखायां च । **कर्णः**। पु० । कृ—करणे । नन्प्रत्ययः । कर्ण—भेदने । अच्प्रत्ययः । अथवा कीर्यते शब्दग्रहणाय । कृ—विक्षेपे, विज्ञाने वा । नन्प्रत्ययः । " कर्णः पृथाज्येष्ठपुत्रे सुवर्णालौ श्रुतावपि" इति मेदिनी ॥ पिप्पल्यां स्वनामख्यातायाम् । जीरके धान्यादेरतिसूक्ष्मांशे लेशे। पु०। वनजीरके श्वेतजीरके च **कणा** । स्त्री० ।कण—निमीलने।अच्प्रत्ययः। कणा जीरककुम्भीरमक्षिकापिप्पलीषु च" इति मेदिनी ॥ १२४ ॥ अस्त्रौ वस्त्रादेरग्रभागे, गृहादिकोणे वा । वाद्ये येन धनुराकृतिना काष्ठेन वीणादयो वाद्यन्ते तस्मिन् वादनसाधने काष्ठे । लगुडे दण्डाकारे काष्ठनिर्मिते पदार्थे । तथा गृहादीनामेकदेशे अस्त्राणामग्रभागे मङ्गलग्रहे च **कोणः** । पु० । कुण-शब्दे, उपकरणे वा। करणे घञ्प्रत्ययः । कर्तरि अच् प्रत्ययो वा । "कोणो वाद्यप्रभेदे स्याद्वीणादीनां च वादने। एकदेशे गृहादीनामस्त्रौ च लगुडेऽपि च" इति मेदिनी ॥ वधे नाशे । हेतौ कारणे । चकारात् साधने इन्द्रिये देहे कर्मणि वाद्यभेदे हिंसायां यातनायां च । स्त्री० । **कारणम्** । न० । कृ—करणे । णिच्प्रत्ययः । करणे ल्युट्प्रत्ययो वा । "कारणं करणे हेतुवधयोश्च नपुंसकम् । स्त्रीयातनायाम्" इति मेदिनी ॥ स्वीकृते अङ्गीकृते । हस्ते करे । तद्वत् आदाने आदरे ज्ञाने बन्धने चन्द्रसूर्ययोर्ग्रासे इन्द्रिये च **ग्रहणम्** । न० । ग्रह—आदाने । भावादौ ल्युट्प्रत्ययः । "ग्रहणे स्वीकारादरकरोपरागोपलब्धिबन्दिषु" इति मेदिनी ॥ रज्जुः बन्धनसाधनं दाम । सूदः सूपकारकः । तयोः । तथा । धनुषो मौर्व्यां शौर्यादिधर्मे राज्ञां सन्धिविग्रहादिषु षट्सु साधनेषु ज्ञानविनयादिषु अप्रधाने न्यायमते रूपादिषु चतुर्विंशतिपदार्थेषु आवृत्तौ तन्तौ उत्कर्षे दूर्वायां च । गुणः। पु० । गुण-मन्त्रणे, आमेडने वा। अच्प्रत्ययः, घञ् वा। "गुणो मौर्व्यामप्रधाने रूपादौ सूद-इन्द्रिये" इति मेदिनी ॥१२५॥ अङ्गुष्ठानामिकोन्माने अनामिकायुतविस्तृताङ्गुष्ठमाने । अहौ सर्पे । मृगे मृगभेदे । अपिशब्दात् अश्वतरे गणदेवताभेदे शैवे तीर्थभेदे च **गोकर्णः** । पु० । गौरिव कर्णो यस्य । "गोकर्णोऽश्वतरे सर्पे सारङ्गे च गणान्तरे । अङ्गुष्ठानामिकोन्माने गोकर्णो मृगितोयधौ" इति मेदिनी ॥ नासिका प्रसिद्धा । आघ्रातः आक्रान्तः गृहीतगन्धो वा तयोश्च ।

वेदांशे बह्वृचादौ च ब्रध्ने पादेऽपि चास्त्रियाम् ।
चरणश्चीर्णपर्णस्तु खर्जूरपिचुमन्दयोः ॥ १२७ ॥
जेतरीन्द्रेऽर्जुने जिष्णुर्झूणिः कठिनपूगयोः ।
तरुणः कुब्जपुष्पेऽपि त्राणं रक्षितरक्षयोः ॥ १२८ ॥
दुर्वर्णं रजकेऽपि स्याद्द्रुणोऽलिः कच्छपी द्रुणी ।
द्युमणौ तरणिः पुंसि कुमारीनौकयोः स्त्रियाम् ॥ १२९ ॥

घ्राणम् । न० । घ्रायतेऽनेन । घ्रा-गन्धग्रहणे । ल्युट्प्रत्ययः । "घ्राणं क्लीबं नासिकायां घ्राते-स्याद्वाच्यलिङ्गकम्" इति मेदिनी ॥ गन्धयुतौ गन्धवति द्रव्ये । अपिशब्दात् पेषणजाते रजसि धूलौ ताम्बूलचर्वणोपयोगिद्रव्ये कपर्दके च **चूर्णम्** । न० । चूर्ण—पेषणे । घञ्प्रत्ययः । "चूर्णः कपर्दके । चूर्णो धूलौ क्षारभेदे चूर्णा निवासयुक्तिषु" इति मेदिनी ॥ १२६ ॥ वेदांशे वेदैकदेशे शाखारूपे ग्रन्थे । बह्वृचादौ ऋग्वेदे । ब्रध्ने वृक्षमूले । पादे च । अपिशब्दात् वेदाध्येतरि जने गोत्रे गतौ भक्षणे आचारे शीले च **चरणः** । पु० न० । चर—गतौ करणे ल्युट्प्रत्ययः । "चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च । भ्रमणे भक्षणे चाऽपि नपुंसक उदाहृतः" इति मेदिनी ॥ खर्जूरः द्रुमभेदः । पिचुमन्दः निम्बः तयोश्च । **चीर्णपर्णः** । पु० । चीर्णमिव पर्णमस्य । "चीर्णपर्णस्तु निम्बेऽपि खर्जूरीभूरुहे पुमान्" इति मेदिनी ॥ १२७ ॥ जेतरि जित्वरे । इन्द्रे शक्रे । अर्जुने स्वनामाख्याते वृक्षे । तथा विष्णौ सूर्य्ये वसुषु च **जिष्णुः** । पु० । जिस—सेके । रस्नुप्रत्ययः । "जिष्णु र्ना वासवेऽर्जुने । जित्वरे वाच्यवत्" इति मेदिनी ॥ कठिनः क्रूरः । पूगः क्रमुकः तयोश्च । झूणिः पु० । क्वचित् "जूर्णिः" "झणिः" इति पाठः । झूण—ग्रहे, पिधाने वा । इण्प्रत्ययः । "झूणिः क्रमुकभेदेऽपि दुष्टदैत्यप्रतावपि" इति विश्वः ॥ कुब्जपुष्पे महासहपुष्पे । अपिशब्दात् एरण्डवृक्षे स्थूलजीरके नूतने यूनि । त्रि० । दन्तीवृक्षे च **तरुणः** । पु० । तृ—तरणे, प्लवने वा । उनन्प्रत्ययः । "तरुणं कुब्जपुष्पे ना रुबुके यूनि तु त्रिषु" इति मेदिनी ॥ रक्षितः पालितः, उपाधिभेदो वा । रक्षः पालनः तयोश्च । **त्राणम्** । न० । त्रै—पालने । ल्युट्प्रत्ययः । "त्राणं तु त्रायमाणायां रक्षणे रक्षितेऽपि च" इति मेदिनी ॥ १२८ ॥ रजके रागकारके जातिभेदे । क्वचित्तु "रजते" इति पाठः । रजते रूप्ये । अपिशब्दात् एलवालुके मलिने दुष्टवर्णवति च । त्रि० । **दुर्वर्णम्** । न० । दुष्टोऽपि वर्ण्यते रज्यतेऽनेन दुष्टं मलिनं वा वर्णयति शुभ्रतापादनेन रूपान्तरं करोति । दुर्पूर्ववर्ण—वर्णने । घञ्प्रत्ययः । "दुर्वर्णा त्रिष्वसद्वर्णे

क्लीबमैलेयरूप्ययोः" इति मेदिनी ॥ अलिः भ्रमरः । तस्मिन् । **द्रुणः** । पु० । द्रुण—कुटिलीकरणे । कप्रत्ययः । "अलिनि द्रुणः" इति मेदिनी ॥ कच्छपी प्रसिद्धा । तस्याम् । तथा कर्णजलौकायां काष्ठाम्बुवाहिन्यां च । **द्रुणी** । स्त्री० । द्रुण—कुटिलीकरणे । कप्रत्ययः । गौरादित्वात् ङीप् । "द्रुण्यम्बुद्रोणीकच्छप्योः" इति मेदिनी ॥ द्युमणौ सूर्ये । पु० । कुमारी

काष्ठागारेऽम्बुवाहिन्यां शैलसन्धौ च योषिति ।
द्रोणी न स्त्री मानभेदे द्रोणः काके कृपीपतौ ॥ १३० ॥
दक्षिणा दिशि दाने च दक्षिणः सरलेऽपि च ।
असती स्याद्धर्षणी च धर्षणं निकृतौ रते ॥ १३१ ॥
बुद्धमन्त्रे नाडिकायां धारणाऽथ च मज्जने ।
निर्वाणं निर्वृतौ मोक्षे प्रघणोऽस्त्रगृहांशयोः ॥ १३२ ॥

घृतकुमारी । नौका प्रसिद्धा तयोः । तथा भेलके अर्कवृक्षे किरणे ताम्रे पद्मचारिण्यां च **तरणिः**। पु० । तृ–तरणे । अणिप्रत्ययः । "तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्" इति मेदिनी ॥ १२९ ॥ काष्ठागारेऽम्बुवाहिन्यां काष्ठादिरचिते नौकाजलसेचनीपात्रे । शैलसंधौ शैलजनामगन्धद्रव्ये । तथा जलाद्याधारे पात्रभेदे नदीभेदे च **द्रोणी** । स्त्री० । द्रोणिरप्यत्र । द्रुण–कुटिलीकरणे । इण्प्रत्ययः । वा ङीप् । "द्रोणी काष्ठाम्बुवाहिन्यां गवां घासभुजि स्थितौ" इति मेदिनी ॥ मानभेदे आढकचतुष्टये परिमाणे । काके द्रोणाख्ये वायसे । कृपीपतौ द्रोणाचार्ये । तथा भारतप्रसिद्धे स्वनामाख्याते योद्धृभेदे वृश्चिके मेघभेदे वृक्षभेदे जलाशयभेदे च **द्रोणः** । पु० । द्रुण–कुटिलीकरणे । अच्प्रत्ययः । "द्रोणोऽस्त्रियामाढके स्यादाढकानां चतुष्टये । पुमान् कृपीपतौ दग्धकाके स्त्री नीवृदन्तरे" इति मेदिनी ॥ १३० ॥ दिशि याम्यदिशि । दाने यज्ञशेषे कर्मणः साङ्गतार्थं देये द्रव्ये । चकारात् यज्ञपत्न्यां प्रतिष्ठायां दक्षिणकालिकायां रुचिप्रजापतेः कन्यायां परिक्रयद्रव्ये नायिकाभेदे च **दक्षिणा** । अव्ययम् । वा । स्त्री० ॥ सरले स्वनामाख्याते वृक्षे । अपिशब्दात् सर्वनायिकासु समानुरागे नायकभेदे मध्यदेशाद्दक्षिणे देशे शरीरस्य दक्षिणभागे अनुत्तरे परच्छन्दानुवर्तिनि अवामभागस्थे औदार्यवति च । त्रि० । **दक्षिणः**। पु० । दक्ष–वृद्धौ, शीघ्रार्थे वा । इनन् प्रत्ययः । "दक्षिणो दक्षिणोद्भूतसरलच्छन्दवृत्तिषु। आरामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्" इति मेदिनी॥ असती भिन्नपतिव्रता अभिसारिका स्त्री । तस्यां च । **धर्षणी** स्यात् । स्त्री० ॥ निकृतौ वञ्चायाम् । रते रमणे तथा परिभवे च **धर्षणम्** । न० । धृष–क्रोधे, अभिभवे वा । भावे ल्युट्प्रत्ययः । कर्मणि ल्युट् च । "धर्षणं स्यात्परिभवे रतेऽसत्यां तु धर्षणी" इति मेदिनी ॥ १३१ ॥ बुद्धमन्त्रे संसारमुक्तिसाधनार्थं भगवता शाक्यमुनिना उक्ते धर्मविशेषे । "यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः" इत्युक्तायामात्मनि चित्तस्य स्थितौ वा । नाडिकायां (कलम्बी) शाके, पट्टशाके वा । श्रेणौ च । स्त्रियां ङीप् । "कुसुम्भं नाडिकाशाकम्" इति स्मृतिः । तथा मर्यादायां न्याय्यपथस्थितौ निश्चये च **धारणा** । स्त्री० । धृ–धारणे, स्थितौ वा । णिच्युच्प्रत्ययौ । "धारणी नाडिकायां स्याद्बुद्धोक्तमन्त्रभिद्यपि । धारणाङ्गे च योगस्य न पुंसि स्याद्विधारणे" इति मेदिनी ॥ मज्जने गजमज्जने । निर्वृतौ निर्वृत्ते । मोक्षे मुक्तौ । तद्वत् आत्यन्तिकमोक्षे एकान्तसुखस्वरूपे निर्वृतौ विनाशे कर्दमे च । न० । शान्ते निश्चले शून्ये विश्रान्ते च । त्रि० । **निर्वाणम्**।

बोले वाते बले प्राणः पूर्णे पुं भूम्नि चासुषु ।
पर्णं पक्षे च पत्रे च प्रोक्षणं सेचने वधे ॥ १३३ ॥
ग्रन्थे कार्षापणे चास्त्री पुराणमनवे त्रिषु ।
पार्ष्णिः पादे व्यूहपृष्ठे वाणी व्यूतिश्च भारती ॥ १३४ ॥
मन्त्रान्यवेदे विप्रौघे क्लीबं ना ब्राह्मणो द्विजे ।
लिङ्गाग्रेऽलिञ्जरे मौक्तिकादौ स्त्रीपुंसयोर्मणिः ॥ १३५ ॥

न० । निपूर्ववा—गतौ । भावे क्तप्रत्ययः । निपातनात् नत्वणत्वे च । "निर्वाणमस्तङ्गमने निर्वृतौ गजमज्जने । सङ्गमे चापवर्गे च" इति मेदिनी ॥ अस्त्रं लोहमुद्गरम् । गृहांशं बहिर्द्वारप्रकोष्ठकः अलिन्दः तयोश्च । **प्रघणः** । पु० । प्रपूर्वहन—वधे, गतौ च । अप्प्रत्ययः । निपातनात् कुत्वणत्वे। मतान्तरे अणत्वम् । "प्रघनः" वाप्यत्र । "प्रघणस्ताम्रकुम्भे स्यादलिन्दे लोहमुद्गरे" इति मेदिनी ॥ १३२ ॥ बोले गन्धरसे, गन्धरसद्रव्यभेदे वा । वाते वायुमात्रे । बले देहजे सामर्थ्ये । पूर्णे पूरिते । पु० । भूम्नि आसुषु हृदयस्थे नासाग्रवर्तिनि वायौ, पञ्चवृत्तके देहस्थे वायुभेदे वा । तथा काव्यजीवने रसे इन्द्रिये च **प्राणः** । पु० । प्रपूर्वअन—जीवने । वञ्प्रत्ययः । णत्वं च । "प्राणो हृन्मारुते बोले काव्यजीवेऽनिले बले । पुँल्लिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चात्मसु" इति मेदिनी ॥ पक्षे पक्षिणां पक्षपत्रे । पत्रे लेखनाधारे द्रव्ये च **पर्णम्** । न० । पॄ—पालने, पूर्तौ वा । नप्रत्ययः । पर्ण—हरितभावे । अच्प्रत्ययो वा । "पर्णः पत्रं किंशुके ना" इति मेदिनी ॥ सेचने समन्तात् सेचने । वधे यज्ञार्थं पशूनां हनने च । **प्रोक्षणम्** । न०। प्रपूर्वउक्ष—सेचने । ल्युट् प्रत्ययः । "प्रोक्षणं सेचने वधे" इति मेदिनी ॥ १३३ ॥ ग्रन्थे व्यासादिप्रणीते शास्त्रभेदे । तत्तु । "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम्" इत्युक्तम् । कार्षापणे पणे, षोडशसु पणेषु वा । पु० न० । अनवे अनूतने च । **पुराणम्** । त्रि० । पुरा भवः । ट्युप्रत्ययः । निपातनात् तुट् न । पुरा नीयते । नीप्रापणे । डप्रत्ययो वा । णत्वम् । "पुराणं पञ्चलक्षणम् । पणे पुंसि त्रिषु प्रत्ने" इति मेदिनी ॥ पादे पादग्रन्थे, गुल्फस्याधोभागे वा । व्यूहपृष्ठे सैन्यपृष्ठे । तथा पृष्ठे जिगीषायां च । पु० । **पार्ष्णिः** । पु० स्त्री० । पृष—सेके । निप्रत्ययः । णत्वम् । निपातनात् वृद्धिः । "पार्ष्णिः स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च" इति मेदिनी ॥ व्यूतिर्वस्त्रादिवपनकर्म वपनं वा । भारती वाक्यम् । तयोश्च । तथा वापदण्डे वेम्नि सरस्वत्यां च। **वाणी** । स्त्री० । वण—शब्दे । इण्प्रत्ययः । वा ङीप् । "वाणिः स्याद्व्यूतिभारत्योर्वाणिमूले बलाहके" इति विश्वः ॥ १३४ ॥ मन्त्रान्यवेदे वेदभागविशेषे । विप्रौघे ब्रह्मसङ्घाते । न० । द्विजे विप्रे च । तथा फञ्जिकायां पृक्कायां ब्राह्मणपत्न्याम् । स्त्री० । **ब्राह्मणः** । पु०। ब्रह्म वेदं शुद्धं परचैतन्यं वा वेत्त्यधीते वा । अण्प्रत्ययः । ब्रह्मणो जाताविति न टिलोपः । ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् । अण् प्रत्ययः । तेन न टिलोपः । "ब्राह्मणं ब्रह्मसङ्-

अजागलस्तने चापि मसृणौ मृद्वकर्कशौ ।
निश्मश्रुपुरुषोद्दंशौ मत्कुणावथ रोहिणी ॥ १३६ ॥
नक्षत्रे रोहितायां च रणः क्वणनयुद्धयोः ।
लक्ष्मणा सारसी दाशरथिः श्रीमांश्च लक्ष्मणः ॥ १३७ ॥
छागेऽपि लम्बकर्णः स्याद्वेणुर्वंशे नृपान्तरे ।
वाणा झिण्ट्यां शरे वाणो वृष्णिर्यादवमेषयोः ॥ १३८ ॥

घाते वेदभागे नपुंसकम् । भूमिदेवे तु पुँल्लिङ्गः फञ्जिकापृक्कयोः स्त्रियाम्'' इति मेदिनी ॥ लिङ्गाग्रे लिङ्गकोटयाम् । अलिञ्जरे मृन्मयपात्रभेदे । मौक्तिकादौ रत्ने । अजागलस्तने अविग्रीवास्तने । अपिशब्दात् नागभेदे मणिबन्धे च **मणिः** । पु० स्त्री० । मण-अव्यक्तशब्दे । इन्-प्रत्ययः । स्त्रीत्वपक्षे वा ङीप् । "मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च । कण्ठदेशस्तनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च'' इति मेदिनी ॥ १३५ ॥ मृदुः स्निग्धः । अकर्कशः कोमलः, कार्कश्यरहितो वा । तयोश्च । तथा अतस्याम् । स्त्री० । **मसृणः** । त्रि० । मस-परिणामे, परिमाणे वा । ऋण् प्रत्ययः । सम्पूर्वऋण- गतौ । कप्रत्ययो वा । पृषोदरादित्वात् साधुः । "मसृणोऽकर्कशे स्निग्धे त्रिपूमायां तु योषिति'' इति मेदिनी ॥ निश्मश्रुपुरुषः श्मश्रुरहितपुरुषः।उद्दंशः मस्तकदंशकः । (उकुण) निर्विषाणेभः कीटभेदो वा । तयोश्च । **मत्कुणः** । पु० । मद-क्विप् कुणयति । कुण आभाषणे,मन्त्रणे च । अच्प्रत्ययः । "मत्कुणो निर्विषाणेभे निश्मश्रुपुरुषेऽपि च । उद्दंशे नारिकेले च'' इति मेदिनी ॥ १३६ ॥ नक्षत्रे अश्विन्यवधिके चतुर्थे नक्षत्रे । रोहितायां रक्तवर्णवत्यां स्त्रियाम् । चकारात् विद्युति स्त्रीगव्यां कटुतुम्ब्यां लतायां सोमवल्के हरीतक्यां काश्मर्यां मञ्जिष्ठायां च **रोहिणी** । स्त्री० ।रुह-उद्भवे, जाते वा । इनन्प्रत्ययः। गौरादित्वात् ङीप्। "रोहिणी कण्ठरुग्भिदि । तडित्कटुम्भरासोमवल्केषु लोहिता गवे:''इति मेदिनी । क्वणनं नादः । युद्धः समरः । तयोः । तथा कोणे क्वणे गतौ च **रणः** । पु० । रण- रवे । रण्यते शब्द्यतेऽत्र । घञर्थे कप्रत्ययः । "रणः कोणे क्वणे पुंसि समरे पुन्नपुंसकम्'' इति मेदिनी ॥ सारसी सारसपक्षिणी । तस्याम् । स्त्री० । **लक्ष्मणा** । दाशरथिः दशरथपत्न्याः सुमित्रायाः स्वनामाख्यातः पुत्रः । श्रीमान् श्रीयुक्तः । तयोश्च । चकारात् चिह्ने प्रधाने श्वेतकण्टकार्यां च **लक्ष्मणः** । पु० । लक्ष-दर्शने, अङ्कने च । मनिन्प्रत्ययः । स्वार्थे अण् च । "लक्ष्मणा त्वोषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात्सश्रीके चाभिधेयवत्'' इति मेदिनी ॥ ॥ १३७ ॥ छागे अजे । अपिशब्दात् हस्तिनि राक्षसे श्येनपक्षिणि अङ्कोटवृक्षे लम्बश्रोत्रवति । त्रि० । **लम्बकर्णः** स्यात् । पु० । लम्बः कर्णो यस्य । "लम्बकर्णः स्मृतोऽङ्कोटपादपेऽजगलेऽपि च'' इति मेदिनी । वंशे त्वक्सारे, तृणजातिभेदे वा । नृपान्तरे राजभेदे । तथा वंशीवाद्ये च **वेणुः** । पु० । वेण-वाद्यादाने । उण्प्रत्ययः । "वेणुर्नृपान्तरे । त्वक्सारेपि च पुंसि स्यात्'' इति मेदिनी ॥ झिण्ट्यां नीलझिण्टयाम् । **वाणा** ॥ स्त्री०॥ शरे

कर्णे श्रुतौ च श्रवणं शरणं मारणेऽपि च।
श्रेणिः पङ्क्तौ सेकपात्रे न क्लीबं कारुसंहतौ ॥ १३९ ॥
कषे मासचतुष्के च शाणः शोणो नदेऽरुणे।
पक्के श्राणं यवाग्वां स्त्री श्रीपर्णं गणिकारिका ॥ १४० ॥
पद्मं च श्रमणा भिक्षुक्यां मुण्डीर्यां च दृश्यते।
सुवर्णं मानभेदेऽपि स्थूणा शूर्मी च दारु च ॥ १४१ ॥

काण्डे । तथा गवां—स्तने दैत्यभेदे केवले वह्नौ भद्रमुञ्जे कादम्बरीग्रन्थकारके कविभेदे च **वाणः** । पु० । वण—शब्दे । घञ्प्रत्ययः । "बाणः स्याद्गोस्तने दैत्यभेदे केवलकाण्डयोः । वाणा तु वाणमूले स्त्री नीलझिण्ट्यां पुनर्द्वयोः" इति मेदिनी ॥ यादवः यादववंशीयः श्रीविष्णुः । मेषः एडकः तयोश्च । **वृष्णिः** । पु० । वृष—प्रजननसामर्थ्ये । निप्रत्ययः । किच्च । "वृष्णिः पाषाण्डचण्डयोः । त्रिषु ना । यादवे मेषे" इति मेदिनी ॥ १३८ ॥ कर्णे शब्दग्राहकेन्द्रियभेदे । श्रुतौ श्रवणेन्द्रियजन्ये । चकारात् अश्विन्यादिषु द्वाविंशे नक्षत्रे मुण्डरिकावृक्षे च । स्त्री० । **श्रवणम्** । न० । शृणोत्यनेन । श्रु—श्रवणे, गतौ वा । ल्युट्प्रत्ययः । "श्रवणं स्याच्छ्रुतौ कर्णे नक्षत्रे न नपुंसकम्" इति मेदिनी ॥ मारणे घातके । अपिशब्दात् गृहे रक्षके रक्षणे वधे प्रसारण्याम् । स्त्री० । **शरणम्** । न० । शॄ—हिंसने । ल्युट्प्रत्ययः । "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी ॥ पङ्क्तौ छिद्रसहितायां पङ्क्तौ । सेकपात्रे जलसेचकपात्रभेदे । कारुसंहतौ समानशिल्पिसमूहे च । **श्रेणिः** ॥ स्त्री० । पु० । "श्रेणी" इति क्वचित् पाठः । श्रि—सेवने । निप्रत्ययः । वा ङीप् । "श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ" इति मेदिनी ॥ १३९ ॥ कषे कषपाषाणे शस्त्रादीनां निकषणेन तीक्ष्णीकरणयन्त्रभेदे । क्वचित् "कर्षे" इति पाठः । मासचतुष्के—मासचतुष्टये । तथा शणसूत्रनिर्मिते वस्त्रादौ च **शाणः** । पु० शणेन निर्वृत्तः । अण्प्रत्ययः । "शाणो मासचतुष्टये । लोहादीनां च निकषे" इति मेदिनी । नदे नदभेदे । अरुणे ईषत् रक्तवर्णे । तथा सिन्दूरे रुधिरे रक्तेक्षौ मङ्गलग्रहे अह्नौ चित्रके श्योनाकवृक्षे वनहरिद्रायां च स्त्री० । **शोणः** । पु० । शोण—गतौ अच्प्रत्ययः । "शोणः कृशानौ श्योनाके लोहिताश्वे नदे पुमान् । त्रिषु कोकनदच्छाये" इति मेदिनी ॥ पक्वे कृतपाके, परिणते वा । यवाग्वां षड्गुणजलपक्के द्रवभेदे च । स्त्री० । **श्राणम्** । न० । श्रा—पाके । ल्युट्प्रत्ययः । "श्राणं पक्के यवाग्वां स्त्री" इति मेदिनी ॥ गणिकारिका गणिकारी द्रुमः अग्निमन्थवृक्षः । पद्मं कमलम् । तत्र च । **श्रीपर्णम्** । न० पु० । श्रीर्लक्ष्मीः पर्णे दलेऽस्य । अथवा श्रीयुक्तं पर्णमस्य । "श्रीपर्णी काश्मरी कुम्भे क्लीबे पद्माग्निमन्थयोः" इति मेदिनी ॥ १४० ॥ भिक्षुक्यां भिक्षोपजीविन्याम् । मुण्डीर्यां केशच्छेदिन्याम् । तथा जटामांस्यां सुदर्शनायां च । **श्रमणा** । दृश्यते ईक्ष्यते । स्त्री० । श्रम—तपसि, आयासे च । युच् प्रत्ययः । श्रमणो यतिभेदे ना

स्थाणू शङ्कुशिवौ विष्णौ सुषेणः करमर्दके ।
कपिवैद्यौ चाथऽहृतौ हरणं यौतकेऽपि च ॥ १४२ ॥
इति णान्ताः ॥
मोक्षः सुधा यज्ञशेषोऽयाचितं वारि चामृतम् ।
अमृता तु गुडूची स्याद्धरीतक्यामलक्यपि ॥ १४३ ॥
शेषे विष्णावनन्तो ना गुडूचीदूर्वयोः स्त्रियाम् ।
क्लीबं खे त्रिष्वनवधावनन्तं मरणेऽशुभे ॥ १४४ ॥

निन्द्यजीविनि तु त्रिषु । स्त्रियां सुदर्शनामांस्योर्मुण्डीरीशबरीभिदोः" इति मेदिनी । मानभेदे परिमाणविशेषे । कर्षमिते "सुवर्णा पञ्चधरणम्" इति वचनात् । काञ्चने वा । "कर्षं सुवर्णस्य सुवर्णसंज्ञम्" इत्युक्तम् । अपिशब्दात् स्वनामाख्याते धातुभेदे हरिचन्दने स्वर्णगैरिके धने नागकेशरे यज्ञभेदे धुस्तूरे कणगुग्गुलौ च । पु० । सुरूपे सुन्दराक्षरयुक्ते च । त्रि० । **सुवर्णम्** । त्रि० । सुष्ठु वर्णोऽस्य । "सुवर्णो ना स्वर्णकर्षे सुवर्णाख्यमखान्तरे । स्त्री कृष्णागुरुणि क्लीबं काञ्चने हरिचन्दने" इति मेदिनी ॥ शूर्मी लौहप्रतिमा । दारु गृहस्तम्भः । तयोश्च **स्थूणा** । स्त्री० । स्था—गतिनिरोधे । नक्प्रत्ययः । पृषोदरादित्वात् ऊदन्तादेशः । "अथ स्थूणा स्याच्छूर्म्यां स्तम्भे गृहस्य च" इति मेदिनी ॥ १४१ ॥ शङ्कुः शाखाशून्यवृक्षः, कीलो वा । शिवः महादेवः तयोः । तथा अस्त्रभेदे स्थविरे च । त्रि० । **स्थाणुः** । पु० । स्था—गतिनिरोधे । नुप्रत्ययः । पृषोदरादित्वात् णत्वम् । "स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे" इति मेदिनी । विष्णौ हरौ । करमर्दके करञ्जवृक्षे । कपिः वानरभेदः, सुग्रीवो वा । वैद्यः चिकित्सकः । तयोश्च । तथा त्रिवृत्त कृष्णत्रिवृत् । स्त्री० । **सुषेणः** । पु० । सुष्ठु सेनयति सेनां करोति । अच्प्रत्ययः । णत्वम् । "सुषेणः करमर्दः स्याद्विष्णुसुग्रीववैद्ययोः" इति मेदिनी ॥ हृतौ स्थानान्तरकरणे । यौतके विवाहकाले लब्धे धने । अपिशब्दात् विभाजने च **हरणम्** । न० । हृ-हरणे । भावे ल्युट्प्रत्ययः । "हरणं यौतकादीनां द्रव्ये भुजे हृतावपि" इति मेदिनी ॥ ॥ १४२ ॥ इति णकारान्ताः समाप्ताः ॥ अथ तान्तानाह ॥ मोक्षः मुक्तिः । सुधा पीयूषम् । यज्ञशेषः होमावशिष्टद्रव्यम् । अयाचितम् अयाचितलब्धम् । वारि जलम् । तत्र च । तथा घृते मरणशून्ये च **अमृतम्** । न० । मृ—मृतौ । क्तप्रत्ययः । नादितत्पुरुषः । "अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः" इति मेदिनी ॥ गुडुची स्वनामाख्याता लता । हरीतकी हरीतकीफलम् । आमलकी धात्रीफलम् । तत्र च । अपिशब्दात् मागध्यां च **अमृता** स्यात् । स्त्री० । मृ—मृतौ । क्तप्रत्ययः । नादितत्पुरुषः । "अमृता मागधीपथ्यागुडूच्यामलकीषु च" इति मेदिनी ॥ ॥ १४३ ॥ शेषे अनन्तनागराजे । विष्णौ श्रीकृष्णे । पु० । गुडूची अमृता । दूर्वा स्वनामाख्यातो घासभेदः तयोः । स्त्री० । खे आकाशे । न० । अनवधौ अवधिशून्ये । त्रि० । तथा मेघे बलभद्रे सिन्दु-

चूल्यां च पूर्णिमाभेदेऽनुमतिः सम्मतावपि ।
स्वरूपेऽन्तं विनाशे ना न स्त्री शेषेऽन्तिके त्रिषु ॥ १४५ ॥
गते ज्ञातेऽप्यवसितमवन्तार्वश्वकुत्सितौ ।
अर्वती कुम्भदास्यश्वाऽथार्दितं प्रार्थिते हते ॥ १४६ ॥
क्षिप्ताद्रिभेदयोरस्तः स्याल्लाजेष्वपि चाक्षतम् ।
कृषावसत्येऽप्यनृतमाकृतिर्जातिरूपयोः ॥ १४७ ॥

वारवृक्षे च **अनन्तः** । पु० । नास्ति अन्तः गुणानां यस्य । "अनन्तः केशवे शेषे पुमानन-वधौ त्रिषु । अनन्ता च विशल्यायां शारिवादूर्वयोरपि" इति मेदिनी ॥ मरणे मृत्यौ । अशुभे शुभशून्ये ॥ १४४ ॥ चूल्यां च तदग्नितापाद्धि प्राणक्षयः । अस्वन्तम् ॥ न०॥ असूनामन्तो यस्मादिति पञ्चमीबहुव्रीहिः । "अस्वन्तमशुभे चुल्ल्यां मरणेऽनवधावपि" इति विश्वः ॥ पूर्णिमा-भेदे कलाहीनचन्द्रवत्याम् । शुक्लचतुर्दशीयुतपूर्णिमातिथौ च । सम्मतौ अपिशब्दात् अनुज्ञाते च **अनुमतिः** । स्त्री० । अनुपूर्वमन—बोधे । क्तिन्प्रत्ययः । "अथानुमतिरूनेन्दुपूर्णिमानु-ज्ञयोरपि" इति मेदिनी ॥ स्वरूपे स्वभावे । विनाशे । पु० । शेषे । पु०न०। अन्तिके निकटे । त्रि० । तथा प्रान्ते सीमायाम् निश्चये अवयवे । पु०। मनोहरे च । त्रि० । **अन्तम्** । न० । अम—गतौ । तन्प्रत्ययः । "अन्तं स्वरूपे नाशे ना न स्त्री शेषेन्तिके त्रिषु" इति मेदिनी । "अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहरे" इति विश्वः॥१४५॥ गते गमने । ज्ञाते अवगते । अपिशब्दात् ऋद्धे समाप्ते परिपक्वे निश्चिते मर्दितधान्ये च **अवसितम्** । न०। अवपूर्वसो—नाशे। क्तप्रत्ययः । "अवसितमृद्धे ज्ञातेऽप्यवसानगते च वाच्यलिङ्गं स्यात्" इति मेदिनी ॥ अश्वः घोटकः । कुत्सितः निन्दितः। तयोः । तथा इन्द्रे गोकर्णपरिणामे च **अर्वा** । पु०। ऋ—गतौ-वनिप्प्रत्ययः । "अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः" इति मेदिनी ॥ कुम्भदासी कुट्टनी । अश्वा वडवा । तयोः **अर्वती** । स्त्री०। ऋ—गतौ । वनिप्प्रत्ययः ङीप् च । "अर्वती कुम्भ-दास्यां च वडवायां च योषिति" इति मेदिनी ॥ प्रार्थिते याचिते । हते पीडिते, नष्टे वा । तथा गते याचिते वातरोगे च **अर्दितम्** । न० । अर्द—याचने, वधे वा । क्तप्रत्ययः । अर्दितं या-चितेऽपि स्याद्वातव्याधौ च हिंसिते" इति मेदिनी ॥१४६॥ क्षिप्तः त्यक्तः, विकीर्णो वा । अद्रि-भेदः पश्चिमाचलः तयोः । तथा अवसिते मृत्यौ ज्योतिषोक्ते लग्नात् सप्तमे स्थाने च **अस्तः**।पु०। अस—दीप्तौ।अस्यन्ते सूर्यकिरणा यत्र।आधारे क्तप्रत्ययः।"अस्तं क्षिप्तेऽप्यवसिते त्रिषु ना पश्चिमाच-ले"इति मेदिनी॥लाजेषु भृष्टधान्येषु।अपिशब्दात् यवे क्षतरहिते च **अक्षतं** स्यात् । न०।क्षण—वधे । क्तप्रत्ययः । नादितत्पुरुषः।अक्षतं न द्वयोः पण्डे लाजेषु त्रिष्वहिंसिते" इति मेदिनी॥कृषौ वैश्यवृत्तिभेदे, भूमिकर्षणरूपे, सस्योत्पादनव्यापारे वा । असत्ये सत्यभिन्ने अयथार्थे । अपिश-ब्दात् वाणिज्ये च **अनृतम्** । न० । ऋतं सत्यम् । नादितत्पुरुषः ।"अनृतं कृषावसत्येऽपि" इति मेदिनी ॥ जातिः जन्म । रूपं वपुः तयोः । तथा आकारे अवयवसंस्थाने च **आकृतिः**

आप्तौ लब्धहितौ दैर्घ्ये भाविकालेऽपि चाऽयतिः ।
आचितः शाकटोन्मेयेऽप्यावर्तश्चिन्तनेऽपि च ॥ १४८ ॥
आयस्तस्तेजिते क्षिप्तेऽथाऽख्यातं तिङि भाषिते ।
भ्रंशे तदात्वे चाऽपात आहतं गुणिते हते ॥ १४९ ॥
मृषोक्ते चाथ दग्धे स्यादुषितं स्थितवत्यपि ।
व्यसनार्त्ते चोऽपरक्त उदितं प्रोक्त उद्गते ॥ १५० ॥

। स्त्री० । आपूर्वकृ—करणे । क्तिन्प्रत्ययः । "आकृतिस्तु स्त्रियां रूपे सामान्यवपुषोरपि" इति मेदिनी ॥ १४७ ॥ लब्धः प्राप्तः । हितः इष्टसाधनः । तयोः । तथा विश्वस्ते सत्ये रागद्वेषादिवर्जिते यथार्थोपदेष्टरि भ्रमादिशून्ये यथार्थज्ञातरि च **आप्तः** । त्रि० । आप—प्राप्तौ । क्तप्रत्ययः । "आप्तो लब्धे स्वसत्ययोः" इति मेदिनी ॥ दैर्घ्ये दीर्घकालभाविनि । भाविकाले उत्तरकालफलदाने । अपिशब्दात् सङ्गमे प्रापणे च **आयतिः** । स्त्री० । क्वचित्तु "आयती" इत्यपि। आपूर्वया—गतौ । डतिप्रत्ययः । वा ङीप् । "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः" इति मेदिनी ॥ शाकटोन्मेये शकटपरिमाणे । अपिशब्दात् सङ्गृहीते वाक्ये ग्रथिते दशभारमितपरिमाणे छन्ने च **आचितः** । पु०। आपूर्वचि—चयने । क्तप्रत्ययः । "आचितः शाकटोन्मेये पलानामयुतद्वयोः । पुँल्लिङ्गः सङ्गृहीतेऽपि च्छन्नेऽपि स्यात्त्रिलिङ्गकः" इति मेदिनी ॥ चिन्तने संस्कारोद्बोधे पूर्वदृष्टपदार्थस्मरणे । अपिशब्दात् चक्राकारेण जलस्य स्वयं भ्रमणे ध्रुवाख्ये रोगसंस्थानभेदे घोटकचिह्ने वामावर्तनामके मणौ आवर्तने मेघाधिपभेदे माक्षिकधातौ च । न० । **आवर्तः** । पु० । आपूर्ववृत—वर्त्तने । घञ्प्रत्ययः । "आवर्त्तश्चिन्तने वारिभ्रमे चाऽवर्त्तने पुमान्" इति मेदिनी ॥ १४८ ॥ तेजिते तीक्ष्णीकृते । क्षिप्ते त्यक्ते । तथा क्लेशिते कुपिते हते च **आयस्तः** । पु० । आपूर्वयस—परिणामे च । क्तप्रत्ययः । "आयस्तस्तेजिते क्षिप्ते क्लेशिते कुपिते हते" इति मेदिनी ॥ तिङि व्याकरणप्रसिद्ध तिङन्ते पदे । भाषिते कथिते । तथा व्याख्याने च **आख्यातम्** । न० । आपूर्वख्या—कथने । क्तप्रत्ययः । "आख्यातं भाषिते तिङि" इति मेदिनी ॥ भ्रंशे सहसा पतने । तदात्वे तत्काले । चकारात् मार्गे च **आपातः** । पु० । आपूर्वपत—गतौ । भावे घञ्प्रत्ययः । "अहिंसितेऽपि चापातस्तदात्वे पतनेऽपि च" इति विश्वः ॥ गुणिते पूरिते, वर्धिते वा । हते ताडिते । मृषोक्ते वन्ध्यासुतोऽसीत्यादौ मृषार्थके वाक्ये । चकारात् ढकायाम् । पु० । पुरातने नूतनवस्त्रे वा । न० । **आहतम्** । आपूर्वहन्—हिंसायाम् । क्तप्रत्ययः । "आहतं गुणिते चाऽपि ताडिते च मृषार्थके । स्यात्पुरातनवस्त्रेऽपि नववस्त्रे च नाऽनके" इति मेदिनी ॥ १४९ ॥ दग्धे भस्मीकृते । स्थितवति कृतस्थिते । अपिशब्दात् पर्युषिते च **उषितम्** । त्रि० । उष—वधे, दाहे च । क्तप्रत्ययः । वस—निवासे । क्तो वा । "उषितं व्युषिते दग्धे" इति मेदिनी ॥ व्यसनार्त्ते व्यसनपीडिते, व्यसनेष्वासक्ते वा । चकारात् राहुग्रस्ते सूर्ये चन्द्रे च । रक्तद्रव्येण रक्ते च **उपरक्तः** । पु० । उपपूर्वरञ्ज—रागे । क्तप्रत्ययः । "उपरक्तो व्यस-

स्याद्धुस्तूरेऽपि चोन्मत्तः क्षिते सृष्टेऽपि चोऽद्धृतम्।
उत्तप्तं शुष्कमांसेऽपि वह्न्युत्पातेऽप्युपाहितः॥ १५१॥
उदास्थितश्चरे द्वाःस्थे स्यादूतिः स्यूतिरक्षयोः।
ऋतमुञ्छशिले सत्ये एतावागतकर्बुरौ॥ १५२॥
ऐरावतो नागरङ्गेऽप्यथ कान्तिर्द्युतीच्छयोः।
किरातौ म्लेच्छभूनिम्बौ कान्तस्तु प्रियरम्ययोः॥ १५३॥

नार्ते राहुग्रस्तेन्दुसूर्ययोः" इति मेदिनी॥ उद्गते उदिते। प्रोक्ते कथिते। तद्वत् उत्थिते वृद्धे च **उदितम्**। त्रि०। वद—वाक्ये, सन्देशे च। उद्पूर्वइण्—गतौ। क्तप्रत्ययो वा। "उत्तुङ्गे मुद्गरेऽपि स्यादुदितं तूक्त उद्गते" इति मेदिनी॥ १५०॥ धुस्तूरे स्वनामाख्याते वृक्षे। अपिशब्दात् मुचुकुन्दवृक्षे उन्मादवति ग्रहावेशवति च। त्रि०। **उन्मत्तः** स्यात्। पु०। उत्पूर्वमद—जाड्ये। करणे क्तप्रत्ययः। "उन्मत्त उन्मादवति धुस्तूरमुचुकुन्दयोः" इति मेदिनी॥ क्षिते उत्क्षिप्ते। सृष्टे त्यक्ते। अपिशब्दात् भुक्तोज्झिते कृतोद्धारे पृथक्कृते। उच्छेदिते च **उद्धृतम्**। त्रि०। उद्पूर्वहृ—हरणे। क्तप्रत्ययः। उद्पूर्वधृ—धारणे। क्तप्रत्ययो वा। "उद्धृतं स्यात्त्रिषूत्क्षिप्ते परिभुक्तोज्झितेऽपि च" इति मेदिनी। शुष्कमांसे आतपादिना कृतशोषणे मांसे। न०। अपिशब्दात् संतप्ते स्नाते च **उत्तप्तम्**। त्रि०। उद्पूर्वतप-दाहे, उपतापे वा। क्तप्रत्ययः। "उत्तप्तं शुष्कमांसेऽथ त्रिषु तप्ते परिप्लुते"इति मेदिनी। वह्न्युत्पाते अग्न्युत्पातरूपे उपद्रवे। अपिशब्दात् उल्कापातादौ आरोपिते योजिते च **उपाहितः**। पु०। उप आसङ्गमाहितं यतः। तथा उप—आपूर्वधृ—धारणे। क्तप्रत्ययो वा। "उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु" इति मेदिनी॥ १५१॥ चरे स्वपरराष्ट्रवृत्तान्तज्ञानार्थं राजनियोगेन इतस्ततो भ्रमणकर्तरि चारे। द्वाःस्थे द्वारपाले। तथा अध्यक्षे प्रव्रज्यारूपस्थानच्युते नष्टसंन्यासे परिव्राजके च। **उदास्थितः**। त्रि०। उदापूर्वस्था—गतिनिरोधे। क्तप्रत्ययः। "उदास्थितः प्रतीहारे प्रव्रज्या वसिते चरे" इति मेदिनी। स्यूतिः सूच्यादिना वस्त्रादिसीवनम्। रक्षः रक्षणं तयोः। तथा लीलायां क्षरणे च। **ऊतिः**। स्त्री०। ऊयी—तन्तुसन्ताने। क्तिन् प्रत्ययः। अव—रक्षणे। क्तिन्प्रत्ययो वा। "ऊतिः स्त्री रक्षणे स्यूतौ"इति मेदिनी॥ उञ्छशिले "ऋतमुञ्छशिलं ज्ञेयम्" इत्युक्तेः ब्राह्मणस्य उपजीव्यवृत्तौ मोक्षे। सत्ये सत्यवचने। तथा सुप्रिये—वाक्ये जले कर्मफले "ऋतं पिबन्तौ" इति श्रुतिः। दीप्ते पूजिते च **ऋतम्**। न०। ऋ—गतौ। क्तप्रत्ययः। "ऋतमुञ्छशिले जले। सत्ये दीप्ते पूजिते स्यात्" इति मेदिनी॥ आगतः उपस्थितः आयातो वा। कर्बूरः स्वर्णम्। हरितालः तद्वर्णे वा। तयोश्च **एतः**। त्रि०। पु०। इण्—गतौ। तन्प्रत्ययः। "एतः कर्बूर आगते" इति मेदिनी॥ ॥ १५२॥ नागरङ्गे स्वनामाख्याते जम्बीरभेदे। अपिशब्दात् समुद्रजाते इन्द्रगजे

केतुर्ग्रहोत्पातचिह्ने कलितं विदिताप्तयोः ।
कपोतः पक्षिमात्रेऽपि गुप्तं रक्षितगूढयोः ॥ १९४ ॥
गतिर्यात्रादशोपायाः शण्डः सूर्यश्च गोपतिः ।
गृही सत्री गृहपतिर्गीतं शब्दितगानयोः ॥ १९५ ॥

लकुचद्रुमे च **ऐरावतः** । पु० । इरा जलानि सन्त्यस्य । इराशब्दात् मतुप् प्रत्ययः ।मस्य वः । इरावान् समुद्रस्तत्र भवः । अणूप्रत्ययो वा । " ऐरावतोऽभ्रमातङ्गे नारङ्गे लकुचद्रुमे । नागभेदे च पुंसि स्याद्विद्युत्तद्भेदयोः स्त्रियाम्" इति मेदिनी ॥ द्युतिः शोभा । इच्छा अभिलाषः तयोः । तथा दीप्तौ च **कान्तिः** । स्त्री० । कम-वाञ्छायाम्, कामनायां वा । क्तिन्प्रत्ययः । "कान्तिः शोभेच्छयोः स्त्रियाम्' इति मेदिनी ॥ म्लेच्छः जातिभेदः पर्यन्तदेशाश्रयी । भूनिम्ब अरिष्टः । तयोः । तथा अल्पतनौ " तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे ! किरातदेशो देवेशि ! विन्ध्यशैलेऽवतिष्ठति इत्युक्तदेशे च । **किरातः** । पु० । कीर्यन्तेऽवस्कारा अत्र । कॄ-विक्षेपे । कप्रत्ययः । पर्यन्तदेशमतति । अणूप्रत्ययः । " किरातो म्लेच्छदेशे स्याद्भूनिम्बेऽल्पतनावपि । स्त्रियां चामरधारिण्यां कुट्टिनीदुर्गयोरपि" इति मेदिनी ॥ प्रियः भर्ता पतिर्वा । रम्यः रमणीयः तयोः । तद्वत् लौहे सूर्यकान्तशिलायां चन्द्रकान्तमणौ वसन्ते हिज्जलवृक्षे वासुदेवे कुङ्कुमे शोभने अभीष्टे त्रि० । नार्यां प्रियङ्गुवृक्षे च । स्त्री० । **कान्तः** । पु० । कन-दीप्तौ । क्तप्रत्ययः । कम-वाञ्छायाम् । क्तो वा । "कान्ता नार्यां प्रियङ्गौ स्त्री शोभने त्रिषु माधवे । लोहे च चन्द्रसूर्यायां पर्य्यायान्तःशिलासु च" इति मेदिनी ॥ १९३ ॥ ग्रहोत्पातः ग्रहः राहोः शरीरात्मकः उपग्रहः, तेषामुत्पातरूपता । सा च ज्योतिःशास्त्रे प्रसिद्धा । चिह्नं लक्षणम् । तस्मिन् । न० । तथा रोगे द्युतौ पताकायां रिपौ च केतुः । पु० । चाय-दर्शने । तु प्रत्ययः । क्यादेशः । "केतुर्ना रुक्पताकाऽविग्रहोत्पातेषु लक्षणे" इति मेदिनी ॥ विदितः ज्ञातः । आप्तः प्राप्तः तयोः । तथा । भेदिते गृहीते उक्ते सङ्ख्याते विचारिते बद्धे च **कलितम्** । त्रि० कल-गतौ, सङ्ख्यायां च । क्तप्रत्ययः ।"कलितं विदिताप्तयोः" इति मेदिनी॥ पक्षिमात्रे पक्षिसाकल्ये । अपिशब्दात् पारावते च **कपोतः** । पु० । को वातः पोत इव यस्य । "कपोतः स्याच्चित्रकण्ठपारावतविहङ्गयोः" इति मेदिनी ॥ रक्षितः त्राणम् । गूढं संवृतं तयोः । तथा वैश्यसंज्ञायां च । पु० । **गुप्तम्** । त्रि० । गुप-रक्षणे, गोपने वा । क्तप्रत्ययः । "गुप्तं स्याद्रक्षिते गूढे"इति मेदिनी ॥ १९४॥ यात्रा गमनम् । दशा अवस्था । उपायः राज्ञां रिपुनिराकरणहेतुसाम्यः, क्रियासाधनार्थमवश्यकरणीयः । तेषु च । तथा गमने पथि ज्ञाने नाडीव्रणपथे कर्मफले प्राप्तौ च **गतिः** । स्त्री० । गम-गतौ । भावादौ क्तिन्प्रत्ययः । "गतिः स्त्री मार्गदशयोर्ज्ञाने यात्राभ्युपाययोः । नाडीव्रणे सरण्यां च"इति मेदिनी॥शण्डः गवां पतिर्वृषः । सूर्यः किरणपतिः । तत्र च । चकारात् शिवे भूमिपतौ नृपे श्रीकृष्णे स्वर्गपतौ-शक्रे ऋषभनामौषधौ च **गोपतिः** । पु० । गवां पतिरिति षष्ठीतत्पुरुषः । "गोपतिः शिवशण्डयोः । नृपभास्करयोः

गर्जितं स्तनिते नेभे ग्रस्तं वाग्भेदभुक्तयोः।
चर्मण्वत्यौ नदीरम्भे जातं व्यक्तौघजन्मसु ॥ १५६ ॥
सूर्यावर्तेऽपि जामाता ना वाते पिष्टपे जगत्।
जातिश्छन्दासि मालत्यां चुल्ल्यां जातीफले कुले ॥ १५७ ॥
व्याप्तविस्तृतवाद्येषु ततं तिक्तं सुगन्ध्यपि।
चापे तृणत्वे तृणता तातः पित्रनुकम्पयोः ॥ १५८ ॥

पुंसि'' इति मेदिनी ॥ गृही गृहस्थः। सत्री गृहस्वामी। तयोः। तथा गन्त्रिणि धर्मे च **गृहपतिः**। पु०। गृहस्य पतिरिति षष्ठीतत्पुरुषः। ''भवेद्गृहपतिः पुंसि गृहस्थेऽपि च सत्रिणि'' इति मेदिनी ॥ शब्दितः नादितम्। गानं गीतकर्म तयोश्च। **गीतम्**। न०। गै—शब्दे। क्तप्रत्ययः। ''गीतं शब्दितगानयोः'' इति मेदिनी ॥१५५॥ स्तनिते मेघशब्दे। इभे मत्तहस्तिनि। पु०। **गर्जितम्**। न०। गर्ज—शब्दे। क्तप्रत्ययः। ''गर्जितं वारिवाहादिध्वनौ ना मत्तकुञ्जरे'' इति मेदिनी ॥ वाग्भेदः लुप्तवर्णपदो वाग्विशेषः। भुक्तः भक्षितः तयोश्च। त्रि०। **ग्रस्तम्**। न०। ग्रस—भक्षणे। क्तप्रत्ययः। ''ग्रस्तं ग्रासीकृतेऽपि स्याल्लुप्तवर्णपदोदिते'' इति मेदिनी ॥ नदी गङ्गाभेदः। रम्भा कदलीपादपः। तयोश्च। **चर्मणवती**। स्त्री०। चर्माऽस्त्यस्याम्। मतुप्प्रत्ययः। निपातनात् साधुः। ''चर्मण्वती नदीभेदे कदलीपादपे स्त्रियाम्'' इति मेदिनी ॥ व्यक्तः स्फुटः, प्रकाशितो वा। ओघः समूहः। जन्म उत्पन्नम्। तेषु च। तथा प्रशस्ते च। त्रि०। **जातम्**। न०। जन—जनने। क्तप्रत्ययः। ''जातं व्यक्तौघजन्मसु। क्लीबं त्रिलिङ्गमुत्पन्ने'' इति मेदिनी ॥ १५६ ॥ सूर्यावर्ते क्षुपभेदे, शाके वा। अपिशब्दात् दुहितृपतौ वल्लभे स्वामिनि च **जामाता**। पु०। जायां माति मिनोति मिमीते वा। मा—माने, शब्दे वा। तृच्प्रत्ययः। ''जामाता दुहितुः पत्यौ सूर्यावर्ते धवे पुमान्'' इति मेदिनी ॥ वाते वायौ। पिष्टपे भुवने। न०। तथा जङ्गमे च। त्रि०। **जगत्**। पु०। गम—गतौ। क्विप्प्रत्ययः। निपातनात् साधुः। ''जगत्स्यात्पिष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु'' इति मेदिनी ॥ छन्दसि (नियताक्षरवर्णमात्रादिसंनिवेशवशात् चतुश्चरणादौ) उक्तादिछन्दोभेदे। मालत्यां जातिलतायाम्। चुल्ल्यां पाकार्थमग्निस्थापनस्थाने। जातीफले स्वनामाख्याते फले। कुले पौत्राद्यपत्यात्मके गोत्रे। तथा जन्मनि अनुगतैकाकारबुद्धिजनसमर्थे धर्मभेदे वेदशाखाभेदे षड्जरेतिषु सप्तसु स्वरेषु अलङ्कारभेदे आमलक्यां च **जातिः**। स्त्री०। जन—जनने। क्तिप्रत्ययः। ''जातिः स्त्री गोत्रजन्मनोः। अश्मन्तिकामलक्योश्च सामान्यछन्दसोरपि। जातिफले च मालत्याम्'' इति मेदिनी ॥ १५७ ॥ व्याप्तं पूर्णम्। विस्तृतं विस्तारयुक्तम्। वाद्यं वादनीयं मृदङ्गादिकम्, वीणावाद्यं वा तेषु। तथा वायौ। पु०। पृथौ च। त्रि०। **ततम्**। न०। तन—विस्तृतौ। क्तप्रत्ययः। ''ततं व्याप्ते विस्तृते च त्रिलिङ्गकम्। क्लीबं वीणादिवाद्ये स्यात्पुंलिङ्गस्तु सदागतौ'' इति मेदिनी ॥ सुगन्धि इष्टगन्धि, सुरभि वा। तत्र च अपिशब्दात् वरुणद्रुमे कुटजे रसभेदे पर्पटौषधौ

दुर्गतिर्नरके नैःस्व्ये दुर्जातं व्यसनेऽपि च ।
दिवाभीत उलूके स्यात्कुम्भिले कुमुदाकरे ॥ १५९ ॥
विसृष्टे रक्षिते दत्तं द्रुतं शीघ्रविलीनयोः ।
दशने शैलशृङ्गे च दन्तः स्यादौषधे स्त्रियाम् ॥ १६० ॥
दितिः खण्डनदैत्याम्बे धृतिस्तुष्टौ क्रतावपि ।
राशौ च धातुनिर्वाणे सुस्थितत्वे च निर्वृतिः ॥ १६१ ॥

कटुकायां पाठायां छिक्कण्यां च । **तिक्तम् ।** न० । तिज—तीक्ष्णीकरणे । क्तप्रत्ययः । "तिक्तो रससुगन्धयोः । तिक्ता तु कटुरोहिण्यां पर्पटे तु नपुंसकम्" इति मेदिनी ॥ चापे धनुषि । तृणत्वे तृणभावे च । **तृणता ।** स्त्री० । तृणशब्दात् भावे ताप्रत्ययः । स्वार्थे तल्प्रत्ययश्च । तृणानां समूह इति समूहार्थे तल्प्रत्ययो वा । "तृणता धनुषि तृणत्वे" इति मेदिनी ॥ पिता जनकः । अनुकम्पा दया तयोः । तथा पूज्ये । त्रि० । **तातः ।** पु० । तन उपकारे, श्रद्धायां वा । क्तप्रत्ययः, दीर्घश्च । "तातोऽनुकम्पो जनके इति मेदिनी ॥ १५८ ॥ नरके रौरवप्रभृते पापिनां दुःखभोगस्थानभेदे । नैःस्व्ये दारिद्रे । तथा दुष्टायां गतौ च **दुर्गतिः ।** स्त्री० । दुर्पूर्व गम—गतौ । क्तिन्प्रत्ययः । "दुर्गतिर्नरके नैःस्व्ये" इति मेदिनी ॥ व्यसने विपत्तौ । अपिशब्दात् आपदादौ असम्यग्जाते अनुचिते च । त्रि० । **दुर्जातम् ।** न० । दुष्टं जातम् । प्रादिसमासः । 'दुर्जातं व्यसने क्लीबेऽसम्यग्जातेऽन्यलिङ्गकम्' इति मेदिनी ॥ उलूके पेचके । कुम्भिले चौरे । कुमुदाकरे चन्द्रे च । **दिवाभीतः ।** पु० । दिवा दिवसे भीतः । "दिवाभीतः कुम्भिले स्यादुलूके कुमुदाकरे" इति मेदिनी ॥ १५९ ॥ विसृष्टे त्यक्ते, प्रेरिते वा । रक्षिते गोपिते । तथा द्वादशपुत्रमध्ये दत्तक इति ख्याते पुत्रभेदे दत्तात्रेयाख्ये अवतारभेदे दाने "दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम् । पण्यमूल्यं भृतिस्तुष्टया स्नेहात्प्रत्युपकारतः । स्त्रीणां चानुग्रहार्थं च दत्तं सप्तविधं स्मृतम्" इत्युक्ते दानभेदे च । न० । **दत्तम् ।** त्रि० । दा—दाने । क्तप्रत्ययः । "दत्तं विश्राणितेऽविते" इति मेदिनी ॥ शीघ्रं त्वरितम् । विलीनं द्रवीभूतं तयोः ॥ तथा नृत्ये गीते वाद्ये पलायिते च **द्रुतम् ।** त्रि० । द्रु—गतौ । क्तप्रत्ययः । "अथ द्रुतं त्रिषु । शीघ्रे विलीने विद्रावे" इति मेदिनी ॥ दशने चर्वणसाधनेऽस्थिभेदे । शैलशृङ्गे पर्वतनितम्बे । औषधे स्वनामाख्याते भेषजद्रव्ये । स्त्री० । चकारात् कुञ्जे सानुनि द्वात्रिंशत्सङ्ख्यायां च **दन्तः ।** पु० । अन्तर्भावितण्यर्थे । दम—शमे, दण्डे च । तन्प्रत्ययः । "दन्तोऽद्रिकटके कुञ्जे दशने नौषधौ स्त्रियाम्" इति मेदिनी ॥ १६० ॥ खण्डनं भञ्जनं, भेदनं वा । दैत्याम्बा दैत्यमाता । तयोः । कश्यपपत्न्यां च **दितिः ।** स्त्री० । दो—अवखण्डने । क्तिच्प्रत्ययः । वा ङीप् । क्वचित् **"दिती"** च । भावे क्तिन्प्रत्ययः । न ङीप् । "दितिर्दैत्यजनन्यां च खण्डनेऽपि च योषिति" इति मेदिनी ॥ तुष्टौ सन्तोषे । क्रतौ यागे । अपिशब्दात् विष्कम्भावधिके अष्टमे योगे धारणे सुखे धारणायाम् अवसादेऽपि शरीरादेः

अस्वाध्याये कुरूपे च प्रत्युक्तौ स्त्री निराकृतिः ।
जम्ब्वां स्त्री ना नदीकान्तः सिन्धुवारे जलाब्धिषु ॥ १६२ ॥
निमित्तं हेतुचिह्नाङ्गशकुनोद्देश्यपर्वसु ।
प्रसृतः कुब्जिते पाणौ जङ्घायां स्त्री गते त्रिषु ॥ १६३ ॥
प्रकृतिर्गुणसाम्ये स्यात्स्वभावामात्ययोरपि ।
प्रतीकारे प्रतिकृतिः प्रतिबिम्बेऽथ पद्धतिः ॥ १६४ ॥

स्तम्भनशक्तौ अष्टादशाक्षरे छन्दोभेदे अष्टादशसङ्ख्यायां च । **धृतिः** । स्त्री० । धृ-धारणे । क्तिन्-प्रत्ययः । "धृतिर्नेष्टौ स्त्रियां तुष्टौ योगिभिर्धैर्यधारणे" इति मेदिनी ॥ राशौ धान्यादिपुञ्जे, मेषादिराशौ वा । धातुः स्वर्णादिः । निर्वाणं मोक्षः । तत्र च । सुस्थितत्वे सुखे, आरोग्यत्वे वा । चकारात् अस्तङ्गमने मृत्यौ च **निर्वृतिः** । स्त्री० । निरपूर्व-वृ--आवरणे । क्तिन्प्रत्ययः । "निर्वृतिः स्वस्थितावस्तङ्गमने च सुखे स्त्रियाम्" इति मेदिनी ॥ ॥ १६१ ॥ अस्वाध्याये स्वाध्यायविरहिते, स्वकीयत्वेन विहिताध्यायरहिते । कुरूपे गर्हितरूपे । प्रत्युक्तौ विरुद्धवाक्ये । चकारात् वारणे च **निराकृतिः** । स्त्री० । निरआपूर्वकृ--करणे । क्तिन्प्रत्ययः । "निराकृतिरनाकारेऽस्वाध्याये त्रिषु वारणे" इति मेदिनी ॥ जम्ब्वां जम्बुवृक्षे । स्त्री० । सिन्धुवारे निर्गुण्डिवृक्षे । जलं तोयम् । अब्धिः समुद्रः तेषु । तथा हिज्जलवृक्षे काकजङ्घौषधौ च **नदीकान्तः** । पु० । नदी कान्ता यस्य । "नदीकान्तः समुद्रे स्याद्धिज्जले सिन्धुवारके" इति मेदिनी ॥ १६२ ॥ हेतुः कारणम् । चिह्नं लक्षणम् । अङ्गम् अवयवम् । शकुनं भावीशुभाशुभसूचकः ज्योतिषाद्युक्तः पक्षी । उद्देश्यम् अनुसन्धानम् अन्वेषणं वा । पर्व ग्रन्थिः, उत्सवो वा । तेषु च **निमित्तम्** । न० । निपूर्वमद--स्नेहे । तक्प्रत्ययः । क्वचित्तु "निमित्तं हेतुचिह्नाङ्गे तु दैवादेशपर्वसु" इति पाठो दृश्यते। "निमित्तं हेतुलक्ष्मणोः" इति मेदिनी ॥ कुब्जिते पाणौ कुब्जहस्तवति । जङ्घायां गुल्फजान्वोरन्तराले अवयवे । स्त्री० । गते गमने । त्रि० । तथा अर्धाञ्जलौ प्रवृद्धे प्रसादिते विनीते वेगिते नियुक्ते च **प्रसृतः** । पु० । प्रपूर्व-सृ--गतौ । क्तप्रत्ययः।"प्रसृतः सम्प्रचारे स्याद्विनीते वेगिते त्रिषु। अर्द्धाञ्जलौ तु पुँल्लिङ्गो जङ्घायां प्रसृता मता । प्रसृतं कुसुमे क्लीबं त्रिषु सञ्जातसूतयोः" इति मेदिनी ॥ १६३ ॥ गुणसाम्ये सत्त्वरजस्तमोरूपगुणत्रयात्मके साम्ये । अथवा स्वाम्यः स्वाम्यादिराज्याङ्गम् । तत्र च । स्वभावः प्रसिद्धः । अमात्यः मन्त्री तयोः । अपिशब्दात् उपादानकारणे लिङ्गे स्वामिनि अज्ञाने सुहृदि कोषे राष्ट्रे पौरश्रेणौ दुर्गे बले शिल्पिनि शक्तौ योषिति परमात्मनि पञ्चभूतेषु करणे गुह्ये जन्तौ एकविंशत्यक्षरपादके छन्दोभेदे मातरि व्याकरणोक्ते प्रत्ययोत्पत्तिनिमित्ते शब्दभेदे च **प्रकृतिः** स्यात् । स्त्री० । प्रकरोति । प्रपूर्वकृ--करणे । क्तिच्प्रत्ययः । "प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गेऽमी पक्षत्यादयः स्त्रियाम्" इति मेदिनी ॥ प्रतीकार वैर नैर्यातने कृतस्यापकारस्य तुल्यरूपापकारकरणेन शोधने, रोगादेश्चिकित्सायां वा ।

पङ्क्तौ मार्गेऽपि पूतं तु पवित्रे बहुलीकृते ।
श्रेणिर्दश च पङ्क्तिः स्यात्प्रसूतिर्जन्मतोकयोः ॥ १६५ ॥
प्रतिपत्तिश्चित्प्रवृत्तिः प्राप्तिः प्रागल्भ्यगौरवे ।
पारावती गोपगीतिलवलीफलयोरपि ॥ १६६ ॥
पलितं कर्दमेऽपि स्याद्विधौ भूपे प्रजापतिः ।
शक्ते निवारणे वृत्तौ पर्याप्तं स्याद्यथेप्सिते ॥ १६७ ॥

प्रतिविम्बे प्रतिमायाम् । तथा सादृश्ये प्रतिनिधौ च **प्रतिकृतिः** । स्त्री० । प्रतिपूर्वकृ-करणे । क्तिन्प्रत्ययः । "प्रतिकृतिरर्चायां प्रतिनिधिप्रतिकारयोश्च स्त्री" इति मेदिनी ॥ पङ्क्तौ श्रेणौ । मार्गे पथि । अपिशब्दात् पूजादिज्ञापकग्रन्थभेदे च **पद्धतिः**। स्त्री० । पद्पूर्व-हन–वधे, गतौ वा । क्तिन्प्रत्ययः । वा ङीप् । "पद्धती" अप्यत्र । "पद्धतिः पङ्क्ति-वर्त्मनोः" इति मेदिनी ॥ पवित्रे व्रतादिना शुद्धे । बहुलीकृते राशीकृतमात्रे वृष-स्यापसारणेन राशीकृते खलस्थे धान्ये । तथा सत्ये शङ्खे श्वेतकुशे विकङ्कतवृक्षे च । पु० । दूर्वायाम् । स्त्री० । टाप् च । **पूतम्** । न० । पू–शोधे । क्तप्रत्ययः । "पूतं त्रिषु पवित्रे च शटिते बहुलीकृते" इति मेदिनी ॥ श्रेणिः सजातीयसन्ततिः । तत्र । दश दशसङ्ख्यायाम् । तथा पञ्चाक्षरपादके दशाक्षरपादके च छन्दोभेदे पृथिव्यां गौरवे पाके प्रपञ्चे च **पङ्क्तिः** । स्यात् । स्त्री० । पचि–विस्तारे । क्तिन्प्रत्ययः । "पङ्क्तिः स्याद्गौरवे पाके" इति मेदिनी । "पङ्क्तिर्दशाक्षरच्छन्दोदशसङ्ख्यावलीष्वपि" इति विश्वः ॥ जन्म प्रस-वम् । तोकम् अपत्यं तयोः । तथा उदरे मातरि च **प्रसूतिः** । स्त्री० । प्रपूर्वसू–प्रेरणे । क्तिन्प्रत्ययः।"प्रसूतिरुद्भवेऽपि स्यात्तनये दुहितर्यपि" इति मेदिनी॥१६४॥१६५॥ चित्प्रवृत्तिः चेतनाप्रयत्नभेदः । प्राप्तिः पदवृद्धिः । प्रागल्भ्यं प्रतिभान्वितम् । गौरवं गुरुत्वम्, अभ्युत्थाना-दिसम्मानं वा । तेषु । तथा कर्तव्यताज्ञाने च **प्रतिपत्तिः** । स्त्री० । प्रतिपूर्वपद–गतौ, स्थैर्ये वा । क्तिन्प्रत्ययः । "प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च । सम्प्राप्तौ च प्रबोधे च पदप्राप्तौ च योषिति" इति मेदिनी ॥ गोपगीतिः गोपालगीतिका । लवलीफलं लवली स्वनामाख्यातवृक्षः तत्फलं तयोः । अपिशब्दात् नदीभेदे च । **पारावती** । स्त्री० । परं जीवमवति । अव–रक्षणे । शतृप्रत्ययः । तस्येदमित्यण् । ङीप् च । "पारावती गोपगीति-नदीभिल्लवलीफले" इति मेदिनी ॥ १६६ ॥ कर्दमे पङ्के । अपिशब्दात् केशादौ जरया जातायां श्वेततायां मांसादेर्वलीपलितमात्रे शैलजे तापे वृद्धे च **पलितं** स्यात् । न० । पल–गतौ । भावे क्तप्रत्ययः । "पलितं शैलजे तापे केशपाके च कर्दमे" इति मेदिनी ॥ विधौ चतुर्मुखे ब्रह्मणि । भूपे भूपाले । तथा प्रजासर्जके दक्षादौ जामातरि सूर्ये वह्नौ त्वष्टरि च **प्रजापतिः** । पु० । प्रजायाः पतिरिति षष्ठीतत्पुरुषः । "प्रजापतिर्ना दक्षादौ महीपाले [illegible]" इति मेदिनी ॥ शक्ते सामर्थ्ये । निवारणे निषेधे । वृत्तौ वर्तने । यथेप्सिते यथेष्टे ।

प्रेतो मृते प्राणिभेदे पित्सन्पातेच्छुपक्षिणोः ।
क्लीबं बिन्दौ पृषन्तेणे पृषतोऽप्यनयोर्नरि ॥ १६८ ॥
खातादौ पूरिते पूर्तं पातो भ्रंशे च रक्षिते ।
प्रेषिते च प्रतिक्षिप्तं प्रतीतः सादरेऽपि च ॥ १६९ ॥
प्लुतः स्वरे चाऽभियुक्तहतौ च प्रार्थितौ स्मृतौ ।
द्विष्टेऽपि च प्रतिहतः पिण्डितं गुणिते घने ॥ १७० ॥

तथा योग्यत्वे समर्थे आप्ते च । त्रि० । **पर्याप्तं** स्यात् । न० । परिपूर्वआप—प्राप्तौ । भावे क्तप्रत्ययः । कर्त्तरि वा । "पर्याप्तं तु यथेष्टे स्यात्तृप्तौ शक्ते निवारणे" इति मेदिनी ॥ ॥ १६७ ॥ मृते कालङ्कृते । प्राणिभेदे नरकस्थे जीवे, पिशाचभेदे वा । **प्रेतः** । पु० । प्रपूर्व-इण—गतौ । क्तप्रत्ययः । "प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः" इति मेदिनी ॥ पातेच्छुः पतनेच्छावान् । पक्षी विहङ्गमः तयोश्च । **पित्सन्** । पु० । पत—गतौ । सन् । शतृप्रत्ययः । "पित्सन्विहङ्गमे पुंसि पतनेच्छौ पुनस्त्रिषु" इति मेदिनी॥ बिन्दौ अल्पांशे । न० । ऐणे शुभ्रबिन्दुमति मृगभेदे । पु० । **पृषत्** । न० । पृष—सेके । अतिप्रत्ययः । किच्च । अनयोः बिन्दुशुभ्रबिन्दुमन्मृगभेदयोः **पृषतः** । पु० । पृष—सेके अतच्प्रत्ययः । किच्च । "पृषन्मृगे पुमान्बिन्दौ न द्वयोः पृषतोऽपि ना । अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभावपि" इति मेदिनी ॥ १६८ ॥ खातादौ खातादिकर्मणि विश्वजनोद्देशेन जलाशयदानादौ । पूरिते पूर्णे । तथा काले छन्ने । त्रि० । पूरणे च । न० । **पूर्तम्** । न० । पूर—पूर्तौ, प्रीणने च । क्तप्रत्ययः निपातनात् साधुः । "पूर्तं त्रिषु पूरिते स्यात्क्लीबं खातादिकर्मणि" इति मेदिनी ॥ भ्रंशे पतने । रक्षिते पालिते । त्रि० । चकारात् ज्योतिषोक्ते क्रान्तिसाम्यसम्पादके राहुरूपे ग्रहभेदे च **पातः**। पु० । पत--गतौ, पतने वा । घञ्प्रत्ययः । "पातो ना पतने त्राते" इति मेदिनी ॥ प्रेषिते प्रेरिते । चकारात् अधिक्षिप्ते बाधिते तिरस्कृतं च **प्रतिक्षिप्तम्** । त्रि० । प्रतिपूर्वक्षिप--प्रेरणे, नोदने वा । क्तप्रत्ययः । "प्रतिक्षिप्तं वारिते स्यात्प्रेषिते पञ्चके त्रिषु" इति मेदिनी । "प्रति-क्षिप्तं प्रतिहते प्रेषिते च निराकृते" इति विश्वः॥ सादरे आदरान्विते । अपिशब्दात् ख्याते ज्ञाते हृष्टे च **प्रतीतः**। त्रि०। प्रतिपूर्व--इण--गतौ । क्तप्रत्ययः। "प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयो त्रिषु" इति मेदिनी ॥ १६९ ॥ स्वरे नादे । चकारात् तिर्यग्गतौ झम्पेन गतौ अश्वगतिभेदे च **प्लुतः** । पु० न०। प्लु--सर्पणे, उत्प्लुत्यगतौ च । क्तप्रत्ययः । "प्लुतं तुरङ्गमगतौ क्लीबं पुंसि त्रिमात्रके" इति मेदिनी । अभियुक्तः अभिहितः । हतः प्रसिद्धः । तयोः । चकारात् पालिते शत्रुसंरुद्धे च **प्रार्थितः** । स्मृतः ज्ञेयः । त्रि० । प्रपूर्वअर्थ--याचने । क्तप्रत्ययः । "प्रार्थितं याचिते शत्रुसंरुद्धेऽभिहिते त्रिषु" इति मेदिनी ॥ द्विष्टे शत्रौ। अपिशब्दात् रुद्धे निरस्ते प्रतिस्खलिते च **प्रतिहतम्** । त्रि०। प्रतिपूर्वहन—वधे । क्तप्रत्ययः। "भवेत्प्रतिहतं द्विष्टे प्रति-स्खलितरुद्धयोः" इति मेदिनी । गुणिते गुणीकृते । घने घनीभूते । तथा संहते तुरुष्के च

प्राप्ते ज्ञाते परिगतं प्रपातौ भृगुनिर्झरौ ।
लोकायते कच्छपे च पञ्चगुप्तः स्मृतो बुधैः ॥ १७१ ॥
लब्धे समञ्जसे प्राप्तं पक्तिर्गौरवपाकयोः ।
पारिजातो देवतरौ मन्दारे पारिजातके ॥ १७२ ॥
वृत्तिवार्ताप्रवाहेषु प्रवृत्तिरथ घोटके ।
पाने च पीतिः सिक्ते तु प्रोक्षितं निहतेऽपि च ॥ १७३ ॥
रामानुजे नाट्यशास्त्रे दौष्मन्तौ भरतो नटे ।
जिने पूज्ये च भगवान्भोगवानाढ्यनागयोः ॥ १७४ ॥

पिण्डितम् । त्रि० । पिण्डि-राशीकरणे क्तप्रत्ययः । पिण्डितं गुणिते घने'' इति मेदिनी ॥ १७० ॥ प्राप्ते प्रयाते । ज्ञाते प्रसिद्धे । तथा विस्मृते चेष्टिते वेष्टिते गते च **परिगतम्** । त्रि० । परिपूर्वगम--गतौ । क्तप्रत्ययः । ''स्त्रियां परिगतं प्राप्ते विस्मृतज्ञातचेष्टिते'' इति मेदिनी ॥ भृगुर्मुनिभेदः । निर्झरः पर्वतान्निःसृतजलप्रवाहः तयोः । तथा तटरहिते निरवलम्बे पर्वतस्थाने कूले अवस्कन्दे च **प्रपातः** । पु० । प्रपतत्यस्मात् । पत-पतने । वञ्प्रत्ययः । ''देवमुन्यन्तरे शैले प्रपातो निर्झरे तटे'' इति मेदिनी ॥ लोकायते चार्वाकमते । कच्छपे कमठे च । **पञ्चगुप्तः** । पु० । बुधैः पण्डितैः । स्मृतः ज्ञातः । पञ्च गुप्तानि यस्य । ''पञ्चगुप्तस्तु चार्वाकदर्शने कमठे पुमान्'' इति मेदिनी ॥ १७१ ॥ लब्धे लाभे । समञ्जसे उचिते, युक्ते वा । **प्राप्तम्** । त्रि० । प्रपूर्वआप-प्राप्तौ । क्तप्रत्ययः ॥ गौरवं गौरवणीयम् । पाकः पचनम् । तयोः । **पक्तिः** । स्त्री० । पचि-विस्तारे । क्तिन्-प्रत्ययः । पक्तिः स्त्री गौरवे पाके'' इति मेदिनी ॥ देवतरौ सुरद्रुमभेदे । मन्दारे स्वनामाख्याते वृक्षे । पारिजातके पारिभद्रवृक्षे च । **पारिजातः** । पु० । पारमस्यास्ति पारी समुद्रस्तत्र जातः । जन-जनने । क्तप्रत्ययः । ''पारिजातः सुरतरौ पारिभद्रतरावपि'' इति मेदिनी ॥ १७२ ॥ वृत्तिर्निवर्त्तनम् । वार्ता वृत्तान्तम् । प्रवाहः जलस्रोतः तेषु । तथा अवन्त्यादिदेशे हस्तिमदे न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने प्रयत्नभेदे च **प्रवृत्तिः** । स्त्री० । प्रपूर्व-वृत-वर्त्तने । क्तिन्प्रत्ययः । ''प्रवृत्तिस्तु प्रवाहे स्यादुदन्ते च प्रवर्तने । अवन्त्यादौ च'' इति मेदिनी ॥ घोटके अश्वे । पाने द्रवद्रव्यस्य गलाधःसंयोजने । चकारात् गतौ शुण्डायां च । **पीतिः** । पु० । पा-पाने । क्तिच्प्रत्ययः । भावे क्तिश्च । अज-गतौ, क्षेपणे च । व्यादेशे कृते **वीति** र्वा । ''पीतिर्नाऽश्वे स्त्रियां पाने'' इति मेदिनी ॥ सिक्ते सेचनकर्मणि । निहते नाशिते । अपिशब्दात् हिते यज्ञार्थं संस्कृते मांसादौ च । ''भक्षयेत्प्रोक्षितं मांसम्'' इति स्मृतिः । **प्रोक्षितम्** । त्रि० । प्रपूर्वउक्ष-सेचने । क्तप्रत्ययः । ''प्रोक्षितं निहते सिक्ते'' इति मेदिनी ॥ १७३ ॥ रामानुजे दशरथकनिष्ठपुत्रे । नाट्यशास्त्रे भरतमुनिकृते नाटकशास्त्रे । दौष्मन्तौ चन्द्रवंशीये भरतराजपुत्रे । नटे नाटके । **भरतः** । पु० । तथा वेदव्यास-

सेवाविभागयोर्भक्तिर्भवद्युष्मत्सदर्थयोः।
पक्षिण्यां वाचि वृत्तौ च भारती भारतं पुनः॥ १७५॥
जम्बुद्वीपे व्यासकृतौ भूतिर्भरणमूल्ययोः।
कुड्यभेदनयोर्भित्तिर्भास्वन्तौ सूर्यभास्वरौ॥ १७६॥

प्रणीते लक्षश्लोकात्मके ग्रन्थभेदे। "हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता। तस्माच्च भारतं वर्षम्" इत्युक्ते जम्बुद्वीपान्तर्गते वर्षभेदे भरतनृपस्य वंश्ये अग्नौ च "**भारतं**"। न०। भरतान् भरतवंश्यानधिकृत्य कृतो ग्रन्थः।अण्प्रत्ययः। भरतेन चिह्नितं तस्येदं वा।अण्प्रत्ययः। भरतस्य गोत्रापत्यम्।अण्प्रत्ययः। तदधीयते पुनरण् च। इह भारतपदं मूलेन ग्रथितं अग्रेऽस्त्येव तथापि भरतपदानुषङ्गेण भारतपदस्य पर्यायास्तथा विवरणं कृतं वर्तते। "भरतो नाट्यशास्त्रे मुनौ नटे। रामानुजे च दौष्मन्तौ"। "भारतं ग्रन्थभेदे स्याद्वर्षभेदे" इति मेदिनी॥ जिने सर्वज्ञे। पूज्ये पूजनीये। तथा ऐश्वर्यादियुक्ते। पु०। दुर्गायाम्। स्त्री०। **भगवान्**। पु०। भगम् ऐश्वर्यादि अस्त्यस्य। मतुप्प्रत्ययः। मस्य वः।"भगवान्ना जिने गौर्यां स्त्रियां पूज्ये तु वाच्यकम्" इति मेदिनी॥ आढ्यः भोगयुक्तः। नागः सर्पः तयोः। तथा पातालगङ्गायां नागपुर्यां च। स्त्री०। **भोगवान्**। पु०। भोगः सर्पशरीरं भुजमस्त्यस्याम्। मतुप्प्रत्ययः। मस्य वः। "अथ भोगवती नागपुरीनद्योरहौ पुमान्" इति मेदिनी॥ १७४॥ सेवा आसेवनक्रिया, आराधना वा। विभागः प्रसिद्ध, भागो वा तयोः। तथा तदेकाग्रचित्तवृत्तिभेदे गौण्यां वृत्तौ उपचारे अवयवे भङ्ग्यां श्रद्धायां रचनायां च। **भक्तिः**। स्त्री०। भज–भागे, सेवायां च। क्तिन्प्रत्ययः। "भक्तिर्विभागे सेवायां स्त्रियाम्" इति मेदिनी॥ युष्मदर्थे युष्मच्छब्दस्य अर्थे। सर्वनामता चास्य। भवत्याः पुत्रः भवत्पुत्रः। सदर्थे स्वार्थे, वा सदर्थः विद्यमानार्थः तयो-। **भवत्**। त्रि०। भा–दीप्तौ। डवतुप्रत्ययः। भू–सत्तायाम्। शतृ च। "भवद्युष्मत्सतोस्त्रिषु" इति मेदिनी॥ पक्षिण्यां विहङ्गयोषिति। वाचि सरस्वत्याम्। वृत्तौ अलङ्कारोक्ते वृत्तिभेदे। "भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः" इति साहित्यम्॥ १७५॥ पुनः जम्बूद्वीपे जम्बुवृक्षचिह्निते द्वीपे। व्यासकृतौ वेदव्यासरचनायां भारते च। **भारतम्**। न०। **भारती**। स्त्री०। भृ–धारणे, भरणे वा। अतच्प्रत्ययः। स्वार्थे प्रज्ञाद्यण्। "भारती। वचने च सरस्वत्यां पक्षिः-वृत्तिप्रभेदयोः" इति मेदिनी॥ भरणं पोषणं, धारणं वा। मूल्यं वेतनं तयोः। तथा भवने अणिमाद्यष्टविधैश्वर्ये शिवाङ्गभस्मनि भूतृणे सम्पत्तौ जात्यां वृद्धिनामौषधे च **भूतिः**। स्त्री०। भू–सत्तायाम्। क्तिन्प्रत्ययः। "भूतिर्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम्" इति मेदिनी। कुड्यं गृहादेः कुड्यम्। भेदनं विदारणम्। तयोः। तथा पल्ल्यां च। **भित्तिः**। स्त्री०। भिद्–द्विधाकरणे। क्तिन्प्रत्ययः। "भित्तिः कुड्यप्रदेशयोः" इति मेदिनी॥सूर्यः अर्कः। भास्वरः दीप्तियुक्तः, अर्कवृक्षो वा तयोः। तथा वीरे च **भास्वान्**। पु०। भाः अस्त्यर्थे मतुप्-

पृथिवीजननीगावो ब्रह्माण्याद्याश्च मातरः ।
मूर्धाभिषिक्तोऽमात्येऽपि मुक्तौ निर्वृतमोचितौ ॥ १७७ ॥
मूर्तं स्यात्त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि ।
मतिरिच्छाप्यथ यतिः पाठच्छेदे मुनौ पुमान् ॥ १७८ ॥
न्याययोजनयोर्युक्तिः पाश्यब्धी यादसाम्पती ।
रेवती हलिपत्न्यां भे स्मरपत्न्यां रतेः रतिः ॥ १७९ ॥

प्रत्ययः । मस्य वः । "भास्वान्भास्वरसूर्ययोः" इति मेदिनी ॥ १७६ ॥ पृथिवी भूमिः । जननी अम्बा । गौः वृषः । तेषु । ब्रह्माणी ब्राह्मी । आदिपदात् माहेश्वरी चण्डी वाराही वैष्णवी कौमारी । चामुण्डा चर्चिकाश्चात्र सङ्गृह्यन्ते । तथोक्तम् । "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्टमातरः" इति । तत्र शिवसहचरीभेदे तथा विभीतौ लक्ष्म्यां रेवत्याम् आखुकर्ण्याम् इन्द्रवारुण्यां जटामांस्यां च **माता** । त्रि० । मा-माने । तृच्प्रत्ययः । "माता गौर्यादिजननी गोब्रह्माण्यादिभूमिषु" इति मेदिनी ॥ अमात्ये मन्त्रिणि । अपिशब्दात् भूपाले क्षत्रिये च मूर्धाभिषिक्तः । पु० । मूर्ध्नि अभिषिक्तो यस्य । "मूर्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च" इति मेदिनी ॥ निर्वृतः प्राप्तमोक्षः । मोचितः त्यक्तः तयोः । तथाः आनन्दिते मौक्तिके च । स्त्री० । **मुक्तः** । त्रि० । मुच-त्यागे । क्तप्रत्ययः । "मुक्तः प्राप्तमोक्षे च मोचिते । त्रिषु स्त्री मौक्तिके" इति मेदिनी ॥ १७७ ॥ मूर्च्छाले मूर्च्छान्विते मूर्च्छाविशिष्टे वा । कठिने कर्कशे । मूर्तिमति देहे, आकारयुक्ते वा । अपिशब्दात् न्यायोक्तेषु क्षितिजलपावकपवनमनःसु च **मूर्तम्** । त्रि० । मूर्च्छ-मोहे । क्तप्रत्ययः । दीर्घः । "मूर्तं स्यात्त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि" इति मेदिनी ॥ इच्छा अभिलाषा । तत्र । अपिशब्दात् ज्ञाने स्मृतौ च **मतिः** । स्त्री० । मन-बोधे । भावे क्तिन्प्रत्ययः । क्तिच । "मतिः स्त्रीच्छाधियोः स्मृतौ" इति मेदिनी ॥ पाठच्छेदे उच्चारणकालविच्छेदे, छन्दोग्रन्थविख्याते जिह्वाया विश्रामस्थाने वा । मुनौ परिव्राजके, संन्यासिनि, बौद्धभिक्षौ वा । **यतिः** । पु० । यतते मोक्षाय । यत-यत्ने । इन्प्रत्ययः । यम्यते जिह्वा यत्र । यम-उपरतौ । क्तिन्-प्रत्ययः । यत्-परिमाणे । यच्छब्दात् डतिप्रत्ययः । "यतिः स्त्रीपाठविच्छेदे निकारयतिनोः पुमान्" इति मेदिनी ॥ १७८ ॥ न्यायः नयोपायः, उचितो वा । योजनं संयोगः तयोः । तथा व्यवहारे अनुमाने तत्साधकलिङ्गज्ञानादौ नाटकाङ्गविशेषे च **युक्तिः** । स्त्री० । युज-युतौ । क्तिन्प्रत्ययः । "युक्तिः स्त्री न्याययोगयोः" इति मेदिनी ॥ पाशी पश्चिमदिशाधिपतिः वरुणः । अब्धिः समुद्रः तयोश्च । **यादसाम्पतिः** । पु० । षष्ठीतत्पुरुषः । अलुक्समासः । "यादसाम्पतिरम्बोधौ पश्चिमाशापतौ पुमान्" इति मेदिनी ॥ हलिपत्न्यां बलदेवपत्न्यां रेवतराजकन्यायां वा । भे अश्विन्यावधितः सप्तविंशतिसङ्ख्याते नक्षत्रे । तथा तत्सङ्ख्यायां मातृकाभेदे स्त्रीगव्यां नदीभेदे दुर्गायां च **रेवती** । स्त्री० । रेवतस्यापत्यम् । अण्प्रत्ययः । पृषोदरादित्वात् साधुः ।

रिक्तं वनेऽपि रीतिस्तु लोहकिट्टारकूटयोः।
रोहितमृजुशक्रास्त्रे रक्ते ना मृगमीनयोः॥ १८०॥
शैलभेदे सुवर्णालौ शङ्करेऽपि च रैवतः।
स्वर्णाद्यक्तेऽपि रसितं कस्तूरीपृक्कयोर्लता॥ १८१॥
वर्तुलाधीतयोर्वृत्तं वार्तं कुशलनीरुजोः।
वासेऽपि वसतिर्वृक्षमात्रेऽपि च वनस्पतिः॥ १८२॥

रेव—गतौ। अतच्प्रत्ययः। गौरादित्वात् ङीप्। "रेवती हलिपत्न्यां स्यात्ताराभिन्मातृभेदयोः" इति मेदिनी॥ स्मरपत्न्यां कामपत्न्याम्। रते रमणे। तथा रागे गुह्ये च **रतिः**। स्त्री०। रम—क्रीडायाम्। क्तिन्प्रत्ययः। "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिनी॥ ॥१७९॥ वने दावे। अपिशब्दात् शून्ये निरर्थके च **रिक्तम्**। न०। त्रि०। रिच—सम्पर्के, वियोगे च। क्तप्रत्ययः। "रिक्तं शून्ये वने" इति मेदिनी॥ लोहकिट्टं लौहमलम्। आरकूटः पित्तलं तयोः। तुकारात् प्रस्तावे क्षरणे सीमायां गतौ स्वभावे अलङ्कारोक्ते गौड्यादिरचनाभेदे च **रीतिः**। स्त्री०। री—गतौ, क्षरणे च। क्तिन्प्रत्ययः। "रीतिः स्त्रियां स्यन्दप्रचारयोः। पित्तले लोहकिट्टे च" इति मेदिनी॥ ऋजुशक्रास्त्रे सरलेन्द्रचापे। रक्ते रुधिरे। मृगः स्वनामाख्यातः मृगविशेषः। मीनः स्वनामाख्यातो मत्स्य-भेदः तयोः। तथा रक्तवर्णे स्वनामाख्याते वृक्षे कुङ्कुमे च **रोहितम्**। न०। रुह—उद्भवे। इतच्प्रत्ययः। "रोहितं रक्ते ऋजुशक्रशरासने। पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे" इति मेदिनी॥ १८०॥ शैलभेदे द्वारिकासमीपस्थे पर्वतभेदे। सुवर्णालौ स्वर्णालुवृक्षे। शङ्करे शिवे। अपिशब्दात् दैत्यभेदे चतुर्दशसु मनुषु मनुभेदे च **रैवतः**। पु०। रेवत्या नद्या अदूरो देशः। अण्प्रत्ययः। रेवत्यां भवः। ण्यप्रत्ययश्च। "रैवतस्तु सुवर्णालौ शैलभेदेऽपि शङ्करे" इति मेदिनी॥ स्वर्णाद्यक्ते सुवर्णादिलेपने। अपिशब्दात् मेघादिशब्दे विहगादिशब्दे शब्दवति आस्वादिते च। त्रि०। **रसितम्**। न०। रस—आस्वादे। क्तप्रत्ययः कर्तरि, कर्मणि वा। "रसितः पुनः। रुतस्तनितयोः क्लीबं स्वर्णादिखचिते त्रिषु" इति मेदिनी॥ कस्तूरी मृगनाभः। पृक्का शाकभेदः तयोः। तथा शाखारहिते गुडूच्यादौ प्रियङ्गौ ज्योतिष्मत्यां वल्ल्यां च **लता**। स्त्री०। लत—आघाते। अच्प्रत्ययः। "लता प्रियङ्गुशाखयोः। पृक्काज्योतिष्मतीवल्लील-ताकस्तूरिकासु च" इति मेदिनी॥ १८१॥ वर्तुलं गोलाकारः पदार्थः। अधीतम् अध्ययनं, पठितं वा तयोः। तथा "गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते" इत्युक्ते चारित्रे। पद्यभेदे वृत्तौ अतीते दृढे मृते जाते च। त्रि०। कूर्मे च। पु०। **वृत्तम्**। न०। वृत—वर्तने, संभक्तौ वा। भावे क्तप्रत्ययः। कर्तरि च। "वृत्तोऽधीतेऽप्यतीतेऽपि वर्तुलेऽपि वृते मृते। दृढेऽन्यलिङ्गवान्क्लीबं छन्दश्चारित्रवृत्तिषु" इति मेदिनी॥ कुशलम् आरोग्यम्। नीरुज् निरामयं तयोः। तथा वृत्तिशीले। त्रि०। दुर्गायां

वर्तने विवृतौ वृत्तिर्वर्तिर्दीपदशास्वपि ।
लाभसम्बन्धयोर्व्याप्तिर्विश्वस्ता विधवापि च ॥ १८३ ॥
छेदे विनाशे विच्छित्तिर्विगतौ वीतनिष्प्रभौ ।
असारेऽश्वेभयोर्वीतं वीतमङ्कुशकर्मणि ॥ १८४ ॥
अभ्युद्गते विकसिते चेष्टिते च विजृम्भितम् ।
विकृतौ रोगिबीभत्सौ वित्तं ख्याते धनेऽपि च ॥ १८५ ॥

कृषिकर्मणि वृत्तौ जनश्रुतौ वृत्तान्ते कालकर्तृके भूतनाशने च । स्त्री० । "अस्मिन् महामोहमये कटाहे सूर्याग्निना रात्रिदिनेन्धनेन । मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता" इति **वार्तम्** । न० । वृत्तिशब्दात् अण्प्रत्ययः । " वार्ता तु वर्तने वातिङ्गणे कृष्णाद्युदन्तयोः । निःसारारोग्ययोः क्लीबं वृत्तिमन्नीरुजोस्त्रिषु" इति मेदिनी ॥ वासे गृहे । अपिशब्दात् यामिन्यां निकेतने स्थाने च । **वसतिः** । स्त्री० । वस—निवासे । अतिप्रत्ययः । वा ङीप् । "वसतिः स्यात्स्त्रियां वासे यामिन्यां च निकेतने" इति मेदिनी ॥ वृक्षमात्रे द्रुममात्रके पुष्पं विना जायमानफले अश्वत्थादौ वृक्षे । अपिशब्दात् वनज्येष्ठवृक्षे च । **वनस्पतिः** । पु० । वनस्य पतिः । गतिसमासत्वात् सुट् । " वनस्पतिर्ना द्रुमात्रे विना पुष्पं फलिद्रुमे" इति मेदिनी॥१८२॥ वर्तने वृत्तौ । विवृत्तौ विवरणे । तथा स्थितौ जीविकायां कौशिकीसात्वतीभारत्यारभटयाख्ये रचनाभेदे वेदान्तोक्ते अन्तःकरणादेः परिणामभेदे च **वृत्तिः** । स्त्री० । वृत—वर्तने । क्तिन्प्रत्ययः । "वृत्तिर्विवरणाजीवकौशिकादिप्रवर्तने" इति मेदिनी ॥ दीपः प्रदीपः । दशा दीपदशा । अथवा दीपदशा प्रदीपदशा तासु । अपिशब्दात् नयनाञ्जने लेखे गात्रानुलेपने भेषजनिर्माणवर्तौ च **वर्तिः** । स्त्री० । वृत—दीप्तौ । इन्प्रत्ययः । वा ङीप् । "वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः । गात्रानुलेपनीदीपदशादीपेषु योषिति" इति मेदिनी ॥ लाभः प्रसिद्धः सम्बन्धः समृद्धिः तयोः । तथा ईश्वरस्य ऐश्वर्यभेदे । न्यायमते तदभाववति अविद्यमानरूपे पदार्थे च **व्याप्तिः** । स्त्री० । विपूर्व-आप-प्रापणे । क्तिन्प्रत्ययः । "व्याप्तिर्व्यापनलम्भयोः" इति मेदिनी । विधवा मृतपतिका तस्याम् । अपिशब्दात् जातविश्वासायां स्त्रियां च **विश्वस्ता** । स्त्री० । विपूर्वश्वस—जीवने । क्तप्रत्ययः । "विश्वस्ता विधवा स्त्रियाम्" इति मेदिनी ॥ ॥ १८३ ॥ छेदे छेदने । विनासे ध्वंशे, अदर्शने वा । तथा अङ्गरागे हारभेदे विच्छेदे स्त्रीण चेष्टाभेदे च **विच्छित्तिः** । स्त्री० । विपूर्वछिद—द्वैधीकरणे । क्तिन्प्रत्ययः । "विच्छित्तिरङ्गरागे विच्छेदे हारभेदेके च स्त्री" इति मेदिनी ॥ वीतो गतः, शान्तो वा । निष्प्रभा दीप्तिरहिता । तयोः । तथा प्रमादरहिते विशेषगते अपगते च **विगतः** । पु० । विपूर्वगम—गतौ । क्तप्रत्ययः । असारे साररहिते, युद्धाय असमर्थे वा । अश्वः हयः । इभः हस्ती । तयोः ॥ अङ्कुशकर्मणि अङ्कुशक्रियायाम् । तथा न्यायाद्युक्ते अनुमानभेदे शान्ते गते च । त्रि०। **वीतम्** । न० । विपूर्वइण—गतौ । क्तप्रत्ययः।"वीतमसारगजे स्यादङ्कुशकर्मण्यसारतुरगे च" इति मेदिनी॥ ॥ १८४ ॥ अभ्युद्गते प्रकाशे । विकसिते विकासयुक्ते । चेष्टिते कायिके व्यापारे च । "आ-

दृढेऽपि व्यायतं शुक्तिर्मुक्तास्फोटाश्वलक्ष्मणोः ।
अस्त्रभेदेऽपि शुक्तिः स्याच्छान्तिः स्यान्मङ्गले शमे ॥ १८६ ॥
वेतसेऽपि च शीतो ना शुक्तं पूताम्लनिष्ठुरम् ।
शितिर्भूर्जे सिते कृष्णे श्रीमन्तौ तिलकेश्वरौ ॥ १८७ ॥

त्मजन्यं भवेदिच्छा इच्छाजन्या भवेत्कृतिः । कृतिजन्या भवेच्चेष्टा'' इत्युक्तम् । **विजृम्भितम्** । त्रि० । विपूर्वजृभि—जृम्भे च । क्तप्रत्ययः । ''विजृम्भितं तु चेष्टायां क्लीबं त्रिषु विकस्वरे'' इति मेदिनी ॥ रोगी रोगयुक्तः। बीभत्सः पापी, जुगुप्सितो वा । तयोः । तथा मलिनीकृते च **विकृतम्** । त्रि० । विपूर्वकृ—करणे क्तप्रत्ययः । ''विकृतं त्रिषु बीभत्से रोगिते संस्कृतेऽपि च'' इति मेदिनी ॥ ख्याते प्रसिद्धे । धने वसुनि । अपिशब्दात् विचारिते ज्ञाते लब्धे च **वित्तम्** । त्रि०। वित्यते त्यज्यते । वित्त—त्यागे । घञ्प्रत्ययः । विद—लाभे,ज्ञाने च। क्तप्रत्ययः । ''वित्तं क्लीबं धने वाच्यलिङ्गं ख्याते विचारिते'' इति मेदिनी ॥१८५॥ दृढे प्रगाढे, बलवति वा । अपिशब्दात् दीर्घे आयते दूरे अतिशये च **व्यायतम्** । त्रि० । विपूर्वयम—उपरतौ । क्तप्रत्ययः । ''व्यायतं व्यावृते दीर्घे दृढे चातिशयेऽन्यवत्'' इति विश्वः । मुक्तास्फोटा मुक्तायै स्फोटः शुक्तिरेव। अश्वलक्ष्म अश्वावर्तकः तयोः । तथा जलजन्तुभेदे कपालखण्डे शङ्खनखे नख्याम अर्शोरोगे चक्षुरोगविशेषे च । **शुक्तिः** । स्त्री० । शुच—शौचे, क्लेदे च । क्तिन्प्रत्ययः। ''शुक्तिः कपालशकले शङ्खे शङ्खनखेऽपि च। नख्यश्वावर्तदुर्नाम मुक्तास्फोटेषु च स्त्रियाम्'' इति मेदिनी॥ अस्त्रभेदे आयुधविशेषे । अपिशब्दात् सामर्थ्ये स्त्रीदेवतायां न्यायायुक्ते कारणनिष्ठे कार्योत्पादनयोग्ये धर्मभेदे शब्दनिष्ठे अर्थबोधकतारूपे वृत्तिभेदे च **शक्तिः** स्यात् । स्त्री० । शक—सामर्थ्ये । क्तिन्प्रत्ययः । ''शक्तिरस्त्रान्तरे गौर्यामुत्साहादौ बले स्त्रियाम्'' इति मेदिनी ॥ मङ्गले प्रशस्ते, अभीष्टार्थसिद्धौ वा । शमे अन्तरिन्द्रियदमने । तथा कामक्रोधादिजये उपद्रवनिवारणे निवारणे च **शान्तिः** स्यात् । स्त्री० । शम—शान्तौ । क्तिन्प्रत्ययः । ''शान्तोऽभियुक्तरसयोः पुंसि त्रिषु शमान्विते । अव्ययं वारणे शान्तम्'' इति मेदिनी ॥ १८६ ॥ वेतसे बहुवारवृक्षे, असनवृक्षे वा । अपिशब्दात् शीतले जले हिमे च । न० ॥ शीतस्पर्शवति । त्रि० । **शीतः** । पु० । शी—गतौ । क्तप्रत्ययः । ''शीतं हिमगुणे क्लीबं शीतलालसयोस्त्रिषु। वानीरे बहुवारे ना'' इति मेदिनी॥ पूतम् अपनीततुषम् । आम्लं तक्रम्, आम्लरसो वा । निष्ठुरं कर्कशम् । तेषु । तथा मांसे काञ्जिके द्रवद्रव्यभेदे श्लिष्टे दुर्जने च **शुक्तम्** । न० । शुच—शोके, शौचे च । क्तप्रत्ययः । ''शुक्तं पूताम्लनिष्ठुरे'' इति मेदिनी ॥ भूर्जे भूर्जपत्रवृक्षे । सिते शुभ्रवर्णे । कृष्णे कालवर्णे च **शितिः** । पु० । शि—छेदने । क्तिच् प्रत्ययः । ''निशिते च शितिर्भूर्जे ना सितासितयोस्त्रिषु'' इति मेदिनी॥ तिलकः तिलकवृक्षः । ईश्वरः शिवः । तयोः। तथा शोभायुक्ते । त्रि० । विष्णौ अश्वत्थवृक्षे कुङ्कुमे राधिकायां च । स्त्री० । **श्रीमान्** । पु० । श्रीरस्त्यस्य । मतुप्प्रत्ययः । ''श्रीमांस्तिलकवृक्षे ना मनोज्ञे धनिके त्रिषु'' इति मेदिनी ॥ १८७ ॥

ब्रह्मशक्रौ शतधृती वार्तायां श्रवणे श्रुतिः ।
दुर्बले निशिते स्यातां शितशातावथो वचः ॥ १८८ ॥
सरस्वती सरिद्गोश्च सूतो वन्दिनि पारदे ।
स्मृतिः स्याद्धर्मशास्त्रेऽपि प्रवाहेऽपि च सन्ततिः ॥ १८९ ॥
रणे सभायां समितिः स्तिमितौ क्लिन्ननिश्चलौ ।
स्थपतिः कञ्चुकी कारुभेदो गीर्पतियागकृत् ॥ १९० ॥

ब्रह्मा प्रजापतिः । शक्रः इन्द्रः । तयोः । तथा स्वर्गे च **शतधृतिः** । पु० । शतं धृतयोऽस्य । "**शतधृती**" अप्यत्र। "भवेच्छतधृतिः पुंसि शक्रे च परमेष्ठिनि"इति मेदिनी॥वार्तायां वृत्तान्ते। श्रवणे कर्णे । तथा श्रवणेन्द्रियजन्ये ज्ञाने वेदे अङ्कशास्त्रोक्ते त्रिभुजक्षेत्रादौ भुजकोटयोः संयुज्यमानरेखाभेदे च **श्रुतिः** । स्त्री० । श्रु-श्रवणे । क्तिन्प्रत्ययः । "श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्तयोः स्त्रियाम्" इति मेदिनी ॥ दुर्बले बलहीने । निशिते तीक्ष्णीकरणे, शाणिते वा । **शितशातौ** स्याताम् । पु० । शितश्च शातश्चेति द्वौ शब्दौ । "शातं शितं च दुर्बले निशिते च" इति मेदिनी ॥ वचः वचनम् । तत्र ॥ १८८ ॥ सरित् नदी । गौः प्रसिद्धः । तत्र च । तथा सरोवरे सागरे नदीभेदे ज्योतिष्मत्यां ब्राह्म्यां शक्तौ देवीभेदे च **सरस्वती** । स्त्री० । सरांसि जलानि सन्त्यस्य । मतुप्प्रत्ययः । मस्य वः । "सरस्वांस्तु नदे चाम्बौ नान्यवद्रसिके स्त्रियाम् । वाणी स्त्रीरत्नवाग्देवीगोनदीषु नदीभिदि" इति मेदिनी । बन्दिनि राजादेः स्तुतिपाठके । पारदे रसराजे । तद्वत् सूर्ये क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे त्वष्टरि सारथौ मागधे लोमहर्षणाख्ये पुराणवक्तरि । पु० न० । प्रसूते प्रेरिते च। त्रि०। **सूतः**। पु०। सू-प्रसवे, प्रेरणे,ऐश्वर्ये वा । क्तप्रत्ययः।"सूतस्तु सारथौ तक्षिण क्षत्रियाद्ब्राह्मणीसुते । बन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु" इति मेदिनी ॥ धर्मशास्त्रे धर्मशासनशास्त्रे, वेदार्थानुभवजन्ये वेदार्थानुवादके, मुनिप्रणीते वाक्यरूपे शास्त्रे वा । अपिशब्दात् अनुभूतवस्तुनि उद्बोधकसहकारेण संस्काराधीने ज्ञानभेदे । "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" इति मनुः ॥ **स्मृतिः** । स्यात् । स्त्री० । स्मर्यते धर्मोऽनेन । स्मृ-स्मरणे । क्तिन्प्रत्ययः । करणे वा । "ना त्रिपूते स्मृतिर्धर्मशास्त्रस्मरणयोः स्त्रियाम्" इति मेदिनी ॥ प्रवाहे अविच्छिन्नजलधारायाम् । अपिशब्दात् गोत्रे पुत्रे कन्यायां विस्तारे पङ्क्तौ च **सन्ततिः** । स्त्री० । सन्त्यतेऽनेनेति । संपूर्व्वतन-विस्तारे । क्तिप्रत्ययः । "सन्ततिः स्यात्पङ्क्तौ गोत्रे पारम्पर्ये च पुत्रयोः" इति मेदिनी ॥ १८९ ॥ रणे युद्धे । सभायां बहूनां समावेशनस्थाने । तथा सङ्गमे सम्पराये च **समितिः** । स्त्री० । सम्पूर्वइण-गतौ । क्तिन्प्रत्ययः । "समितिः सम्पराये स्यात्सभायां सङ्गमेऽपि च" इति मेदिनी ॥ क्लिन्नम् आर्द्रः । निश्चलः चञ्चलरहितः । तयोः । तथा आर्द्रतायाम् अचाञ्चल्येऽपि । त्रि० । **स्तिमितः** । पु० । स्तिम-आर्द्रीकरणे, स्नेहने च । भावे क्तप्रत्ययः । "स्तिमितो निश्चलार्द्रयोः" इति

सम्बन्धेऽपि च संवित्तिर्मर्यादायामपि स्थितिः ।
सीता लाङ्गलरेखा स्याद्व्योमगङ्गा च जानकी ॥ १९१ ॥
सूनृतं कुशले सत्ये सुदोहा गौश्च सुव्रता ।
शर्कराऽपि सिताऽथोर्ध्वे सत्प्रतिज्ञेऽपि च स्थितः ॥ १९२ ॥
सती कात्यायनीसाध्व्योः सङ्घातो नरके चये ।
हरीतकी हैमवती गौरी शुक्लवचावपि ॥ १९३ ॥

मेदिनी । "स्तिमितोऽचञ्चलक्लिन्ने" इति विश्वः । कञ्चुकी राज्ञामन्तःपुराधिकारी, द्वारपालो वा । कारुभेदः शिल्पिभेदः । गीर्पतियागकृत् बृहस्पतिः स्वनामकयागकर्ता । तत्र च । तथा कुबेरे अधीशे सत्तमे । त्रि० । **स्थपतिः** । पु० । स्था—गतिनिरोधे । क्तप्रत्ययः । "स्थपतिः कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु" इति मेदिनी ॥ १९० ॥ सम्बन्धे जनस्याविवादे । अपिशब्दात् ज्ञाने प्रतिपत्तौ बुद्धौ अङ्गीकारे च **संवित्तिः** । स्त्री० । संपूर्वविद्—ज्ञाने । क्तिन्प्रत्ययः । "संवित्तिः प्रतिपत्तौ स्यादविवादे जनस्य च" इति मेदिनी ॥ मर्यादायां सीमायाम् । अपिशब्दात् न्यायपथावस्थाने स्थाने च **स्थितिः** । स्त्री० । स्था—गतिनिरोधे । क्तिन्प्रत्ययः । "स्थितिः स्त्रियामवस्थाने मर्यादायां च सीमनि" इति मेदिनी ॥ लाङ्गलरेखा लाङ्गलपद्धती । व्योमगङ्गा भद्राश्ववर्षस्थितगङ्गा । जानकी जनकराजदुहिता । तासु च **सीता** स्यात् । स्त्री० । सि—बन्धने । तप्रत्ययः । पृषोदरादित्वात् दीर्घः । "सीता लाङ्गलपद्धती । वैदेहीस्वर्गगङ्गासु" इति मेदिनी ॥१९१ ॥ कुशले मङ्गले । सत्ये सत्यवचने । तथा प्रियवाक्ये च **सूनृतम्** । न० । सुनृत्यति अनेन । सुपूर्वनृत—नर्तने । घञर्थे कप्रत्ययः । "सूनृतं मङ्गलेऽपि स्यात्प्रियसत्यवचस्यपि" इति मेदिनी ॥ सुदोहा गौः सुशीला गौः । तस्याम् । चकारात् सुन्दरव्रतयुक्ते च । त्रि० । **सुव्रता** । स्त्री० । सुष्ठु व्रतं नियमो यस्याः । "सुव्रता सुखसन्दोहा शोभनव्रतयोरपि" इति मेदिनी ॥ शर्करा खण्डविकारः । तत्र । अपिशब्दात् धवलस्त्रियां **सिता** । स्त्री० । सो—नाशे । क्तप्रत्ययः । "सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री" इति मेदिनी । ऊर्ध्वे ऊर्ध्वस्थतया दण्डायमाने । सत्प्रतिज्ञे शोभनस्वीकारे । अपिशब्दात् स्थिते निश्चले स्थितिशालिनि च **स्थितः** । त्रि० । स्था—गतिनिरोधे । क्तप्रत्ययः । "स्थितं प्रतिज्ञातवति चोर्ध्वनिश्चलयोस्त्रिषु" इति मेदिनी ॥ १९२ ॥ कात्यायनी दक्षकन्या । साध्वी पतिव्रता तयोः । "सती सतीयोगविसृष्टदेहा" इति कुमारः । ब्रह्मणि । न० । आदरे अव्ययम् । "सदसती आदरानादरयोः" इति पाणिनिः । **सती** । स्त्री० । "सन्साधौ धीरशस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियाम्" इति मेदिनी ॥ नरके नरकभेदे । चये समूहे । तथा सम्यग्घनने । दृढसंयोगे कफे च **सङ्घातः** । पु० । संपूर्वहन—हिंसायाम् । घञ्प्रत्ययः "सङ्घातः स्यात्पुंसि घाते संहतौ नरकान्तरे" इति मेदिनी । हरीतकी स्वनामाख्यातवृक्षः । तत्फलं च । तत्र । गौरी पार्वती । शुक्लवचा श्वेत, वचा । तयोः । अपिशब्दात्

स्त्री हरिदिशि वर्णे ना दूर्वाऽपि हरिता मता ।
इति तान्ताः ॥
अतिथिः कुशपुत्रेऽपि हरीतक्यपि चाव्यथा ॥ १९४ ॥
अपेक्षालम्बनं चास्था स्यादर्थो विषयेऽपि च ।
भटे पुंस्यप्रतिरथं यात्रामङ्गलसाम्नि च ॥ १९५ ॥
उन्माथः कूटयन्त्रेऽपि कुथः कम्बलबर्हिषोः ।
काशे क्षुते च क्षवथुर्ग्रन्थो द्वात्रिंशदक्षरे ॥ १९६ ॥

भारतवर्षभेदे हिमालयसम्बन्धिनि । त्रि० । विषभेदे स्वर्णक्षीर्यां च **हैमवती** । स्त्री० । हिमवतोऽदूरभवो देशः, तस्येदं वा । अण्प्रत्ययः । "हैमवत्यभयास्वर्णक्षीर्योः श्वेतवचोमयोः" इति मेदिनी ॥ १९३ ॥ दिशि दिशायाम् । वर्णे नीलपीतमिश्रितवर्णे, पलाशवर्णे वा । त्रि० । तथा सूर्याश्वे मुद्गे सिंहे सूर्ये विष्णौ च **हरित** । पु० । हृ-हरणे । इतिप्रत्ययः । "हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः" इति मेदिनी ॥ दूर्वा स्वनामाख्यातः घासभेदः । तत्र । अपिशब्दात् जयन्त्यां हरिद्रायां कपिलद्राक्षायां नीलदूर्वायां च **हरिता** । मता ज्ञातेत्यर्थः स्त्री० । हृ-हरणे इतच्प्रत्ययः । "हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्" इति मेदिनी ॥ इति तकारान्ताः समाप्ताः ॥ अथ थान्तानाह ॥ कुशपुत्रे कुशराजसूनौ । अपिशब्दात् अध्वयोगेन आगन्तुके गृहागते विषये च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुमीयते । **अतिथिः** । पु० । अतति गच्छति न तिष्ठति । अत-गमने । इथिन् प्रत्ययः । "अतिथिः कुशपुत्रे स्यात्पुमानागन्तुके त्रिषु" इति मेदिनी ॥ हरीतकी स्वनामाख्यातवृक्षः तत्फलम् । तत्र । स्त्री० । अपिशब्दात् शुण्ठ्याम् । स्त्री० । सर्पे । व्यथाशून्ये । त्रि० । **अव्यथा** । स्त्री० पु० । न व्यथते पद्भ्यां न सञ्चलति । व्यथ-भयचलनयोः । अच्प्रत्ययः । नास्ति व्यथा यस्माद्वा । "अव्यथो निर्व्यथे सर्पे चारटीपथ्ययोः स्त्रियाम्" इति मेदिनी ॥ १९४ ॥ अपेक्षा आकाङ्क्षा कार्यकारणयोरवश्यसम्बन्धः । तस्मिन् । आलम्बनम् आश्रयः । तस्मिन् । चकारात् श्रद्धायां स्थितौ प्रयत्ने प्रतिष्ठायां स्थाने च **आस्था** । स्त्री० । आपूर्वस्था-गतिनिरोधे । अङ्प्रत्ययः । "आस्था त्वालम्बनस्थानयत्नापेक्षासु योषिति" इति मेदिनी ॥ विषये इन्द्रियगोचरे शब्दादौ । अपिशब्दात् अभिधेये धने वस्तुनि प्रयोजने निवृत्तौ हेतौ प्रकारे अभिलाषे । उद्देशे च **अर्थः** । पु० । अर्थ-याचने । भावादौ घञ्प्रत्ययः । "अर्थो विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने" इति मेदिनी ॥ भटे योधे । पु० । यात्रामङ्गलं युद्धसमये यात्राकृतमङ्गलम् । साम सामावयवभेदः । तत्र च । चकारात् । अतुल्ये विष्णौ । पु० । युद्धार्थयाने च **अप्रतिरथम्** । न० । न प्रतिकूलो रथो यत्र । न प्रतिपक्षो रथो रथान्तरमस्येति षष्ठीबहुव्रीहिर्वा ॥ ॥ १९५ ॥ कूटयन्त्रे आमिषदानेन मृगादिबन्धनार्थं निवेशिते कूटयन्त्रे । अपिशब्दात् विलो-

धनं च ग्रन्थना चाऽपि तीर्थं तूपाययोगयोः ।
कट्यंशघोणयोः प्रोथो वीथिः पङ्क्तौ गृहांशके ॥ १९७ ॥
वानप्रस्थो मधूकेऽपि स्यात्तृतीयेऽपि चाश्रमे ।
काकोल्यामलकी ब्राह्मी वयःस्था तरुणे त्रिषु ॥ १९८ ॥

ड्योत्थापने । हिंसने च **उन्माथः** । पु० । उन्मथ्यतेऽनेन । उद्पूर्वमथ—विलोडने । करणे घञ्प्रत्ययः । "उन्माथः कूटयन्त्रे स्यान्मारणे घातके पुमान्" इति मेदिनी ॥ कम्बलः हस्तिपृष्ठस्थश्चित्रकम्बलः । बर्हिर्मयूरः तयोः । तथा कुशतृणे च **कुथः** । पु० । स्त्री० । कुथ—क्लेशे, पूतिगन्धे वा । अच्प्रत्ययः । "कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि" इति मेदिनी ॥ कासे रोगभेदे । क्षुते नासातः वायुनिःसरणजे शब्दे च **क्षवथुः** । पु० । क्षु—क्षुतौ । अथुच्प्रत्ययः । "क्षवथुर्ना क्षुते कासे" इति मेदिनी ॥ द्वात्रिंशदक्षरे अनुष्टुप्छन्दस्के पद्ये । द्वात्रिंशदक्षरीति क्वचित् पाठः । धनं मूल्यम् । तत्र । ग्रन्थना गुम्फनम् । तस्मिन् । अपिशब्दात् शास्त्रे च **ग्रन्थः** । पु० । ग्रन्थ—सन्दर्भे । घञ्प्रत्ययः । "ग्रन्थो ग्रन्थनाधनयोः स्याच्छास्त्राक्षरसङ्ख्ययोः" इति मेदिनी ॥ १९६ ॥ उपायः राज्ञां रिपुनिराकरणहेतुः सामादिः साधनो वा । योगः ध्यानम् । "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलिः । तयोः । तुग्रहणात् शास्त्रे यज्ञे क्षेत्रे स्त्रीरजसि घट्टादौ नद्यादेरवतरणे विद्यादिगुणयुतपात्रे उपाध्याये मन्त्रिणि योनौ दर्शने ब्राह्मणे आगमे निदाने अग्नौ उपकूपजलाशये दैहिके मानसिके भौमिके त्रैविधे पवित्रस्थाने च **तीर्थम्** । न० । तॄ—तरणे, प्लवने, अभिभवे च । थक्प्रत्ययः । "तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च इति मेदिनी ॥ कट्यंशः कटीभागः । घोणा अश्वनासिका, नासिकामात्रं तयोः । तथा शाटके स्त्रीगर्भे गर्ते भीषणे स्फिचि अश्वमुखे । पु० । पान्थे स्थापिते प्रथिते च । त्रि० । **प्रोथः** । पु० । न० । प्रु—सर्पणे । थन्प्रत्ययः । "प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु" इति मेदिनी ॥ पङ्क्तौ श्रेणौ । गृहांशके गृहाङ्गे । तद्वत् वर्त्मनि दृश्यकाव्यनाटकाङ्गभेदे च **वीथिः** । स्त्री० । वीथ—याचने । इन्प्रत्ययः । पृषोदरादित्वात् ङीप् । "**वीथी**"अप्यत्र । "वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तारवर्त्मनोः" इति मेदिनी ॥ १९७ ॥ मधूके मधूकवृक्षे । तृतीये आश्रमे वानप्रस्थाश्रमे । "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । पुत्रेषु दारान्निक्षिप्य वनं गच्छेत्सहैव वा" इति । अपिशब्दात् पलाशवृक्षे च **वानप्रस्थः** । पु० । वाने वनसमूहे प्रतिष्ठति । स्था—गतिनिरोधे । कप्रत्ययः । वनप्रस्थ एव स्वार्थे अण्प्रत्ययो वा । "वानप्रस्थो मधूकेऽपि स्यात्तृतीयाश्रमे पुमान्" इति मेदिनी ॥ काकोली स्वनामाख्यातः औषधभेदः । आमलकी धात्री । ब्राह्मी शाकभेदः तत्र च । तरुणे यौवने च । त्रि० । **वयःस्था** । स्त्री० । वयसि यौवने तिष्ठति । स्था—गतिनिरोधे । कप्रत्ययः । "वयःस्था तु स्त्रियां ब्राह्मी गुडूच्यामलकीषु च । सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणे त्रिषु" इति मेदिनी ॥ १९८ ॥

सूर्यमन्थानयोर्मन्थः साक्तवेऽप्यथ मन्मथः ।
कपित्थे कामदेवेऽपि रथः पौरुषदेहयोः ॥ १९९ ॥
पुंसि स्त्रियां च षड्ग्रन्थः करञ्जवचयोः क्रमात् ।
सिद्धार्थः सर्षपे बुद्धे संस्था स्थितिविनाशयोः ॥ २०० ॥
संस्थः समाप्तिक्रतुषु वरूथो निजराष्ट्रकः ।
सिक्थो भक्तपुलाके ना म च्छिष्टे नपुंसकम् ॥ २०१ ॥

इति थान्ताः ॥

सूर्यः अर्कः, अर्कवृक्षो वा । मन्थानः मन्थनदण्डः तयोः । साक्तवे सक्तुभिः कृतपेयभेदे । "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः । नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते" इति । अपिशब्दात् नेत्रमले किरणे आलोडनादौ च **मन्थः** । पु० । मन्थ—विलोडे, क्लेशे वा । करणे घञ्प्रत्ययः । "मन्थः स्यात्पुंसि मन्थाने साक्तवे च दिवाकरे" इति मेदिनी । कपित्थे स्वनामाख्यातवृक्षे । कामदेवे कन्दर्पे । अपिशब्दात् कामचिन्तायां च **मन्मथः** । पु० । मनः मथ्नातीति । मन—गर्वे, धृतौ वा । क्विप्प्रत्ययः । अच्प्रत्ययश्च । षष्ठीतत्पुरुषो वा । "मन्मथः । कामचिन्तायां कपित्थे कुसुमायुधे" इति मेदिनी ॥ पौरुषं पुरुषनिवृत्तः स्वनामाख्यातयानभेदः, विक्रमो वा । देहं शरीरम् । "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति गीता । तयोः । तथा वेतसवृक्षे तिनिसवृक्षे पादे च **रथः** । पु० । रम्यतेऽनेन, अत्र वा । रम—क्रीडायाम् । क्थन्प्रत्ययः । रथः पुमानावयवे स्यन्दने वेतसेपि च" इति मेदिनी ॥ १९९ ॥ करञ्जः स्वनामख्यातवृक्षभेदः । वचा औषधविशेषः तयोश्च । **षड्ग्रन्थः** । क्रमात् क्रमेण।पु०। स्त्री०। षट् ग्रन्थाः यस्य । "षड्ग्रन्था तु वचायां स्त्री स्यात्करञ्जान्तरे पुमान्" इति मेदिनी ॥ सर्षपे श्वेसतर्षपे । बुद्धे गौतमबुद्धे । तथा प्रसिद्धे च । त्रि० । "सिद्धार्थं सिद्धसम्बन्धम्" इति प्राञ्चः । वटीवृक्षे च **सिद्धार्थः** । पु० । सिद्धः अर्थो यस्मादिति पञ्चमीबहुव्रीहिः । वा कप् । सिद्धार्थकोऽप्यत्र । "सिद्धार्थस्तु पुमाञ्छाक्यसिंहे च सितसर्षपे" इति मेदिनी ॥ स्थितिः स्थानम् । विनाशः नाशः तयोश्च । **संस्था** । स्त्री० । सम्पूर्वस्था—गतिनिरोधे । अङ्प्रत्ययः ॥ २००॥ समाप्तिः निष्ठा । क्रतवो यज्ञभेदाः । तेषु । तथा न्याय्यपथावस्थितौ स्थितौ व्यवस्थायां व्यक्तौ सादृश्ये प्रान्ते च **संस्थः** । पु० । सम्पूर्वस्था—गतिनिरोधे । कप्रत्ययः । "संस्थश्चरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः" इति मेदिनी ॥ निजराष्ट्रकः स्वजनपदः । तत्र । तथा तनुत्राणे वर्मणि रथगुप्तिस्थाने परप्रहाररक्षार्थमावृते स्थाने च **वरूथः** । पु० । वृ—वरणे । ऊथन्प्रत्ययः । "वरूथो रथगुप्तौ स्याद्वरूथं चर्मवेश्मनोः" । इति मेदिनी ॥ भक्तपुलाके अन्नगुलिकायाम् । पु० । मधूच्छिष्टे मधुनः उच्छिष्टे अवशिष्टे वा [illegible] तथा [illegible] मासे च **सिक्थः** । पु० न० । सिच—सेचने । कर्त्तरि थक्प्रत्ययः ।

अष्टापदं शारिफले सुवर्णेऽस्त्री पशौ पुमान् ।
वामनेभ्यां स्त्रियां क्लीबं केयूरे नाऽङ्गदः कपौ ॥ २०२ ॥
अर्बुदो रुजि सङ्ख्यायामामोदो गन्धहर्षयोः ।
रहस्ये स्यादुपनिषत्समीपसदनेऽपि च ॥ २०३ ॥
कन्दोऽस्त्री शूरणे मूले राजलिङ्गविषाणयोः ।
स्त्री ककुत्कट्टुकन्दस्तु शृङ्गबेररसोनयोः ॥ २०४ ॥

"सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्" इति मेदिनी ॥ २०१ ॥ इति थकारान्ताः समाप्ताः ॥ अथ दान्तानाह ॥ शारिफले शारिफलके । सुवर्णे कनके । न० । पशौ शरभे । तथा लूतायां कैलासे काले च **अष्टापदम्** । पु० न० । अष्टौ अष्टौ पदानि पङ्क्तावस्य वृत्तौ सङ्ख्याशब्दस्य वीप्सात्वाङ्गीकारात् आत्वम् । अष्टसु धातुषु पदं प्रतिष्ठा यस्य । अष्टाभिः सिद्धिभिरापद्यते । आपूर्व पद–गतौ । अच् प्रत्ययः । अष्टसङ्ख्यातेन आपद्यते । ङीप् वा । "अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च । अष्टापदी चन्द्रमल्ल्यां शरभे मर्कटे पुमान्" इति मेदिनी ॥ वामनेभ्यां दक्षिणादिग्गजकरिण्याम् । स्त्री० । केयूरे बाहुभूषणे । न० । कपौ वालिपुत्रे वानरे । पु० । तथा अङ्गदानकर्तरि । त्रि० ॥ **अङ्गदः** । पु० । अङ्गं दायति शोधयति । दैप्–शोधने । कप्रत्ययः । "अङ्गदः कपिभेदे ना केयूरे तु नपुंसकम् । अङ्गदा याम्यदिग्दन्तिहस्तिन्यामपि योषिति" इति मेदिनी ॥२०२॥ रुजि रोगभेदे । सङ्ख्यायां दशकोटिसङ्ख्यायाम् । तत्सङ्ख्यातेषु च । तथा पर्वतभेदे च । **अर्बुदः** । न० पु० । अर्ब–हिंसने । विच् प्रत्ययः । तस्मै उदेति अर्बशब्दोपपद उद्पूर्वइण्–गतौ डप्रत्ययः । "अर्बुदः" इत्यपि भवत्येव । "अर्बुदो मांसपुरुषे दशकोटिषु न स्त्रियाम् । महीधरविशेषे ना" इति मेदिनी ॥ गन्धः अतिदूरव्यापी–गन्धः, गन्धमात्रं वा । हर्षः सुखम्, इष्टाधिगमजन्यानन्दो वा तयोश्च । **आमोदः** । पु० । आसमन्तात् मोदयति । आपूर्व मुद–संमार्जने, हर्षे वा । णिच्–अच् प्रत्ययौ । भावे घञ् प्रत्ययो वा । "आमोदो गन्धहर्षयोः" इति मेदिनी ॥ रहस्ये गोप्ये । समीपसदने आसन्नगृहे । अपिशब्दात् ब्रह्मविद्यायाम् तत्प्रतिपादके वेदशिरोभागे वेदान्ते च । **उपनिषद्** स्त्री० । उप निषीदति प्राप्नोति ब्रह्मात्मभावोऽनया । उपनिपूर्वसद–आश्रयकरणे, गतौ च । क्विप् प्रत्ययः । "भवेदुपनिषद्धर्मवेदान्ते विजने स्त्रियाम्" इति मेदिनी ॥ २०३ ॥ शूरणे स्वनामाख्याते मूलभेदे । मूले शस्यमात्रमूले । तथा गृञ्जने मेघे च । पु० । **कन्दः** । पु० न० । कन्दति, कन्दयति, कन्द्यते वा । कदि–रोदने, वैक्लवे, आह्वाने च । अच्–णिच्प्रत्ययौ । घञ्प्रत्ययो वा । "कन्दोऽस्त्री शूरणे शस्य–मूले जलधरे, पुमान्" इति मेदिनी ॥ राजलिंगं श्वेतच्छत्रादिनृपचिह्नम् । विषाणं वृषाङ्गं तयोः । तथा वृषस्कन्धपृष्ठस्थमांसपिण्डाकारे प्रधाने पर्वताग्रभागे च **ककुद्** । स्त्री० । कं सुखं कौति । कु–शब्दे । क्विप् प्रत्ययः । तुक् च तस्य दः । "ककुद् स्त्री ककुदोऽप्यस्त्री वृषाङ्के राड्ध्वजे वरे" इति मेदिनी ॥ शृङ्गबेरम्

स्त्री गम्भार्यां क्लीबमब्जे दिङ्नागे कुमुदः कपौ ॥
पुष्पे क्लीबं भ्रमौ कुन्दः क्षोदो रजसि पेषणे ॥ २०५ ॥
शिवजूटे वराटेऽपि कपर्दोऽथाऽमये गदः ।
विष्णोर्भ्रातरि चास्त्रे स्त्री पलाशे गरुति च्छदः ॥ २०६ ॥
देशे जने जनपदौ निषादौ श्वपचस्वरौ ।
वाक्ये शब्दे प्रदेशेऽपि पदं पापस्तु न द्वयोः ॥ २०७ ॥

आर्द्रकम् । रसोनः लशुनम् तयोः । तथा शिग्रुवृक्षे च **कटुकन्दः** । पु० । कटुः कन्दो मूलं यस्य । "कटुकन्दः पुमाञ्छिग्रौ शृङ्गवेररसोनयोः" इति मेदिनी ॥ २०४ ॥ गम्भार्यां द्रुमभेदे । स्त्री० । अब्जे पद्मे । न० । दिङ्नागे दिग्गजे । कपौ वानरभेदे । तथा कैरवे कह्लारे श्वेतोत्पले दैत्यभेदे कर्पूरे च **कुमुदः** । पु० । कौ भूमौ मोदते । मुद-हर्षे । कप्रत्ययः । "कुमुदं कैरवे रक्तपद्मे स्त्री कुम्भिकौषधौ । गाम्भार्यां पुंसि दिङ्नागे नागे शाखामृगान्तरे" इति मेदिनी ॥ पुष्पे पुष्पवृक्षभेदे, माध्यकुसुमे वा । न० । भ्रमौ भ्रमियन्त्रे । तथा कुन्दुरुनाम गन्धद्रव्ये कुबेरस्य निधिभेदे करवीरवृक्षे च **कुन्दः** । पु० । कुं भूमिं दायति, द्यति वा दैपृ-शोधने । दो-छेदे वा । कप्रत्ययः । निपातनात् मुच् । "कुन्दो माध्ये स्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना" इति मेदिनी॥रजसि धूलौ। पेषणे चूर्णने तथा चूर्णे च **क्षोदः**। पु०। क्षुद-पेषणे । घञ्प्रत्ययः । "क्षोदः स्यात्पुंसि रजसि पेषणे च प्रकीर्त्तितः" इति मेदिनी ॥ २०५ ॥ शिवजूटे हरजटायाम् । वराटे कपर्दके । "वराटकानां दशकद्वयं यत्" इति लीलावती । अपिशब्दात् तुलामानभेदे च **कपर्दः** । पु० । पर्व-पूरणे । क्विप्प्रत्ययः । रात् वलोपे पर पूर्तिः कस्य गङ्गाजलस्य परा पूर्त्या दायति शुध्यति । कपरपूर्वे दैपृ-शोधने । कप्रत्ययः । "कपर्दः खण्डपरशोर्जटाजूटे वराटके" इति मेदिनी ॥ आमये रोगे । विष्णोर्भ्रातरि श्रीकृष्णानुजे । अस्त्रे स्वनामाख्याते लोहादिकीलिते आयुधे । स्त्री० । तथा कथने विषे च **गदः** । पु० । गद-भाषणे । अच्प्रत्ययः । "गदो भ्रातरि विष्णोः स्यादामये नाऽयुधे गदे" इति मेदिनी । पलाशे पत्रे । गरुति पक्षिणां पक्षे । तद्वत् ग्रन्थिपर्णवृक्षे तमालवृक्षे च **छदः** । पु० । छद-संवरणे, अपवरणे च । कप्रत्ययः । "छदः पलाशे गरुति ग्रन्थिपर्णतमालयोः" इति मेदिनी ॥ २०६ ॥ देशे भूगोलविभागमात्रे कुरुपञ्चालादिषु प्रसिद्धजनपदेषु स्थानमात्रे जने लोके च **जनपदः** । पु० । जनाः पद्यन्ते गच्छन्ति यत्र । पद-गतौ । घञ्प्रत्ययः । अत्र "जानपदः" इत्यपि पाठः । "भवेज्जनपदो जानपदोऽपि जनदेशयोः" इति मेदिनी ॥ श्वपचः चण्डालः । ब्राह्मणात् शूद्रायामुत्पन्नः पारशवाख्यो वर्णसङ्करश्च । स्वरः ध्वनिभेदः । "निषादं रौति कुञ्जरः" इत्युक्तः । तन्त्री कण्ठोत्थितः स्वरविशेषः । तयोश्च । **निषादः** । पु० । निषीदति मनः पापं वा [illegible] । षद्-गतौ, विषादे वा । घञ्प्रत्ययः । "निषादः स्वरभेदे स्याच्चण्डाले धीवरान्तरे" इति मेदिनी ॥ वाक्ये स्वार्थबोधसमाप्ते पदसमुदाये । "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः

मूले प्रत्यन्तशैले च प्रसादस्त्वनुरोधने।
स्वास्थ्ये काव्यगुणे चाऽथ प्रतिपत्तिथिसंविदोः॥ २०८॥
विप्रुट् ज्ञाता च बिन्दुः स्यान्मन्दौ स्वैरशनैश्चरौ।
हस्तिभेदश्चाऽथ मदः स्यात्कस्तूरीभदानयोः॥ २०९॥
गर्वे शुक्रेऽथ माकन्द्यामलक्यां नाऽम्रपादपे।
मर्यादा धारणासीम्नोर्महानादो गजेऽपि च॥ २१०॥

पदोच्चयः" इति॥ शब्दे सुप्तिङन्तरूपे शब्दभेदे। प्रदेशे एकदेशे। "पितुः प्रदेशास्तवे" इति कुमारः। अपिशब्दात् चिह्ने स्थाने उद्यमे त्राणे वस्तुनि श्लोकपादे च **पदम्**। न०। पद—गतौ। अच्प्रत्ययः। "पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः। श्लोकपादेऽपि च क्लीबं पुँल्लिङ्गः किरणे पुनः" इति मेदिनी॥ मूले वृक्षादेर्मूले। प्रत्यन्तशैले बृहत्पर्वतसमीपस्थे पर्वते। चकारात् चरणे चतुर्थांशे च **पादः**। पु०। पद्यते गम्यतेऽनेन। पद—गतौ। करणे घञ्। "पादो ब्रध्ने तुरीयांशे शैलप्रत्यन्तपर्वते" इति मेदिनी॥ २०७॥ अनुरोधने आराध्यादेरिष्टसम्पादनेच्छायाम्, अनुग्रहे वा। स्वास्थ्ये आरोग्ये। काव्यगुणे अलङ्कारशास्त्रोक्त प्रसादगुणे। चकारात् प्रसक्ते गुरुजनभुक्तावशिष्टे च **प्रसादः**। पु०। प्रपूर्वसद—गतौ, आश्रयकरणे च। घञ्प्रत्ययः। "प्रसादोऽनुग्रहे काव्यगुणस्वास्थ्यप्रसक्तिषु" इति मेदिनी॥ तिथिः पक्षारम्भकः तिथिः संविद् बुद्धिः, प्रतिपत्तिर्वा तयोश्च। **प्रतिपद्**। स्त्री०। प्रतिपद्यते उपक्रम्यते पक्षोऽनया। प्रतिपूर्व पद—गतौ। क्विप्प्रत्ययः। "प्रतिपत्स्त्री तिथौ मतौ" इति मेदिनी॥ २०८॥ विप्रुट् वेदपाठकाले मुखनिर्गतजलबिन्दुः। ज्ञाता वेदिता। तयोः। चकारात् अल्पांशे च **बिन्दुः**। स्यात्। पु०। विन्दुरिति वा पाठः विदि—अवयवे। उप्रत्ययः। विद्—ज्ञाने। उप्रत्ययः। निपातनात् साधुः। "बिन्दुर्दन्तक्षतान्तरे। भ्रुवोर्मध्ये रूपकार्थप्रकृतौ पृषते पुमान्" इति मेदिनी। स्वैरं स्वेच्छा, स्वतन्त्रं वा। शनैश्चरः शनिग्रहः। तयोः। हस्तिभेदः हस्तीनां जातिविशेषः। तत्र च। तथा मूर्खे मृदौ प्रभाग्ये रोगिणि अल्पे बले यमे प्रलये च। पु०। ज्योतिषोक्ते रविसंक्रान्तिभेदे च। स्त्री०। **मन्दः**। त्रि०। मदि—हर्षे, जाड्ये च। अच्प्रत्ययः। "मन्दो तीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः। अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ" इति मेदिनी॥ कस्तूरी मृगनाभिजातं गन्धद्रव्यम्। इभादानं हस्तिगण्डजलं तयोः गर्वे अहङ्कारे। शुक्रे रेतसि। तथा आमोदे मत्ततायाम् नदे कल्याणकरे वस्तुनि च **मदः**। पु०। मद—गर्वे, मदे च। जाड्ये वा अच्प्रत्ययः। "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः" इति मेदिनी॥ २०९॥ आम्रलक्यां धात्री वृक्षे। अम्रपादपे सहकारवृक्षे। तथा पीतचन्दने नगरभेदे च। पु०। **माकन्दी**। स्त्री०। गौरादित्वात् ङीप्। पुंसि माकन्द इति वा। मा—माने क्विप्प्रत्ययः। माः परिमितः कन्दोऽस्याः। "माकन्दः सहकारे स्त्री धात्रीनगरभेदयोः" इति मेदिनी॥ धारणा आत्मनि

मेनादस्तु त्रयश्छागमार्जारकशिखण्डिनः ।
विशदः पाण्डरे व्यक्ते शारदोजलदेऽपि च ॥ २११ ॥
स्त्रियां च शारदी तोयपिप्पलीसप्तपर्णयोः ।
संवित्सङ्केतकेऽपि स्यात्समर्यादोन्तिके स्थिरे ॥ २१२ ॥
व्यञ्जने सूपकारे च सूदः सूपवदिष्यते ।
धर्मस्वेदनयोः स्वेदः सम्पल्लक्ष्म्यां समुच्चये ॥ २१३ ॥

इति दान्ताः ॥

चित्तस्य स्थितिः । "यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्र- विशारदैः" इति सीमा प्रसिद्धा । तयोः । तथा न्याय्यपथावस्थितौ कुले च **मर्यादा** । स्त्री० । मर्यायां सीमायां दीयते । दा—दाने । अच्प्रत्ययः । पर्यादीयते वा । परिआपूर्वदा—दाने । अङ् प्रत्ययः । पृषोदरादित्वात् पस्य मः । "मर्यादा सीमनि स्थितौ" इति मेदिनी । गजे हस्तिनि । अपिशब्दात् सिंहे उष्ट्रे गर्जन्मेघे च **महानादः** । पु० महान्नादोऽस्य । "महानादः कुञ्जरे स्याद्वर्षुकाब्दे महास्वने" इति मेदिनी ॥ २१० ॥ छागः अजः । मार्जारः बिडालः । शिखण्डी मयूरः । एतेषु त्रिष्वर्थेषु च । **मेनादः** स्यात् । पु० । मेनमत्ति । अद—भक्षणे । घञ्प्रत्ययः । मेघेन नन्दतीति वा । निपातनात् साधुः । "मेनादस्तु पुमान्केकी मार्जारच्छागलेषु च" इति मेदिनी ॥ पाण्डरे शुभ्रवर्णे । व्यक्ते स्फुटे, प्राज्ञे वा । त्रि० । तथा विमले च **विशदः** । पु० । विपूर्वशद—शातने, गतौ वा । अच्प्रत्ययः । "विशदः पाण्डरे व्यक्ते" इति मेदिनी । जलदे मेघे । अपिशब्दात् श्वेतपद्मे कासे वकुले हरिन्मुद्गे च । शरद्भवमात्रे । त्रि० । शारं श्वेतपद्मम- स्त्यस्याः । अच्प्रत्ययः । सरस्वत्याम् । स्त्री० । **शारदः** । पु० । शरदि भवः । अण्प्रत्ययः । "शारदोऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः । शस्ये क्लीबं शरज्जाते नूतनाप्रतिभे त्रिषु" इति मे- दिनी ॥२११॥ तोयपिप्पलीशाकभेदः, लाङ्गली वा । सप्तपर्णः स्वनामख्यातवृक्षः । तयोः । **शा- रदी** । स्त्री० शरदि भवा । अण्प्रत्ययः । "जलपिप्पल्यां सप्तपर्णे च शारदी" इति विश्वः । सङ्केतके मनोगतभावव्यञ्जनाय कृते हस्तादिचालनरूपे व्यापारे । अपिशब्दात् ज्ञाने प्रतिपत्तौ बुद्धौ अङ्गीकारे । समाधौ नाम्नि आचारे युद्धे तोषे च **संविद्** स्यात् । स्त्री० । सम्पूर्वविद—ज्ञाने । क्विप्प्रत्ययः । "संवित्स्त्रियां प्रतिज्ञायामाचारज्ञानसङ्गरे। सम्भाषणे क्रियाकारे सङ्केते नाम्नि तोषणे" इति मेदिनी । अन्तिके समीपे । स्थिरे सीमायां, पर्वते वा । **समर्यादः** । त्रि० । सहमर्यादया । "समर्यादः समीपे ना मार्यादासहिते त्रिषु" इति मेदिनी ॥ २१२ ॥ व्यञ्जने सूपशाकादौ व्यञ्जनभेदे । सूपकारे सूपकारके । तथा सारथ्ये अपराधे लोध्रे पापे च **सूदः** । सूदशब्दः सूपवत् इष्यते काम्यते इत्यर्थः । शाब्दिकैरिति शेषः। पु० । सूदयति छागान् । सूद—हनने । अच्प्रत्ययः । 'सूदस्तु कथितः सूपकारे च व्यञ्जनान्तरे' इति मेदिनी ॥ घर्मश्रमार्तस्य गात्रान्निःसृतं जलम्, आतपं वा । स्वेदनं गात्रादितो घर्मादेर्निस्सारणव्यापारः तयोः । तथा

खण्डे ना समभागेऽर्धमवधिः सीमकालयोः ।
आविद्धं प्रहृतं वक्रमानद्धं वाद्यबद्धयोः ॥ २१४ ॥
अलङ्कारेऽपि चाबद्धः प्रत्याशाऽप्याधिरुच्यते ।
कुटुम्बव्यापृते धर्मचिन्तायां च विशेषणे ॥ २१५ ॥
उपाधिरुग्रगन्धस्तु वचा क्षेत्रयमानिके ।
उपलब्धिर्मतिप्राप्त्योर्ऋद्धिः सम्पदि चौषधे ॥ २१६ ॥

पाकभेदे च **स्वेदः** । पु० । स्वेद–स्विद–गतौ वा । घञ्प्रत्ययः । "स्वेदस्तु स्वेदने घर्मे" इति मेदिनी ॥ लक्ष्म्यां विभवे । समुच्चये राशीकरणे । तथा उत्कर्षगुणे हारविशेषे च **सम्पद्** स्त्री० । समूपूर्वपद–गतौ । क्विप्प्रत्ययः । "सम्पद्भूतौ गुणोत्कर्षे हारभेदेऽपि च स्त्रियाम्" इति मेदिनी ॥ २१३ ॥ इति दकारान्ताः समाप्ताः ॥ अथ धान्तानाह ॥ खण्डे भेदे । "खण्डं खण्डं ययुर्घनाः" इति । खण्डने च । समभागे तुल्यांशे । तथा खण्डिते च । त्रि० । **अर्धम्** । न० पु० वा । ऋध–वृद्धे । घञ्प्रत्ययः । "अर्धं समांशे खण्डने" इति मेदिनी ॥ सीमा मर्यादा । कालः क्षणदण्डादिसमयः तयोः तथा अवधाने । बिले च **अवधिः** । पु० । अवपूर्व धा–धारणे, पोषणे च । किप्रत्ययः । आधारे किप्रत्ययो वा । "अवधिस्त्ववधाने स्यात्सीम्नि काले बिले पुमान्" इति मेदिनी ॥ प्रहृतं पराहतम् । तत्र । वक्रं कुटिलम् । तत्र च । तथा विद्धे क्षिप्ते अभिभूते मूर्खे च **आविद्धम्** । त्रि० । आ पूर्व व्यध–वेधे, ताडने च । क्तप्रत्ययः । "आविद्धो वाच्यलिङ्गः स्यात्कुटिले च पराहते" इति मेदिनी ॥ वाद्यं चर्मणा बद्धमुखं पटहमुरजादि । बद्धः । कृतबन्धनः तयोः । तथा । केशभूषादिके ग्रथिते व्याप्ते च । त्रि० । **आनद्धम्** । आपूर्वनह–बन्धने । क्तप्रत्ययः । "आनद्धं मुरजादौ च क्लीबं स्यात्सन्दिते त्रिषु" इति मेदिनी ॥ २१४ ॥ अलङ्कारे । भूषणविशेषे । अपिशब्दात् दृढबन्धने प्रेम्णि योक्त्रे बद्धे आप्ते प्रतिरुद्धे च । त्रि० । **आबद्धः** । पु० । आसम्यक्बद्धः । आपूर्वबन्ध–बन्धने । भावे क्तप्रत्ययः । आधारे कर्मणि करणे च क्तः । क्वचित् "आबन्ध" वा । "आबन्धो दृढबन्धे स्यात्प्रेम्ण्यलङ्कारयोक्त्रयोः" इति मेदिनी ॥ प्रत्याशा प्रतीच्छा । तत्र । अपिशब्दात् मानसदुःखे अधिष्ठाने बन्धके व्यसने च **आधिः** । उच्यते कथ्यते । पु० । आधीयते मनोऽत्र । आपूर्व धा–धारणे । कि प्रत्ययः । "आधिः पुमांश्चित्तपीडा प्रत्याशाबन्धकेषु च" इति मेदिनी ॥ कुटुम्बव्यापृते सन्ततिव्यापारयुक्ते । धर्मचिन्तायां धर्मसम्बन्धवितर्के । स्वधर्मस्यान्यगततया वभासके विशेषणे भेदकधर्मे गुणक्रियादौ च ॥ २१५ ॥ **उपाधिः** । पु० । उपआपूर्वधा–धारणे । किप्रत्ययः । "उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले । विशेषणे" इति मेदिनी ॥ वचा स्वनामाख्यातं गन्धद्रव्यम् । क्षेत्रं प्रसिद्धम् । यमानिका हिङ्गु । तत्र च । तुकारात् चम्पके कट्फले अर्जवृक्षे लशुने उत्कटगन्धाढ्ये । त्रि० । अजमोदायां च **उग्रगन्धः** । पु० । उग्रः गन्धः पुष्पेऽस्य । उग्रगन्धाजमोदायां वचायां छिक्कौषधौ" इति मेदिनी ॥ मतिर्ज्ञानम् ।

राहौ शिरःशून्यकाये कबन्धः क्लीबमम्बुनि ।
गोधा तले निहाकायां गन्धो गर्वे लवेऽपि च ॥ २१७ ॥
दोग्धा गोपे कवौ वत्से दुग्धं क्षीरे प्रपूरिते ।
दिग्धं लिप्ते विषाक्ते च दुर्विधौ खलदुर्गतौ ॥ २१८ ॥
रोधे निरोधो नाशे च बुद्धो ज्ञाते जिने बुधे ।
निषेधे बुद्ध्योर्बाधो रौहिणेये कवौ बुधः ॥ २१९ ॥

प्राप्तिर्लाभः तयोश्च **उपलब्धिः** । स्त्री० । उपपूर्वलभ—प्राप्तौ । क्तिन्प्रत्ययः । "उपलब्धिर्मतौ प्राप्तावपि ज्ञाने च योषिति" इति मेदिनी ॥ सम्पदि सम्पत्तौ । औषधे औषधिभेदे । चकारात् वृद्धौ । देवभेदे च **ऋद्धिः** । स्त्री० ऋध—वृद्धौ । क्तिन्प्रत्ययः । "ऋद्धिः स्यादोषधीभेदे समृद्धावपि योषिति" इति मेदिनी ॥ २१६ ॥ राहौ स्वनामके ग्रहे । शिरः शून्यकाये मस्तकशून्यक्रियायुक्तदेहे । "मनुष्याणां सहस्रेषु हतेषु हृतमूर्धसु । तदावेशात्कबन्धः स्यादेको मूर्धा क्रियान्वितः" इत्युक्तम् । अम्बुनि जले । न० । उदरे धूमकेतौ राक्षसभेदे च **कबन्धः** । पु० । कं सुखं बध्नाति । बन्धबन्धने । अण्प्रत्ययः । कं बध्यते छिद्यतेऽस्मात् । बन्ध—बन्धने । घञ्प्रत्ययः । केन वायुना वध्यते । को वायुर्बन्धो वा यस्येति यथायथा वाक्यम् । "कबन्धोऽस्त्री क्रियायुक्तेऽप्यपमूर्धकलेवरे । क्लीबं जले पुंस्युदरे राहुरक्षोविशेषयोः" इति मेदिनी ॥ तले स्वरूपे । निहाकायां गोधिकायां । तथा धनुर्गुणाघातवारणाय प्रकोष्ठे बद्धे चर्मणि सर्पभेदे च **गोधा** । स्त्री० । गुध्यते वेष्ट्यते बाहुरनया । गुध—वेष्टने । करणे घञ्प्रत्ययः । "गोधा तलनिहाकयोः" इति मेदिनी ॥ गर्वे अहङ्कारे । लवे लेशे । अपिशब्दात् सम्बन्धे गन्धके शोभाञ्जने घृष्टचन्दनादीनां घ्राणग्राह्ये गुणभेदे । स च घ्राणग्राह्यः गन्धः पञ्चविधः । "चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव वा । रसः संमदजो वापि प्राण्यङ्गोद्भव एव वा" इति । गन्धः । पु० । गन्ध—सूचने । अच्प्रत्ययः । "गन्धः प्रतिवेश्यामोदलेशसम्बन्धगन्धके" इति मेदिनी ॥ २१७ ॥ गोपे गोपाले । कवौ सूक्ष्मदर्शिनि पण्डिते, काव्यकर्तरि वा । वत्से गवादिशिशौ । तथा दोहकर्तरि । त्रि० । गवि च । स्त्री० । **दोग्धा** । पु० । दुह—दोहे । तृच्प्रत्ययः "दोग्धाऽर्थोपजीविकवौ वत्सगोपालयोः पुमान्" इति मेदिनी ॥ क्षीरे पयसि स्त्रीजातिस्तननिस्यन्दिद्रवद्रव्ये वा । प्रपूरिते प्रकर्षेण पूर्णे । त्रि० । तद्वत् कृतदोहायां धेन्वादौ । स्त्री० । दोहने च । न० । **दुग्धम्** । न० । दुह—दोहे । क्तप्रत्ययः । कर्मणि भावे च । "दुग्धं प्रपूरिते क्षीरे दुग्धी क्षीरविकौषधौ" इति मेदिनी ॥ लिप्ते लेपने विषाक्ते विषपीते बाणे । चकारात् वह्नौ प्रबन्धे स्नेहे च **दिग्धम्** । न० । दिह—लेपने । क्तप्रत्ययः । भावे कर्मणि च । "दिग्धो विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गकः" इति मेदिनी । खलः दुर्जनः, मूर्खो वा । दुर्गतः दरिद्रः । तयोश्च । **दुर्विधः** । त्रि० । दुष्टा विधा यस्य । "दुर्विधो वाच्यलिङ्गः स्याद्दुर्गतेऽपि खलेऽपि च" इति मेदिनी ॥ २१८ ॥ रोधे आवरणे,

दैत्येचैत्रवसन्तेषु द्रुमभेदे च ना मधुः ।
मिद्धं चिन्तातिसंक्षेपे निद्रायां चाऽथ मागधी ॥ २२० ॥
पिप्पल्यां यूथिकायां ना लग्ने मगधजे त्रिषु ।
लशुनेऽतिविषायां च शुण्ठ्यामपि महौषधम् ॥ २२१ ॥
सीता योजनगन्धा स्यात्कस्तूरी, व्याससूरपि ।
विधिर्ब्रह्मणि काले च प्रकारे वेधने विधा ॥ २२२ ॥

निरुत्पत्त्यां वा । नाशे विनाशे । चकारात् प्रलये प्रतिरोधे च **निरोधः** । पु० । निपूर्वरुध—आवरणे । घञ्प्रत्ययः । "निरोधो नाशरोधयोः" इति मेदिनी ॥ ज्ञाते ज्ञातरि । त्रि० । जिने सर्व्वज्ञे । बुधे पण्डिते । तथा जागरिते च । बुद्धः । पु० । बुध—ज्ञाने । क्तप्रत्ययः । "बुद्धो जिने लब्धवर्णे पुंसि स्याद्बुद्धितेऽन्यवत्" इति मेदिनी ॥ निषेधः प्रतिरोधः । बुद्धः बोधप्रतिबन्धः तयोः । तथा न्यायमते स्वभाववत्पदार्थे यथा वह्निबुद्धौ वह्न्यभाववान् ह्रदो बाधः ।" प्रतिबन्धके पीडने उपद्रवे च **बाधः** । पु० । बाध—विहतौ । घञ्प्रत्ययः । कर्तरि अच्प्रात्ययः । भावे घञ् च । "बाधा दुःखे निषेधे च" इति मेदिनी । रौहिणेये बृहस्पतिभार्यायां तारायां चन्द्रेण जनिते पुत्रे ग्रहभेदे सौम्ये । तस्य रोहिण्या प्रतिपालनात् रौहिणेयत्वं प्रसिद्धम् । कवौ पण्डिते । काव्यकर्तरि च **बुधः** । पु० । बुध—ज्ञाने । कप्रत्ययः । "बुधः सौम्ये च पण्डिते" इति मेदिनी ॥ २१९ ॥ दैत्यः कुम्भीनस्याः भर्ता दैत्यभेदः । "विष्णुकर्णमलोद्भूता वसुरौ मधुकैटभौ" इति पुराणम् । चैत्रं मासविशेषम् । वसन्तः ऋतुभेदः तेषु । द्रुमभेदे वृक्षभेदे । अशोकवृक्षे यष्टिमधौ च । पु० । तथा प्राणिनां शुभाशुभकर्मणि । न० । जीवन्त्याम् । स्त्री० । त्रपुणि च । न० । **मधुः** । पु० । मनबोधे, गर्वे वा । उप्रत्ययः । नस्य धः । "मधुपुष्परसक्षौद्रमद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिच्चैत्रे स्याज्जीवन्त्यां तु योषिति" इति मेदिनी । चिन्तातिसंक्षेपे चिन्ताप्रागनुभूतज्ञानजन्यः संस्कारोद्बोधः पूर्वदृष्टपदार्थस्मरणं वा तस्याः अतिसंक्षेपः अल्पवाक्यादिना प्रकाशनं तत्र । क्वचित् चित्ताभिसंक्षेपे इति पाठः । **मिद्धम्** । न० । मिध—कार्याक्षमे । क्तप्रत्ययः । "मिद्धं चित्ताभिसंक्षेपे क्लीबमालस्यनिद्रयोः" इति मेदिनी ॥ २२० ॥ पिप्पल्यां कणायाम् । यूथिकायां पुष्पप्रधानवृक्षे । पु० । लग्ने स्तुतिपाठके । मगधजे मगधदेशजाते । त्रि० । तथा वर्णसङ्करभेदे श्वेतजीरके च **मागधी** । स्त्री० । मगधदेशे भवा । अण्—ङीप्प्रत्ययौ । "मागधी स्त्री कणायूथ्योर्वाच्यवन्मगधोद्भवे । पुंसि वैश्यात्क्षत्रियाजे शुक्लजीरकबन्दिनोः" इति मेदिनी॥लशुने स्वनामाख्याते भेषजे । अतिविषायां शुण्ठ्यां

स्वनामाख्यातायाम् । अपिशब्दात् वाराहीकन्दे वत्सनाभे विषे पिप्पल्यां वीर्याद्यौषधमात्रे च । **महौषधम्** । न० । महच्च तत् औषधमिति कर्मधारयः । "महौषधं तु शुण्ठ्यां स्याद्विषायां लशुनेऽपि च" इति मेदिनी ॥२२१॥ सीता जनकराजदुहिता । तस्याम् । कस्तूरीमृगनाभिः । व्याससूः व्यासमाता सत्यवती । तयोः । अपिशब्दात् तद्वति च **योजनगन्धा** ।

पृक्का महिला च वधूर्विश्वस्तोऽनुद्धतश्च विश्रब्धः ।
विश्रब्धं बाढार्थं शुद्धं त्रिषु पूतकेवलयोः ॥ २२३ ॥
श्राद्धं निवापे श्रद्धालौ त्रिषु साधुर्धनिन्यपि ।
स्कन्धः सङ्घेऽपि सिद्धस्तु नित्यनिष्पन्दनाकिषु ॥ २२४ ॥

स्त्री० । योजनं व्याप्य गन्धो यस्याः इति बहुव्रीहिः । "योजनगन्धा कस्तूर्यां सीतायां व्यास-मातरि" इति मेदिनी ॥ ब्रह्मणि प्रजापतौ । काले चकारात् भाग्ये क्रमे प्रवर्तनारूपे नियोगे "चिकीर्षाकृतिसाध्यत्वहेतुधीविषयोः" इत्युक्तम् । तज्जनके वाक्ये विष्णौ कर्मणि गजभक्ष्यान्ने वैद्ये अप्राप्तप्रापकरूपे वाक्यभेदे "संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिका-रश्च षड्विधं सूत्रलक्षणम्" इत्युक्ते सूत्रभेदे च । **विधिः** । पु० । विपूर्वधा-धारणे । कि प्रत्ययः । विधिर्ना नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी ॥ प्रकारे भेदे । वेधने वेधन-कर्मणि । तथा विमाने । गजभक्ष्यान्ने वृद्धौ वेतने कर्मणि च । स्त्री० । **विधा** । स्त्री० । विध-विधाने । कप्रत्ययः । आङ् वा । "विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधौ" इति मेदिनी ॥ २२२ ॥ पृक्का शाकभेदः । महिला योषित् भर्या वा । तयोः । चकारात् नवोढायां पुत्रजायायां शठ्यां च **वधूः** । स्त्री० । उह्यते पितृगेहात् पतिगृहम् । वह-प्रापणे । ऊप्रत्ययः । धुकच् । "वधू स्त्री शारिवौषधौ । स्नुषाशटीनवोढासु भार्यापृक्काङ्गनासु च" इति मेदिनी ॥ विश्वस्तः जातविश्वासः । अनुद्धतः वाक्याद्यचञ्चलः, विनीतो वा । क्वचित्तु "अनुद्भटः" तयोः बाढार्थं गाढभावम् । तत्र । विश्रब्धं न० चकारात् शान्ते च **विश्रब्धः** । पु० । विपूर्व-श्रम्भु-प्रमादे । क्तप्रत्ययः । "विश्रब्धोऽनुद्भटेऽपि स्याद्गाढविश्वस्तयोस्त्रिषु" इति मेदिनी ॥ पूतं पवित्रम् । केवलमेकं, कृत्स्नं वा । तयोः । तथा सैन्धवलवणे मरिचे निर्दोषे शुभ्रे च । त्रि० । **शुद्धम्** । न० । शुध-शौचे, शोधने च । क्तप्रत्ययः । "शुद्धं स्यात्त्रिषु केवले । निर्दोषे च पवित्रे च" इति मेदिनी ॥ २२३ ॥ निवापे पित्रुद्देशेन दाने, पित्रादिभ्यः श्रद्धया देये द्रव्ये च । "श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते" इत्युक्तम् । श्रद्धालौ श्रद्धायुक्ते । त्रि० । **श्राद्धम्** । न० । श्रद्धाहेतुत्वेनास्त्यस्य । अण् प्रत्ययः । "श्राद्धं श्रद्धान्विते त्रिषु" इति मेदिनी ॥ धनिनि धनस्वामिनि । अपिशब्दात् उत्तमकुलजाते सुन्दरे मनोहरे उचिते च । स्त्रियां वा ङीप् । मुनौ जिने च । "न प्रहृष्यति सम्माने नावमानेन कुप्यति । न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम्" इत्याद्युक्तधर्मवति जने वार्धुषिके च । पु० । **साधुः** । त्रि० । साध-सिद्धौ । उन् प्रत्ययः । "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" इति मेदिनी ॥ सङ्घे व्यूहे, समूहे च । अपिशब्दात् अंशे वृक्षस्य काण्डे नृपे काये भद्रादौ छन्दोभेदे सौगतमतसिद्धेषु विज्ञानादिषु पञ्चसु । "पञ्च इमे भिक्षवः स्कन्धाः" इति [illegible] । "मुक्त्वाङ्कुरस्कन्धपञ्चकम्" इति माघः । पथि ग्रन्थपरिच्छेदे च "स्कन्धैर्द्वादशभि-र्युतम्" इति भागवतम् । **स्कन्धः** । पु० स्कद्यते आरुह्यते । कर्मणि घञ्प्रत्ययः । पृषोदरा-

सन्धिः पुमान्सुरङ्गायां भेदे संघट्टने भगे।

इति धान्ताः।

कुले ख्यातौ चाऽभिजनः स्याद्ध्वा कालवर्त्मनोः ॥ २२५ ॥

अतिवृत्तेऽवदानं स्यात्कर्मखण्डनयोरपि।

अग्रजन्माऽग्रजे विप्रे स्यादन्नं भक्तभुक्तयोः ॥ २२६ ॥

विनीते विप्रभेदे चाऽनूचानोऽर्थी विवाद्यपि।

अन्तावसायी चाण्डाले मुनिभेदे च नापिते ॥ २२७ ॥

दित्वात् साधुः। "स्कन्धः स्यान्नृपतावंशे सम्परायसमूहयोः। काये तरुप्रकाण्डे च भद्रादौ छन्दसां भिदि" इति मेदिनी ॥ नित्यं निरन्तरम्। निष्पन्दं निश्चलम्। नाकी देवयोनिभेदः तेषु। तथा निष्पन्ने पक्वे व्यासादौ मुनौ गुडे कृष्णधुस्तूरे च। पु०।निश्चिते। त्रि०। **सिद्धः**। पु०। सिध–सिद्धौ। क्तप्रत्ययः। "सिद्धो व्यासादौ भेदे योगस्य देवयोनेश्च त्रिषु निष्पन्ने" इति मेदिनी ॥ २२४ ॥ सुरङ्गायां चौरादिकृतसुरङ्गायाम्। क्वचित्तु "सुरङ्गायाम्" इति। "सन्धिः कृत्वा तु चौर्यम्" इति स्मृतिः। भेदे व्याकरणोक्ते वर्णद्वयपठितवर्णविकारभेदे। सङ्घट्टने नृपाणां षड्गुणान्तर्गते मेलनार्थं मैत्रीकरणरूपे व्यापारे। भगे योनौ। तथा संयोगे अस्थिद्वयसंयोगस्थाने नाटकाङ्गविशेषे च **सन्धिः**। पु०। समपूर्व धा–धारणे। कि प्रत्ययः। "सन्धिः पुमान्सुरङ्गायां भगे सङ्घट्टनेऽपि च" इति मेदिनी॥ इति धकारान्ताः समाप्ताः॥अथ नान्तानाह॥ कुले वंशे। ख्यातौ प्रसिद्धौ तयोः **अभिजनः**। स्यात्।पु०। अभिजन्यतेऽस्मिन्। जन–जनने। घञ्प्रत्ययः।अवृद्धिः।"भवेदभिजनः ख्यातौ जन्मभूम्यां कुलध्वजे। कुलेऽपि च"इति मेदिनी तथा जन्मभूमौ कुलश्रेष्ठे च कालवर्त्मनोः कालः प्रसिद्धः वर्त्म मार्गः तयोः **अध्वा**। ॥२२५॥अतिवृत्ते अतिक्रमे। कर्म शुद्धीकरणम्। खण्डनं भेदनं तयोः। अपिशब्दात् पराक्रमे। वीरणमूले च। **अवदानम्**। न०। अवपूर्व दो छेदे।ल्युट्प्रत्ययः।"अवदानं खण्डने स्यादति वृत्ते च कर्मणि" इति मेदिनी ॥ अग्रजे ज्येष्ठभ्रातरि। विप्रे ब्राह्मणे। तथा ब्रह्मणि-अग्रजातमात्रे च। त्रि०। **अग्रजन्मा**। पु०। अग्रे जन्म यस्य। अग्रशब्दोपपदजन–जनने। मनिन् प्रत्ययः। व्यधिकरणबहुव्रीहिः। अग्रजन्मा द्विजे ज्येष्ठभ्रातरि ब्रह्मणि स्मृतः" इति मेदिनी ॥ भक्तम् ओदनं, स्विन्नान्नं वा। "शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। आमं तु वितुषं ज्ञेयं स्विन्नमन्नमुदाहृतम्" इति। भुक्तं भक्षितं तयोः। तथा पृथिव्यां अन्नहेतुत्वात् तस्या अन्नत्वम्। अत एव वेदान्ते तेजोऽबन्नात्मिका प्रकृतिरित्युक्तम्। उपचारात् उपकरणे च। **अन्नम्**। न०। अनत्यनेन अन–जीवने। नन् प्रत्ययः। अद्यते इति वा। अद–भक्षणे, अवने वा। क्तप्रत्ययः। अन्नार्थतया न जग्धिः। "अन्नं भुक्ते च भक्ते स्यात्" इति मेदिनी ॥ ॥ २२६ ॥ विनीते विनययुक्ते, सुशिक्षिते च। विप्रभेदे ब्राह्मणविशेषे। चकारात् शिक्षादिषडङ्गसहितवेदाध्ययनकारिणि वेदार्थानुवचनसमर्थे च **अनूचानः**। पु०। अनुपूर्ववच–कथने।

अश्वकुत्सितयोरर्वा वज्रे विद्युति चाऽशनिः ।
वर्णमात्रे विसर्गे चाऽभिनिष्णानोऽथ हैहये ॥ २२८ ॥
पार्थे द्रुमे मयूरे ना अर्जुनस्त्रिषु पाण्डरे ।
अर्जुनी गव्युषायां च भृङ्गवृश्चिकयोरली ॥ २२९ ॥
आत्मा मनस्याकलनं विबन्धपरिसङ्ख्ययोः ।
आवेशनं शिल्पगेहे भूतावेशेऽथ गेन्दुके ॥ २३० ॥

कानप्रत्ययः । निपातनात् साधुः । अनूचानो विनीते स्यात्साङ्गवेदविचक्षणे" इति मेदिनी ॥ विवादी विरुद्धवादी। "ऋणादिदायकलहे द्वयोर्बहुतरस्य वा । विवादो व्यवहारश्च" इत्युक्तलक्षणः व्यवहारः । तत्र । अपिशब्दात् याचके सेवके असन्निहितधने धनस्वामिनि च **अर्थी** । त्रि० । अर्थ-याचने । इनिप्रत्ययः ।"अर्थः पुमान्याचके स्यात्सेवके च विवादिनि" इति मेदिनी॥चाण्डाले श्वपचे । अन्ताय स्वतोपक्रते जन्तुनाशाय अवस्यति । पाणिहिंसके चाण्डालादौ । अन्ते वृद्धे वयसि अवस्यति निश्चिनोति तत्त्वम् । मुनिभेदे मुनिविशेषे । नखकेशानामन्तमवसातुं छेत्तु शीलमस्य । नापिते क्षुरकर्मकारके च । **अन्तावसायी** । पु० । अन्तशब्दःअवपूर्वसा नाशेणिनिप्रत्यः । युक् च । "अन्तावसायी श्वपचे मुनिभेदे च नापिते" इदि मेदिनी ॥२२७॥ अश्वः घोटकः । कुत्सितः निन्दितः । तयोः । तथा इन्द्रे गोकर्णपरिमाणे वडवायां कुट्टिन्याम् । स्त्री०।अर्वा । पु० । ऋ-गतौ । वनिप्प्रत्ययः ।"अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः" इति मेदिनी ॥ वज्रे मेघोत्पन्ने ज्योतिषि पवौ । विद्युति तडिति । तथा प्रस्तरवर्षिणि उल्काविशेषे च **अशनिः**। स्त्री०। अश्नुते संहन्ति अश-संहतौ, व्याप्तौ च । अनिप्रत्ययः । "अशनि स्त्रीपुंसयोः स्याच्च चञ्चलायां पवावपि" इति मेदिनी ॥ वर्णमात्रे अक्षरमात्रे । विसर्गे विसर्जनीये च । **अभिनिष्णानः** । पु० । अभिनिपूर्वस्ना-शौचे, शोधने च । ल्युट्प्रत्ययः । क्वचित्तु "अभिनिष्ठानः" इति पाठः । "अभिनिष्णानोऽप्यक्षरमात्रे विसर्जनीयेऽपि च" इति मेदिनी ॥ हैहये हैहयाधिपे कार्तवीर्ये ॥ २२८ ॥ पार्थे पृथापुत्रे, युधिष्ठिरादौ च द्रुमे स्वनामख्याते वृक्षे । मयूरे स्वानामाख्याते खभेदे । पु० । पाण्डरे शुभ्रवर्णवति । त्रि० । तथा मध्यमपाण्डवे करवीरे धवले आर्जुनी इति ख्याते नेत्ररोगे च । न० । अर्जुनः । पु० । अर्ज-संस्कारे, अर्जने च । उनन्प्रत्ययः । "अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः" इति मेदिनी । गवि नवप्रसूतायां धेन्वाम् । उषायां स्वनामख्याते काले । "तेजः परिहानिरुषा भानोरर्धोदयं यावत्" इति वराहोक्तम् । चकारात् बाहुदायां नद्यां कुट्टिन्यां अर्जुनी । स्त्री० । अर्ज-संस्कारे । उनन्प्रत्ययः । गौरादित्वात् ङीप् । "अर्जुनी गवि । उषायां बाहुदानद्यां कुट्टिन्यामपि च क्वचित्" इति मेदिनी ॥ भृङ्गः भ्रमरः । वृश्चिकः कीटभेदः तयोश्च । **अली** । पु० । अलः पर्याप्तः सर्वत्र गतिर्विद्यतेऽस्य । अल-पर्याप्तौ । इनिप्रत्ययः । "अली स्याद्वृश्चिके भ्रमरेऽपि च" इति मेदिनी ॥ २२९ ॥ मनसि चित्ते । तथा देहे स्वरूपे प्रयत्ने वृत्तौ बुद्धौ अर्के

विशेषे चोपधानं स्याच्चुल्ल्यामुद्धानमुद्गमे ।
अगम्भीरेऽपि चोत्तानः शराभ्यासेऽप्युपासनम् ॥ २३१ ॥
स्यात्कात्यायन्यर्धवृद्धा गौर्योर्वररुचौ नरि ।
शिरीषाम्रातकाश्वत्थगर्दभाण्डे कपीतनः ॥ २३२ ॥
चीरेऽपि कौपीनमश्वे पुन्नागेऽपि च केशरी ।
कुलीनत्वे च गुह्ये च कौलीनमथ कञ्चुकी ॥ २३३ ॥

वायौ वह्नौ जीवे ब्रह्मणि च । **आत्मा** । पु० । आपूर्वअत्--गतौ, प्रापणे च । मनिन्प्रत्ययः । "आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीर-ब्रह्मणोरपि" इति मेदिनी ॥ विबन्धः अनुसन्धानः, रोगभेदो वा । परिसङ्ख्या गणन तयोः । तथा आकाङ्क्षायां च **आकलनम्** । न० । आपूर्वकल--सङ्ख्यायाम् । ल्युट्प्रत्ययः । "आकलनं विबन्धे स्यादाकाङ्क्षापरिसङ्ख्ययोः" इति विश्वः । शिल्पगेहे शिल्पशालायाम् । भूतावेशे अमनुष्याधिष्ठिते रोगे । तथा सूर्य्येन्दुपरिधौ च **आवेशनम्** । न० । आपूर्वविश--प्रवेशे । आधारे ल्युट्प्रत्ययः । "आवेशनं शिल्पिशाले भूतावेशप्रवेशयोः" इति मेदिनी ॥ गेन्दुके

वस्त्रनिर्मितगोलाकारे क्रीडनके कन्दुके च । पृषोदरादिना वा डःवे कृते "गेण्डुके" इति च ॥ २३० ॥ विशेषे व्रतभेदे । चकारात् शिरोधाने प्रणये विषे च **उपधानं** । स्यात् । न० । उपधीयते शिरोऽत्र । उपपूर्वधा--धारणे । आधारे ल्युट्प्रत्ययः । "उपधानं विषे गण्डौ प्रणयेऽपि नपुंसकम्" इति मेदिनी ॥ चुल्ल्यां पाकार्थमग्निस्थापनस्थाने । उद्गमे ऊर्द्धगमने । तथा वमिते च **उद्धानम्** । न० । उपधीयतेऽस्मिन् । उद्पूर्वधाधारणे । ल्युट्प्रत्ययः । "उद्धान-मुद्गते वाच्यलिङ्गं चुल्ल्यां नपुंसकम्" इति मेदिनी ॥ अगम्भीरे निम्नरहितस्थाने । अपिशब्दात् विस्तारशून्ये भूमिलग्नपृष्ठतया ऊर्द्धभावेन स्थिते ऊर्द्धमुखे वा । **उत्तानः** । त्रि० । उद्गतस्तानो विस्तारो यस्मादिति बहुव्रीहिः । "उत्तानमगंभीरे स्यादुद्धास्यशयिते त्रिषु" इति मेदिनी ॥ शरा-भ्यासे । बाणमोचनशिक्षायाम् । अपिशब्दात् सेवने देवताद्याराधने च **उपासनम्** । न० । उपपूर्वअस--क्षेपे । ल्युट्प्रत्ययः । उपपूर्वआस--उपवेसने । ल्युट्प्रत्ययः । युक् च । "उपासनं शराभ्यासेऽप्युपास्तावासनेपि च" इति मेदिनी ॥ ॥ २३१ ॥ अर्धवृद्धा अर्धवयस्का । गौरी दुर्गा । सा हि कल्पान्तरे कत्यस्यापत्यमासीदिति वेदोक्तिः तयोः । वररुचौ स्वनामाख्याते कवौ । पु० । तथा काषायवस्त्रायां विधवायां च । **कात्यायनी** । स्यात् । स्त्री० । कत्य-स्यापत्यम् । स्त्री० । फञ्प्रत्ययः । "कात्यायनो वररुचौ विशेषे च मुनेः पुमान् । कषायवस्त्रे

विधवार्धजरत्युभयोः स्त्रियाम्" इति मेदिनी ॥ शिरीशः स्वनामाख्यातो वृक्षः । आम्रातकः स्वना-माख्यातो वृक्षः । (आमडा इति हिन्दी) अश्वत्थः बोधिवृक्षः । गर्दभाण्डः पत्रादिष्वश्वत्थ-तुल्याकारो वृक्षः । तेषु च । **कपीतनः** । पु० । कपीनाम् ईं लक्ष्मीं तनोति । तनु--विस्तारे । अच्प्रत्ययः । "कपीतनो गर्दभाण्डशिरीषाम्रा केषु च" इति मेदिनी ॥ २३२॥ चीरे मेखला-

स्थापत्ये वर्मिते सर्पे क्लृप्तौ छेदे च कल्पनम् ।
कामिनौ स्त्रैणचक्रौ च कृतिनौ योग्यपण्डितौ ॥ २३४ ॥
काञ्चनं तु हेम्नि नागकेशरे काञ्चनी निशा ।
धातुवादरते कांस्यकारे कारन्धमी नरि ॥ २३५ ॥
चर्चिकाचिल्लदयिते खकामिन्यौ प्रकीर्त्यते ।
विषदिग्धपशोर्मांसे गृञ्जनं ना रसोनके ॥ २३६ ॥

निबद्धे वस्त्रखण्डे । "कौपीनवन्तः खलु भाग्यवन्तः" इति पुराणम् । अपिशब्दात् पापे तद्वत् काकार्ये च गोप्यत्वात् पुत्रषलिङ्गे च **कौपीनम्** । न० । कूपे पतनमर्हति । अकार्यार्थे निपातनात् साधुः । "कौपीनं स्यादकार्ये च गुह्यचीरप्रदेशयोः" इति विश्वः ॥ अश्वे तुरगे । पुन्नागे स्वनामाख्याते वृक्षे । अपिशब्दात् सिंहे नागकेशरवृक्षे बीजपूरकवृक्षे हनुमत्पितरि वानरभेदे च **केशरी** । पु० । केशराः सन्त्यस्य इति कचित्तु "केसरी" अप्यत्र । "केशरी तुरगे सिंहे पुन्नागे नागकेशरे" इति मेदिनी ॥ कुलीनत्वे कुलीनभावे, कुलीनकर्मणि वा । गुह्ये लिङ्गे । चकारात् परीवादे दुष्टकार्ये प्राणिभिर्युते च **कौलीनम्** । न० । कौ पृथिव्यां लीनं यस्मादिति अलुक्समासः । कुलीनस्य भावः कर्म वा । "कौलीनं गुह्यजन्ययोः । कुकर्मणि कुलीनत्वे युद्धे पश्वहिपक्षिणाम्" इति मेदिनी ॥ २३३ ॥ स्थापत्ये राज्ञामन्तः पुररक्षके द्वारपाले । वर्मिते कृतसन्नाहे । सर्पे भुजगे । तथा जारे यवे चणके च **कञ्चुकी** । पु० कञ्चुकः अस्त्यस्य तं धारयति वा । इनिप्रत्ययः । "कञ्चुक्यन्तः पुराध्यक्षेऽपिङ्गेही जोङ्गकद्रुमे" इति मेदिनी ॥ क्लृप्तौ कृतौ । छेदे छेदने । चकारात् न्यायोक्ते अनुमितिभेदे च **कल्पनम्** । न० । क्लृप—कल्पने । भावे ल्युट्प्रत्ययः "अथ कल्पना । करिणः सज्जनायां स्त्री क्लीबं क्लृप्तौ च" इति मेदिनी ॥ स्त्रैणं स्त्रीसम्बधी । चक्रः चक्रवाकपक्षी । तयोः । चकारात् पारावते चटके सारसपक्षिणि च । एतेषां कामाधिक्यात् कामित्वं प्रसिद्धम् । **कामवती** । त्रि० । भीरुस्त्रियां दारुहरिद्रायां मदिरायां च । स्त्री० । **कामी** । पु० । कामोऽस्त्यस्य । णिनूप्रत्ययः । "कामी तु कामुके चक्रवाके पारावतेऽपि च" इति इति मेदिनी ॥ योग्यः उचितः पण्डितः शास्त्रतत्त्वज्ञः । तयोः । तथा पुण्यवति निपुणे साधौ कृतार्थे च **कृती** । स्त्री० । कृतमनेन । इष्टादित्वादिनिः । "कृती स्यात्पण्डिते योग्ये" इति मेदिनी ॥ २३४ ॥ हेम्नि स्वर्णे । नागकेशरे स्वनामाख्याते पुष्पवृक्षे । न० । तथा चम्पके उदुम्बरे धूस्तूरे पद्मकेशरे स्वर्णादिपुष्पे । पु० । दीप्तौ । न० । काञ्चनम् । न० । निशा हरिद्रा । तस्याम् । तथा गोरोचनायां स्वर्णक्षीरिवृक्षे च **काञ्चनी** । स्त्री० । कचि—दीप्तौ । ल्युट्प्रत्ययः । करणे ल्युट् । ङीप् वा । "काञ्चनः काञ्चनारे स्याच्चम्पके नागकेशरे । उदुम्बरे च धुस्तूरे हरिद्रायां च काञ्चनी" इति मेदिनी ॥ धातुवादरते धातवो हि वातादिवशाद्बहुविधाः तत्सम्बन्धवादानुरक्ते । कांस्यकारे स्वनामाख्याते जातिभेदे च **कारन्धमी** । पु० । कारं धमति । ध्मा—मुखमारुतसंयोजने शब्दे । णिनिप्रत्ययः "कारन्धमी कांस्यकारे धातुवादरतेऽपि च" इति मेदिनी ॥ २३५ ॥ चर्चिका चन्दनादिना गात्रले-

गहनं गह्वरं दुःखे वनेऽथाम्बुदमुस्तयोः ।
घनः पुंसि घनं वाद्यं चर्म स्यात्फलकत्वचोः ॥ २३७ ॥
चीनो वस्त्रव्रीहिभेदौ चिह्नं लक्ष्मपताकयोः ।
चक्रिणो विष्णु भुजगकुलालग्रामजालिनः ॥ २३८ ॥
कम्प्रे ना चलनं कम्पे चलनी वस्त्रघर्घरी ।
भूर्जे फलकृपाणौ च चर्म्यथालम्बुषे पुमान् ॥ २३९ ॥

पनम् । चिल्लदयिता पक्षिप्रिया, क्लिन्ननेत्रा वा । तयोः **खकामिनी** । प्रकीर्त्यते कथ्यते । स्त्री० । खे देहे, आकाशे वा कामिनी इति सप्तमीतत्पुरुषः ॥ विषदिग्धपशोर्मांसे विषेण लिप्तमृगादेर्मांसे । रसोनके लशुने । "गन्धाकृतिरसैस्तुल्यः सूक्ष्मनालः पलाण्डुना" इत्युक्तलक्षणे मूलभेदे च । पु० । **गृञ्जनम्** । न० । गृञ्जते भक्ष्यत्वेन कथ्यते रोगेषु । गृजि—ध्वनौ । ल्युट्प्रत्ययः । "अथ गृञ्जनम् । विषदिग्धपशोर्मांसे क्लीबं पुंसि रसोनके" इति मेदिनी ॥ २३६ ॥ गह्वरे निकुञ्जे । दुःखे पीडायाम् । वने कानने । तथा दुर्गमे । दुष्प्रवेशे च त्रि० । **गहनम्** । न० । गाह—विलोडने । युच् प्रत्ययः । पृषोदरादित्वात् ह्रस्वः । "गहनं कलिले त्रिषु । नपुंसकं गह्वरे स्याद्दुःखकाननयोरपि" इति मेदिनी ॥ अम्बुदः मेघः । मुस्ता स्वनामाख्यात औषधभेदः तयोः । तथा दार्ढ्ये काठिन्ये विस्तारे ओघे देहे लोहमुद्गरे कफे अभ्रके निबिडे सान्द्रे पूर्णे दृढे च **घनः** । पु० । वाद्यं कांस्यतालादिवाद्यम् । तत्र च । **घनम्** । न० । हन—वधे । अप् प्रत्ययः । घनादेशः । "घनं स्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः । ना मुस्तादौ वदार्ढ्येषु विस्तारे लोहमुद्गरे । त्रिषु सान्द्रे दृढे च" इति मेदिनी ॥ फलकं स्वनामाख्यातमस्त्रम् । "शरीरावरकं शस्त्रं चर्म इत्यभिधीयते" इति । त्वक् वल्कलं, चर्म वा तयोः तथा रक्तधरायां कृत्तौ इन्द्रियभेदे **चर्म** । स्यात् । न० । चर—गतौ । मनिन् प्रत्ययः । "चर्म स्याद्वल्कलत्वचोः इति विश्वः ॥ ॥ २३७ ॥ वस्त्रं चीनदेशोद्भववसनम् । व्रीहिभेदः कङ्गुधान्यविशेषः । तयोश्च । तथा मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्तितः" इत्युक्ते देशे तद्देशस्थे जने तन्त्रोक्ते तद्देशाचारभेदे च तथा सूत्रे मृगभेदे च । पु० । पताकायां सीसके च **चीनः** । पु० । चि—चयने । नक् प्रत्ययः । पृषोदरादित्वाद्दीर्घः । "चीनो देशांशुकव्रीहिभेदे तन्तौ मृगान्तरे" इति मेदिनी । लक्ष्म लक्षणम् । पताका वंशोपरि देयं त्रिकोणाकारं वस्त्रखण्डं तयोश्च । **चिह्नम्** । न० । चिह्—लक्षणे । अच् प्रत्ययः । चह—प्रतारणे । नप्रत्ययः । उपधाया इत्वं वा । "चिह्नं लक्ष्मपताकयोः" इति मेदिनी ॥ विष्णुः श्रीकृष्णः । भुजगः सर्पः । कुलालः कुम्भकारः । ग्रामजाली ग्रामजालिकः । क्वचित्तु "ग्रामयाजिनः" इति दृश्यते । तेषु । तथा चक्रवाके सूचके तैलिकभेदे चक्रमर्दे चक्रवर्तिनि व्यालनखे खरे चक्रवति । त्रि० । **चक्री** । पु० । चक्रमस्त्यस्येति इनि प्रत्ययः । "चक्री तैलिकभित्कोककुलालजाभिसूचके" इति मेदिनी ॥ २३८ ॥ कम्प्रे कम्पान्विते । पु० । कम्पे गात्रादिकम्पे, वेपथौ च । तथा भ्रमणे च **चलनम्** । न० ।

निम्बेऽपि छर्दनं वान्तौ जवनो देशवेगिनोः ।
बुद्धे जिनो जित्वरे च जीवनं वर्तनाम्भसोः ॥ २४० ॥
शूरे दातरि च त्यागी व्रतिशोच्यौ तपस्विनौ ।
तपनो नरके भानौ विरलेऽल्पे कृशे तनुः ॥ २४१ ॥

चल—प्रेषणे, गतौ वा । ल्युट्प्रत्ययः । "चलनं भ्रमणे कम्पे कम्प्रे तु वाच्यलिङ्गकम्" इति मेदिनी ॥ वस्त्रघर्घरी वस्त्रैः कृतघण्टिका । वस्त्रकृत स्वरभेद इति वा । तस्याम् । तथा वारीभेदे च **चलनी** । स्त्री० । चल—कम्पने । ल्युट्—ङीप्प्रत्ययौ च । "चलनी वस्त्रघर्घर्यां वारीभेदेऽपि च क्वचित्" इति मेदिनी ॥ भूर्जे भूर्जवृक्षे । फलकपाणौ फलकास्त्रवति । तथा त्वग्रूपे चर्मवति । भृङ्गरोटे कदल्यां च **चर्मी** । पु० । चर्म फलकमस्त्यस्य । व्रीह्यादित्वादिनिः । चर्मी फलकपाणौ स्याद्भूर्जे भृङ्गरिटावपि" इति मेदिनी ॥ अलम्बुषे लज्जालुवृक्षे । पु० । स्वर्वेश्यायाम् । स्त्री० ॥ २३९ ॥ निम्बे अरिष्टवृक्षे । वान्तौ वमने । अपिशब्दात् मदनवृक्षे च **छर्दनम्** । न० । छर्द—वमने । णिच्—ल्युट्प्रत्ययौ । "छर्दनं वमने क्लीबं निम्बालम्बुषयोः पुमान्" इति मेदिनी ॥ देशः देशविशेषः । वेगी वेगवान्, शीघ्रगः तयोः । तथा घोटके जातिभेदे च **जवनः** । पु० जुरंहसि, गतौ वा । युच्प्रत्ययः । "जवनं स्यात्तु वेगेऽपि हये ना वेगिनि त्रिषु" इति मेदिनी ॥ बुद्धे सम्यक्सम्बुद्धे । जित्वरे जयशीले । चकारात् विष्णौ अर्हति च **जिनः** । पु० । जयति संसारम् । जि—जये । नक्प्रत्ययः । "जिनोऽर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु" इति मेदिनी ॥ वर्तन वृत्तिः, प्राणधारणम् । अम्भः जलम् । तयोः तथा मज्जनि हैयङ्गवीने पुत्रे जीवकौषधे वायौ क्षुद्रफलकवृक्षे च **जीवनम्** । न० । जीव्यतेऽनेन । जीव—प्राणधारणे । करणे ल्युट्प्रत्ययः । जीवयति णिच् प्रत्ययो वा । "जीवनं वर्तने जीवप्राणधारणयोर्जले" इति मेदिनी ॥२४०॥ शूरे वीरे, विक्रमवति वा । दातरि दानशीले । चकारात् वर्जनशीले कर्मफलत्यागिनि च "यस्तु कर्मफलत्यागी स त्यागी त्वभिधीयते" इति । **त्यागी** । त्रि० । त्यज—दाने । विणुन्प्रत्ययः । "त्यागी दातरि शूरे" इति मेदिनी ॥ व्रतिश्चान्द्रायणादिव्रतधारणः । शोच्य अनुकम्पनीयः । तयोः । तथा तापसे दीने प्रशस्ततपोवति च घृतकरञ्जे मत्स्यभेदे चटके च । पु० । **तपस्वी** । त्रि०। तपोऽस्यस्येति विनिप्रत्ययः । "तपस्वी तापसे चानुकम्प्ये त्रिषु" इति मेदिनी । नरके स्वनामाख्याते निरयभेदे । भानौ सूर्ये । तथा तापे ग्रीष्मे ऋतौ भल्लातकवृक्षे अर्कवृक्षे क्षुद्राग्निमन्थवृक्षे सूर्यकान्तमणौ च **तपनः** । पु० । तप—उपतापे । ल्युट् प्रत्ययः । "तपनोऽस्करेऽपि स्याद्भास्करे निरयान्तरे" इति मेदिनी । विरले अनिबिडे । अल्पे क्षुद्रे, ईषदर्थे वा । कृशे अल्पे, सूक्ष्मे वा । तथा देहे मूर्तौ च । स्त्री० । वा ङीप् । तन्वी, तनूश्च । **तनुः** । स्त्री० । तन—विस्तारे । उप्रत्ययः । "तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे" इति मेदिनी॥ २४१॥

क्रीडादौ देवनं नाऽक्षे द्विजन्मा दन्तविप्रयोः ।
दानं गजमदे त्यागे खण्डने रक्षणेऽपि च ॥ २४२ ॥
दर्शनं वर्णमुकुरचक्षुःशास्त्रोपलब्धिषु ।
स्त्री दीर्घकोष्यां दुर्नामाऽर्शसि द्युम्नं बले धने ॥ २४३ ॥
धन्वा मरौ धन्वचापे धावनं गतिशौचयोः ।
निर्भर्त्सनं खलीकारालक्तयोरथ नन्दनम् ॥ २४४ ॥
देवोद्याने सुते पुंसि नग्नौ क्षपणवन्दिनौ ।
श्रुतौ दृष्ट्यां निशमनं खगङ्गाऽपि नलिन्यथ ॥ २४५ ॥

क्रीडादौ परिहासादौ, खेलने वा । अक्षे पाशके । तथा दीप्तौ व्यवहारे जिगीषायां स्तुतौ लीलोद्याने पद्मे च । पु० । **देवनं** । न० । दीव्यतेऽनेन । दिवजिगीषायाम्, व्यवहारे वा । करणे ल्युट्प्रत्ययः । दीव्यत्यत्राऽधारे ल्युट् वा । "देवनं व्यवहारे स्याज्जिगीषाक्रीडयोरपि । देवनोऽक्षेषु पुंसि स्यात्" इति मेदिनी ॥ दन्तः दशनः, चर्वणसाधनास्थिविशेषश्च । द्विजः ब्राह्मणः तयोः । तथा अण्डजे च **द्विजन्मा** । पु० । द्वे जन्मनी यस्य । "द्विजन्मा दशने विप्रे" इति मेदिनी ॥ गजमदे हस्तिमदजले । त्यागे वर्जने, दाने वा । खण्डने छेदने । रक्षणे पालने । अपिशब्दात् शुद्धौ च **दानम्** । न० । दो—छेदे, खण्डने च । दै—शुद्धे । दा—दाने वा । ल्युट्प्रत्ययः । "दानं गजमदे त्यागे पालनच्छेदशुद्धिषु" इति मेदिनी ॥ २४२ ॥ वर्णः शुक्लादिरूपभेदः। मुकुरः दर्पणम् । चक्षुः नेत्रम् । शास्त्रं हितानुशासनम्, आध्यात्मज्ञानोपायं, न्यायादिशास्त्रं वा । उपलब्धिर्ज्ञानं, प्राप्तिर्वा । "नाभाव उपलब्धेः" इति वेदान्तसूत्रम् । तेषु च । तथा स्वप्ने बुद्धौ धर्मे च **दर्शनम्** । न० । दृश—चाक्षुषज्ञाने। ल्युट्प्रत्ययः । "दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु । शास्त्रदर्शनयोश्च" इति मेदिनी । दीर्घकोष्यां दीर्घकोषिकायाम् । अर्शसि गुदस्थरोगभेदे च । न० । **दुर्नामा** । पु०। दुष्टं निन्दितं नामास्य ङीप् । "दुर्नामा क्लीबमर्शसि । स्याद्दीर्घकोषायां स्त्री" इति मेदिनी॥बले शक्तौ । धने वित्ते च । **द्युम्नम्** । न० । दिवं मनति। म्ना—अभ्यासे । कप्रत्ययः । "द्युम्नं वित्ते बलेऽपि च" इति मेदिनी ॥ २४३ ॥ मरौ मरुदेशे । पु०। चापे धनुषि । न०। तथा स्थले च **धन्वा** । पु० । सौत्रसिद्धम् । धन्व—गतौ कनिन्प्रत्ययः । "धन्वा तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च" इति मेदिनी॥ गतिः शीघ्रगमनम् । शौचं शोधनम् । तयोश्च। **धावनम्** । न०। धाव—जवे । ल्युट्प्रत्ययः । "धावनं गमने शुद्धौ पृष्णिपर्ण्यां तु धावनी" इति मेदिनी ॥ खलीकारः अपकारः, अपकारवचनं वा । तत्करणे हि अखलोऽपि खलो भवति । अलक्तः लाक्षारसः तयोः। **निर्भर्त्सनम्** । न० । निर्पूर्वभर्त्स—अधिक्षेपे । ल्युट्प्रत्ययः । निर्भर्त्सनं खलीकारेऽलक्तकेऽपि नपुंसकम्" इति मेदिनी ॥ २४४ ॥ देवोद्याने नन्दनोद्याने । न० । सुते पुत्रे । तथा हर्षके भेके पर्वतभेदे । पु० । बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये" । इत्युक्ते षष्टिवर्षमध्ये वत्स-

ग्रन्थिप्रस्तावयोः पर्व विषुवत्प्रभृतिष्वपि ।
प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोः ॥ २४६ ॥
पाकस्थाने कुलालस्य वाते च पवनः पुमान् ।
हरीतकी राक्षसी च पूतनाऽथ वद्दालके ॥ २४७ ॥
पाठीनो गुग्गुलुद्रौ च रक्षोवृक्षौ पलाशिनौ ।
फाल्गुनो मासि पार्थे च स्त्री विदग्धा च वाणिनी ॥ २४८ ॥

रभेदे च । नन्दकारके च । त्रि० । **नन्दनम्** । न० । नन्दयतीति । नदि–सन्तोषे । णिच्–ल्युट्प्रत्ययौ । "नन्दनं वासवोद्याने नन्दनो हर्षके सुते" इति मेदिनी ॥ क्षपणः निर्ग्रन्थः संन्यासिभेदः । बन्दी स्तुतिपाठकः तयोः । तथा विवस्त्रे स तु पञ्चविधोः भवति । "द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च । एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः" इति । **नग्नः**।त्रि० नज–व्रीडायाम् । क्तप्रत्ययः । "नग्नो वन्दिक्षपणयोः पुंसि त्रिषु विवाससि" इति मेदिनी ॥ श्रुतौ श्रवणे । दृष्टयां दर्शने च । **निशमनम्** । न० । निपूर्वशम–शान्तौ, आलोचने वा । णिच् ल्युट् प्रत्ययौ। वा ह्रस्वः। "निशामनम्" अप्यत्र । "निशमनमुक्तं दृष्टौ श्रुतौ" इति मेदिनी॥ खगङ्गा खं व्योम तत्स्थिता या गङ्गा नदी । आकाशगङ्गा इत्यर्थः। अपिशब्दात् पद्मसङ्घे पद्मयुक्तदेशे नलिकायां च **नलिनी** । स्त्री० । नलाः सन्त्यस्याः । इनिप्रत्ययः । "नलिनी पद्मिनी व्योमनिम्नगा कमलाकरे । नपुंसकं नीलिकायां न पुंसि सरसीरुहे" इति मेदिनी ॥ ॥ २४५ ॥ ग्रन्थिः वंशादिसन्धिः, बन्धनं वा । प्रस्तावः अवसरः, प्रसङ्गो वा तयोः । विषुवत् समरात्रिदिनकालकः अयनांशक्रमेण रवेः तुलामेषादिराशिसङ्क्रान्तिभेदः । समरात्रिदिनप्रभृतिर्येषां तेषु पञ्चसु कालेषु । "चतुर्दश्यष्टमी चैव अमावस्या च पूर्णिमा । पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च" इत्युक्तम् । अपिशब्दात् उत्सवे लक्षणभेदे प्रस्तारे ग्रन्थविच्छेदनस्थाने च **पर्व** । न० । पॄ–पालने, पूर्तौ । वनिप्प्रत्ययः । "पर्व क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि" इति मेदिनी ॥ प्रतिच्छाया प्रतिमा । तत्र । गजदन्त हस्तिदशनः, कुम्भस्याधोभागो वा । अन्तरालं तयोर्मध्यस्थानं तयोः । तथा प्रतिबिम्बे च **प्रतिमानम्** । न०। प्रतिमीयतेऽनेन।प्रतिपूर्वमि–क्षेपे । मा माने वा । ल्युट्प्रत्ययः । "प्रतिमानं प्रतीच्छायागजदन्तान्तरालयोः" इति मेदिनी ॥ २४६ ॥ कुलालस्य कुम्भकारस्य पाकस्थाने आमघटादिपाकस्थाने । वाते वायौ । चकारात् धान्यादेः शोधने बहुलीकरणे व्यापारे च **पवनः** । पु० । पु–शोधे । कर्तरि ल्युट्प्रत्ययः । भावे करणे आधारे च ल्युट् वा । "पवनं कुम्भकारस्य पाकस्थाने नपुंसकम् । निष्पावमरुतोः पुंसि" इति मेदिनी ॥ हरीतकी स्वनामाख्यातः औषधभेदः । तत्र । राक्षसी बालकमातृकाभेदः । "पूतना जम्भकादयः" इति । तस्याम् । चकारात् गन्धमांस्यां बकासुरभगिन्यां रोगभेदे च **पूतना** । स्त्री० । पूतं करोति पूतशब्दात् णिच–ल्युट्प्रत्ययौ । "पूतना तु हरीतक्यां दानवीरोगभेदयोः" इति मेदिनी ॥ वद्दालके मत्स्यभेदे ॥ २४७ ॥ गुग्गुलुद्रौ स्वनामाख्याते वृक्षे । चकारात् पाठके ।

वर्धमानः प्रश्नभेदशरावैरण्डविष्णुषु ।
सेना नदी च वाहिन्यौ छेदे वृद्धौ च वर्धनम् ॥ २४९ ॥
भुवनं विष्टपे तोये भिन्नं दीर्णे विशेषिते ।
जन्माश्रयश्च भवनं भाजनं पात्रयोग्ययोः ॥ २५० ॥
भृतिकाञ्चनयोर्भर्म मलिनं दूषितेऽसिते ।
मानं प्रमाणे तौल्ये च मीनो राश्यन्तरे झषे ॥ २५१ ॥

त्रि० । पण्यवीथ्यां हट्टे च । स्त्री० । **पाठीनः** । पु० । पाठिं पृष्ठं नमयति । नम—नमने डप्रत्ययः । दीर्घः । "पाठीनो मीनभेदे स्यात्पाठके गुग्गुलुद्रुमे" इति मेदिनी ॥ रक्षः राक्षसः । वृक्षः द्रुमः । तयोश्च । **पलाशी** । पु० । पलाशानि सन्त्यस्य । इनिप्रत्ययः । "पलाशी वृक्षरक्षसोः" इति मेदिनी ॥ मासि चैत्रावधिके द्वादशे मासे । पार्थे अर्जुन-वृक्षे । चकारात् मध्यमपाण्डवे अश्विन्यवधिके एकादशे द्वादशे नक्षत्रे च **फाल्गुनः** । पु० । फल—निष्पत्तौ, भेदने वा । उनन् प्रत्ययः । गुक् च । स्वार्थे प्रज्ञाद्यण्।"फाल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे" इति मेदिनी ॥ विदग्धा निपुणा, पण्डिता वा । तस्याम् । चकारात् वाक्ये तद्देवतायां च । **वाणिनी** । स्त्री० । वण—शब्दे । इण्प्रत्ययः । वा ङीप् । "वाणिनी नर्तकीमत्तविदग्धवनितासु च" इति विश्वः ॥ २४८ ॥ प्रश्नभेदः प्रश्नविशेषः । शरावः मृन्मयः पात्रभेदः, अथवा कुडवद्वयपरिमाणम् । एरण्डः स्वनामाख्यातो वृक्षः विष्णुः । श्रीकृष्णः तेषु । तथा वृद्धिशीले त्रि० । धनिनां गृहभेदे देशभेदे नगरभेदे च **वर्धमानः** । पु० । वर्ध—पूरणे । शानच् प्रत्ययः । "वर्धमानः प्रश्नभेदे शरावैरण्डविष्णुषु" इति मेदिमी ॥ सेना सैन्यम् । नदी गङ्गा । तयोः । चकारत् तरङ्गिण्यां च **वाहिनी** । स्त्री० । वाहोऽस्त्यस्याः । इनिप्रत्ययः । ङीप् । वह- प्रापणे । णिनिप्रत्ययो वा । "वाहिनी स्यात्तरङ्गिण्यां सेना सैन्यप्रभेदयोः" इति मेदिनी ॥ छेदे छेदने । वृद्धौ वृद्धिकारके । त्रि० । "करोमि क्षितिवर्धनम्" इति भट्टिः । चकारात् पूरणे वृद्धियुक्ते च **वर्धनम्** । न० । वृधु—वर्धने । ल्युट्प्रत्ययः । वृध—वर्धने । णिच् ल्युट् प्रत्ययौ च । वर्धनं छेदने वृद्धौ वारिधान्यां तु वर्धनी" इति विश्वः ॥ २४९ ॥ विष्टपे जगति । तोये सलिले । तथा आकाशे जने चतुर्दशसङ्ख्यायां च **भुवनम्** । न० । भवत्यत्र । भू—सत्तायाम् । क्युन्प्रत्ययः । "भुवनं विष्टपेऽपि स्यात्सलिले गगने जने" इति मेदिनी ॥ दीर्णे विदारिते । विशेषिते भेदिते । तथा मिश्रिते सङ्गते अन्ये प्रस्फुटिते च **भिन्नम्** । न० । भिद—द्विधाकरणे । क्तप्रत्ययः । "भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे" इति विश्वः ॥ जन्म उत्पत्तिः । आश्रयः गृहम् । तयोः । चकारात् भावे सत्तायां च **भवनम्** । न० । भू—सत्तायाम् । आधारे ल्युट्प्रत्ययः । "भवनं स्याद्गृहे भावे" इति ॥ मेदिनी पात्रं भोजनयोग्यममत्रम् । योग्यः योगार्हः उचितो वा तयोश्च । **भाजनम्** । न० । भाज्यतेऽनेन । भाज—पृथक्करणे । ल्युट् प्रत्ययः । "भाजनं पात्रयोग्ययोः" इति मेदिनी ॥ २५० ॥ भृतिर्भरणं, पोषणं वा । काञ्चने

मदनाः सिक्थधुस्तूरतरुभेदमनोभवाः ।
मुनिर्वाचंयमे बुद्धे छन्दश्चम्पा च मालिनी ॥ २५२ ॥
मातुलानी तु भङ्गायां मातृभ्रातृस्त्रियामपि ।
राशौ युग्मे च मिथुनं विष्णवली मधुसूदनौ ॥ २५३ ॥
यापनं स्यान्निरसने कालक्षेपे च वर्तने ।
चतुःक्रोश्यां च योगे च योजनं स्यात्तु वाहने ॥ २५४ ॥

स्वर्णं तयोः । तथा भारे नाभौ धुस्तूरे च **भर्म** । न० । भृ—भरणे, धारणे वा । मन्प्रत्ययः, मनिन्प्रत्ययो वा । "भर्मस्वर्णे भृते भारे" इति विश्वः । दूषिते मलयुक्ते । असिते कृष्णे । तथा ऋतुमत्याम् । स्त्री० । टङ्कणे दोषे च **मलिनम्** । त्रि० । मलमस्त्यस्येति अस्त्यर्थे इनच्प्रत्ययः । "मलिनं दूषिते कृष्णे ऋतुमत्यां तु योषिति" इति मेदिनी ॥ प्रमाणे परिमाणे । तौल्ये हस्ततुलाप्रस्थाद्यैर्द्रव्यपरिच्छेदे । चकारात् गानाङ्गे कालक्रियायां तालविरामोपलक्षिते कालव्यापारे च **मानम्** । न० । मा—माने । ल्युट्प्रत्ययः । "मानश्चित्तोन्नतग्रहे । क्लीबं प्रमाणे प्रस्थादौ" इति मेदिनी ॥ राश्यन्तरे मेषादितो द्वादशे राशौ । झषे मत्स्ये । तथा विष्णोरवतारभेदे च **मीनः** । पु० । मी—वधे, गत्यां च । "मीनो मत्स्ये राश्यन्तरे झषे" इति मेदिनी ॥२५१॥ सिक्थः मधूच्छिष्टम् । धुस्तूरः स्वनामाख्यातो वृक्षः । तरुभेदः द्रुमविशेषः । मनोभवः कामदेवः । तेषु च । **मदनः** । माद्यत्यनेन । मद—मदे, गर्वे, तर्पणे च । करणे ल्युट्प्रत्ययः । "मदनः स्मरवसन्तद्रुभेदधुस्तूरसिक्थके" इति मेदिनी ॥ वाचंयमे मितभाषिणि, मौनावलम्बिनि च । बुद्धे सम्यक्संबुद्धे । तथा वीतरागादौ स्थिरचित्ते जने "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" इति । सप्तसङ्ख्यायां च **मुनिः** । पु० । मन—बोधे । इन्प्रत्ययः । उत्वं च । "मुनिः पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने" इति मेदिनी ॥ छन्दः पञ्चदशाक्षरपादकः छन्दोभेदः । चम्पा स्वनामाख्याता पुरी । तयोः । तथा मालाकारे माल्यवति । त्रि० । मालाकारपत्न्यां गौर्यां मन्दाकिन्यां कण्वाश्रमान्तिकस्थे नदीभेदे अग्निशिखावृक्षे दुरालभयां च **मालिनी** । स्त्री० । माला शिल्पमस्त्यस्येति । इनिप्रत्ययः । ङीप् । "मालिनी मातृकावृत्तभिदोर्मालिकयोषिति" इति मेदिनी ॥ २५२ ॥ भङ्गायां मातुल्याम् । मातृभ्रातृस्त्रियाम् । अपिशब्दात् कलापे च **मातुलानी** । स्त्री० । इन्द्रवरुणेति ङीप् । आनुक् च । मातुला टाप् । "मातुलानी कलापे स्याद्भङ्गायां मातुलस्त्रियाम्" इति मेदिनी ॥ राशौ मेषादितस्तृतीये राशौ । युग्मे स्त्रीपुंसयोश्च । **मिथुनम्** । न० । मिथ—वधे मेधायां च । उनन्प्रत्ययः । किच्च । "मिथुने राशिभेदे स्यान्मिथुनं दम्पतीयुगे" इति विश्वः ॥ विष्णुः श्रीकृष्णः । मधुं तन्नामकासुरं सूदयति, मधुजीवानां शुभाशुभकर्मज्ञानदानेन सूदयति वा । "भक्तानां कर्मणां चैवसूदनान्मधुसूदनः" इति । अलिर्भ्रमरः । मधु माध्वीकं सूदयति भक्षयति । तयोः । मधु इव सूद्यते भक्ष्यते इति । पालङ्कीशाके च **मधुसूदनः** । पु० । मधुशब्दोपपदसूद—आश्रवे, हनने च । ल्युप्रत्ययः । ल्युट् ङीप् वा । "मधुसूदनसंज्ञा च भ्रमरे वनमालिनि" इति विश्वः । "मधुसूदनस्तु पुंसि भ्रमरे वनमालिनि" इति मेदिनी ॥ २५३ ॥ निरसने प्रतिक्षेपे, परित्यागे च । कालक्षेपे कालादौ

गतौ च यानं योनिस्तूत्पत्तिस्थाने भगेऽपि च।
रसनन्तु ध्वनौ स्वादे रसज्ञारास्नयोः स्त्रियाम् ॥ २५५ ॥
यक्षे चन्द्रे च राजा स्यात रक्तः कामी च रागिणौ।
गोपित्ते रोचना कूटशाल्मलौ रोचनः पुमान् ॥ २५६ ॥
निशा हरिद्रा रजनी छंदे भूर्जे च लेखनम्।
राशीनामुदयो लग्नं सक्तलज्जितयोस्त्रिषु ॥ २५७ ॥

क्षेपणे वर्तने च **यापनम्** । न० । या—गतौ । णिच्—ल्युट्प्रत्ययौ । "यापनं वर्तने कालक्षेपे निरसनेऽपि च" इति मेदिनी ॥ चतुःक्रोश्यां क्रोशचतुष्टयात्मके । योगे संयोगे । चकारात् संयोगकरणे च । **योजनं** स्यात् । न० । युज—योगे, युतौ च । भावादौ ल्युट्प्रत्ययः । योजनं परमात्मनि । चतुष्क्रोश्यां च योगे" इति मेदिनी ॥ वाहने गमनसाधने रथादौ ॥ २५४ ॥ गतौ गमने । चकारात् उपचितशक्तेः राज्ञः मूलराष्ट्रादिरक्षां कृत्वा रिपोरास्कन्दनाय गमने च **यानम्** । न० । या—गतौ । भावे ल्युट्प्रत्ययः । करणे ल्युट् वा । "यानं स्याद्वाहने गतौ" इति मेदिनी ॥ उत्पत्तिस्थाने मण्यादीनामुत्पत्तिस्थाने आकरे । भगे स्त्रीणामसाधारणचिह्ने । अपिशब्दात् कारणे । जले । तद्दैवतके पूर्वफल्गुनिनक्षत्रे च । स्त्रीत्वे वा ङीप् । **योनिः** । पु० । यु—मिश्रणे, अमिश्रणे च । निप्रत्ययः । "योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे" इति मेदिनी ॥ ध्वनौ नादे । स्वादे रसानुभवे । रसज्ञा जिह्वा, रसज्ञानसाधनं वा । रास्ना स्वनामाख्याता लता । तयोः । स्त्री० । **रसनम्** । न० । रस—आस्वादे । ल्युट्प्रत्ययः । करणे ल्युट् वा । "रसनं स्वादने ध्वनौ । जिह्वायाञ्च न पुंसि स्याद् रास्नायां रसना स्त्रियाम्" इति मेदिनी ॥ २५५ ॥ यक्षे कुबेरे । चन्द्रे शीतरश्मौ । चकारात् नृपे शुचौ क्षत्रिये इन्द्रे च । पूर्वपदस्थः उत्तरपदस्थश्च समभिव्याहृतपदार्थश्रेष्ठवाचकः । यथा "राजमाषः मुनिराज" इत्यादि । **राजा** । स्यात् । पुं० ।राज—दीप्तौ । कनिन्प्रत्ययः । "राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यात्" इति मेदिनी ॥ रक्तः अनुरक्तः । तस्मिन् । कामी कामुकः । तस्मिन् । चकारात् रागवति । रतियुक्ते । गीत्यङ्गे । स्वरभेदे च । रागी । त्रि० । रागोऽस्त्यस्य । इनि प्रत्ययः । "रागी रक्तविकामुके" इति मेदिनी । गोपित्ते गोरोचनायाम् । तथा मनःशिलायाम् । आमलक्याम् । श्वेतत्रिवृति । गन्धद्रव्यभेदे । उत्तमायां स्त्रियाञ्च । **रोचना** । स्त्री० । रोचयतीति । रुच—प्रीतौ, प्रकाशे च । कर्त्तरि संज्ञायां ल्युट् प्रत्ययः । अजादित्वाट्टाप् । "रोचना रक्तकह्लारे गोपित्ते वरयोषिति" इति मेदिनी ॥ कूटशाल्मलौ कूटशाल्मलिवृक्षे । तथा शोभाञ्जने । पलाण्डौ । करञ्जे । अङ्कोटे । आरग्वधे । दाडिमे च **रोचनः** । पु० रोचते इति । रुच—प्रीतौ, प्रकाशे च । ल्युट्प्रत्ययः । रुचयतीति वा ल्युट् । "रोचनः कूटशाल्मल्यां पुंसि स्याद् रोचके त्रिषु" इति मेदिनी ॥२५६॥ निशा रात्री । हरिद्रा स्वनामाख्यातः औषधिभेदः । तयोः । तथा जतुकायां च । **रजनी** । स्त्री० । रज्यतेऽत्र ।

योषिज्जिह्वा च ललना लाञ्छनं नामचिह्नयोः ।
रक्ते वितानमुल्लोचे विलग्नं मध्यलग्नयोः ॥ २५८ ॥
दैवानिष्टफले सक्तौ व्यसनं निष्फलोद्यमे ।
स्वतन्त्रता च व्युत्थानं वामनौ विष्णुदिग्गजौ ॥ २५९ ॥

रञ्ज– रागे । कनिप्रत्ययः । वा ङीप् । रजनिरप्यत्र । "रजनी नीलिनीरात्रिहरिद्राजतुकासु च,, इति मेदिनी ॥ छर्दे छर्दने । क्वचित्तु "छेदे" इति पाठः । भूर्जे भूर्जपत्रे । चकारात् पत्रादौ वर्णादिविन्यासे । लेखनसाधने । स्त्रियां ङीप् । **लेखनम्** । न० । लिख–लिखने । ल्युट्-प्रत्ययः । आधारे करणे च वा ल्युट् । "लेखनं छर्दने भूर्जे लिपिन्यासे" इति मेदिनी ॥ राशी-नामुदये मेषादीनां राशीनाम् उदयरूपे । सक्तः । संसक्तः । लज्जितः जातलज्जः तयोः । त्रि० । तथा स्तुतिपाठके । लग्न इव इवार्थे कन्प्रत्ययः । प्रतिभुवि च । "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदि" इति स्मृतिः ॥ **लग्नम्** । न० । लस्ज–व्रीडायाम् । क्तप्र-त्ययः । तस्य नः । लगे–सङ्गे । क्तप्रत्ययः । पृषोदरादित्वात् साधुः । "लग्नं राश्युदये क्लीबं सक्तलज्जितयोस्त्रिषु" इति मेदिनी ॥ २५७ ॥ योषित् नारी । जिह्वा रसना । तयोः । तथा चालने । केलौ । बाले । सालवृक्षे च । पु० । **ललना** । स्त्री० । लल–इच्छायाम् । ल्युप्र-त्ययः । लड–उत्पीडने, जिह्वाचालने, भाषणे वा । वुन्प्रत्ययः । डस्य लश्च । "ललना कामिनी-नारीभेदजिह्वासु योषिति" इति मेदिनी ॥ नामनि । चिह्ने । तथा अङ्कने च । **लाञ्छ-नम्** । न० । लाञ्छ्यते । लाछि–अङ्कने । कर्मणि ल्युट्प्रत्ययः । "लाञ्छनं नामचिह्नयोः" इति मेदिनी ॥ रक्ते लोहितवर्णे । उल्लोचे विताने । तथा यज्ञे । विस्तारे । वृत्तविशेषे । न० । मन्दे । तुच्छे च । त्रि० । **वितानम्** । न० । पु० । विपूर्वकतन–विस्तृतावित्यस्माद् घञ् प्रत्ययः । "वितानो यज्ञ उल्लोचे विस्तारे पुन्नपुंसकम् । क्लीबं वृत्तविशेषे स्यात् त्रिलिङ्गो मन्द-तुच्छयोः" इति मेदिनी॥ मध्यं मध्यभागम् । लग्नं मेषादिराशीनामुदयम् । तयोः। तथा संलग्ने । कटौ च । त्रि० । **विलग्नम्** । न० । विशेषेण लग्नम् । लस्ज–सङ्गे । क्तप्रत्ययः । तस्य नः जस्य गश्च । "विलग्नं न स्त्रियां मध्ये त्रिषु स्याल्लग्नमात्रके" इति मेदिनी ॥ २५८ ॥ दैवा-निष्टफले दैवादिकृते उपद्रवे । सक्तौ कामजाते कोपे । निष्फलोद्यमे निरर्थकव्यायामे । तथा विपत्तौ । भ्रंशे । स्त्रीभोगमद्यपानादौ दोषे च । **व्यसनम्** । न० । विपूर्वअस–ग्रहणे, दीप्तौ, गतौ च । ल्युट्प्रत्ययः । "व्यसनं त्वशुभे सक्तौ पानस्त्रीमृगयादिषु । दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे" इति मेदिनी ॥ स्वतन्त्रता स्वाधीनत्वम् । तस्मिन् । चकारात् विरोधकरणे । प्रतिरोधने । नृत्यभेदे । विशेषेण उत्थाने च । **व्युत्थानम्** । न० । वि–उद्–पूर्वकस्था–गतिनिरोधे । ल्युट्प्रत्ययः । "व्युत्थानं स्वातन्त्र्यकृत्ये विरोधाचरणेऽपि च" इति मेदिनी ॥ विष्णुर्हरिः । दिग्गजः दक्षिणदिङ्नागः । तयोः । खर्वः कुब्जः । तस्मिन् । चकारात् [illegible] । पाणिनिसूत्रस्य काशिकावृत्तिकारके पंडितभेदे च । ह्रस्वे । त्रि० । स्त्रियां

खर्व्वेश्चाऽथ फले शुष्के वानं स्यूते कटे गतौ ।
वृषपर्वा शिवे दैत्ये वेष्टनं मुकुटे वृतौ ॥ २६० ॥
वर्ष्माकारेऽपि विषयी कामिनि क्लीबमिन्द्रिये ।
वृक्षादनी स्याद्वन्दायां स्त्रियां कुठारके पुमान् ॥ २६१ ॥
समालब्धे विभक्ते च विच्छिन्नं वाच्यलिङ्गकम् ।
लब्धे ज्ञाते स्थिते विन्नं वेदना ज्ञानपीडयोः ॥ २६२ ॥

ङीप् । "वामन्ती मूर्तिमाददे" इति । **वामनः** । पु० । "वामनो नीचे खर्वे च त्रिषु पुंसि तु दिग्गजे । ह विङ्कोटवृक्ष' इति मेदिनी ॥ २५९ ॥ फले शुष्कफले । शुष्के आतपादिना कृतशोषणे । स्यूते स्यूतिकर्मणि । कटे नडादिरचिते । गतौ गमने च । वनस्येदं, समूहो वा । अणप्रत्ययः । वनसम्बन्धिनि । त्रि० । तत्समूहे च । न० । **वानम्** । न० । वन–याचने, उपतापे च । घञ्प्रत्ययः । "वानं शुष्कफले शुष्के सूतिकर्म्मकटे गतौ" इति मेदिनी ॥ शिवे महादेवे । दैत्ये असुरभेदे । तथा भृङ्गारवृक्षे । कशेरौ च **वृषपर्व्वा**। पु०। वृषे पर्व उत्सवो यस्य। वृषं बलकरं पर्व उत्सवो यस्य वेति बहुव्रीहिः।"वृषपर्व्वा पुमान् दैत्यभेदेऽप्यन्धकसूदने" इति मेदिनी ॥ मुकुटे शिरोभूषणे । वृतौ वेष्टने । क्वचित्तु "गतौ" इति पाठः । तथा कर्णशष्कुल्याम् । उष्णीषे च । **वेष्टनम्** । न० । वेष्ट–वेष्टने । ल्युट्प्रत्ययः । "वेष्टनं कर्णशष्कुल्यामुष्णीषे मुकुटे वृतौ" इति मेदिनी ॥ २६० ॥ वर्ष्माकारे सुन्दराकारे, देहाकारे वा । वेशकारे इति क्वचित् पाठः । कामिनि विषयासक्ते । त्रि० । इन्द्रिये आत्मनो विषयोपलम्भीकरणे चक्षुरादौ । न०। अपिशब्दात् ज्ञाने । राज्ञि । कामदेवे । ध्वनौ च । पु० । **विषयी** । पु० । विषयोऽस्त्यस्य । इनि प्रत्ययः । "विषयी विषयासक्ते वाच्यवत् क्लीबमिन्द्रिये । पुंसि स्यात् नृपतौ कामदेवे वैषयिकेऽपि च" इति मेदिनी ॥ वन्दायां लताभेदे । कुठारके कुठाराख्ये । पु०।"कुद्दालके"इति क्वचित् पाठः । तथा अश्वत्थवृक्षे । मधुच्छत्रे । पियाले । विदारके च । पु० । **वृक्षादनी** स्यात् । स्त्री० । वृक्षमत्ति भिनत्ति वृक्षान्तरमत्ति भिनत्ति वा । अद–भक्षणे । ल्युट्प्रत्ययः ।"वृक्षादनी तु वन्दायां विदारीकन्दकेऽपि च" इति मेदिनी ॥ २६१ ॥ समालब्धे कुङ्कुमादिना कृतगात्रलेपने । विभक्ते कृतविभागे, पृथक्कृते च । तथा छेदने च । न० । **विच्छिन्नम्** । त्रि० । विपूर्व्वछिद्–द्वैधीकरणे । क्तप्रत्ययः । विच्छिन्नं च समालब्धे विभक्ते चाभिधेयवत्" इति मेदिनी ॥ लब्धे प्राप्ते । ज्ञाते अवगते, अभिज्ञाते वा । स्थिते कृतस्थाने । तथा विचारिते च । **विन्नम्** । त्रि० । विद–लाभे, ज्ञाने च । क्तप्रत्ययः । "विन्नं विचारिते लब्धे" इति मेदिनी ॥ ज्ञानं सुखदुःखाद्यनुभवः । पीडा व्यथा, दुःखं वा । तयोः । तथा विवाहे च । "वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने" इति मनुः । **वेदना** । स्त्री० । विद–ज्ञाने । ल्युट्प्रत्ययः ।

वर्त्तनी तर्कुपीठेऽपि स्त्रियां वर्त्तनवर्त्मनोः ।
वनश्वा जम्बुके व्याघ्रे विपन्नोऽहौ विपद्गते ॥ २६३ ॥
दैवशंसिनिमित्ते च शकुनं पुंसि पक्षिणि ।
चूडावान् कुक्कुटश्चापि शिखी शृङ्गारिणौ त्विमौ ॥ २६४ ॥
क्रमुकश्च सुवेशश्च पार्थेन्द्वोः श्वेतवाहनः ।
मयूरे भीष्मशत्रौ च शिखण्डयथ विहेठनम् ॥ २६५ ॥

युच् वा । "वेदना ज्ञानदुःखयोः" इति मेदिनी ॥ २६२ ॥ तर्कुपीठे स्वनामाख्याते यन्त्र-पीठभेदे । वर्त्तनं प्रवृत्तिः । वर्त्म मार्गः । तयोः । अपिशब्दात् वृत्तिमति । वर्त्तिष्णौ । वायसे। पु० । **वर्त्तनी** । स्त्री० । वर्त्यते पादावत्र । वृत-वर्त्तने, आधारे । ल्युट्प्रत्ययः । "वर्त्तनो वामने क्लीवं वृत्तौ स्त्री पेषणाध्वनोः । न पुंसि तुलनालायां तर्कुपीठे च जीवने । वर्तिष्णौ त्रिषु" इति मेदिनी ॥ क्वचित् तर्कुपिण्डे इति दृश्यते । जम्बुके शृगाले । स्वना-माख्याते वृक्षे, श्योनाके वा । व्याघ्रे शार्दूले, जन्तुभेदे च । तथा गन्धमार्ज्जारे च । **वनश्वा** । पु० । वनस्य, वने वा अश्वा इव, इवार्थे बहुव्रीहिः। "वनश्वा गन्धमार्ज्जारे वृश्चकः-व्याघ्रयोः पुमान्" इति मेदिनी ॥ अहौ सर्पे । विपद्गते विपद्युक्ते । तथा नष्टे च । **विपन्नः**। त्रि० । विपूर्वपद-गतौ । क्तप्रत्ययः । "विपन्नं विपदाक्रान्ते त्रिषु पुंसि भुजङ्गमे" इति मेदिनी॥ ॥ २६३ ॥ दैवशंसिनिमित्ते शुभाशुभसूचकनिमित्ते, बाहुस्पन्दनकाकादिदर्शनादौ च । पक्षिणि पक्षिमात्रे, पक्षिभेदे च । पु० । चकारात् गृध्रे च । **शकुनम्** । न० । शक-सामर्थ्ये । उनन्प्रत्ययः । "शकुनस्तु पुमान् पक्षिमात्रपक्षिविशेषयोः । शुभशंसिनिमित्ते च शकुनं स्यान्न-पुंसकम्" इति मेदिनी ॥ चूडावान् शिखान्वितः । तस्मिन् । कुक्कुटः ताम्रचूडः । तस्मिन् । अपिशब्दात् मयूरे । अश्वे । केतुग्रहे । चित्रकवृक्षे । वृक्षे । वह्नौ । अजलोम्नि । पर्वते । ब्राह्मणे । मेथिकायाम् । मयूरशिखावृक्षे च । **शिखी** । पु०। शिखा अस्त्यस्य । इनिप्रत्ययः । "शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गके" इति मेदिनी ॥ २६४ । क्रमुकः पूगः । तस्मिन् । "तत्फलभक्षणे हि कामोद्रेक" इति । तथा-त्वम् । सुवेशः सुन्दरवेशयुक्तः । तस्मिन् । त्रि० । तथा गजे च **शृङ्गारी** । पु० । शृङ्गारः जन्यत्वेनास्त्यस्य । इनिप्रत्ययः । "शृङ्गारी पूगगजयोः सशृङ्गारसुवेशयोः" इति मेदिनी ॥ पार्थः अर्ज्जुनः ।इन्दुश्चन्द्रः तयोः । तथा इन्द्रे च । **श्वेतवाहनः** । पु०। श्वेतं वाहनमस्येति बहुव्रीहिः । "श्वेतवाहन इत्येष सुधाधाम्नि धनञ्जये" इति मेदिनी ॥ मयूरे स्वनामाख्याते खगभेदे । भीष्मशत्रौ गाङ्गेयरिपौ, द्रुपदराजस्य पुत्रभेदे च । चकारात् विष्णौ । यूथिकायाम् । गुञ्जायां च। स्त्री०। **शिखण्डी** । पु०। शिखण्डोऽस्त्यस्य । इनिप्रत्ययः।"शिखण्डी ना कलापे स्याद्गाङ्गेयारिमयूरयोः । शिखण्डिनी यूथिकायां गुञ्जायामपि योषिति" इति मेदिनी ॥२६५॥

विहिंसायां विडम्बे च यमे ना शमनं वधे।
श्येनः शुक्ले पक्षिभेदे शकुनिः सौबले खगे॥ २६६॥
धान्यभेदे पुमान् षष्टिहायनः कुञ्जरेऽपि च।
ना साधौ सज्जनं क्लृप्तौ साधनं सिद्धमेढ्रयोः॥ २६७॥
समानो देहवायौ च संस्थानं मृत्युरूपयोः।
सन्तानः सन्ततौ देववृक्षे चाऽपत्यगोत्रयोः॥ २६८॥

विहिंसायां विघातने। विडम्बे तिरस्कारे। चकारात् मर्दने च। **विहेठनम्**। न०। विपूर्व हेठ—बाधने। ल्युट्प्रत्ययः। "विहेठनंतु हिंसायां मर्दने च विडम्बने" इति मेदिनी॥ यमे लोकानां पुण्यापुण्यफलदातृत्वेन दण्डकारके। पु०। वधे नाशे। तथा शान्तौ च **शमनम्**। न०। शमयति। शम-शान्तौ। णिच्ल्युट्प्रत्ययौ। "शमनं शांतिवधयोः शमनः श्राद्धदेवते" इति मेदिनी॥शुक्ले पाण्डुरवर्णे। तद्युक्ते च पक्षिभेदे विहङ्गविशेषे च। **श्येनः**। पु०।श्यै—गतौ।इनन्-प्रत्ययः। "श्येनः पक्षिणि पाण्डुरे" इति मेदिनी॥ सौबले सुबलराजपुत्रे, दुर्योधनमातुले च। खगे पक्षिमात्रे। तथा चिल्लपक्षिणि। श्यामापक्षिणि। स्त्री०। ङीष्। **शकुनिः**। पु०। शक—सामर्थ्ये। उन्प्रत्ययः। "शकुनिः पुंसि विहगे सौबले करणान्तरे" इति मेदिनी॥२६६॥ धान्यभेदे षष्टिकधान्ये। पु०। षष्टिदिनपच्यो हायनी व्रीहिः। शाकपार्थिवादितत्पुरुषः। कुञ्जरे षष्टिवयस्के गजे। अपिशब्दात् षष्टिसंवत्सरवति च। **षष्टिहायनः**। पु०। षष्टिर्हायनं वयोऽस्येति बहुव्रीहिः। "स्यात् षष्टिहायनो धान्यविशेषे कुञ्जरे पुमान्" इति मेदिनी॥ साधौ सत्पुरुषे, सत्कुलोद्भवे च। "कुरु सज्जनरञ्जनम्" इति। पु०। क्लृप्तौ नृपादीनामारोहणार्थं गजभूषाकरणादौ। तथा रक्षार्थं सैन्यस्थापने। घट्टे। आयोजने। सौजन्यवति जने च **सज्जनम्**। त्रि०। षस्ज—सङ्गे। णिच्ल्युट्प्रत्ययौ। षस्ज—सङ्गे। ल्युट् च। "सज्जनंतु भवेत् क्लीबमुपरक्षणघट्टयोः। वाच्यलिङ्गं कुलीने स्यात् कल्पनायांतु योषिति" इति मेदिनी॥ सिद्धः निष्पादनः। मेढ्रः पुंचिह्नम्। तयोः। तथा करणे। क्रियानिष्पादके हेतुभेदे। "क्रियायां परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" इत्युक्ते क्रियासाधकवति करणे। सैन्ये। युद्धोपकरणे। प्रमाणे। कारकभेदे। अनुमापके हेतौ च। भावे ल्युट्। मारणे। मृतसंस्कारे। अग्निदाने। गतौ। अनुगमने। कर्मणि ल्युट्। द्रव्ये। धने। मैत्रे च। **साधनम्**। न०। साध्यतेऽनेन। सिध—सिद्धौ, गतौ च। णिच्ल्युट्प्रत्ययौ। साधादेशः। "साधनं मृतसंस्कारे सैन्ये सिद्धौषधौ गतौ। निवर्त्तनोपायमेढ्रदापनेऽनुगमे धने" इति मेदिनी॥ २६७॥ देहवायौ शरीरस्थे वाते, नाभिमारुते च। "समानो नाभिमण्डले" इत्यायुर्वेदः। चकारात् तुल्ये। साधौ। एकस्मिन्नित्यर्थे च "यत् समानाधिकरणम्" इति चिन्तामणिः। **समानः**। त्रि०। सममानयति। अन—जीवने। अण्प्रत्ययः। "समानः स्यात् समैकेषु त्रिषु ना नाभिमारुते" इति मेदिनी। मृत्युः मरणम्। रूपमाकृतिः। तयोः। तथा चतु-

क्रतौ स्नाने च सवनं मारणेऽपि समापनम् ।
स्यन्दनं स्रवणे ना तु रथे तिनिशपादपे ॥ २६९ ॥
सुप्तज्ञाने च शयने स्वप्नोऽथ स्पर्शदानयोः ।
स्पर्शनं स्पर्शनो वाते सूनं पुष्पे वधालये ॥ २७० ॥
सेवनं सीवनोपास्त्योः शाश्वताजौ सनातनौ ।
पुत्रे रवौ च सूनुः स्याद्भ्रातर्यपि कनीयसी ॥ २७१ ॥

ष्पथे । चिह्ने । सन्निवेशे । सम्यकूस्थितौ । अवयव्यारम्भकसंयोगभेदे च । **संस्थानम्** । न० । संपूर्व्वस्था-गतिनिरोधे । ल्युट्प्रत्ययः । "संस्थानमाकृतौ मृत्यौ सन्निवेशे चतुष्पथे" इति मेदिनी ॥ सन्ततौ वंशे । देववृक्षे तन्नामकदेवतरौ । अपत्यं पुत्रदुहितृरूपं सन्तानम् । गोत्रं सजातीयगणम् । तयोः । चकारात् विस्तारे च । **सन्तानः** । पु० । संपूर्वतन-विस्तृतौ,उपकारेच । घञ्प्रत्ययः । "सन्तानः सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे" इति मेदिनी ॥ २६८ ॥ क्रतौ स्नाने यज्ञाङ्गे स्नाने । चकारात् प्रसवे । यज्ञे। सोमपाने । सोमनिष्पादनव्यापारे, सोमनिष्पीडने च । **सवनम्** । न० । सु-स्नपने, मर्दने च । ल्युट्प्रत्ययः । "सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च" इति मेदिनी ॥ मारणे वधे, मृत्यौ वा । अपिशब्दात् समाप्तौ । परिच्छेदे । शेषे च । **समापनम्** । न० । सम्पूर्व्वआप-प्राप्तौ । ल्युट्प्रत्ययः । समापनं परिच्छेदे समाप्तिवधयोरपि" इति मेदिनी ॥ स्रवणे मूत्रजले । रथे स्वनामाख्याते यानभेदे । तिनिशपादपे स्वनामाख्याते वृक्षे । पु० । तथा क्षरणे च । **स्यन्दनम्** । न० । स्यन्द-स्रवणे । कर्त्तरि ल्युट्प्रत्ययः । "स्यन्दनं तु स्रुतौ नीरे तिनिशे ना रथे स्त्रियाम्" इति मेदिनी ॥ २६९ ॥ सुप्तज्ञाने सुप्तस्य मानसिकज्ञानभेदे । शयने निद्रायाम् । चकारात् दर्शने च । **स्वप्नः** । पु० । स्वप-शयने । नन्प्रत्ययः।"स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्" इति मेदिनी ॥ स्पर्शः न्यायोक्तः त्वगिन्द्रियग्राह्यो गुणभेदः । दानं वितरणम् । तयोः । वाते वायौ । पु० । तथा ग्रहणे च । **स्पर्शनम्** । न० । स्पर्श-ग्रहणे । स्पृश-स्पर्शे वा । ल्युट्प्रत्ययः । "स्पर्शनो मारुते पुंसि दाने स्पर्शे नपुंसकम्" इति मेदिनी ॥ पुष्पे कुसुमे । वधालये प्राणिवधस्थाने । स्त्री० । "पञ्चसूना गृहस्थस्य" इति मनुः । तथा विकशिते । जाते च **सूनम्** । न० । सू-प्रसवे । क्तप्रत्ययः । तस्य नः । कर्त्तरि वा । "सूनं प्रसवपुष्पयोः" इति मेदिनी ॥ "सूनं वाच्यवदुद्धूनेषु सूनं प्रसवपुष्पयोः" इति विश्वः ॥ २७० ॥ सीवनं सूच्यादिना वस्त्रादेर्योजनम् । उपास्तिः उपासना । "यदुपास्तिमसावत्र" इति कुसुमाञ्जलिः । तयोः । तथा आश्रयणे । उपभोगे । बन्धने । पूजने । भजने च । **सेवनम्** । न० । सीव्यतेऽनया । सिव-तन्तुसन्ताने । ल्युट्प्रत्ययः । "सेवनं सीवनोपास्त्योः" इति मेदिनी ॥ शाश्वतं सदाभवं वस्तु । अजः ब्रह्मा । तयोः । तथा निश्चले । सरस्वत्याम् । लक्ष्म्याम् । स्त्री० । शिवे । दिव्यमनुष्ये च । **सनातनः** । पु० न० । सदा ल्युट्प्रत्ययः, तुट् च । निपातनात् साधुः । "सनातनः शाश्वतेऽजे पित्रतिथ्यन्तरे हरे" इति मेदिनी ॥ पुत्रे तनये । रवौ सूर्ये । कनीयसि भ्रातरि अनुजे । अपिशब्दात् अर्कवृक्षे । कन्यायाञ्च । स्त्री० । **सूनुः** स्यात्

सीमाऽघाटे स्थितौ क्षेत्रे स्वामी भर्तरि षण्मुखे ।
धूमवंशशरामर्त्याः सुपर्वाणः प्रकीर्तिताः ॥ २७२ ॥
हनुर्हट्टविलासिन्यां कपोलावयवेऽपि च ।

इति नान्ताः ॥

सजले महिषेऽनूपोऽवलेपः सङ्गगर्वयोः ॥ २७३ ॥
आक्षेपो भर्त्सनाकृष्टयोराकल्पौ वेशकल्पने ।
तृणभिद्गुल्मिन्युपलश्चन्द्रे ना स्त्र्युडुपः प्लवे ॥ २७४ ॥

पु० । सू—प्रसवे । नुप्रत्ययः । "सूनुः पुत्रेऽनुजेऽर्के ना" इति मेदिनी ॥ २७१ ॥ आघाटे सीमायाम् । क्वचित्तु "आवाटे" इति पाठो दृश्यते । स्थितौ स्थानकरणे क्षेत्रे शस्याद्युत्पत्तिस्थाने केदारे । तथा मर्य्यादायाम् । अवधौ । अण्डकोशे । "सीम्नि पुष्कलको हतः" इति सिद्धान्तकौमुदी । वेलायाञ्च । **सीमा** । स्त्री० । सी—बन्धने । इमनिप्रत्ययः । पृषोदरादित्वान्न गुणादि "सीमाऽघाटस्थितिक्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम्" इति मेदिनी ॥ भर्त्तरि प्रिये । षण्मुखे कार्तिकेये । तथा अधिपतौ । ईश्वरे । विभौ । नृपे । वात्स्यायनमुनौ । असौ मुनिस्तु कामशास्त्रस्य कर्त्ता इति प्रसिद्धः । गरुडे । परमहंसे । च ॥ **स्वामी** । पु० । स्व अस्त्यस्येति अस्त्यर्थे इनिप्रत्ययः । दीर्घश्च ।"स्वामी प्रभौ विशाखे च" इति विश्वः। धूमः प्रसिद्धः । वंशः बेणुः । शरः बाणः । अमर्त्यः देवः । तेषु । सुन्दरपर्वणि च । **सुपर्वा** । प्रकीर्तितः कथितः पु०। सुष्ठु पर्व यस्येति बहुव्रीहिः । प्रादिसमासो वा । "सुपर्वा ना शरे वंशे पर्वधूमसुरेष्वपि" इति मेदिनी ॥ २७२ ॥ हट्टविलासिन्यां गन्धद्रव्यभेदे । हरिद्रायां वा । कपोलावयवे कपोलद्वयोपरिस्थे मुखभागे । अपिशब्दात् रोगे । अस्त्रभेदे । मृतौ च । स्त्री० । **हनुः** । पु० । स्त्री० । हनूरप्यत्र । "हनुर्हट्टविलासिन्यां मृत्यावस्त्रे गदे स्त्रियाम् । द्वयोः कपोलावयवे" इति मेदिनी ॥ नकारान्ताः समाप्ताः ॥ अथ पान्तानाह ॥ सजले जलप्राये देशे । महिषे जलस्थले सर्व्वदावासिनि स्वनामाख्याते पशुभेदे । तथा देशविशेषे । "बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः । देशोऽनूपः"इति । अनूपसर इति प्रसिद्धे देशे वा। **अनूपः**। त्रि० । अनुगता आपो यत्रेतिसप्तमी बहुव्रीहिः । अच्समासो वा। आत ऊत्त्वम् "अनूपो महिषे-नाम्बुप्रायदेशे तु वाच्यवत्" इति मेदिनी ॥ "अनूपं महिषे विद्याज्जलप्राये तु वाच्यवत्" इति विश्वः ॥ सङ्गः सम्बन्धः । गर्वः अहङ्कारः । तयोः । तथा लेपने । दूषणे च । **अवलेपः** । पु०। अवपूर्वलिप—लेपने । घञ्प्रत्ययः।"अवलेपस्तु गर्व्वे स्याल्लेपने दूषणेऽपि च" इति मेदिनी॥ तथा विश्वः ॥ २७३ ॥ भर्त्सनम् अपकारवचनम् । भर्त्सनाऽप्यत्र । आकृष्टिः आकर्षणम् । तयोः । तथा अपवादे । धनादिन्यासरूपे निक्षेपे । अर्थालङ्कारभेदे च । "वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये । निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा" इति साहित्यम । **आक्षेपम्**। पु० । आपूर्व—क्षिप—प्रेरणे । नोदने वा । घञ्प्रत्ययः । "आक्षेपो भर्त्सनाकृष्टिकाव्यालङ्कृतिषु

कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने ।
धान्ये कुशेऽष्टमांशेऽह्नः कुतपश्छागकम्बले ॥ २७५ ॥
गुणवृक्षेऽपि कूपो विट्सार्य्यां स्त्री कुणपः शवे ।
जिह्वापः शुनि मार्ज्जारे त्रपुसीसकरङ्गयोः ॥ २७६ ॥
पादुकायां स्त्रियां वृक्षे पादपीठे च पादपः ।
पिण्डपुष्पौ जवाशोकौ पुष्पं कुसुम आर्त्तवे ॥ २७७ ॥

स्मृतः'' इति मेदिनी । वेशः वेशरचना । कल्पना न्यायोक्तः अनुमितिभेदः । तयोः । तथा भूषणे । कल्पपर्य्यन्ते च । अव्ययम् ''आकल्पं नरकं भुङ्क्ते'' इति स्मृतिः । **आकल्पः** । पु० । आपूर्वकृप—कल्पने । णिच्घञ्प्रत्ययौ । ''आकल्पः कल्पने वेशे'' इति मेदिनी ॥ तृणभिद् कोमलस्तृणविशेषः । गुल्मी शाखापत्रप्रचययुता लता । तयोश्च । **उलपः** । पु० । न० । वल—संवरणे । समवाये च । कपम्प्रत्ययः । सम्प्रसारणम् । ''उलपस्तृणभेदे स्याद्गुल्मिन्यामुलपः स्मृतः'' इति विश्वः । ''पुंस्युलपो न स्त्री गुल्मिन्यां ना तृणान्तरे'' इति मेदिनी ॥ चन्द्रे नक्षत्रपतौ । स हि ताराणां पतिरतो रक्षकः । पु० । प्लवे भेलके च । स्त्री० । **उडुपः** । पु० । उडपोऽप्यत्र । उडुनि जले पाति । उडूनि नक्षत्राणि पाति वा । पा—रक्षणे । कः प्रत्ययः । ''उडुपस्तु प्लवे चन्द्रे'' इति विश्वः । ''उडुपन्तु प्लवे स्त्रियां चन्द्रे'' इति मेदिनी ॥ २७४ ॥ शास्त्रे यज्ञक्रियाणामुपदेशके । शिक्षाकल्पव्याकरणादीनामन्यतमे वेदाङ्गभेदे च । विधौ ब्रह्मणि । न्याये । संवर्त्ते प्रलये । ब्रह्मदिने ब्रह्मणो दिवसे । तथा विकल्पे । कल्पवृक्षे । उत्तरपदस्थः सादृश्ये । कल्पः । यथा पितृकल्पः गुरुकल्पश्च । **कल्पः** । पु० । कृप—युतौ । चित्रीकरणे वा । अच्प्रत्ययः । घञ् वा । ''कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने'' इति मेदिनी ॥ धान्ये व्रीहिविशेषे । कुशे कुशतृणे । अह्नः अष्टमांशे पञ्चदशधाविभक्तदिनस्याष्टमांशे काले । पु० न० । स च मध्याह्नात् पूर्वोत्तरदण्डद्वयात्मकः मुहूर्त्तरूपः कालः । छागकम्बले नेपालकम्बले । तथा वह्नौ । सूर्ये । ब्राह्मणे । अतिथौ । गवि । भागिनेये । दौहित्रे वाद्ये च । **कुतपः** । पु० । कुत्सितं तपति । तप—उपतापे । अच् प्रत्ययः । ''कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले । कुशे दिनस्याष्टमांशे ना सूर्य्ये'' इति मेदिनी ॥ २७५ ॥ गुणवृक्षे काष्ठमये वृक्षे । अपिशब्दात् स्वनामाख्याते जलाधारे । गर्त्ते च । **कूपः** । पु० । कुत्सिता ईषत् वा आपो यत्र अच्समासः । कुवन्ति मण्डूकाः अस्मिन् कु—शब्दे । पक्प्रत्ययः । दीर्घश्च । ''कूपं कूपकमृन्माने गर्त्ताम्बुगुणवृक्षके'' इति मेदिनी ॥ विट्सार्य्यां विट्सारिकायाम् । स्त्री० । शवे त्यक्तप्राणे मृतदेहे । तथा पूतिगन्धे च । **कुणपः** । पु० । कण—शब्दे । कपन्प्रत्ययः । सम्प्रसारणम् । ''कुणपः पूतिगन्धे शवेऽपि च'' इति मेदिनी ॥ शुनि कुक्कुरे । मार्जारे विडाले । त्रपुसीसः स्वनामाख्यातो धातुभेदः । रङ्गः स्वनामाख्यातो धातुभेदः । तयोश्च । **जिह्वापः**। पु०। जिह्वया पीयते । पा—पाने । कः प्रत्ययः । ''जिह्वापः शुनि मार्ज्जारे'' इति मेदिनी ॥ २७६ ॥ पादुकायां चर्ममये पादाच्छादने पदार्थे ।

ग्रन्थावृत्तौ पशौ शब्दे स्वभावे नाटकादिषु ।
रूपमाकारसौन्दर्यनामकेष्वपि दृश्यते ॥ २७८ ॥
शररोपणयो रोपो लेपो लेपनभोजने ।
विटपः पल्लवे स्तम्बे षिङ्गे मेदोबिले वपा ॥ २७९ ॥
आक्रोशे शपथे शापः स्वापः शयननिद्रयोः ।
इति पान्ताः ॥

स्त्री० । वृक्षे द्रुमे । पादपीठे पादस्थापनासने च । **पादपः** । पु० । पादेन मूलेन पिबति सिक्तं जलम् । पा—पाने । कः प्रत्ययः । पादं पाति रक्षति । पा—रक्षणे । कः प्रत्ययो वा । "पादपः पादपीठेद्रौ पादुकायान्तु पादपा" इति मेदिनी ॥ जवा जवापुष्पम् । अशोकः अशोकपुष्पम् । तयोः । तथा पद्मपुष्पे । तगरपुष्पे च । **पिण्डपुष्पम्** । न०। पिण्डं संहतं पुष्पम् । "पिण्डपुष्पमशोके च जवायाञ्च कुशेशये" इति मेदिनी ॥ कुसुमे । आर्त्तवे स्त्रीरजसि । तथा विकाशे । कुबेरस्य विमाने । नेत्ररोगभेदे च । **पुष्पम्** । न० । पुष्प—विकाशे । अच् प्रत्ययः । "पुष्पं विकाशकुसुमस्त्रीरजःसु नपुंसकम्" इति मेदिनी ॥ २७७ ॥ ग्रन्था वृत्तौ । पशौ मृगादौ । लोमवल्लाङ्गूलवति जन्तुभेदे च । शब्दे शब्दधातूनां विभक्तियोगेन निष्पन्नशब्दे । स्वभावे । नाटकादिषु दृश्यकाव्ये नाटकादौ ॥ आकारः अवयवसंस्थानविशेषः । सौन्दर्यञ्चारुता । अङ्गप्रत्यङ्गानां यः सन्निवेशो यथोचितम् । "सुश्लिष्टः सन्धिबन्धः स्यात् तत्सौन्दर्य्यमुदाहृतम्" इति। नामकः अभिधानम् । तेषु । अपिशब्दात् शुक्लादिवर्णे । श्लोके । उत्तरपदस्थः सदृशार्थे । त्रि० । यथा पितृरूपस्तनयः । मातृरूपा कन्या । एकसंख्यान्विते । न० । "रूपं भजेत् स्यात्परिपूर्त्तिकाल" इति लीलावती । "एकाव्यक्तं शोधयेदन्यपक्षात् रूपाण्यन्यस्येतरस्माच्च पक्षात्" इति बीजगणितः । **रूपम्** । न०।दृश्यत इति क्रियापदेनान्वयः। रूप—रूपान्वितकरणे । कः प्रत्ययः । भावे अच् वा । "रूपं स्वभावे सौन्दर्य्ये नामके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि" इति मेदिनी ॥ २७८ ॥ शरः बाणः । रोपणः धान्यादेर्जननाय अङ्कुरादेरारोपणम् । तयोः । तथा छिद्रे च । **रोपः** । पु० । रुह—उद्भवे । णिच्प्रत्ययः । हस्य पः । कर्म्मणि अच्प्रत्ययश्च । "रोपो रोपणबाणयोः" इति मेदिनी ॥ लेपनं प्रलेपः । भोजनं कठिनद्रव्यस्य गलबिलाधःसंयोजनम् । तयोः । तथा क्षुधायाञ्च । **लेपः** । पु० । लिप—लेपने । लेप—गमने वा । घञ्प्रत्ययः। "लेपः प्रलेपने जग्धौ" इति मेदिनी । पल्लवे अभिनवे पत्रविस्तारे । स्तम्बे तृणादौ गुच्छे । तथा शाखायाम् । विटपालके च । **विटपः** । पु० । न० । विटं विस्तारं पाति।पा—रक्षणे । कप्रत्ययः। "विटपो ना स्त्रियां स्तम्बशाखाविस्तारपल्लवे । विटाधिपेना" इति मेदिनी॥षिङ्गे कामुके । मेदः मांसजन्यो धातुभेदः । बिलं छिद्रः । तयोश्च । तथा शरीरे । प्रशस्ताकारे च । **वपा** । स्त्री० । वप—बीजवपने । तन्तुवपने । मुण्डने च । अच्प्रत्ययः । उसिप्रत्ययो वा । "वपाया हविष" इति श्रुतिः । "वपा विवरमेदसोः" इति मेदिनी ॥ २७९ ॥ आक्रोशे अनिष्टं भूयादिति एवं विरुद्धचिन्तने शपथे सत्यता-

त्रिषु स्यात्कुत्सिते रेफो रवर्णे तु पुमानऽयम् ॥ २८० ॥

इति फान्ताः ॥

गजे ग्रीवालके कम्बुः कलम्बः शरनालयोः ।
वृन्दे कदम्बं नीपे ना कादम्बौ शरपक्षिणौ ॥ २८१ ॥
प्लीहविप्लवयोर्डिम्बः प्रलम्बो दैत्यशाखयोः ।
बिम्बं बिम्बीफले रूपे शम्बस्तु मुशलानने ॥ २८२ ॥

करणाय दिव्यभेदकरणे। यथा "एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यात्" इति।**शापः**। पु० । शप—आक्रोशे । घञ्प्रत्ययः । "शाप आक्रोशदिव्ययोः" इति मेदिनी । शयनं प्रसिद्धम् । निद्रा स्वप्नम् । "यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः" इत्युक्ते जीवस्यावस्थाभेदे । तथा अज्ञाने च । **स्वापः** । पु० । स्वप—शयने । घञ्प्रत्ययः । "स्वापः शयननिद्रयोः" इति मेदिनी ॥ पकारान्ताः समाप्ताः ॥ अथ फान्तानाह ॥ कुत्सिते निन्दिते।त्रि०।रवर्णे रकारात्मके वर्णे। पु०।तुकारात् क्रूरे । अधमे । दुष्टे । कृपणे च । त्रि० । **रेफः** । पु० । र—गतौ । इफप्रत्ययः । "रेफः स्यान्निन्दिते क्रूरे" इति मेदिनी ॥ फकारान्ताः समाप्ताः ॥ २८० ॥ अथ बान्तानाह ॥ गजे हस्तिनि । ग्रीवालके सुवर्णालिसन्निभायां ग्रीवायाम् । तथा शङ्खे । शम्बूके । वलये । नलके च । न० । **कम्बुः** । पु० । न० । कम—वाञ्छायाम् । कामनायां वा । उप्रत्ययः । बुक् च । "कम्बुः शङ्खेऽस्त्रियां पुंसि शम्बूके वलये गजे" इति मेदिनी ॥ शरः बाणः । नालः नालिकाशाकः । तयोः । तथा कदम्बवृक्षे । शाकनाड्याञ्च । **कलम्बः**। पु०। कड—भक्षणे । हर्षे वा । अम्बच्प्रत्ययः। डस्य लः। "कलम्बः शायके नीपे नालिशाके कलम्ब्यपि" इति विश्वः । वृन्दे समूहे । न० । नीपे कदम्बवृक्षे । पु० । तथा सर्षपे । देवताडवृक्षे च । **कादम्बम्** । न० । कद—विह्वलीभावे । रोदने वा । अम्बच्प्रत्ययः । "कदम्बं निकुरम्बे स्यान्नीपसर्षपयोः पुमान्" इति मेदिनी । शरः बाणः । पक्षी कलहंसः । तयोः । इक्षौ च । **कादम्बः** । पु० । कद—विह्वलीभावे । णिच्—अम्बच्प्रत्ययौ । कदम्बे भवः अणप्रत्ययो वा । "कादम्बः स्यात् पुमान् पक्षिविशेषे शायकेऽपि च" इति मेदिनी ॥ २८१ ॥ प्लीहा वामकुक्षिपार्श्वस्थः मांसकखण्डः । तद्वृद्धिहेतुकः रोगभेदश्च । विप्लवः राष्ट्रोपद्रवः । परनृपतिराष्ट्रादितो जातं भयं वा । तयोः । तथा शिशौ । अण्डे । अशस्ते । कलहे । एरण्डे । भयहेतुके ध्वनौ । भ्रमरे । फुप्फुसे च । न० । **डिम्बः** । पु० । डिबि—प्रेरणे । घञ्प्रत्ययः "डिम्बो भयध्वनावण्डे फुप्फुसप्लीहविप्लवे" इति मेदिनी । दैत्यः स्वनामाख्यातः, असुरविशेषः । शाखा वृक्षस्यावयवः । तयोः । तथा प्रकर्षेण लम्बमाने च । **प्रलम्बः** । त्रि० । प्रपूर्व्वलम्ब—अवलम्बने । अच्प्रत्ययः । "प्रलम्बो दैत्यभेदे स्यात् त्रपुषेऽपि पयोधरे" इति मेदिनी ॥ बिम्बीफले । बिम्बिकाफले । रूपे दर्पणादौ । भासमानप्रतिबिम्बाश्रये । तथा कमण्डलौ । सूर्यादिमण्डले । कृकलासे

कल्याणवति वज्रे च हेरम्बो महिषेऽपि च ।
इति बान्ताः ॥
स्वर्णारम्भाववष्टम्भौ वाणी छन्दोऽप्यनुष्टुभौ ॥ २८३ ॥
आरम्भे उद्यमे दर्पे कामे ब्रह्मणि चात्मभूः ।
ऋषभौ श्रेष्ठवृषभौ करभोऽधःकरोष्ट्रयोः ॥ २८४ ॥
कुम्भो वारस्त्रियाः कान्ते रक्षोराशिप्रभेदयोः ।
वीणा प्रसेवे ककुभो रागभेदेऽर्ज्जुनद्रुमे ॥ २८५ ॥

च । **बिम्बम्** । न० पु० । वी—कान्तौ । जनने च । वत्प्रत्ययः । मुच् । ह्रस्वः । "बिम्बस्तु प्रतिबिम्बे स्यान्मण्डले पुन्नपुंसकम् । बिम्बिकायाः फले क्लीबं कृकलासे पुनः पुमान्" इति मेदिनी ॥ मुशलानने मुशलाग्रस्थितलौहे । लौहकाञ्च्याञ्च । कल्याणवति गुणान्विते।वज्रे हीरके। तथा अनुलोमकर्षणे । दरिद्रे च । **शुम्बः** । पु० । शम्ब--गतौ । अच्प्रत्ययः । "शुम्बः स्यान्मुसलाग्रस्थलोहमण्डलके पवौ । शुभान्विते त्रिषु" इति मेदिनी ॥ २८२ ॥ महिषे स्वनामाख्याते पशुभेदे । अपिशब्दात् गणेशे । शौर्ये । गर्विते च । **हेरम्बः** । पु० । हे शिवे रम्बति रम्ब--गतौ शब्दे च । अच्प्रत्ययः । अलुक् समासः । "हेरम्बो विघ्नराजे स्यान्महिषे शौर्यगर्विते" इति मेदिनी ॥ इति बकारान्ताः समाप्ताः ॥ अथ भान्तानाह ॥ स्वर्णं कनकम् । आरम्भः प्रारम्भः । तयोः । तथा रोधने । स्तम्भे । गर्वे च । "रघोवष्टम्भमयेन मन्त्रिणा" इति रघुः। **अवष्टम्भः**।पु०। अवपूर्वस्तन्भ—जडीकरणे जटीकरणे वा । घञ्प्रत्ययः। "अवष्टम्भः सुवर्णे च स्तम्भारम्भयोरपि" इति मेदिनी ॥ वाणी सरस्वती । छन्दः अष्टाक्षरपादकच्छन्दोभेदः । तयोश्च । **अनुष्टुभ्** । स्त्री० । अनुपूर्वस्तनूभ—जडीकरणे । क्विप्प्रत्ययः। षत्वम् । "अनुष्टुभ् स्यात् सरस्वत्यां छन्दोभेदे च योषिति" इति मेदिनी ॥ २८३ ॥ आरम्भे उद्यमे । उद्योगे । दर्पे अहङ्कारे । कामे । ब्रह्मणि चतुर्मुखे च । **आत्मभूः** । पु०। आत्मना स्वयम आत्मनि मनसि वा भवति।भू—सत्तायाम् । क्विप्प्रत्ययः। "आत्मभूर्ना विधौ कामे" इति मेदिनी॥श्रेष्ठः अतिशयेन प्रशस्तः । वृषभः प्रसिद्धः । तयोः । तथा ओषधिभेदे मुनिभेदे च । **ऋषभः** । पु० । ऋष—गतौ । अभच्प्रत्ययः । "ऋषभस्त्वौषधान्तरे" इति मेदिनी ॥ अधः करः मणिबन्धात् कनिष्ठापर्य्यन्तः करस्य बाह्यदेशः । उष्ट्रः प्रसिद्धः। उष्ट्रशिशुश्च । तयोः । तथा करिशावके । नामगन्धद्रव्ये च । **करभः** । पु० । कॄ—विक्षेपे । अभच्प्रत्ययः । करे भाति भा—दीप्तौ । कः प्रत्ययो वा । "करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते" इति मेदिनी॥२८४॥ वारस्त्रियाः कान्ते वेश्यायाः पतौ । वेश्यापताविस्यर्थः । रक्षः कुम्भकर्णस्य पुत्रः । राशिप्रभेदः मेषावधिकः एकादशराशिः । तयोः । तथा घटे । हस्तिशिरस्थमांसपिण्डद्वये । "तैः किं मत्तकरीन्द्रकुम्भकुहरे" इति प्रसन्नराघवम् । हृद्रोगभेदे । प्राणायामाङ्गे श्वासरोधके चेष्टाभेदे । परिमाणभेदे । "दशद्रोणा भवेत् खारी कुम्भस्तु द्रोणविंशतिः" इति । तथा गुग्गुलौ । त्रिवृत्ति

गर्दभं शुक्लकुमुदे खरे पुंस्यऽथ दानवे ।
जम्बीरे व्यवहारे च जम्भो दन्तेऽपि चेष्यते ॥ २८६ ॥
दुन्दुभिर्दैत्यभेदेऽपि दम्भः कैतवकल्कयोः ।
दुर्लभः कर्चूरेऽकाम्ये सदृशव्याजयोर्निभः ॥ २८७ ॥
मुख्यराट्‌क्षत्रयोः पुंसि नाभिः प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥ २८८ ॥

च । **कुम्भः** । पु० । कुं भूमिं कुत्सितं वा उम्भति उन्भ—पूरणे । अच् प्रत्ययः । शाकपार्थिवादितत्पुरुषः ।"कुम्भो राश्यन्तरे हस्तिमूर्द्धांशे राक्षसान्तरे । कामुके वारनार्य्याश्च घटे क्लीबन्तु गुग्गुलौ" इति मेदिनी ॥ वीणा प्रसेवे वीणाङ्गे । वीणायाः प्रान्तबद्धे काष्ठे च। रागभेदे रागिणी विशेषे । अर्जुनद्रुमे अर्जुनवृक्षे । तथा दिशि । रागिणि च स्त्री० । **ककुभः** । पु० । कं वातं स्कुभ्नातीति । कः प्रत्ययः । पृषोदरादिना साधुः । कस्य वातस्य कुः भूमिः भात्यस्मादिति । भा—दीप्तौ । कःप्रत्ययः । कचित्तु "कुकुभ" इति। "ककुभो रागभेदेऽपि वीणाङ्गेऽर्ज्जुनपादपे" इति मेदिनी ॥ २८९ ॥ शुक्लकुमुदे श्वेतकैरवे । न० । खरे स्वनामाख्याते पशौ । तथा गन्धभेदे । विडङ्गे च । पु० । **गर्दभम्** । न० । गर्द—रवे । अभच्प्रत्ययः "गर्दभः श्वेतकुमुदे गर्दभो गन्धभिद्यपि । रासभे गर्दभो क्षुद्ररोगजन्तुविशेषयोः" इति मेदिनी ॥ दानवे दैत्यभेदे । जम्बीरे स्वनामाख्याते वृक्षे । व्यवहारे । दन्ते दशने । अपिशब्दात् अंशे । हनौ । तूणे च । **जम्भः** । पु० । इष्यते इति क्रियापदेनान्वयः । जभि—जृम्भणे, मैथुने वा । घञ्प्रत्ययः । "जम्भो दैत्यविशेषे ना दन्ते जम्बीरभक्षयोः" इति मेदिनी ॥ २८६ ॥ दैत्यभेदे असुरविशेषे । अपिशब्दात् राक्षसभेदे । विषे । बृहत् ढक्कायाम् । भेर्य्याम् । वरुणे । षष्टिवर्षमध्ये वत्सरभेदे । "प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि" इति । पाशके वा । **दुन्दुभिः** । पु० । दुन्दु इति शब्देन उभति पूरयति । उभ—पूरणे । कः प्रत्ययः । शकन्ध्वादित्वात् पररूपम् । "दुन्दुभिः पुमान् । वरुणे दैत्यभेर्य्योश्च" इति मेदिनी ॥ कैतवः शाठ्यम् । कल्कः कपटः, पापो वा । तयोश्च। **दम्भः** । पु० ।दम्भ—दम्भे, सङ्घाते वा । घञ्प्रत्ययः । "दम्भस्तु कैतवे कल्के" इति मेदिनी ॥ कर्चूरे गन्धद्रव्ये । शट्यां वा । कचित्तु कच्छुरे इति दृश्यते । कच्छुरे कच्छुरोगवति । परस्त्रीगामिनि वा । अकाम्ये दुष्प्रापे । त्रि० । "मानुष्यं दुर्लभं लोके विद्या तत्र सुदुर्लभा"इति "दुर्लभश्च मनुष्यत्वं बुद्धयुत्पादश्च दुर्लभः" इति । तथा दुरालभायाम् । श्वेतकण्टकार्य्याञ्च । स्त्री० । **दुर्लभः** । पु० । दुरपूर्वः लभ—प्राप्तौ । खल् प्रत्ययः । "दुर्लभस्त्रिषु दुष्प्रापे कर्चूरे" इति मेदिनी । "दुर्लभः कर्चूरे ज्ञेयो दुष्प्रापे वल्लभेऽपि च" इति विश्वः ॥ सदृशः तुल्यः । यथा पितृनिभः मातृनिभ इत्यादि । तत्सदृश इत्यर्थः । व्याजः कपटः । तयोश्च **निभः** । पु० । निभाति निपूर्वः भा—दीप्तौ । कः प्रत्ययः। "निभस्तु कथितो व्याजे पुंल्लिङ्गः सदृशे त्रिषु" इति मेदिनी ॥ २८७ ॥ मुख्यराट् प्रधाननृपः, क्षत्र

भूर्भूमौ स्थानमात्रे च भमृक्षे भृगुजे पुमान्।
रम्भा कदल्यप्सरसोर्विभुः स्यात्स्वामिनित्ययोः॥ २८९॥
पुनर्नवायां वर्षाभूः स्त्री ना किञ्चुलुके प्लवे।
विश्रम्भः केलिकलहे विश्वासे प्रणयेऽपि च॥ २९०॥
सुरभिः स्याद्वसन्तेऽपि सभा द्यूतालयेऽपि च।

इति भान्ताः॥

अभ्यागमो विरोधे च शास्त्रमायातमागमः॥ २९१॥

क्षत्रियः तयोः। प्राण्यङ्गके प्राण्यङ्गभेदे। पु०।स्त्री०। चक्रमध्ये द्वादशनृपचक्रस्य मध्ये। प्रधाने मुखे। कस्तूरिकामदे मृगमदे। स्त्री०। तथा रथचक्रस्य वामपिण्ड्याञ्च। **नाभिः**। पु०। नह्यन्ते अत्र नह्यतेऽनेन वा। नह—बन्धे। इञ्प्रत्ययः। भान्तादेशः। "नाभिमुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे" इति मेदिनी॥ २८८॥ भूमौ पृथिव्याम्। स्थानमात्रे। तथा एकसङ्ख्यायाम्। यज्ञाग्नौ च। **भूः**। स्त्री०। भू—सत्तायाम्। क्विप्प्रत्ययः। "भूः स्थानमात्रे कथिता धरण्यामपि योषिति" इति मेदिनी॥ ऋक्षे नक्षत्रे। भृगुजे भृगुनन्दने। पु०। तथा मेषादिराशौ। ग्रहे शुक्राचार्ये। भ्रमरे भान्तौ। छन्दोग्रन्थोक्ते आदिगुरुके अन्त्योपान्तलघुयुक्ते वर्णत्रिके च। पु०। **भम्**। न०। भा—दीप्तौ। कः प्रत्ययः। "भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद्भृगुनन्दने" इति मेदिनी॥ कदली वृक्षविशेषः। अप्सराः समुद्रादुत्पन्नत्वात् मेनकादिस्वर्वेश्याजातिः। तयोः। तथा गवां ध्वनौ। गौर्य्याञ्च। **रम्भा**। स्त्री०। रभि—गतौ। अच्प्रत्ययः। "रम्भा कदल्यप्सरसोर्ना वेणौ वानरान्तरे" इति मेदिनी। स्वामी प्रभुः। नित्यं ब्रह्म। तयोः। तथा सर्वमूर्तिसंयुक्ते शिवे च। **विभुः**। पु०। विपूर्वः भू—सत्तायाम्। डु प्रत्ययः। "विभुः प्रभौ सर्वगतशङ्करब्रह्मणोस्तु ना" इति मेदिनी॥ २८९॥ पुनर्नवायाम्। **किञ्चुलु**के महीलताख्ये कीटभेदे। प्लवे भेके। तथा इन्द्रगोपे। भेक्याम्। स्त्री०। वर्षाभवमात्रे च। त्रि०। **वर्षाभूः**। पु०। वर्षासु भवति। भू—सत्तायाम्। क्विप् प्रत्ययः। "वर्षाभूः स्त्री च शोथघ्न्यां भूलताप्लवयोः पुमान्" इति मेदिनी॥ केलिकलहे परिहासाय कृतकलहे विश्वासे। प्रणये प्रीतौ, स्नेहे वा। अपिशब्दात् वधे च। **विश्रम्भः**। पु०। विपूर्वः श्रन्भ—प्रमादे। घञ् प्रत्ययः। "विश्रम्भः केलिकलहे विश्वासे प्रणयेऽपि च" इति मेदिनी। "विश्रम्भः केलिकलहे विश्वासे प्रणये वधे" इति विश्वः॥२९०॥वसन्ते स्वनामाख्याते ऋतौ। "सुसुरभि सुरभि सुमनोभरैः" इति माघः। अपिशब्दात् स्वर्णे। चम्पके। गन्धाश्मनि। सुन्दरे। जातीफलवृक्षे। सुगन्धे। शमीवृक्षे कदम्बे। कणगुग्गुलौ। गन्धतृणे। बकुलवृक्षे। राले। चैत्रे मासि। पण्डिते। गन्धफले। पु०। शल्लक्याम्। रुद्रजटायाम्। मातृकाभेदे। गवि। सुरायाम्। नवमालिकायाम्। तुलस्याम्। पृथिव्याम्। गवां मातरि च। स्त्री०। वा ङीप्प्रत्ययः। **सुरभिः**। पु०। न०। सुपूर्वः भ—औत्सुक्ये। शब्दे च।

मठादौ ब्रह्मचर्य्यादिचतुष्के चाऽश्रमोऽस्त्रियाम् ।
अङ्गीकृतावुपगमः समीपगमनेऽपि च ॥ २९२ ॥
उमा दुर्गाऽतसी चाऽथ पीडायां वीचिवेगयोः ।
वस्त्रसूक्ष्मे च रेखायां चोर्म्मः स्त्रीपुंसयोर्मतः ॥ २९३ ॥

इनिप्रत्ययः । "सुरभिः शल्लकीमातृभिन्मुरागोषु योषिति । चम्पके च वसन्ते च तथा जातिफले पुमान् । स्वर्णे गन्धोत्पले क्लीबं सुगन्धिकान्तयोस्त्रिषु । विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयम्" इति मेदिनी ॥ द्यूतं पाशकक्रीडा । आलयः मन्दिरम् । तस्मिन् । अपिशब्दात् बहूनां समावेशनस्थाने । तदधिष्ठायिजनसमूहे । **सभा** । स्त्री० । सह भान्ति अभीष्टनिश्चयार्थमेकत्र गृहे यत्र । भा—दीप्तौ । क्विप्प्रत्ययः । "सभा सामाजिके गोष्ठयां द्यूतमन्दिरयोरपि" इति मेदिनी ॥ इति भकारान्ताः समाप्ताः ॥ अथ मान्तानाह ॥ विरोधे विरुद्धतायाम् । चकारात् समरे । अभिगमने । भोगे । अन्तिके । स्वीकारे । फलसम्बंधे च । **अभ्यागमः** । पु० । अभिआपूर्वः गम—गतौ । घञ् प्रत्ययः । अवृद्धिः । "अभ्यागमो विरोधाजिघाताभ्युद्गमनान्तिके" । इति मेदिनी ॥ शास्त्रं शास्त्रमात्रम् । "सिद्धः सिद्धैः प्रमाणैस्तु हितं वाऽत्र परत्र च । आगमं शास्त्रमाप्तानाम्" इत्युक्तलक्षणम् । तस्मिन् । आयातम् आगतिः । तस्याम् । तथा उपदेशे । व्याकरणप्रसिद्धे प्रकृतिप्रत्ययानुपघातेन तन्मध्ये आगन्तरि इडादौ च । **आगमः** । पु० । आगच्छति प्राप्नोतीति । आपूर्व गम—गतौ । अच्प्रत्ययः । "आगमः शास्त्र आगतौ" इति मेदिनी ॥ २९१ ॥ मठादौ मुनीनां वासस्थानादौ । ब्रह्मचर्य्यादिचतुष्के ब्रह्मचर्य्यादिके शास्त्रोक्ते धर्म्मभेदे ब्रह्मचर्य्या श्रेष्ठाचर्य्या । आदिना वानप्रस्थः गृहस्थः भिक्षुकश्च ग्राह्यः । एषु चतुर्ष्वाश्रमेषु । कलौ तु ब्रह्मचर्यवानप्रस्थौ न स्तः । गृहस्थभिक्षुकाश्रमावेवेति वदन्ति । "गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" इति स्मरणात् । सर्वक्लेशहानेन विश्रामस्थाने । वने च । **आश्रमः** । पु० न० । आङ्पूर्वः श्रम—तपसि, आयासे च । आधारे घञ् प्रत्ययः । अवृद्धिः । "आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे वने" इति मेदिनी ॥ अङ्गीकृतौ स्वीकारे । समीपगमने । अपिशब्दात् ज्ञाने च । **उपगमः** । पु० । उप-पूर्वः गम-गतौ । घञ्प्रत्ययः । अवृद्धिः । "उपगमः स्वीकारेऽन्तिकसर्पणे" इति मेदिनी ॥ २९२ ॥ दुर्गा प्रसिद्धा । तस्याम् । "उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" इति । अतसी स्वनामाख्यातो वृक्षः । तस्मिन् । तथा हरिद्रायाम् । कीर्त्तौ । कान्तौ । शान्तौ च । **उमा** । स्त्री० । ओः शिवस्य मा लक्ष्मीः । अथवा उ शिवं माति पतित्वेन मन्यते मा—माने कः प्रत्ययः । वे—स्तुतौ । मक्प्रत्ययः । सं प्रसारणम् । "उमाऽतसीहैमवतीहरिद्राकीर्तिकान्तिषु" इति मेदिनी ॥ अथशब्दः अनन्तरार्थवाची । पीडायाम् । वीचिस्तरङ्गः । वेगः जवः, अश्वगतिर्वा । तयोः । वस्त्रसूक्ष्मे रेखायां । वस्त्रसङ्कोचरेखायाम् । चकारात् प्रकाशे । उत्कण्ठायाम् । बुभुक्षादिषु षट्सु । यथा "बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ । शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः" इति । **ऊर्म्मिः** ।

कुसुमं स्त्रीरजः पुष्पं क्षेमं कल्याणरक्षयोः ।
क्षेमा चण्डाऽथ कलमा लेखनीचौरशालयः ॥ २९४ ॥
रेतोनिकामकाम्येषु कामं पुंसि स्मरेच्छयोः ।
क्षौममट्टे दुकूले च ग्रामः संवसथे स्वरे ॥ २९५ ॥
गुल्मः स्तम्बे घट्टभेदे घर्मः स्वेदातपोष्मसु ।
जिह्मः स्यात्कुटिले मन्दे तलिमं तल्पकुट्टिमे ॥ २९६ ॥

पु० स्त्री० । मतः ज्ञात इत्यर्थः । ऋ—गतौ । मिः प्रत्ययः । अर्तेरुच । "ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः" इति मेदिनी ॥ २९३ ॥ स्त्रीरजः स्त्रिया आर्त्तवः । पुष्पं प्रसिद्धम् । तत्र च । तथा फले नेत्ररोगभेदे च । **कुसुमम्** । न० । कुस—श्लेषे । उमक्प्रत्ययः । "कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः" इति मेदिनी ॥ कल्याणं कुशलम् । न० । रक्षा लब्धवस्तुनो रक्षणम् । पु० । तयोः । चण्डा चोरनामगन्धद्रव्यम् । तस्याम् । तथा मुक्तौ च **क्षेमम्** । न० । क्षि—गतौ । मन्प्रत्ययः । "क्षेमोऽलब्धरक्षणे । चण्डायां ना शुभे न स्त्री कात्यायन्याञ्च योषिति" इति मेदिनी ॥ अथशब्दः अनन्तरार्थद्योतकः । लेखनी लेखनसाधनी । स्त्री० । चौरः तस्करः । शाली धान्यविशेषः । तेषु च । **कलमा** । स्त्री० । पु० । कल—शब्दे । अमप्रत्ययः । "कलमः पुंसि लेखन्यां शालौ पाटच्चरेऽपि च" इति मेदिनी ॥ ॥ २९४ ॥ रेतः शुक्रः । निकामः इष्टानतिक्रमः । काम्यः कमनीयः । "यत्किञ्चित्फलमुदिश्य यज्ञदानतपःक्रिया । क्रियते बहुलायासं तत्काम्यं परिकीर्तितम्" इति । तेषु । स्मरः अनङ्गः । इच्छा अभिलाषा । तयोः । पु० । तथा सुन्दरे च त्रि० । **कामम्** । न० । कम—कामनायाम्, वाञ्छायाम् । णिच्अच्प्रत्ययौ । "वाच्यवच्छक्तिहतयोः कामः स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम्" इति मेदिनी ॥ अट्टे प्रासादस्योपरिगृहे । प्राचीरोपरिस्थसैन्यगृहे वा । तत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते। "अट्ट भक्ते चतुष्के ना क्षौमेत्यर्थे गृहान्तरे" इति मेदिनी । अट्टालिकायां वा । दुकूले क्षौमवस्त्रे, सूक्ष्मवस्त्रे वा । चकारात् अतसीवल्कलजातवस्त्रे । शणजे वस्त्रे च । **क्षौमम्** । न० । पु०। क्षुमाया अतस्या विकारः । अण्प्रत्ययः। "क्षौममट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके । शणजेऽतसीजे" इति मेदिनी ॥ संवसथे विप्रादीनां वासस्थाने, जनसमूहनिवासस्थाने च । "विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा" । "तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः । क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका" इति । स्वरे स्वरभेदे। "यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्देहो ग्राम इत्यभिधीयते" इति । तथा किञ्चिच्छब्दोपपदे । तदर्थसङ्घाते च । यथा "शब्दग्रामः अर्थग्राम" इत्यादि । **ग्रामः** । पु० । ग्रस—भक्षणे । मन्प्रत्ययः । आदन्तादेशः । "ग्रामः स्वरे संवसथे" इति मेदिनी ॥ २९५ ॥ स्तम्बे अप्रकाण्डे लताप्रतानादौ वृक्षे । एकमूलेषु सङ्घातजातेषु शरेक्षुप्र-

तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे ।
द्रुमो यक्षेश्वरे वृक्षे दमो दमथुदण्डयोः ॥ २९७ ॥
धर्मोऽहिंसोपमायागोपनिषत्सु धनुष्यऽपि ।
कटे पुर्य्याञ्च निगमो नियमो निश्चये वृते ॥ २९८ ॥

भृतिषु तृणभेदेषु । घट्टभेदे घट्टदेशे । रक्षणार्थं स्थापिते सैन्ये । तथा प्रधानपुरुषाधिष्ठिते रणके पुरुषसङ्घे (दशगजाः दशरथाः सप्तविंशतिः अश्वाः पञ्चचत्वारिंशत् पदातयः) एतत्सङ्ख्यान्विते सैन्यसमुदाये । स्वनामख्याते रोगभेदे । प्लीहरोगे च । **गुल्मः** । पु० । गुड—रक्षणे, वेष्टने वा । मक्प्रत्ययः । "गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः । स्तम्बे स्त्रियामामलक्ये लावनीवस्त्रवेश्मसु" इति मेदिनी ॥ स्वेदः श्रमार्तस्य गात्रात् निष्यन्दि जलम् । आतपः सूर्य्याद्यालोकः। उष्मः ग्रीष्मः। तेषु। **घर्मः**। घृ—सेके।मक्प्रत्ययः । निपातनाद्गुणः। "घर्म्मः स्यादातपे ग्रीष्मेऽप्युष्मस्वेदाम्भसोरपि" इति मेदिनी ॥ कुटिले वङ्के । मन्दे । तथा नगरवृक्षे च। **जिह्मः**। पु० । हा—त्यागे । मन्प्रत्ययः । द्वित्वादिनिपातनात् । "जिह्मस्तु कुटिले मन्दे क्लीबं तगरपादपे" इति मेदिनी ॥ तल्पः शय्या, अट्टालिका वा । कुट्टिमः तयोः । तथा चन्द्रहासे वितानके च । **तलिमम्**। न०। तलमस्त्यस्येति। इमन्प्रत्ययः।"तलिमं कुट्टिमे तल्पे चन्द्रहासे वितानके"इति मेदिनी॥२९६॥ कर्णमले श्रोतयोर्जाते मले । हरिते हरिद्वर्णे। हरिद्यवे हरिद्वर्णे यवे । शरदि पक्वयवे च । पु०। **तोक्मम्** । न०। तुच—समवाये । मन्प्रत्ययः । अन्तलोपश्च । "तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे"इति मेदिनी॥यक्षेश्वरे कुबेरे । वृक्षे । तथा पारिजाते च। **द्रुमः**। पु०। द्रुः शाखास्त्यस्य । मः प्रत्ययः।"द्रुमो महीरुहे पारिजाते किम्पुरुषेश्वरे" इति मेदिनी॥दमथुर्दमनम्। दण्डः दण्डनम् । तयोः।तथा बाह्येन्द्रियाणां ध्येयविषयव्यतिरिक्तेभ्यो निवर्तने।"निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते" इति । पापकर्म्मभ्यो मनसो निवारणे । कर्दमे च । **दमः** । पु० । दम—शमे । घञ्प्रत्ययः । "दमस्तु दमथे दण्डे कर्दमे दमने पुमान्" इति मेदिनी ॥ ॥ २९७ ॥ अहिंसा वधविरहिता । उपमा सादृश्यम् । यागः यज्ञः । क्वचित्तु "योग" इति पाठः । उपनिषद् ब्रह्मविद्या । तत्प्रतिपादको वेदशिरोभागो वेदान्तश्च । तेषु । धनुषि चापे । अपिशब्दात् शास्त्रविहितकर्म्मानुष्ठानजन्ये भाविफलसाधनरूपे शुभादृष्टे । "श्रुतिस्मृतिभ्यामुदितं यत् स धर्म्म" इत्युक्ते श्रौते स्मार्ते कर्म्मणि।"विहितक्रियया साध्यो धर्म्मः पुंसां गुणो मतः"इत्युक्ते कर्म्मजन्ये अदृष्टे । आत्मनि । देहधारणात् जीवे । वस्तुगुणरूपे । आचारे । स्वभावे । न्याये।यमे। सत्सङ्गे । सोमाधायनि । लग्नात् नवमे स्थाने । दानादौ च । **धर्म्मः** । पु० न० । धृ—धारणे । मन्प्रत्ययः । "धर्म्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे" इति मेदिनी । कटे कटभेदे । पुर्य्यां पुरभेदे । क्वचित्तु लुठयाम्" इतिपाठः । चकारात् वणिक्पथे वाणिजे । निश्चये । अध्वनि । प्रतिज्ञायाम् । पर्य्यायकथनेन [illegible] ग्रन्थभेदे । न्यायमतसिद्ध पञ्चावयवन्यायमध्ये चरमावयवे । न्यायशास्त्रे । तन्त्र-

यन्त्रणाबन्धयोश्चाऽथ पञ्चमः स्वरसङ्ख्ययोः।
पद्मोऽस्त्री बिन्दुजालेऽब्जे व्यूहे सङ्ख्यान्तरे निधौ॥ २९९॥
गजानां दन्तबन्धेऽपि प्रतिमाऽनुकृतावपि।
भूमिः स्थानेऽपि कुन्दाम्बुनिर्गमभ्रान्तिषु भ्रमः॥ ३००॥
गाङ्गेयभीषणौ भीष्मौ भीमः शम्भौ च पाण्डवे।
नरके मङ्गले भौमः स्वरे मध्ये च मध्यमः॥ ३०१॥

भेदे वेदे च। **निगमः**। पु०। निगम्यतेऽत्र अनेन वा। निपूर्वगम—गतौ। घञ्प्रत्ययः। निगमे पुरभेदे भवः। अणूप्रत्ययः।। अवृद्धिर्वा। "निगमो वाणिज पुर्य्यां कटे वेदे वणिक् पथे" इति मेदिनी॥ निश्चये निर्णये। व्रजे पुण्यसाधने उपवासादिनियमभेदे॥ २९८॥ यन्त्रणं नियमनम्। "नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम्" इत्युक्ते अनित्ये आगन्तुकसाधने उपवासादौ कर्म्मणि, रक्षणे वा। आबन्धः दृढबन्धस्तयोः। चकारात् प्रतिज्ञायाम्। शौचादिषु च **नियमः**। पु०। निपूर्वयम—उपरतौ। घञ् प्रत्ययः। "नियमो यन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते" इति मेदिनी॥ अथ अनन्तरार्थवाची। स्वरः पिकानां नादः। सङ्ख्या पञ्चसङ्ख्यायाः पूरणम्। सा च चन्द्रस्य पञ्चमकलाक्रियारूपायां तिथौ। तयोश्च। **पंचमः**। त्रि०। पञ्चानां पूरणः। पञ्चन्शब्दान्मप्प्रत्ययः। "पञ्चमो रागभेदे स्यात्स्वरभेदेऽथ पञ्चमी। पाण्डवानां च पत्न्यां स्त्री पञ्चानां पूरणे त्रिषु" इति मेदिनी॥ बिन्दुजाले गजमुखादिस्थे बिन्दुसमूहे। अब्जे कमले। व्यूहे कमलाकारेण सैन्यादेरभिवेशनरूपे व्यूहभेदे। सङ्ख्यान्तरे "अर्बुदमब्जम्" इति पर्य्यायनाम्नोक्तायां दशार्बुदसङ्ख्यायाम्। निधौ निधिभेदे च। **पद्मः**। पु० न०। पद—गतौ। मन्प्रत्ययः। "पद्मोऽस्त्री पद्मके व्यूहनिधिसङ्ख्यान्तरेऽम्बुजे" इति मेदिनी॥ २९९॥ गजानां दन्तबन्धे हस्तिदन्तस्य बन्धने। अनुकृतौ सदृशीकरणे। अपिशब्दात् सदृशमृत्तिकाशिलादि मूर्त्तौ। उत्तरपदस्थः सदृशे। त्रि०। यथा बुद्धप्रतिमः देवप्रतिमः। **प्रतिमा**। स्त्री०। प्रतिपूर्वमा—माने, परिमाणे वा। अः प्रत्ययः। "प्रतिमा गजदन्तस्य बन्धे चाऽनुकृतावपि" इति मेदिनी॥ स्थाने स्थानमात्रे। अपिशब्दात् पृथिव्याम्। जिह्वायाम्। योगशास्त्रोक्ते योगिनां चित्तस्यावस्थाभेदे। एकसङ्ख्यायाञ्च। **भूमिः**। स्त्री०। भवन्त्यस्मिन् भूतानि। भू—सत्तायाम्। मिक्प्रत्ययः। वा ङीप्। भूमी अप्यत्र। "भूमिर्वसुन्धरायां स्यात् स्थानमात्रेऽपि च स्त्रियाम्" इति मेदिनी। कुन्दः भ्रमियन्त्रम्। अम्बुनिर्गमः जलनिर्गमस्थानम्। भ्रान्तिर्भ्रमणम्। तेषु। तथा मिथ्याज्ञाने। तद्धि अन्यथाभूतस्य वस्तुनोऽन्यथारूपेण ज्ञानम्। **भ्रमः**। पु०। भ्रम—चलने। घञ्प्रत्ययः। "भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दभ्रमणयोरपि" इति मेदिनी॥३००॥ गाङ्गेयः गङ्गागर्भजातः शन्तनुसुतः स्वनामाख्यातः कुरुवंशसम्भवः क्षत्रियः। भीषणः भयानकरसः, भयहेतुर्वा। तयोश्च। **भीष्मः**। पु०। भी—भये। मक्प्रत्ययः, सुगागमश्च। "भीष्मो गाङ्गेयघोरयोः" इति मेदिनी॥ शम्भौ महादेवे। पाण्डवे भीमसेने। भका-

यमः संयमकीनाशयुग्मजेष्वथ राघवे ।
रामः पशौ भार्गवे च रुक्मं लोहसुवर्णयोः ॥ ३०२ ॥
सम्पत्कमलयोर्लक्ष्मीर्विभ्रमो भ्रमहावयोः ।
श्यामा गुन्द्रा कोकिला च श्रामो मण्डपकालयोः ॥ ३०३ ॥

रात भयहेतौ । भयानकरसे आम्लवेतसे । पु० । दुर्गायाम् । स्त्री० । भीमः । त्रि० । बिभेत्यस्मादिति । भी-भयेमक्प्रत्ययः । "भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे" इति मेदिनी ॥ नरके नरकासुरे । मङ्गले मङ्गलग्रहे । तथा भूमिभवे च । त्रि० । **भौमः** । पु० । भूमेरपत्यं तस्या इदं वा । अण्प्रत्ययः । "भौमः कुजे च नरके पुंसि भूमिभवे त्रिषु" इति मेदिनी ॥ स्वरे सप्तस्वरमध्ये क्रौञ्चस्वरतुल्ये पञ्चमे स्वरे। मध्यजे मध्यभवे । चकारात् मध्यदेशे च।**मध्यमः**। त्रि० । मध्ये भवः । मः प्रत्ययः । "मध्यमो मध्यजेऽन्यवत् । पुमान् स्वरे मध्यदेशे" इति मेदिनी ॥ ३०१ ॥ संयमः इन्द्रियादीनां संयमनम् । कीनाशः यमः । अथवा प्राणिनां शुभाशुभकर्म्मानुसारेण दण्डविधायको दक्षिणस्थः देशभेदः। युग्मजः एकगर्भजायमानो यमजः । तेषु । तथा अहिंसादौ । "अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता । अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च" इति । भ्रातृत्वेन यमसम्बन्धिनि शनौ। काके। द्वित्वसङ्ख्यायां योगे च । **यमः** । पु० । यम-परिवेषणे । घञ्प्रत्ययः । "यमोऽन्यलिङ्गो यमजे ना काके गमने शनौ । शरीरसाधनापेक्षनित्यकर्म्मणि संयमे" इति मेदिनी ॥ अथ अनन्तरम् । राघवे दशरथज्येष्ठपुत्रे श्रीरामे। पशौ पशुभेदे । भार्गवे परशुरामे । चकारात् बलरामे। मनोहरे। शुभे च । त्रि०। वास्तूके कुष्ठे। तमालपत्रे च । न०। **रामः**। पु०। रम-क्रीडायाम् । कर्त्तरि घञ्प्रत्ययः । णः प्रत्ययो वा। "रामा योषा हिङ्गुनद्योः क्लीब वास्तूककुष्ठयोः।ना राघवे च वरुणे रेणुकेये हलायुधे" इति मेदिनी। "रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे चाऽसितश्वेतमनोज्ञेषु च वाच्यवत्" इति विश्वः॥ लोहं प्रसिद्धम् । सुवर्णं काञ्चनं तयोः। तथा धुस्तूरे । नागकेशरे च । **रुक्मम्**। न०। रुच-प्रीतौ । मन्प्रत्ययः । निपातनात् कुत्वम् । "रुक्मञ्च काञ्चने लोहे" इति मेदिनी॥ ३०२॥ सम्पत् सम्पत्तिः । कमलं स्थलपद्मम् । तयोः । तथा शोभायाम् । कान्तौ । विष्णोः पत्न्याम् । हरिद्रायाम् । शट्याम् । मुक्तायाम् । ऋद्धौषधे। वृद्धिनामौषधे । फलिनीवृक्षे च । **लक्ष्मीः** । स्त्री० । लक्ष-दर्शने, अङ्कने च । ईप्रत्ययः । मटागमश्च । "लक्ष्मीः सम्पत्तिशोभयोः । ऋद्धौषधे च पद्मायां वृद्धिनामौषधेऽपि च । फलिन्यां स्त्री" इति मेदिनी ॥ भ्रमः भ्रमणम् । हावः स्त्रीणां शृङ्गाराङ्गचेष्टाभेदः । त्वरया भूषास्थानवैपरीत्यम् । "विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्ययः" इति । तयोः । तथा विशेषेण भ्रान्तौ । शोभायाम् । सन्देहे च। **विभ्रमः** । पु० । विपूर्वभ्रम-चलने । घञ्प्रत्ययः । "विभ्रमो भ्रान्तिहावयोः" इति मेदिनी ॥ गुन्द्रा प्रियङ्गुः । कोकिला स्वनामाख्यातो विहगभेदः । तयोः । चकारात् कृष्णत्रिवृति । गुडूच्याम् । कस्तूर्याम् । शारिवायाम् । निशायाम् । वल्गुल्यां । नील्याम् । स्त्रीविशेषे च । "शीतकाले भवे-

सार्वभौमो गजे राज्ञि सम्भ्रमौ साध्वसादरौ ।
कण्टकेऽल्पे च सूक्ष्मं स्यात्साधौ तुल्येऽखिले समः ॥ ३०४ ॥
सीमा घाटे स्थितौ क्षेत्रे हिमं शीतलशीतयोः ।

इति मान्ताः ॥

भिन्नासमानयोरन्यः स्यादभिख्या यशस्यपि ॥ ३०५ ॥

दुष्णा ग्रीष्मे च सुखशीतला । तप्तकाञ्चनवर्णाभा सा श्यामेति च कीर्तिता" इति । **श्यामा** । स्त्री० । श्यै-गतौ । मक्प्रत्ययः । स्त्रियामाप् च । "श्यामा तु वल्गुली । अप्रसूताङ्गनायाञ्च तथा सोमलतौषधौ । त्रिवृताशारिवागुन्द्रानिशाकृष्णाप्रियङ्गुषु । श्यामा नील्यां पिके" इति विश्वः ॥ मण्डपः तपायासनादिना श्रमनिवारणम्, जनविश्रामस्थानं वा । कालः प्रसिद्धः । तयोः ।तथा मासि च । **श्रामः** । पु० । श्राम–मन्त्रणे । अः प्रत्ययः । "श्रामो मासे मण्डपकालयोः" इति मेदिनी ॥ ३०३ ॥ गजे उत्तरदिक्स्थे हस्तिनि । राज्ञि चक्रवर्तिनि, नृपे च । **सार्वभौमः** । पु० । सर्वस्या भूमेरीश्वरः । सर्वासु भूमीषु विदितो वा । अण्प्रत्ययः । "सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि" इति मेदिनी ॥ साध्वसं भयम्, भयादिजनितो वेगो वा । आदरः समादरः, सम्मानो वा । तयोः । तथा त्वरायाम् । अतिशयभ्रमे । मूत्रे च । **सम्भ्रमः** । पु० । सम्पूर्वभ्रमि–चलने । घञ्प्रत्ययः । न वृद्धिः । "सम्भ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि" इति मेदिनी ॥ कण्टके सूच्यग्रे । अल्पे । चकारात् कैतवे । अध्यात्मपदार्थे । अलङ्कारभेदे । कतकवृक्षे । पु० । अणुपरिमाणवति च । त्रि० । **सूक्ष्मम्** । न० । सूच–पैशून्ये, अन्तर्द्रोहे च । स्मन्प्रत्ययः । "सूक्ष्मं स्यात् कैतवेऽध्यात्मे पुंस्यऽणौ त्रिषु चाल्पके" इति मेदिनी ॥ साधौ सज्जने । तुल्ये सदृशे । अखिले सर्वे । तथा समाने । युग्मे । "समेऽर्द्धितेवर्गः" इति लीलावती । संवत्सरे । स्त्री० । समताख्यातेषु द्वितीयचतुर्थषष्ठादिषु राशिषु च । **समः** । त्रि० । सम–अविकले, विह्वले वा । अच्प्रत्ययः । "समा संवत्सरे स्त्रियाम् । सर्वसाधुसमानेषु समं स्यादभिधेयवत्" इति मेदिनी ॥ ३०४ ॥ घाटे वृतिस्थाने । आघाटे इति क्वचित् पाठः । स्थितौ । क्षेत्रे केदारे । तथा मर्यादायाम् । ग्रामादेरन्तभागे । सीमन्शब्दार्थे च । **सीमा** । स्त्री० । सि–बन्धे । इमन्प्रत्ययः । पृषोदरादिना न गुणादि । डीप् च । "सीमाऽघाटे स्थितौ क्षेत्रे मर्यादावेलयोरपि" इति विश्वः ॥ शीतलः शीतस्पर्शः । शीतं तुषारम् । तयोः । तथा आकाशच्युतजलकणे । त्रि० । सूक्ष्मैलायाम् । रेणुकायाम् । भद्रमुस्तायाम् । नागरमुस्तायाम् । पृक्कायाञ्च । स्त्री० । आग्रहायणपौषमासात्मके ऋतुभेदे । चन्दनवृक्षे । चन्द्रे । कर्पूरे च । पु० । **हिमम्** । न० । हि–गतौ, वर्द्धने च । मक्प्रत्ययः । "हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गं" इति मेदिनी ॥ इति मकारान्ताः समाप्ताः । अथ यान्तानाह ॥ भिन्नः अपरः । असमानः असदृशः । तयोश्च । **अन्यः** । त्रि० । स्यादित्यन्वयः । सर्वनामः । अन–जीवने । यत्प्रत्ययः । "अन्योऽस-

आत्रेयी पुष्पवत्यां स्यान्नदीभेदे च ना मुनौ ।
आशयश्छन्द आधार आदित्यो भास्करे सुरे ॥ ३०६ ॥
वेदोपदेशावाम्नायौ हृषीके चेतसीन्द्रियम् ।
इज्या स्यात्सङ्गमे दाने यागेऽर्चायां गुरौ पुमान् ॥ ३०७ ॥
उदयोऽद्रावुन्नतौ च कषायः सुरभौ रसे ।
कायः स्वभावे लक्ष्ये च सङ्घे मूर्त्तौ कदैवते ॥ ३०८ ॥

दर्शेतरयोः'' इति मेदिनी ॥ यशसि कीर्त्तौ । अपिशब्दात् अभिधाने । शोभायाञ्च **अभिख्या** । स्त्री० । अभिपूर्वख्या—कथने । अङ्प्रत्ययः । ''अभिख्यात्वभिधाने स्यात् शोभायाञ्च यशस्यपि'' इति मेदिनी ॥ ३०५ ॥ पुष्पवत्याम् ऋतुमत्याम् । आर्त्तवसञ्जातायां स्त्रियाम् । नदीभेदे नदीविशेषे । मुनौ स्वनामाख्याते ऋषिभेदे च **आत्रेयी** । स्त्री० । न सन्ति कर्म्मयोग्यानि त्रीणि दिनानि यस्याः । अत्रि+ढक्+ङीप् ''आत्रेयी पुष्पवत्यां स्यान्नदीभेदे च ना मुनौ'' इति मेदिनी ॥ छन्दसि अभिप्राये । आधारे । तथा विभवे । पनसवृक्षे । वैद्यकोक्ते अजीर्णे । स्थाने च । कर्म्मजन्ये वासनारूपे संस्कारे । धर्म्माधर्म्मरूपे अदृष्टे च । आशयन्तति चित्ते । शयने स्थाने च । **आशयः** । पु० । आपूर्वशी—शयने । अच्प्रत्ययः । ''आशयः स्यादभिप्राये पनसाधारयोरपि'' इति मेदिनी ॥ भास्करे सूर्य्ये । सुरे देवे । तथा आदित्यमण्डलस्थे हिरण्मये विष्णौ । अर्कवृक्षे । अदितिदेवताके पुनर्वसुनक्षत्रे च । **आदित्यः** । पु० । अदितौ भवः । ण्यः प्रत्ययः । ''आदित्यो भास्करे देवे'' इति मेदिनी ॥ ३०६ ॥ वेदः प्रसिद्धः । उपदेशः सदुपदेशः तयोः । तथा आगमे । निगमे । गुरुपरम्परागते वंशे । कुलक्रमेण कथने । अभ्यासे च **आम्नायः** । पु० । आम्नायते अभ्यस्यते । आपूर्वम्ना—अभ्यासे । घञ्प्रत्ययः । ''आम्नायो निगमेऽपि च । उपदेशेऽपि'' इति मेदिनी । हृषीके विषयग्राहके चक्षुरादौ । चेतसि चित्ते च । रेतसीति क्वचित्पाठः । **इन्द्रियम्** । न० । इन्द्रशब्दात् घः प्रत्ययः । ''इन्द्रियं तु हृषीके चेतसि स्मृतम्'' इति मेदिनी ॥ सङ्गमे सङ्गतौ । दाने वितरणे । यागे क्रतौ । अर्चायां पूजायाम् । गुरौ । पु० । तथा प्रतिमायाम् । गवि । कुट्टिन्याञ्च । **इज्या** । स्त्री० । स्यादित्यन्वयः । यज—देवपूजने, दाने वा । भावे क्यप्प्रत्ययः । कर्म्मणि क्यप् प्रत्ययो वा । स्त्रीत्वात् टाप् च । ''इज्या दानेऽध्वरेऽर्चायां सङ्गमे स्त्री गुरौ त्रिषु'' इति मेदिनी ॥ ३०७ ॥ अद्रौ उदयाचले पूर्वपर्वते । ''यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः'' इत्युक्तेः दृष्टिगोचरस्थाने च ॥ उन्नतौ समुन्नतौ चकारात् राशेरुदयरूपे लग्ने । प्रथमदर्शनयोग्यभवने । वृद्धौ । उत्पत्तौ च । **उदयः** । पु० । उद्पूर्वइ—गतौ । अच्प्रत्ययः । ''उदयस्तु पुमान् पूर्वपर्वते च समुन्नतौ'' इति मेदिनी ॥ सुरभौ श्योनाकवृक्षे, जातिफलवृक्षे । रसे रसभेदे । तथा रागे । अंतःकरणदोषे । धववृक्षे । रक्तपीतमिश्रिते वर्णे । क्वाथे । पु० । क्षुद्रदुरालभायाञ्च । स्त्री० । निर्य्यासे । विलेपने च । **कषायः** । पु० । कषति कण्ठम् । कष—वधे । आयः प्रत्ययः । ''कषायो रसभेदेऽपि निर्यासे च विलेपने ।

कौकृत्यमनुतापे स्यादयुक्तकरणेऽपि च।
कश्यं कशार्हे मद्ये च काद्रवेयोऽहिरङ्गयोः ॥ ३०९ ॥
काव्यं प्रबन्धे शुक्रे ना कुलायः स्थाननीडयोः।
गव्यं गोहितदुग्धादौ ज्यायां गव्या तु गोकुले ॥ ३१० ॥
भीष्मे ना हेम्नि गाङ्गेयं गोप्यौ गोप्तव्यचेटकौ।
गातव्यगायनौ गेयौ गृह्यमस्वैरिपक्षयोः ॥ ३११ ॥

अङ्गरागे च न स्त्री स्यात्सुरभौ लोहिते त्रिषु" इति मेदिनी ॥ स्वभावे निसर्गे। लक्ष्ये वेधार्थमुद्दिश्यमाने शरव्ये। लक्षणया बोधेऽर्थे च। सङ्घे राशौ। मूर्तौ देहे। कदैवते प्रजापतिदेवताके चरौ। कः प्रजापतिर्ब्रह्मा वा देवताऽस्य। अण्प्रत्ययः। इत्अन्तादेशः। वृद्धिरयादेशश्च। तथा प्राजापत्यविवाहे कनिष्ठानामिकयोरधोभागे। ब्राह्मे तीर्थे। मूलधने च। **कायः**। पु०। चीयतेऽन्नादिभिः। चिञ्–चयने। घञ् प्रत्ययः। निपातनात् साधुः। "कायः कदैवते मूर्त्तौ सङ्घे लक्ष्यस्वभावयोः" इति मेदिनी ॥ ३०८ ॥ अनुतापे (इदमनुचितं कृतमिति स्वकृतवस्तुनो दुःखजनकतया ज्ञानेन) पश्चात्तापे। अयुक्तकरणे अनुचितकरणे। अपिशब्दात् दुष्कर्तव्ये च। **कौकृत्यम्**। न०। स्यादित्यन्वयः। कुकृतस्य भावः। यत्प्रत्ययः। "कौकृत्यमनुतापे स्यादयुक्तकरणेऽपि च" इति मेदिनी ॥ कशार्हे कशया ताड्ये अदन्तेऽश्वादौ। मद्ये मद्यभेदे। चकारात् अश्वमध्यभागे च। **कश्यम्**। न०। कश–शब्दे। यक्प्रत्ययः। अथवा कशामर्हतीति कशाशब्दात् यत्प्रत्ययः। "कश्यं त्रिषु कशार्हे स्यात् क्लीबं मद्याश्वमध्ययोः" इति मेदिनी। अहिर्नराकारः फणालाङ्गूलवान् देवयोनिभेदो नागः, सर्पो वा। रङ्गः धातुभेदः। तयोश्च। **काद्रवेयः**। पु०। कद्र्वाः अपत्यम्। ढक्प्रत्ययः। काद्रवेयशब्दः कोषान्तरे नागतः ॥ ३०९ ॥ प्रबन्धे कवेः कर्म्मणि। ग्रन्थभेदे वा। शुक्रे असुराचार्ये। पु०। तथा कवित्वे। गृहे च। **काव्यम्**। न०। कविरेव स्वार्थे ष्यञ्प्रत्ययः। कवेः कर्म वा। "काव्यं ग्रन्थे पुमान् शुक्रे" इति मेदिनी ॥ स्थानमात्रम्। नीडः पक्षिनिलयः। तयोः। तथा देहे च। **कुलायः**। पु०। कुलं पक्षिसङ्घातोऽयतेऽत्र। अय–गतौ। घञ्प्रत्ययः। कौलायो गतिरस्मादिति वा। "कुलायस्तु पुमान् स्थानमात्रे स्यात्पक्षिवासके" इति मेदिनी ॥ गोहितं गोर्हितादि। दुग्धादि गोसम्बन्धि क्षीरादि तयोः। ज्यायां रागद्रव्ये गोकुले च। स्त्री०। **गव्यम्**। त्रि०। गोर्विकारः गवि भवम्। गोर्हितं गोरिदं वा। सर्वत्र यत्प्रत्ययः। "गव्यं नपुंसकं ज्यायां रागद्रव्येऽप्यथ स्त्रियाम्। गोसमूहे त्रिलिङ्गन्तु दुग्धादौ चाऽपि गोहिते" इति मेदिनी ॥ ३१० ॥ भीष्मे गङ्गागर्भजे शन्तनुसुते स्वनामाख्याते कुरुवंश्ये क्षत्रिये। कार्तिकेये च। पु०। हेम्नि। "यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्। तदुल्बं पर्वते न्यस्तं हिरण्यं समपद्यत" इत्युक्ते स्वर्णे। तथा तन्नामके धुस्तूरे। मुस्तके। कशेरुणि च। **गाङ्गेयम्**। न०। गङ्गाशब्दात् ढक्प्रत्ययः। "गाङ्गेयः स्यात्पुमान् भीष्मे क्लीबं स्वर्णकशेरुणि" इति मेदिनी ॥ गोप्तव्यं रक्ष्यम्। चेकटः

चैत्यमायतने बुद्धबिम्बोद्देशकवृक्षयोः ।
चक्षुष्यं सुभगे चक्षुर्हिते स्त्रीकेतकेऽपि च ॥ ३१२ ॥
युद्धे हट्टे च जन्यं स्याज्ज्या स्यान्मौर्व्यां क्षितावपि ।
जटायुर्गुग्गुलुद्रौ च त्रिवेद्यां त्रितये त्रयी ॥ ३१३ ॥

दासीपुत्रः । तयोः । तथा रक्षणीयमात्रे । गुह्ये च । त्रि० । **गोप्यः** । पु० । गुप- गोपने, रक्षणे च । यत्प्रत्ययः ॥ "गोप्यो दासीसुते पुंसि रक्षणीयेऽभिधेयवत्" इति मेदिनी ॥ गातव्यः गायनं गायनकर्म्म तयोः। तथा गीतौ च । **गेयः** । त्रि० । गै--गायने । कर्तरि यत्प्रत्ययः । भावे कर्म्मणि वा यत्प्रत्ययः । "गेयन्तु गीते गेयः स्याद्गातव्ये गायने त्रिषु" इति मेदिनी ॥ अस्वैरी स्वैरभावरहितः । आयत्तः । पक्षः स्वपक्षः तयोः । तथा गृहासक्ते खगे । मृगे च मलद्वारे । वेदोदितकर्मप्रयोगज्ञापके गोभिलसूत्रादौ ग्रन्थभेदे । गृहभवे वस्तुनि । त्रि० । **गृह्यम्** । न० । ग्रह--ग्रहणे, आदाने च । क्यप्प्रत्ययः । गृहे भवो वा । यत्प्रत्ययः । "गृह्यं गुदे ग्रन्थभेदे क्लीबं शाखापुरे स्त्रियाम् । गृहासक्तौ मृगादौ ना त्रिषु चास्वैरिपक्षयोः" इति मेदिनी ॥ ३११ ॥ आयतने बुद्धादिवन्दनस्थाने । बुद्धबिम्बं बुद्धप्रतिमा, बुद्धविशेषो वा । उद्देशकः यज्ञस्थानम् । वृक्षः ग्रामादिप्रसिद्धो महावृक्षः, देवावासवृक्षो वा । तयोः । तद्वत् जनानां सभास्थतरौ। चिताचिह्ने । जनसभायाम् । जनानां विश्रामस्थाने । देवस्थाने च । **चैत्यम्** । न०।चित्याया इदमिति अण्प्रत्ययः।"चैत्यमायतने बुद्धबिम्बे नोद्देशपादपे" इति मेदिनी॥ सुभगे प्रियदर्शने । चक्षुर्हिते नयनयोर्हिते । स्त्री० । केतके केतकीवृक्षे । तत्पुष्पे । "कतके" इति क्वचित् पाठः। अपिशब्दात् पुण्डरीकवृक्षे । रसाञ्जने । शोभाञ्जने । सौवीराञ्जने स्थलपद्मे । खर्परीतुत्थे । न० । कुलत्थिकायाम् । सुभगायाम् । अजशृङ्गायाम् । वनकुलत्थिकायां च । स्त्री० । **चक्षुष्यम्** । न० । चक्षुषे हितः । यत् प्रत्ययः । "चक्षुष्यः केतके पुण्डरीकसंज्ञकपादपे । कुलत्थिकासुभगयोः स्त्रियामक्षिहितेऽन्यवत्" इति मेदिनी ॥३१२॥ युद्धे संग्रामे । हट्टे क्रयविक्रयस्थाने। प्रतिहट्टपथे घरट्टजात्" इति नैषधम् । चकारात् जायमाने । जनके । उत्पाद्ये । नवोढाज्ञातिमित्रभृत्यस्निग्धेषु । त्रि०। परीवादे । प्रीतौ । देहे । पु०।जनने । न० । मातृवयस्यायाञ्ज । स्त्री० । **जन्यम्** । त्रि०।स्यादित्यन्वयः । जन--जनने । कर्तरि यत्प्रत्ययः । अथवा । जन--जनने । णिच्यत्प्रत्ययौ । जनीं वधूं वहति नयति वा । यत् प्रत्ययश्च । "जन्यं हट्टे परीवादे संग्रामे च नपुंसकम्" इति मेदिनी । मौर्व्यां धनुषो गुणे।क्षितौ भूमौ।अपिशब्दात् मातरि च । **ज्या** । स्त्री०। स्यादित्यन्वयः। ज्या--जरायाम् । अङ्प्रत्ययः।"ज्या मातरि वसुधायां मौर्व्याम्" इति मेदिनी ॥ गुग्गुलुद्रौ गुग्गुलुतरौ । चकारात् स्वनामख्याते खगभेदे च। **जटायुः** । पु० । जटां याति या--गतौ । कुः प्रत्ययः । जट--संहतौ । अच्प्रत्ययः । जटं संहतमायुरस्य वा । कचित्तु "कूटायुः" इति पाठः । "जटायुः पुंसि सम्पातेः कनीयसि च गुग्गुलौ" इति मेदिनी। त्रिवेद्याम् ऋगादिवेदत्रये। "त्रयीव नीताङ्गगुणेन विस्तरम्" इति नैषधम् ।त्रितये त्रित्वस-

निन्द्ये वस्त्रगृहे दूष्यं दस्युस्तस्करवैरिणौ ।
भेषजे द्रुविकारे च द्रव्यं भव्ये च पित्तले ॥ ३१४ ॥
द्वितीया तिथिभित्पत्न्योः पार्थेऽग्नौ च धनञ्जयः ।
निकायौ सङ्घनिलयौ नित्ये सततशाश्वते ॥ ३१५ ॥
पर्यायः स्यात्प्रकारेऽपि प्रायो ना भूयतुल्ययोः ।
पथ्यं हितेऽभया पथ्या पानीयं पेयनीरयोः ॥ ३१६ ॥

ङ्ख्यायाम् । "ऋणत्रयमपाकृत्य" इति मनुः । स्त्रीत्वपक्षे "असौ नरशिखित्रयी" इति माघः। तथा त्रित्वसङ्ख्याविशिष्टे । त्रि० । ब्रह्मादिमूर्त्तित्रये । पुरन्ध्याम् । सुमतौ । सोमराजीवृक्षे च, **त्रयी** । स्त्री० । त्रयाणामवयवः । त्रयोऽवयवा येषां वा । अयच्प्रत्ययः । "त्रयी त्रिवेद्यां त्रितये न" इति मेदिनी ॥ ३१३ ॥ निन्द्ये निन्दनीये । वस्त्रगृहे वस्त्रनिर्मिते गृहे । तथा दूषणीये । त्रि० । "दूष्यं वचो मम पुनर्निपुणं विभाव्य" इति शिरोमणिः । कक्षायाम् । गजमध्यबन्धनरज्ज्वांच । स्त्री० । **दूष्यम्** । न०। दुष—वैकृत्ये । णिच्यत्प्रत्ययौ । "दूष्यं त्रिषु दूषणीये क्लीबं वस्त्रे च तद्गृहे" इति मेदिनी ॥ तस्करः चौरः । वैरी रिपुः । तयोः । तथा महासाहसिके च । **दस्युः** ॥ पु० । दस—उत्क्षेपे । युच्प्रत्ययः । नानादेशः । "दस्युश्चौरे रिपौ पुंसि" इति मेदिनी ॥ भेषजे औषधे । द्रुविकारे वृक्षविकारे । भव्ये योग्ये, भाविनि च । पित्तले ताम्रादिजाते धातुभेदे । चकारात् वित्ते । जतुनि । विनये । मद्ये । न्यायोक्तेषु पृथिव्यादिषु गुणवत्सु नवसु । व्याकरणोक्ते लिङ्गसङ्ख्यान्वयिनि पदार्थे । विलेपने । तत्सम्बन्धिनि च । **द्रव्यम्** । त्रि०। द्रु—गतौ । यत् प्रत्ययः । द्रोर्वृक्षस्य विकारः । तस्येदं वा । यतप्रत्ययः । "द्रव्यं तु पित्तले वित्ते पृथिव्यादौ विलेपने । क्लीबे च भेषजे भव्ये द्रुविकारे च वाच्यवत्" इति मेदिनी ॥ ३१४ ॥ तिथिभिद् चन्द्रस्य द्वितीयकला क्रियारूपस्थितिविशेषः । पत्नी ऊढा योषित् । तयोः । तथा द्वयोः पूरणे । द्वितीये भागे च । **द्वितीया** । स्त्री० पु० न० । द्वयोः पूरणः । तीयः प्रत्ययः । "द्वितीया तिथिभित्पत्न्योः पूरणे तूभयोस्त्रिषु" इति मेदिनी ॥ पार्थे अर्ज्जुने । अग्नौ । चकारात् नागभेदे । पोषणकरे देहव्यापिवायौ । ककुभवृक्षे । चित्रकवृक्षे च । **धनञ्जयः** । पु० । धनं जयति । जि—जये । खच्प्रत्ययः । मुमागमश्च । "धनञ्जयोऽर्ज्जुने वह्निनागभिद्देहमारुते" इति मेदिनी ॥ सङ्घः समानधर्मप्राणिसमूहः । निलयः निवासः । तयोश्च । **निकायः** । पु० । निपूर्वचि—चयने । घञ्प्रत्ययः कुत्वञ्च । "निकायस्तु पुमान् लक्षे सधर्मिप्राणसंहतौ" इति मेदिनी ॥ सततं निरन्तरम् । शाश्वतमन्वहं तयोः । तथा अहरहः क्रियमाणत्वेन विधिबोधिते । प्रत्यवायसाधनाभावप्रतियोगिनि कर्म्मणि । अविच्छिन्नपरम्पराके । उत्पत्तिविनाशरहिते । कालत्रयस्थे वस्तुनि । त्रि० । समुद्रे च । पु० । **नित्यम्** । न० । नियमेन नियतं वा भवम् । त्यप् प्रत्ययः । "नित्यं स्यात्सततेऽपि च । शाश्वते त्रिषु" इति मेदिनी ॥ ३१५ ॥ प्रकारे सादृश्ये । द्रव्यधर्म्मभेदे

पौलस्त्यौ रावणश्रीदौ स्वर्गलाभौ फलोदयौ ।
ब्राह्मण्यं ब्रह्मसङ्घेऽपि बालेयौ मृदुगर्दभौ ॥ ३१७ ॥
वीर्य्यं प्रधानधातौ च भयं भीकुब्जपुष्पयोः ।
अनधीनेऽसहाये च भुजिष्यौ हस्तसूत्रके ॥ ३१८ ॥

वा । अपिशब्दात् अनुक्रमे । अवसरे । निर्माणे । समानार्थबोधके शब्दे च । **पर्यायः ।** पु० । स्यादित्यन्वयः । परिपूर्वः इण—गतौ । घञ्प्रत्ययः । "अथ पर्यायः प्रकारेऽवसरे क्रमे"इति मेदिनी ॥ भूयः बाहुल्यः । तुल्यः सादृश्यः । तयोः तथा मृत्यौ । अनशनमृत्यौ च । "प्रायेण सामग्र्यविधौ च" इति कुमारः । **प्रायः ।** पु० । प्रपूर्वः अय—गतौ । इण—गतौ वा । घञ् प्रत्ययः । अच्प्रत्ययो वा । "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्योः"इति मेदिनी। हिते हित- कारके । अभया हरीतकी, तद्वृक्षो वा । तत्र । स्त्री० । तथा चिकित्सोपयोगिनि रोगसेव्ये वस्तुनि । वन्ध्याकर्कोट्याञ्च । **पथ्यम् ।** त्रि० । पथेचिकित्सानुसारिमार्गाय हितम् । यत्प्रत्ययः । "पथ्या स्त्री हरीतक्यां हिते त्रिषु" इति मेदिनी ॥ पेयं पातव्यम् । नीरं जलम् । तयोः । तथा रक्षितव्ये च । त्रि० । **पानीयम् ।** न० । पीयते यत् । पा—पाने । अनीयर्प्रत्ययः ।"पानी- यन्तु जले क्लीबं पातव्ये वाच्यलिङ्गकम्" इति मेदिनी ॥ ३१६ ॥ रावणः प्रसिद्धः । श्रीदः कुबेरः । तयोः । तथा शूर्पनखायाम् । स्त्री०। **पौलस्त्यः ।** पु० स्त्री०। पुलस्तस्याऽपत्यम्। यञ्प्रत्ययः । "पौलस्त्यस्तु कुबेरे स्याद्दशग्रीवेऽपि पुंस्ययम्" इति मेदिनी । स्वर्गः देवलोकः । लाभः फलोत्पत्तिः । प्राप्तौ वा । तयोः । तथा हर्षे च । **फलोदयः ।** पु० । फलस्य उदय इति षष्ठीतत्पुरुषः । "फलोदयः पुमान् लाभे त्रिदिवेशालयेऽपि च" इति मेदिनी । ब्रह्मसङ्घे विप्रसमूहे । अपिशब्दात् ब्राह्मणधर्म्मे । विप्रत्वे च । **ब्राह्मण्यम् ।** न० । ब्राह्मणानां समूहः । भावो वा । ष्यञ्प्रत्ययः । क्वचित्तु ब्राह्मण्यमिति पाठः । "ब्राह्मण्यं ब्राह्मणत्वे च समूहे च द्विजन्मनाम्" इति मेदिनी । मृदुः कोमलः । गर्दभः रासभः तयोः । तथा दैत्यभेदे । बालहिते । अङ्गारवल्लय्र्याञ्च । **बालेयः ।** पु० । बलेरपत्यं बलये हितं वा । ढक्प्रत्ययः । "बालेयो गर्दभे पुंसि मृदौ बालहिते त्रिषु"इति मेदिनी॥१३७॥प्रधानधातौ देहस्थे चरमधातौ शुक्रे । चका- रात् बले । पराक्रमे । प्रभावे । तेजसि । दीप्तौ च **वीर्य्यम् ।** न० । वीर—प्रयत्ने । यत्- प्रत्ययः । वीरस्य भावो वा । यत्प्रत्ययः । "वीर्य्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि" इति मेदिनी ॥ भीर्भीतिः । कुब्जपुष्पं कुब्जकप्रसूनं तयोः । तथा भयहेतौ । दैत्यात्मके । स्वानिष्ट- सम्भावनरूपे वा । चित्तवृत्तिभेदे । नाटकप्रसिद्धे रसभेदे च । **भयम् ।** न० । बिभेत्यस्मात् । भी—भये । अच्प्रत्ययः । "भयं प्रतिभये घोरे प्रसूने कुब्जकस्य च" इति मेदिनी ॥ अनधीने स्वतन्त्रे । असहाये दासे । हस्तसूत्रके करसूत्रे । चकारात् रोगे । दास्याम् । वेश्यायाञ्च । स्त्री० । **भुजिष्यः ।** पु० । भुज—भक्षणे । किष्यन्प्रत्ययः । "भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः"

स्यान्माया शाम्बरीबुद्धयोर्दैत्यशिल्प्युष्ट्रयोर्मयः ।
ययुरश्वे क्रतुहये रूप्यं त्रिषु सुरूपके ॥ ३१९ ॥
आहतस्वर्णरजते रजते च नपुंसकम् ।
वत्से बले बुधे रौहिणेयोऽथ श्लेषवाद्ययोः ॥ ३२० ॥
लयो युक्ते च लभ्यं स्याद्विषयौ देशगोचरौ ।
वर्गप्रस्थानयोर्व्रज्या वदान्यस्त्यागवान् सुवाक् ॥ ३२१ ॥

इति मेदिनी॥३१८॥शाम्बरी माया । बुद्धी बुद्धमाता शुद्धोदनराज्ञः महिषी। तयोः । तथा छद्मनि । कापट्ये । इन्द्रजालादौ । मिथ्या बुद्धिहेतुत्वज्ञानभेदे । कृपायाम् । दम्भे । लक्ष्म्याम् । ईश्वरस्योपाधौ अघटनघटनसाधिकायां शक्तौ च । **माया** । स्त्री० । स्यादित्यन्वयः । मा—माने । शब्दे वा । यः प्रत्ययः। नैत्वम् । "माया स्यात् शाम्बरीबुद्धयोः" इति मेदिनी ॥ दैत्यशिल्पी दानवभेदः। उष्ट्रः करभः। तयोः तथा अश्वतरे च । **मयः** । पु० । मय—गतौ । अच् प्रत्ययः। "मयः शिल्पिनि दैत्यानां करमेऽश्वतरेऽपि च" इति मेदिनी॥अश्वे हयमात्रे। क्रतुहये अश्वमेधीये तुरङ्गमे च।**ययुः**। पु० । या—गतौ । कुः प्रत्ययः। द्वित्वञ्च। "ययुः पुमानश्वमेधतुरङ्गे च तुरङ्गमे" इति मेदिनी ॥ सुरूपके सुन्दरे ॥ ३१९॥ आहतस्वर्णरजते अलङ्कारादिनिर्म्माणाय आहन्यमाने स्वर्णे रजते च । न० । रजते रजतमात्रे च । **रूप्यम्** । त्रि० । रूपाय आहन्यते स्वर्णादि । यत्प्रत्ययः । स्वार्थे यत्प्रत्ययश्च । "रूप्यं स्यात् सुन्दरे त्रिषु । आहतस्वर्णरजते रजते च नपुंसकम्" इति मेदिनी ॥ वत्से गोवत्से बले बलरामे बुधे बुधग्रहे । तथा मरकतमणौ च । न० । **रौहिणेयः** । पु० । रोहिण्यां भवः । ढक्प्रत्ययः । "रौहिणेयोऽन्यवद्वत्से ना बुधे च हलायुधे" इति मेदिनी ॥ अथ अनन्तरम् । श्लेषः संश्लेषः । विनाशो वा । वाद्यः नृत्यगीतवाद्यानामेकतारूपः साम्यः । तयोः । तथा । सर्वभूतक्षयकरे प्रलयकाले । ईश्वरे च । **लयः** । पु० । ली—श्लेषे । अच्प्रत्ययः । "लयो विनाशे संश्लेषे साम्ये तौर्यत्रिके मतम्" इति मेदिनी ॥३२०॥ युक्ते उचिते । मिलिते वा चकारात् लब्धव्ये च । **लभ्यम्** । न० । स्यादित्यन्वयः । लभ प्राप्तौ । क्यप्प्रत्ययः । "लभ्यं युक्ते च लब्धव्ये" इति मेदिनी ॥ देशः कुरुपञ्चालादयः प्रसिद्धजनपदाः । स्थानमात्रं वा । गोचरः इन्द्रियगोचरः शब्दादिः । तयोश्च । **विषयः** । पु०। विषिण्वन्ति स्वात्मकतया विषयिणं निरूपयन्ति सम्बध्नन्ति वा । विपूर्वः षि—बन्धे । अच्प्रत्ययः । "विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी ॥ वर्गः समानधर्मसमूहः । प्रस्थानं गमनं तयोः । तथा पर्य्यटने । जिगीषोर्युद्धार्थप्रयाणे च । **व्रज्या** । स्त्री० । व्रज—गतौ । संस्कारे च । क्यप्प्रत्ययः । "नृत्ये च व्रज्या प्रस्थाने वर्गे पर्यटनेऽपि च" इति मेदिनी ॥ त्यागवान् भूरिदानशीलः । सुवाक् सुन्दरवाची । तयोश्च । **वदान्यः** । पु०। वद—वाक्ये । अन्यः प्रत्ययः । पृषोदरादित्वात् साधुः । वा दीर्घः । "वदान्यो दानशौण्डे च चारु-

स्त्री मल्यां निर्जने शून्यं शौर्य्यं चारभटी बलम् ।
शाण्डिल्यो मुनिमालूरौ सौरभ्यं चारुताऽपि च ॥ ३२२ ॥
सौम्यो बुधग्रहे पुंसि वाच्यवन्नीचबोधने ।
साध्या देवाः फलं साध्यं स्थेयौ नेतृपुरोहितौ ॥ ३२३ ॥
ना शैले सह्यमारोग्ये सामर्थ्यं शक्तियोग्यते ।
एकद्यादौ विचारे च सङ्ख्या क्लीबे च संयुगे ॥ ३२४ ॥

वादिनि वाच्यवत्'' इति मेदिनी ॥ ३२१ ॥ मल्ल्यां मल्लिकायाम् । स्त्री० । कचित्तु नल्याम् इति पाठः । निर्जने जनाभावस्थाने । तथा आकाशे । बिन्दुमात्रे । अभावे । असम्पूर्णे । ऊने तुच्छे च । **शून्यम्** । त्रि० । शूनायै प्राणिवधाय हितं रहस्यस्थानत्वात् । यत्प्रत्ययः । "शून्यं स्यान्निर्जने वाच्यलिङ्गं नल्यान्तु योषिति'' इति मेदिनी॥ आरभटी नाट्यरचनाभेदः। बलं शक्तिः। तयोः।तथा वीर्य्ये च **शौर्यम्** । न०। शूरस्य भावः । ष्यञ्प्रत्ययः । "शौर्यमारभटी शक्त्यौ'' इति मेदिनी॥मुनिः गोत्रप्रवर्त्तकभक्तिशास्त्रकारको मुनिभेदः । मालूरः बिल्वः । तयोः । तथा वह्निभेदे च । **शाण्डिल्यः** । पु० । शण्डिलस्यापत्यम् । यञ्प्रत्ययः । "शाण्डिल्यः पावकान्तरे मुनिभेदे च मालूरे'' इति मेदिनी ॥ चारुता मनोहरता । तत्र च । अपिशब्दात् सौगन्धे । गुणगौरवे च । **सौरभ्यम्** । न० । सुरभेर्भावः । अण् प्रत्ययः । सुरभिरस्यास्तीति । अण्प्रत्ययो वा । "सौरभ्यन्तु मनोज्ञत्वे सौगन्धे गुणगौरवे'' इति मेदिनी ॥ ३२२ ॥ बुधग्रहे बुधे । नीचबोधने । त्रि० । तथा सोमदेवताके । स्त्री० । मनोहरे । प्रियदर्शने । अनुग्रे । वृषादिसमराशौ । उडुम्बरवृक्षे । सोमपायिनि विप्रे च । **सौम्यः** । पु० । सोमो देवतास्य ष्यण् प्रत्ययः । "सौम्यो ज्ञे ना त्रिष्वनुग्रे मनोज्ञे सोमदैवते'' इति मेदिनी ॥ देवाः द्वादशसङ्ख्यकाः गणदेवताः । यथा "मनो मन्ता तथा प्राणो नरोपानश्च वीर्य्यवान् । निर्भयो नरकश्चैव दंशो नारायणो वृषः । प्रभुश्चेति समाख्याताः साध्या द्वादश देवता'' इति । फलं साधनीयम् । तस्मिन् । त्रि० । तथा विष्कम्भादिषु योगेषु एकविंशे योगे । अष्टादशविवादेषु प्रमाणादिना उद्भाव्ये पदार्थे । व्यवहारे साधनार्हे प्रातज्ञेये पक्षे । पु० । यथा "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम् । निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः'' इति । अनुमित्या साधनीये वह्न्यादौ यथा वह्निमान् धूमात्'' इत्यादौ सिषाधयिषितः वह्निः साध्यः संस्कार्ये तन्त्रोक्ते मन्त्रमात्रे । ग्राह्यमन्त्रस्य स्वानुकूलता ग्राहकचक्रस्थे द्वितीयपञ्चमादिके । "सिद्धिः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनीषिभिः'' इत्युक्तेः मन्त्रभेदे च । **साध्या** । स्त्री० । सिध--सिद्धौ । पु० । णिच् यत्प्रत्ययौ । "साध्यो योगान्तरे शरे । गणदेवविशेषे च साधनीये तु वाच्यवत्'' इति मेदिनी ॥ नेता विवादे संशयनिर्णायकः । पुरोहितः प्रसिद्धः । कचित् पुरोधः इति पाठः । तयोः । तथा स्थिरे च । **स्थेयः** । पु० । स्थीयते विवादनिर्णायकतयाऽसौ । स्था--गतिनिरोधे । यत्प्रत्ययः । "स्थेयो विवादपक्षस्य निर्णेतरि पुरोहिते'' इति मेदिनी ॥ ३२३ ॥ शैले पुन्नाख्यदेशसमीपस्थे पर्वतभेदे । पु० । आरोग्ये । तथा साहाय्ये ।

हिरण्यं रेतसि स्वर्णे मानभेदे वराटयोः ।
उरस्यपि च बुक्कायां हृदयं मानसेऽपि च ॥ ३२५ ॥
इति यान्ताः ॥
अङ्कुरो रोम्णि रुधिरे वारिण्यभिनवोद्भिदि ।
अमरा नाभिनालायां गुडूच्यामप्यथाम्बरम् ॥ ३२६ ॥
नाकेऽतिगन्धद्रव्ये च स्यादस्रं रुधिराश्रुणोः ।
प्रस्तावेऽवसरो वर्षे चौष्ठे नीचेऽपि चाधरः ॥ ३२७ ॥

"तत्रार्थे सह्यमकरोत्" इति पुराणम् । साम्ये माधुर्य्ये । सोढव्ये । त्रि० । **सह्यम्** । न० । सहायस्य भावः । यत्प्रत्ययः । निपातनात् साधुः । कर्म्मणि यत्प्रत्ययो वा । "सह्यं शैलान्तरे पुमान् । सोढव्ये वाच्यलिङ्गः स्यादारोग्ये तु नपुंसकम्" इति मेदिनी ॥ शक्तिर्देहजं बलम् । योग्यता । उचितत्व तयोः । तथा सङ्गतार्थतायाञ्च । **सामर्थ्यम्** । न० । समर्थस्य भावः ष्यञ् प्रत्ययः । "सामर्थ्यं योग्यतायां स्याच्छक्तावपि नपुंसकम्" इति मेदिनी ॥ एकद्वयादौ द्रव्याश्रिते एकत्वद्वित्वादौ गुणभेदे । स्त्री० । विचारे तत्त्वनिर्णये । संयुगे युद्धे । चकारात् बुद्धौ च । **सङ्ख्या** । स्त्री० । न० । सङ्ख्यायते परम्परनामोच्चारणं क्रियतेऽत्र । सम्पूर्वः ख्या—कथने । घञर्थे कः प्रत्ययः । "सङ्ख्यं समिति सङ्ख्या स्यादेकद्वयादिविचारयोः" इति मेमिनी ॥ ३२४ ॥ रेतसि शुक्रे । स तु पुंसो रक्तादिपरिपाकजन्यो देहस्थो मज्जहेतुकश्चरमधातुः । स्वर्णे कनके । मानभेदः परिमाणविशेषः । वराटः खर्परः तयोः । तथा धुस्तूरे । अक्षये । द्रव्ये । अकुप्ये । रजते । धने च । **हिरण्यम्** । न० । हिरणमेव स्वार्थे यत्प्रत्ययः । "हिरण्यं रेतसि द्रव्ये, शातकुम्भवराटयोः । अक्षये मानभेदे च स्यादकुप्ये नपुंसकम्" इति मेदिनी । उरसि वक्षसि । बुक्कायां हृदयस्थे मांसपिण्डे । मानसे मनसि । अपिशब्दात् परब्रह्मणि च । "हृदयं तस्माद्धृदयम्" इति श्रुतिः । **हृदयम्** । न० । हृ—हरणे । कयन्प्रत्ययः । दुगागमश्च । हृत् एति इण—गतौ । अच्प्रत्ययो वा । "हृदयं मानसे बुक्कोरसोरपि नपुंसकम्" इति मेदिनी ॥ ३२५ ॥ इति यकारान्ताः समाप्ताः ॥ अथ रान्तानाह ॥ रोम्णि देहजाते अङ्कुराकारे केशतुल्ये पदार्थे लोम्नि । रुधिरे शरीरस्थे रसपाकजन्ये धातुभेदे । वारिणि जले । अभिनवः । बीजादभिनवोत्पन्नः । उद्भिद् मृत्तिकामुद्भिद्य जातस्तृणवृक्षादिः । तयोश्च । **अङ्कुरः** । पु० । न० । अङ्क—सङ्ख्याकरणे । चिह्नयुक्तकरणे च । उरच्प्रत्ययः । "अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि" इति मेदिनी ॥ नाभिनालायां जरायौ दूर्वायाम् । गुडूच्यां छिन्नरुहायाम् । सा हि छिन्नाऽपि पुनः पुनः प्ररोहति सहसा न म्रियते अपिशब्दात् स्थूणायाम् । देवनगर्याममरावत्याम् । घृतकुमार्य्याम् । वटवृक्षे च । **अमरा** । स्त्री० । मृ—मृतौ । पचाद्यच् प्रत्ययः । नञ्तत्पुरुषः । "अमरस्त्रिदशेऽप्यस्थिसंहारे कुलिशद्रुमे । स्त्रीगुडूच्यमरावत्योः स्थूणादूर्वाजरायुषु" इति मेदिनी ॥ अथ अनन्तरार्थवाची ॥ ३२६ ॥ नाके स्वर्गे ।

श्रेष्ठेऽप्यग्रोऽवतारस्तु तीर्थेऽवतरणेऽपि च ।
गलहस्तेऽप्यर्धचन्द्रोऽकूपारः कमठेऽम्बुधौ ॥ ३२८ ॥
अलातेऽस्त्री कुजेऽङ्गारः श्रेष्ठा वाच्यावनुत्तरौ ।
नक्रे चौरे चावहारः स्यादभ्रं व्योममेघयोः ॥ ३२९ ॥

आकाशे वा । अतिगन्धद्रव्ये स्वनामाख्यातगन्धद्रव्ये । चकारात् मर्म्मरशब्दयुक्ते वस्त्रे । अभ्रकधातौ च । **अम्बरम्** । न० । अबि—शब्दे । घञ्प्रत्ययः । अम्बः शब्दस्तं राति धत्ते अम्बशब्दोपपदात् रा—दाने । ग्रहणे वा । कः प्रत्ययः । "अम्बरं न द्वयोर्व्योम्नि सुगन्ध्यन्तरवस्त्रयोः" इति मेदिनी ॥ रुधिरं रक्तम् । अश्रुश्चक्षुर्जलम् । तयोश्च । **अस्रम्** । न० । अश्नुते नेत्रं कण्ठं वा । अश—संहतौ । व्याप्तौ वा । रक्प्रत्ययः । क्वचित्तु अस्रमिति दन्त्यसकारपाठश्च । "अस्रः कोणे कचे पुंसि क्लीबमश्रुणि श्रोणिते" इति मेदिनी ॥ प्रस्तावे प्रसङ्गे । वत्सरे च । चकारात् जिज्ञासानिवृत्तये अवश्यवक्तव्ये । वर्षणे मन्त्रभेदे । क्रियास्थितियोग्यतासम्पादकरूपे कालिकेऽवकाशे च । **अवसरः** । पु० । अवपूर्व—सृ—गतौ । अच्प्रत्ययः । "अथाऽवसरः पुमान् । प्रस्तावे मन्त्रभेदे च वर्षणे चाऽपि कीर्त्तितः" इति मेदिनी॥ओष्ठे दशनच्छदे । नीचे । अपिशब्दात् हीने । ऊर्ध्वे । तले च। **अधरः**। पु०। न ध्रियते। धृङ्—धारणे। अच्प्रत्ययः । नादितत्पुरुषः।"अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वे तु वाच्यवत्"इति मेदिनी ॥ ३२७॥ श्रेष्ठे अतिशयप्रशस्ते । अपिशब्दात् प्रधाने । अधिके । उपरिभागे शेषभागे । आलम्बने । पूर्वभागे । पलपरिमाणे । समूहे । प्रथमे च। त्रि०। **अग्रः** । पु०। न०। अङ्ग—चिह्नयुक्तकरणे। रक्प्रत्ययः । नलोपः।"अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम्" इति मेदिनी ॥ तीर्थे पुष्करिण्यादेः सोपानपद्धतौ । अवतरणे नद्यादेरवरोहणे । अपिशब्दात् देवानामंशावेशवशेन प्रादुर्भावे च । **अवतारः** । पु० । अवपूर्वः तॄ—तरणे । करणे घञ्प्रत्ययः । भावे घञ्प्रत्ययो वा । "अवतारोऽवतरणे पुष्करिण्यादितीर्थयोः" इति मेदिनी ॥ गलहस्ते अपसारणार्थं गलेर्पिते हस्ते । अपिशब्दात् चन्द्रस्यार्द्धे । तदकारे नखक्षते । बाणभेदे । स्त्रीणां तिलकभेदे च । कृष्णत्रिवृति । स्त्री० । **अर्द्धचन्द्रः** । पु० । अर्द्धं चन्द्रस्य एकादितत्पुरुषः । "अर्द्धचन्द्रो नखक्षते । गलहस्ते बाणभेदे कृष्णत्रिवृति तु स्त्रियाम्" इति मेदिनी । कमठे कच्छपे । अम्बुधौ समुद्रे । तथा महापारे समुद्रे । दूरपारे सूर्य्ये च । **अकूपारः** । पु० । न कूपपूर्व ऋ—गतौ । अण्प्रत्ययः । नकुपूर्वः पॄ—पूर्तौ । अण्प्रत्ययो वा । दीर्घः । "उपलादावकूपारः कूर्म्मराजे महोदधौ" इति मेदिनी ॥३२८ ॥ अलाते अर्द्धदग्धे अग्निसङ्क्रान्ते अग्निशून्ये वा काष्ठखण्डे । कुजे मङ्गलग्रहे । तथा रक्तवर्णे च। **अङ्गारः**। पु०। न०। अङ्ग—गतौ । आरण् प्रत्ययः । "अङ्गारमुल्मुके न स्त्री पुँल्लिङ्गस्तु महीसुते" इति मेदिनी ॥ श्रेष्ठः अत्यन्तप्रशस्तः । अवाच्यः उत्तरवाक्यरहितः । तयोः । तथा उत्तरभिन्ने च । स्त्री० । **अनुत्तरः** । त्रि०। नयादिपञ्चमीबहुव्रीहिः, षष्ठीबहुव्रीहिर्वा । नञ्तत्पुरुषश्च । "अनु-

हविर्वह्नी चाऽग्निहोत्रौ वृक्षे लघुनि चाऽगुरुः ।
शक्तो निरण्डश्चाण्डीरावङ्घ्रिः स्यात्पादमूलयोः ॥ ३३० ॥
आसारः स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले ।
आरः शनैश्चरे भौमे इन्द्र आत्मनि वासवे ॥ ३३१ ॥
गौरीश्वरी शिवस्वामिकन्दर्पेष्वीश्वरः पुमान् ।
उदारौ दक्षिणस्थूलौ द्रुमे मेढ्रेऽप्युदुम्बरः ॥ ३३२ ॥

त्तरं त्रिषु श्रेष्ठे प्रतिजल्पविवर्जिते'' इति मेदिनी ॥ नक्रे ग्राहनामके जलजन्तुभेदे । चौरे तस्करे । चकारात् युद्धादिविश्रामे । निमन्त्रितविप्रादिभ्यो देये द्रव्ये च । **अवहारः** । पु० । अवपूर्वः हृ—हरणे । कर्तरि णप्रत्ययः । भावे कर्मणि च । घञ्प्रत्ययः । ''अवहारः पुमान् चौरे द्यूतयुद्धादिविश्रमे''इति मेदिनी॥ व्योम आकाशः । मेघो जलधरः। तयोः । तथा स्वर्णे धातुभेदे च । **अभ्रम्** । न० । स्यादित्यन्वयः । अभ्र— गतौ । अच्प्रत्ययः । ''अभ्रं मेघे च गगने धातुभेदे च काञ्चने'' इति मेदिनी ॥३२९॥ हविर्मन्त्रकरणकवह्निस्थापनपूर्वकहोमादिः । वह्निः । अग्निहोत्रोऽग्निहविषोः'' इति मेदिनी ॥ स्वनामाख्याते अगुरुचन्दने । अग्निहोत्रसम्बन्धित्वात् वह्निः । तयोश्च । **अग्निहोत्रः** । पु० । अग्नौ हूयतेऽत्र । हु—होमे । अदने चात्रः प्रत्ययः । शिंशपावृक्षे । लघुनि गुरुभिन्ने । चकारात् उपदेशकशून्ये च । त्रि० । **अगुरुः** । न गुरुर्यस्मादिति । नञ्बहुव्रीहिः । ''अगुरु क्लीबं जोङ्गकशिंशपयोर्वाच्यवल्लघुनि'' इति मेदिनी ॥ शक्तः समर्थः ॥ निरण्डः पुरुषः । अनिरण्ड इति क्वचित् पाठः । तयोः । अपिशब्दात् पुरुषावयवे च । **अण्डिरः** । पु० । अण्डः पुमवयवभेदः अस्त्यस्येति । अण्डशब्दात् ईरन्प्रत्ययः । ''अण्डीरः पुरुषे शक्ते'' इति मेदिनी । ''अण्डीरः शक्तनरयोः'' इति हैमः । पादश्चरणम् । मूलं वृक्षादेर्मू[illegible] तयोश्च । **अङ्घ्रिः** । पु० । अघ—गतौ । क्रिः प्रत्ययः । ''अङ्घ्रिर्ना पादमूलयोः'' इति मेदिनी ॥ ३३० ॥ प्रसरणे प्रकृष्टगमने । वेगवृष्टौ धारासम्पाते । सुहृद्बले मित्ररूपे सैन्ये । तथा सैन्यानां सर्वतो व्याप्तौ च । **आसारः** । पु० । आपूर्वः सृ—गतौ । घञ्प्रत्ययः । ''आसारः स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले'' इति मेदिनी ॥ शनैश्चरे । शनिग्रहे । भौमे मङ्गलग्रहे । तथा मधुराम्लफले वृक्षभेदे । पित्तले । कोणे । प्रान्तभागे । मुण्डलोहे च । न० । **आरः** । पु० । ऋ—गतौ । घञ्प्रत्ययः । ''आरा चर्म्मप्रभेदिन्यां पुंसि भौमे शनैश्चरे'' इति मेदिनी ॥ आत्मनि मनसि । देहे वा । वासवे देवाधिपे । तथा [illegible]रमेश्वरे । इन्द्रदैवते ज्येष्ठानक्षत्रे । द्वादशार्कमध्ये अर्कभेदे । कुटकवृक्षे च । **इन्द्रः** । पु० । इदि—ऐश्वर्ये । [illegible]रः प्रत्ययः ''इन्द्रः शक्रादित्यभेदे योगभेदान्तरात्मनि'' इति मेदिनी ॥ ३३१ ॥ ईश्वरी पार्वती । तत्र । ''शङ्खेन्दुकुन्दधवला ततो गौरी तु सा मता'' इति । तथा अष्टवर्षायामसञ्जातरजस्कायां कन्यायाम् । ''अष्टवर्षा भवेद्गौरी'' इति । हरिद्रायाम् । दारुहरिद्रायाम् । गोरोचनायाम् । प्रियङ्गौ । भूमौ । नदीभेदे । मञ्जिष्ठायाम् । श्वेतदूर्वायाम । मल्लिकायाम् । तुलस्याम् ।

उग्रोऽन्त्यजे शिवेऽत्युच्चे उस्रो दीप्तौ गवि स्त्रियाम् ।
सिंहजटासु पुन्नागे बकुले नागकेशरे ॥ ३३३ ॥
केशरः पुंसि किञ्जल्के न स्त्री हिङ्गुनि न द्वयोः ।
मक्षिकायामपि क्षुद्रा क्षुद्रः स्यात्कृपणे त्रिषु ॥ ३३४ ॥

सुवर्णकदल्याम् आकाशमांस्याम् । रागिणीभेदे च । **गौरी** । स्त्री० । गौरशब्दात् ङीप् च । "गौरी त्वसञ्जातरजःकन्याशङ्करभार्ययोः" इति मेदिनी ॥ शिवः महादेवः। स्वामी पतिः । कन्दर्पः अनङ्गः । तेषु । बहुवचनात् आढ्ये । स्वामिनि च । त्रि० । **ईश्वरः** । पु० । ईश--ऐश्वर्ये । वरच्प्रत्ययः । "ईश्वरो मन्मथे शम्भौ नाऽढ्ये स्वामिनि वाच्यवत्" इति मेदिनी ॥ दक्षिणः सर्वनायिकासु समानुरागे नायकभेदे । स्थूलः महान् । तयोः। तथा दातरि । सरले । गम्भीरे । असाधारणे च । **उदारः** । त्रि० । उद्आपूर्वः रा-दाने। ग्रहणे च । कः प्रत्ययः। "उदारो दातृमहतोर्दक्षिणे चाऽभिधेयवत्" इति मेदिनी ॥ द्रुमे यज्ञाङ्गे वृक्षे । मेढ्रे पण्डके । अपिशब्दात् ताम्रे । ग्रहावग्रहण्यां देहल्याम् । कुष्ठभेदे च । न० । **उदुम्बरः** । पु० । उं शम्भुं वृणोति । वृ-वरणे । खश् प्रत्ययः । उम्बरः उत्कृष्ट उम्बरः पृषोदरादित्वात् साधुः । "उदुम्बरस्तु देहल्यां वृक्षभेदे च पण्डके । कुष्ठभेदेऽपि च पुमान् ताम्रे तु स्यान्नपुंसकम्" इति मेदिनी ॥ ३३२ ॥ अन्त्यजे क्षत्रियात् ऊढायां शूद्रायामुत्पन्ने संकीर्णवर्णे । "रजकश्चर्म्मकारश्च नटो वरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः" इति ॥ शिवे महादेवे । तथा वायुमूर्तिधारिणि शिवे । उग्रगुणत्वात् शोभाञ्जनवृक्षे । केरलदेशे । क्रूरसंज्ञके । "उग्रः पूर्वमघान्तका" इति ज्यौतिषोक्ते नक्षत्रसमुदाये । वत्सनाभाख्ये विषे । न० । उत्कटे । त्रि० । वचायाम् । यवान्याम् । कन्याके । उग्रजातेः स्त्रियाञ्च । स्त्री० । **उग्रः** । पु० । उच-समवाये । रक्प्रत्ययः । गश्चान्तादेशः । "उग्रः शूद्रासुत क्षत्राद्रुद्रे पुंसि त्रिपूत्कटे । स्त्री वचाक्षुद्रयोरुग्रा कर्कर्यां करभे पुमान्" इति मेदिनी ॥ अत्युच्चे उच्चतरे । दीप्तौ किरणे । सूर्य्यकिरणानां जलहेतुत्वात् रसवत्त्वम् । गवि वृषे । स्त्री० । तथा सुरभ्याम् । उपचित्रायाञ्च । स्त्री० । **उस्रः** । पु० । वसन्ति रसा अत्र । वस--निवासे । रक्प्रत्ययः । सम्प्रसारणञ्च । "उस्रो वृषे च किरणेऽप्युस्राऽर्जुन्युपचित्रयोः" इति मेदिनी ॥ सिंहजटासु सिंहस्कन्धस्थायां जटायाम् । बहुवचनप्रयोगात् अश्वस्कन्धस्थेषु केशेषु च क्वचित्तु सिंहसटासु इति पाठः । पुन्नागे स्वनामख्याते वृक्षे । बकुले वकुलवृक्षे । नागकेशरे स्वनामाख्याते पुष्पवृक्षे । पु० ॥ ३३३ ॥ किञ्जल्के । पु० न० । हिङ्गुनि । रामठे । निर्य्यासभेदे । न० । तथा हिङ्गुले । नीलकेशरवृक्षे । सुरानामगन्धद्रव्ये च । **केशरः** । पु० । के जले शीर्यते शॄ हिंसने भेदने च । अप्प्रत्ययः । एवं दन्त्यसकारान्तशब्दोऽपि एतेष्वर्थेषु दृश्यते । "केशरं हिङ्गुलं क्लीबं किञ्जल्के न स्त्रियां पुमान् । सिंहसटायां पुन्नागे बकुले नागकेशरे" इति मेदिनी ॥

कद्रुस्त्रिषु कडारे स्यात्कद्रुः स्त्री नागमातरि ।
नापितस्योपकरणे कोकिलाक्षेऽपि च क्षुरः ॥ ३३५ ॥
भस्मकाचरसाः क्षाराः कारुः कारकशिल्पिनोः ।
कर्बुरो राक्षसे पापे कर्बुरं शबले जले ॥ ३३६ ॥
कारे पीडा बन्धशाले क्रूरौ कठिनभीषणौ ।
जम्बुद्वीपसहाकन्याः कुमार्योऽथाश्ववारके ॥ ३३७ ॥

मक्षिकायां मक्षिकामात्रे । अपिशब्दात् वेश्यायाम् । कण्टकार्याम् । सरघायाम् । चाङ्गेर्य्याम् । हिंसायाम् । गवेधुकायाञ्च । **क्षुद्रा** । स्त्री० । क्षुद—प्रेषणे । रक्प्रत्ययः । "क्षुद्रा व्यङ्गानटी-कण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंसामक्षिकामात्रयोरपि" इति मेदिनी ॥ कृपणे व्यय-कुण्ठे । त्रि० । तथा नीचे । क्रूरे । दरिद्रे । अल्पे । मूलग्राहिणि च । **क्षुद्रः** । त्रि० । स्या-दित्यन्वयः । क्षुद—प्रेषणे । रक्प्रत्ययः । क्षुद्रः स्यादधमे क्रूरकृपणाल्पेषु वाच्यवत्" इति मेदिनी ॥ ३३४ ॥ कडारे पिङ्गलवर्णे । तद्वति । नागमातरि । स्त्री० । तथा कश्यपपत्न्याम् । **कद्रुः** । पु० । कद—विह्वलीभावे, वैक्लवे च । रुः प्रत्ययः । "कद्रुस्त्रिषु स्वर्णपिङ्गे नागानां मातरि स्त्रियाम्" इति मेदिनी ॥ नापितस्य क्षुरकर्म्मकारकस्य उपकरणे क्षुरकर्म्मादिभाण्डसमूहे अस्त्रे च । कोकिलाक्षे स्वनामाख्याते वृक्षभेदे । अपिशब्दात् गोक्षुरे । महापिण्डीतके । बाणे । पश्वादीनां शफे च । **क्षुरः** । पु० । क्षुर—विलेखने । कः प्रत्ययः । क्षु—क्षुतौ । रक्प्रत्ययो वा । "क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे" इति मेदिनी ॥३३५॥ भस्मदग्धगोमया-दिविकारः । काचः क्षारजातमृत्तिकाभेदः । रसः क्षार इति नाम्नाख्यातो रसः । तेषु । तथा लवणे । गुडे । धूर्त्ते । टङ्कणे । यवक्षारे । विड्लवणे । सर्जिकाक्षारे च । **क्षारः** । पु० । क्षर—सञ्चलने । रः प्रत्ययः । "क्षारे रसान्तरे धूर्त्ते लवणे काचभस्मनोः" इति मेदिनी । कारकः करण-शीलः । शिल्पी चित्रादिकर्म्मकरः । तयोः । तथा विश्वकर्म्मणि च । **कारुः** । त्रि० । कृ—करणे । उण्प्रत्ययः । "कारुर्विश्वकर्म्मणि ना त्रिषु कारकशिल्पिनोः" इति मेदिनी ॥ राक्षसे । पापे शठयाम् । शबले कर्बुरवर्णे । जले सलिले । न० । क्वचित् जने इति पाठः । तथा स्वर्णे । हरिताले च । न० । **कर्बुरः** । पु० । कर्ब—गतौ । उरः प्रत्ययः । "कर्बुरः सलिले हेम्नि कर्ब्बुरः पापरक्षसोः" इति मेदिनी ॥ क्वचित् कर्बूर इति दीर्घोकारान्तपाठो दृश्यते । तस्यार्थोऽप्येवम् ॥ ३३६ ॥ पीडा व्यथा । बन्धशाला बन्धनागारम् । तयोः । तथा बन्धने । दूत्याम् । वीणाधःस्थकाष्ठमयदण्डे । सुवर्णकारिकायाञ्च । **कारा** । स्त्री० । कृ—हिंसने । भिदादित्वात् अङ्प्रत्ययः । निपातनात् दीर्घश्च । "कारा दूत्यां प्रसेवके । बन्धने बन्धनागारे हेमकारिकयोरपि" इति विश्वः । कठिनः निष्ठुरः । भीषणः निर्दयः, घोरो वा । तयोः । तथा परद्रोहकारिणि । नृशंसे । उष्णे । रक्तकरवीरे । श्येनखगे । कङ्कपक्षिणि । ज्योतिषोक्ते रविकुजशनिराहुकेतुरूपे ग्रहे । पूर्वात्रयभरणीमघारूपे नक्षत्रे च **क्रूरः** । त्रि० ।

बालके कार्त्तिकेये च कुमारो भर्तृदारके।
कलिकारस्तु धूम्याटे करञ्जे पीतमस्तके ॥ ३३८ ॥
सिद्धस्थानेऽपि च क्षेत्रं कर्करौ दृढदर्पणौ ।
शिंशपायां कृष्णसारः स्नुह्याश्चाऽथोत्पलेऽपि च ॥ ३३९ ॥
कर्णपूरः कुबेरस्तु नन्दीवृक्षैकपिङ्गयोः ।
शट्याश्च शूकशिम्ब्याश्च कच्छूरा पामने त्रिषु ॥ ३४० ॥

कृत–छेदे, वेष्टे वा । रक्प्रत्ययः । धातोः क्रूआदेशश्च । "क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेय वत्" इति मेदिनी । जम्बुद्वीपः प्रसिद्धः। सहा घृतकुमारी । कन्या अनूढा।"सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते" इति । एतेषु । तथा नवमल्लिकायाम्। अपराजितायाम्। वन्ध्याकर्कोटयाम् । स्थूलैलायाम् । नदीभेदे । श्यामापक्षिणि च । **कुमारी** । स्त्री०। कुमारशब्दात् ङीप्प्रत्ययः । "कुमारी शैलतनया नवमाल्योर्नदीभिदि । सहाऽपराजिताकन्याजम्बुद्वीपेषु च स्त्रियाम्" इति मेदिनी ॥ अथ अनन्तरार्थद्योतकः । अश्ववारके अश्वारोहिणि ॥ ३३७ ॥ बालके पञ्चवर्षीये बालके । कार्त्तिकेये स्कन्दे । भर्तृदारके नाटयोक्तौ राजकुमारे, युवराजे वा । चकारात् शुके पक्षिणि । सिन्धुनदे । वरुणवृक्षे च । **कुमारः** । पु० । कुमारयति क्रीडयति, कौमारयति दुष्टान् वा । कुमार–केलौ । अच्प्रत्ययः । कुत्सितो मारो यस्मादिति । "कुमारः स्याच्छुके स्कन्दयुवराजेऽश्ववारके । बालके वरुणद्रौ ना न द्वयोर्जात्यकाञ्चने" इति मेदिनी ॥ धूम्याटे स्वनामाख्याते पक्षिणि । करञ्जे पूतिकरञ्जे । पीतमस्तके पीतवर्णमस्तकयुक्ते च। **कलिकारः**। पु०। कलिं करोति । कृ–करणे । अण् प्रत्ययः । "कलिकारस्तु धूम्याटे करञ्जे पीतमस्तके" इति मेदिनी॥३३८॥सिद्धस्थाने पुण्यफलसाधनयोग्यस्थाने । अपिशब्दात् इन्द्रिये । देहे । अन्तःकरणे । इन्द्रियादिसङ्घाते । "इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः । इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः" । एतत्क्षेत्रमिति परिरुक्तम् । सस्याद्युत्पत्तिस्थाने केदारे । कलत्रे । मेषादिद्वादशराशिषु च । **क्षेत्रम्** । न०। क्षि–गतौ, हिंसायां वा । ष्ट्रन्प्रत्ययः । "क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति मेदिनी ॥ दृढः कठिनः । दर्पणः आदर्शः । तयोः । तथा चूर्णपाषाणखण्डे कङ्करे । मुद्गरे च । **कर्करः**। पु० । कर्क–हासे । अरन्प्रत्ययः । कर्कं हासं राति । रा–आदाने । कः प्रत्ययो वा । "कर्करो भाण्डभेदे ना दर्पणे कठिने त्रिषु"इति मेदिनी॥ शिंशपायां शिंशपावृक्षे । स्नुह्यां स्नुहीवृक्षे । चकारात् मृगविशेषे च । **कृष्णसारः** । पु० । कृष्णः सारोऽस्येति बहुव्रीहिः।"कृष्णसारा शिंशपायां पुंसि स्नुह्यां मृगान्तरे" इति मेदिनी ॥ अथ अनन्तरार्थवाची । उत्पले नीलोत्पले । अपिशब्दात् कर्णाभरणे । एतेषां पुष्पैः स्त्रीकर्णस्य [illegible] इति लोकोक्तिः । शिरीषवृक्षे । अशोकवृक्षे च । **कर्णपूरः** । पु० । कर्णं पूरयति । पूर–पूर्तौ, प्रीणने च । अण्प्रत्ययः । "कर्णपूरः शिरीषे स्यान्नीलोत्पलवतंसयोः" इति मेदिनी ॥ ॥ ३३९ ॥ नन्दीवृक्षः । एकपिङ्गः यक्षराजः । स हि साभूयं गौरीं निरीक्ष्य तच्छापात् नष्ट-

कन्दरः स्याद्गुहासृण्योः कोट्टारौ कूपनागरौ।
कदरः क्रकचे रोगे कदरः खदिरे सिते॥ ३४१॥
कट्वरं कुत्सिते तक्रे किर्म्मीरौ शबलासुरौ।
कपाले च कटाहे च शस्त्रभेदे च कर्परः॥ ३४२॥
भिक्षापात्रे कपाले च खर्परस्तस्करेऽपि च।
देवताडे खरा स्त्री स्यात्खरो गर्द्दभतीक्ष्णयोः॥ ३४३॥

नेत्रो जातः। पुनः शिवप्रसादात्तच्चक्षुषः पिङ्गलत्वं जातम् इति पुराणकथा। तयोः। कुशरीरे कुत्सिते शरीरे। "कुत्सायां क्विति शब्दोऽयं शरीरं वेरमुच्यते। कुबेरः कुशरीरत्वात्" इत्यवर्ग्यमध्योप्ययम्। कुवेर इति च। चकारात् मन्दे च। **कुबेरः**। पु० कुम्बति धनम्। कुबि—स्तुतौ। ऐरक्प्रत्ययः। कुत्सितं बेरं देहोऽस्येति बहुव्रीहिर्वा। "कुबेरः स्यात् पुंसि नन्दिवृक्षे पुण्यजनेश्वरे" इति मेदिनी॥ शट्यां स्वनामाख्याते औषधभेदे, गन्धशट्यां वा। शूकशिम्ब्यां कपिकच्छ्वाम्। पामने पामनरोगवति च। त्रि०। **कच्छूरा**। स्त्री०। कच्छूं राति ददाति। रा—आदाने। कः प्रत्ययः। "कच्छूरा शूकशिम्ब्याञ्च शटीदुःस्पर्शयोरपि" इति मेदिनी॥ ॥ ३४०॥ गुहा गह्वरम्, गुहाकारगिरिनितम्बदेशो। वा सृणिः अङ्कुशः। तयोः। तथा आर्द्रके। न०। **कन्दरः**। पु०। स्त्री०। कं जलेन दीर्यते। कम्शब्दोपपदः दृ—आदरे। अच्प्रत्ययः। "कन्दरस्त्वङ्कुशे पुंसि गुहायान्तु नपुंसकम्" इति मेदिनी॥ कूपः स्वनामाख्यातो जलाधारगर्त्तः। नागरः प्रसिद्धः। तयोः। तथा पुष्करिण्याः पाटके च **कोट्टारः**। पु०। कुट्ट—प्रतापने। आरक्प्रत्ययः। पृषोदरादित्वात् साधुः। "कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके" इति मेदिनी॥ क्रकचे ग्रन्थिलाख्ये वृक्षे, करपत्रे वा। रोगे रोगभेदे, क्षुद्ररोगे वा। सिते खदिरे श्वेतखदिरे च। **कदरः**। पु०। कं जलं द्रुणोति। द्रु—वधे। पचादित्वात् अच्प्रत्ययः। "कदरः श्वेतखदिरे क्रकचव्याधिभेदयोः" इति मेदिनी॥ ३४१॥ कुत्सिते मलिने। तक्रे चतुर्थांशजलयोगेन मथिते दध्नि। तथा दधिसारे व्यञ्जने च। **कट्वरम्**। न०। कट—गतौ, वर्षणे च। ष्वरन्प्रत्ययः। क्वचित् कच्चरमिति पाठः। "कच्चरं कुत्सिते तक्रे" इति विश्वः। कच्चरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम्" इति मेदिनी॥ शबलः कर्बुरवर्णः, चित्रवर्णो वा। त्रि०। असुरः राक्षसभेदः। तयोः। तथा नागरङ्गे च। **किर्म्मीरः**। पु०। कॄ—हिंसने, विक्षेपे वा। ईरन्प्रत्ययः। कित्, मुडागमश्च। "किर्म्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे" इति मेदिनी॥ कपाले शीर्षोर्द्धास्थिनि। कटाहे तैलादेः पाकसाधनपात्रे। शस्त्रभेदे अस्त्रविशेषे च। **कर्परः**। पु०। कृप—कल्पने। अरन्प्रत्ययः। लत्वाभावः। कर्परः स्यात्कपाले च शस्त्रभेदकटाहयोः" इति मेदिनी॥ ३४२॥ भिक्षापात्रे भिक्षाभाण्डे। कपाले शिरोऽस्थनि। क्वचित्तु कपोले इति पाठः। तस्करे चौरे। अपिशब्दात् धूर्ते भिन्नमृन्मयखण्डे। धातुभेदे। तुत्थाञ्जनभेदे च। न०। **खर्परः**। पु०।

भद्रमुस्ते गुवाके च खपुरोऽथ द्रुमे पुमान् ।
रूप्ये खले च खर्ज्जूरः खुरः कोलदले शफे ॥ ३४४ ॥
खरुरश्वे हरे दर्पे दन्ते श्वेते तु वाच्यवत् ।
गुरुस्त्रिलिङ्ग्यां महति दुर्ज्जरालघुनोरपि ॥ ३४५ ॥
गायत्री खदिरे स्त्री स्याच्छन्दस्यपि षडक्षरे ।
गुन्द्रस्तेजनके गुन्द्रा प्रियङ्ग्वां भद्रमुस्तके ॥ ३४६ ॥

कृप—कल्पने, युतौ वा । अरन्प्रत्ययः । पृषोदरादित्वात् खत्वम् । "खर्परस्तस्करे धूर्त्ते भिक्षाभाण्डकपालयोः" इति मेदिनी ॥ देवताडे स्वनामाख्याते वृक्षे। **खरा** । स्त्री० । गर्दभः प्रसिद्धः । तीक्ष्णः उग्रः । तयोः । तथा अश्वतरे । राक्षसभेदे । "चेरतुः खरदूषणौ" इति भट्टिः । कामे । कङ्कविहगे । कुररपक्षिणि । कण्टकीवृक्षभेदे। षष्टिसंवत्सरमध्ये वत्सरभेदे । रवेः पार्श्वचरे । तिग्मस्पर्शे कठिने च । त्रि० । **खरः** । पु० । खं मुखबिलमतिशयेनास्त्यस्य । रः प्रत्ययः । खमिन्द्रियं राति । रा—आदाने । कः प्रत्ययो वा । रलयोरेकत्वम् । "खरः स्यात्तीक्ष्णघर्मयोः । गर्दभे स्त्री देवताडे" इति मेदिनी ॥ ३४३ ॥ भद्रमुस्तके नागरमुस्तके । गुवाके क्रमुकवृक्षे । चकारात् व्याघ्रनखे । ऊर्द्धगते पुरोघटे । न० । अलसे । त्रि० । **खपुरः** । खमिन्द्रियमाकाशं वा पिपर्त्ति । पॄ—पूर्त्तौ । कः प्रत्ययः । "खपुरः क्रमुके भद्रमुस्तके कलसेऽपि च" इति मेदिनी ॥ अथ अनन्तरार्थवाची । द्रुमे वृक्षभेदे । पु० स्त्री० । रूप्ये रजते । खले । चकारात् स्पर्शने । कीटभेदे च । **खर्ज्जूरम्** । न० । खर्ज्जूं राति । खर्ज्जूं ददाति । रा—दाने, ग्रहणे वा । कप्रत्ययः । "खर्ज्जूरं रूप्यखलयोर्वृश्चिके ना द्रुमे द्वयोः"इति मेदिनी ॥ कोलदले बदरीपत्रे । नखिनामगन्धद्रव्ये च । शफे स्वनामाख्याते पशूनां शफे । तथा नापितास्त्रे । खट्वादीनां पादे च । **खुरः** । पु० । खुर—विलेखने । खः प्रत्ययः । "खुरः कोलदले शफे" इति मेदिनी ॥ ३४४ ॥ अश्वे हये । हरे महादेवे, कामदेवे वा । दर्पे गर्वे । दन्ते चर्वणसाधनेऽस्थिभेदे । श्वेते श्वेतवर्णवति च । तुकारात् निषिद्धरुचौ । निर्बोधे । क्रूरे च। त्रि०। पतिंवरायां कन्यायाञ्च । स्त्री० । **खरुः** । पु० । खन—विदारे । कुःप्रत्ययः । रश्चान्तादेशः । "खरुर्दर्पे हरे हये । दन्ते पुंसि त्रिषु श्वेते" इति मेदिनी॥ महति बलवति । दुर्ज्जरः दुःखेन जीर्य्यत्पदार्थः । अलघुः गुरुत्ववान् । तयोः । त्रि० । अपिशब्दात् मनूक्ते निषेकादिकर्त्तरि पित्रादौ । निषेकादीनि कर्माणि यः करोति यथाविधि । सम्भावयति चान्नेन स विप्रो गुरुरुच्यते" इति । आचार्ये "स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति" इति शास्त्रोपदेष्टरि । सम्प्रदायप्रवर्त्तके । उपाध्याये । तान्त्रिकशास्त्रोपदेष्टरि । बृहस्पतौ तदधिदैवे पुष्ये । द्विमात्रे दीर्घस्वरवर्णे । बिन्दुविसर्गयुक्ते एकमात्रे । संयुक्तवर्णात् पूर्वस्थिते एकमात्रेऽपि वर्णे । द्रोणाचार्ये । कपिकच्छ्वाम् । पूज्ये । "पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः" इति पुराणम् । **गुरुः** । पु० । गिरत्यज्ञानं गृणाति उपदिशति वा धर्म्मम्। गॄ—शब्दे । कुः प्रत्ययः । उच।"गुरुस्त्रिलिङ्ग्यां महति दुर्ज्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि" इति मेदिनी ॥ ३४५ ॥ खदिरे स्वनामा-

गह्वरे द्वे गुहाकुञ्जे पूर्द्वारि द्वारि गोपुरम् ।
नग्नकन्योमयोर्गौरी गौरः स्यादुज्ज्वलेऽपि च ॥ ३४७ ॥
गोत्रं नाम्नि कुले पुंसि शैले भूगव्ययोः स्त्रियाम् ।
स्वरे रणे च गान्धारो गृध्रः स्याल्लोभिपक्षिणोः ॥ ३४८ ॥
कर्बुरे तिलके चित्रं सुभद्रातारयोः स्त्रियाम् ।
चन्द्रः शशिनि कर्पूरे चारो बन्धापसर्पयोः ॥ ३४९ ॥

ख्याते वृक्षे । छन्दसि वेदोक्ते । षडक्षरे षडक्षरपादके छन्दोभेदे । अपिशब्दात् मन्त्रभेदे च । **गायत्री** । स्त्री० । गायन्तं त्रायते । त्रै—पालने । कः प्रत्ययः । "गायत्री त्रिपदादेवी-छन्दोभित्खदिरेषु च" इति मेदिनी ॥ तेजनके वंशे । शरतृणे च । पु० । प्रियङ्ग्वाम् । भद्रमुस्तके नागरमुस्तके । तथा गवेधुकायाञ्च । स्त्री० । **गुन्द्रः** । पु० । गुन्द्र—क्रीडायाम् । अच्प्रत्ययः । "गुन्द्रस्तेजनके स्त्री तु प्रियङ्गौ भद्रमुस्तके" इति मेदिनी ॥ ३४६ ॥ गुहा अकृत्रिमः पर्वतगर्त्तः । कुञ्जं निकुञ्जम् । तयोः । तथा दम्भे । वने । रोदने । विषमस्थाने अनेकानर्थे सङ्कटे च । **गह्वरम्** । न० पु० । गाहू—विलोडने वरच्प्रत्ययः । निपातनात् साधुः । "अथ गह्वरम् । गुहागहनदम्भेषु निकुञ्जे तु पुमानयम्" इति मेदिनी ॥ पूर्द्वारि नगरद्वारे । द्वारे तथा कैवर्त्तिमुस्तके च । **गोपुरम्** । न० । गावः पूर्यन्ते यत्र । पृ—पूर्त्तौ । कः प्रत्ययः । गोपुरं द्वारि पूर्द्वारि कैवर्त्ति मुस्तकेऽपि च" इति मेदिनी ॥ नग्नकन्या असञ्जातरजस्का कन्या । उमा पार्वती । तयोश्च । **गौरी** । स्त्री० । गौरशब्दात् ङीप् प्रत्ययः । "गौरी त्वसञ्जातरजःकन्याशङ्करभार्ययोः" इति मेदिनी ॥ उज्ज्वले स्वर्णे । अपिशब्दात् श्वेतसर्षपे । चन्द्रे । धववृक्षे । अरुणवर्णे । श्वेतवर्णे । तत्तद्वर्णवति । विशुद्धे च । त्रि० । पद्मकेशरे । पङ्कजे । कुङ्कुमे च । न० । **गौरः** । पु० । गुर—वधे, गत्याञ्च । रः प्रत्ययः । निपातनात् साधुः । "गौरः श्वेतेऽरुणे पीते विशुद्धेचाऽभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेशरे" इति मेदिनी ॥ ३४७ ॥ नाम्नि आख्यायाम् । कुले पौत्राद्यपत्ये वंशे । पु० । शैले पर्वते । भूः पृथिवी । गव्या गोसम्बन्धिनी । तयोः । स्त्री० । तथा कानने । क्षेत्रे । पथि । छत्रे । सजातीयगणे च । **गोत्रम्** । न० । गां पृथिवीं त्रायते । त्रै—पालने । कः प्रत्ययः । "गोत्राः भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययो" इति मेदिनी ॥ स्वरे स्वरभेदे । रणे गीतिविषये । चकारात् सिन्दूरे । रागभेदे । कन्दार इति ख्याते देशोद्भवे । त्रि० । गन्धके च । **गान्धारः** । पु० । गन्धं सौरभमृच्छति । ऋ—गतौ । प्रज्ञाद्यण् इति अण्-प्रत्ययः । "गान्धारः पुंसि सिन्दूरे रागदेशप्रभेदयोः" इति मेदिनी ॥ लोभी लोभशीलः । पक्षी खगभेदः । तयोश्च । **गृध्रः** । पु० । गृध—लिप्सायाम् । क्रन्प्रत्ययः । "गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके" इति मेदिनी ॥ ३४८ ॥ कर्बुरे चित्रवर्णे । तिलके स्वनामाख्याते नासादौ धार्य्ये चन्दनादिविशेषके । तथा यमभेदे । अशोकवृक्षे । चित्रकवृक्षे एरण्डवृक्षे । आकाशे । कुष्ठभेदे । नानावर्णे । अद्भुते । त्रि० । लेख्ये । शब्दालङ्कारभेदे । व्याघ्रभेदे च । पु० । सुभद्रा प्रसिद्धा

मृते देवकुले चैत्रं ना भूभृन्मासभेदयोः ।
सर्पे विष्णौ चक्रधरश्चिकुरौ वृक्षभित्कचौ ॥ ३५० ॥
चक्रः कोके व्रजे पुंसि क्लीबे सैन्यरथाङ्गयोः ।
ग्रामजाले कुम्भकारभाण्डे राष्ट्रे च दृश्यते ॥ ३५१ ॥
नदप्रभेदे वाद्ये च झर्झरोऽथ गुणध्वनौ ।
प्रसिद्धावपि टङ्कारस्तारोऽत्युच्चस्वरे त्रिषु ॥ ३५२ ॥

तारा, तारका अक्षितारका वा । तयोः । स्त्री० । **चित्रम्** । न० । चित—स्मृतौ । क्विप्-प्रत्ययः । त्रायते । त्रै—पालने । कः प्रत्ययः । वा न लोपः । चित्र—क्षणिके, लेख्ये, अद्भुते च । अच्प्रत्ययो वा । "चित्राखुपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदी-भेदेषु च स्त्रियाम् । तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि" इति मेदिनी ॥ शशिनि हिमांशौ कर्पूरे स्वनामाख्याते गन्धद्रव्ये । तथा मृगशिरानक्षत्रे । काम्पिल्ले । हीरके । जले । काम्ये । सुन्दरे । कृष्णवर्णे । मयूरचन्द्रके । शोणमुक्ताफले । आह्लादकद्रव्ये । त्रि० । स्वर्णे । चुक्रे च । न० । **चन्द्रः** । पु० । चदि—आह्लादे, दीप्तौ च । रक्प्रत्ययः । "चन्द्रकर्पूरकाम्पिल्लसुधां-शुस्वर्णवारिषु" इति मेदिनी ॥ बन्धः बन्धनम् । अपसर्पः गुप्तचरः, अपसरणं वा । तयोः । तथा चरे । "चारैः पश्यन्ति राजानः" इति नीतिः। गमके आधारे । कारागारे । कृत्रिमविषे । **चारः** । पु० । चर एव। स्वार्थे अण्प्रत्ययः । चरत्यत्र । चर—गतौ । घञ्प्रत्ययो वा । "चारः प्रियालवृक्षे स्याद्गतौ गन्धापसर्पयोः" इति मेदिनी ॥ ३४९ ॥ मृते । देवकुले देववंशे पु० । भूभृत्पर्वतभेदः । मासभेदः स्वनामाख्यातः शुक्लप्रतिपदादिदर्शान्तरूपो मासः । तयोश्च । **चैत्रम्** । न० । चित्रानक्षत्रेण युक्ता पौर्णमासी चैत्री । साऽस्मिन्मासे इति । अण्प्रत्ययः । "चैत्रं मृतदेवकुले ना भूभृन्मासभेदयोः" इति मेदिनी॥ सर्पे भुजङ्गमे । विष्णौ श्रीकृष्णे । तथा ग्रामजालिनि च । **चक्रधरः** । पु० । चक्रमस्त्रभेदं फणमण्डलं वा धारयति । धृ—धारणे । अच्प्रत्ययः । "अथ चक्रधरोऽजेऽहौ ना त्रिषु ग्रामजालिनि" इति मेदिनी ॥ वृक्षभिद् वृक्ष-भेदः । कच। केशः । तयोः । तथा पर्वते । सरीसृपे । चपले । तरले । चञ्चले च । त्रि०। **चिकुरः** । पु० । चिइत्यव्यक्तं शब्दं कुरति । कुर—शब्दे । कः प्रत्ययः । "चिकुरस्तरला गयोः। पक्षिवृक्षभिदोः केशे गृहमभ्रौ सरीसृपे" इति मेदिनी ॥३५०॥ कोके चक्रवाके पक्षिणि। व्रजे समुदाये । पु० । सैन्यः सेनासमुदायः । रथाङ्गः । तयोः । ग्रामजाले कुम्भकारकभाण्डे । कुम्भकारस्य उपकरणे । राष्ट्रे । चकारात् व्यूहभेदे । अस्त्रभेदे । पुटभेदे । जलावर्ते । तगरपुष्पे । अलङ्कारोक्ते काव्यबन्धविशेषे। न०। वीरादिचक्रेषु। "प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः" इति तन्त्रम । तन्त्रोक्तेषु मूलाधारादिषु स्थितेषु षट्सु पद्मेषु च। **चक्रः** । दृश्यते । क्रियतेऽनेन । पु० । कृ—करणे । घञर्थे कः प्रत्ययः। निपातनात् द्वित्वम् । "चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः । जलावर्ते" इति मेदिनी ॥३५१॥ नदप्रभेदे नदविशेषे । वाद्ये वाद्यभेदे पटहे । चकारात् कलियुगे च । **झर्झरः** । पु० झर्झ-

तारिण्यङ्गदमात्रोः स्त्री न ना ऋक्षाक्षिमध्ययोः ।
दृग्रोगे तिमिरं ध्वान्ते तोत्रे प्राजनवेणुके ॥ ३९३ ॥
धान्याके तुम्बरी शुन्यां ताम्रं शुल्वेऽरुणे त्रिषु ।
पेटके नावि च तरी तुषारः शीकरे हिमे ॥ ३९४ ॥
इतिकर्तव्यता तन्त्रमुपायश्च द्विसाधकः ।
तीव्रं कटुनितान्तश्च दर्दरः शैलभग्नयोः ॥ ३९५ ॥

उक्तौ, भर्त्सने च । अरण्प्रत्ययः ।"झर्झरः स्यात् कलियुगे वाद्यभाण्डे नदान्तरे" इति मेदिनी॥ अथ अनन्तरार्थद्योतकः । गुणध्वनौ । धनुर्ज्याकर्षणजे शब्दे । प्रसिद्धौ । अपिशब्दात् विस्मयहेतुके शब्दे । ध्वनिभेदे च । **टङ्कारः** । पु० । टङ्कित्यव्यक्तशब्दस्य कारः । कृ-करणे । घञ्प्रत्ययः । "टङ्कारो विस्मये पुंसि प्रसिद्धौ सिञ्जिनी ध्वनौ" इति मेदिनी ॥ उच्चस्वरे अत्युच्चनादे । त्रि० ॥ ३९२ ॥ तारिणी तरणकर्त्री । अङ्गदमाता वालिपत्नी । तयोः । स्त्री० । ऋक्षः नक्षत्रम् । अक्षिमध्यः नेत्रमध्यस्थकनीनिका । तयोः । न० स्त्री० । तथा प्रणवे देवीप्रणवे । शिरोजातध्वनौ । रूप्ये । अत्युच्चे । निर्म्मले । त्रि० । महाविद्याभेदे । बृहस्पतिभार्य्यायाञ्च । स्त्री० । **तारः** । पु० । तॄ-तरणे, प्लवने, अभिभवने च । स्वार्थे णिच् । तदन्तात् अच्प्रत्ययः । तॄ प्रेरणे । णिच् । करणादौ घञ्प्रत्ययो वा । "तारो वानरभिन्मुक्ताविशुद्धयोः शुद्धमौक्तिके । ना नक्षत्रेऽक्षिमध्ये च न ना रूप्ये नपुंसकम्" इति मेदिनी ॥ दृग्रोगे नेत्ररोगे ।

ध्वान्ते अन्धकारे च । **तिमिरम्** । न० । तिम-आर्द्रीकरणे । किरच् प्रत्ययः । "तिमिरं ध्वान्ते नेत्रामयान्तरे" इति मेदिनी ॥ प्राजनं गवादिताडनदण्डः । वेणुकं गजादिपालनार्थं लौहमुखो वंशदण्डः । तयोश्च । तथा त्रपुणि च । पु० । **तोत्रम्** । न० । तुद-व्यथने । ष्ट्रन्प्रत्ययः । पुंसि त्रपुणि तोत्रन्तु प्राजने वेणुकेऽपि च" इति मेदिनी ॥ ३९३ ॥ धान्याके औषधविशेषे । शुन्यां कुक्कुरयोषिति । तथा गन्धर्वभेदे च **तुम्बरी** । स्त्री० । तुबि-अर्दने । उरन्प्रत्ययः । गौरादित्वात् ङीप् च । "तुम्बरी कुक्कुरस्त्रियाम् । धन्याकेऽपि" इति मेदिनी ॥ शुल्वे धातुभेदे । अरुणे अरुणप्रभायाम । तथा कुष्ठरोगभेदे च । **ताम्रम्** । त्रि० । तम-खेदे । रक्प्रत्ययः, दीर्घश्च । "ताम्रं शुल्वेऽरुणेऽपि च" इति मेदिनी ॥ पेटके वसनपेटके, वसनदशायां वा । नावि नौकायाञ्च । **तरी** । स्त्री० । तॄ-तरणे । ईः प्रत्ययः । तरिरिति ह्रस्वेकारान्त पाठोऽपि युज्यते । "तरिस्तु तरणे पुंसि कृशानौ पेटके तरी" इति मेदिनी । शीकरे जलकणे । हिमे । तथा शीतले । कर्पूरे च । **तुषारः** । पु० । अन्तर्भूतण्यर्थे । तुष-तोषे । आरक्प्रत्ययः । "तुषारस्तु शीतले शीकरे हिमे" इति मेदिनी ॥ ३९४ ॥ इतिकर्त्तव्यता इदं कृत्वा इदं कुर्यादित्येवं परिपाटिरूपः कर्म्मानुष्ठानक्रमः । राष्ट्रम् । तत्र च । उपायः साधनम् । द्विसाधकः उभयार्थः । तस्मिन् । चकारात् सिद्धान्ते । औषधौ । कुटुम्बकार्य्ये । प्रधाने । तन्तुवाये । परिच्छेदे । हेतौ । सक्तप्रवृत्तौ । तन्तौ ॥ स्वराष्ट्रचिन्तायाम । परिजने । तन्तुवायशलाका-

उपाये निर्गमे द्वारं दारुः स्याद्देवदारु च ।
दासीसुतोष्ट्रौ दासेरौ देवयात्राऽशने मृतौ ॥ ३५६ ॥
दिगम्बरोऽन्धकारे च वाद्यमेघौ च दर्दुरौ ।
धात्री भुव्यामलक्याश्च हरिशैलौ धराधरौ ॥ ३५७ ॥

याम् । प्रबन्धे । शपथे । धने । गृहे । वपनसाधने । करणे । कुले । वेदशाखाभेदे । वेदादिशास्त्रे । स्वनामाख्याते शिवाद्युक्ते शास्त्रे च । **तन्त्रम्** । न० । तन-विस्तृतौ । ष्ट्रन्प्रत्ययः । "तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौऽषधोत्तमे । प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके । इतिकर्त्तव्यतायाञ्च" इति मेदिनी ॥ कटु तीक्ष्णम् । नितान्तम् अत्यन्तम् । तस्मिन् । न० । चकारात् शिवे । लौहे । सीसके । तद्वति दुःसहे । पु० । अत्युग्रे । कटुरोहिण्याम् । राजिकायाम् । गण्डदूर्वायाम् । महाज्योतिष्मत्याम् । नदीभेदे च । स्त्री० । **तीव्रम्** । न० । तीव-स्थौल्ये । रक्प्रत्ययः । तीव्रा तु कटुरोहिण्यां राजिकागण्डदूर्वयोः । त्रिष्वत्युष्णे नितान्ते च" इति मेदिनी ॥ शैलः पर्वतः । भुग्नम् । ईषद्भुग्नभाजनम् ॥ क्वचित् भग्न इति पाठः । तयोश्च । **दर्दरः** । पु० । दरपूर्वः दृ-वधे, आदरे च । अप्प्रत्ययः । "दर्दरः पर्वते पुंसि त्रिष्वीषद्भग्नभाजने" इति मेदिनी ॥ ३५५ ॥ उपाये निर्गमने गृहादिनिर्गमनस्थाने । तथा प्रतीहारे । मुखे च । **द्वारम्** । न० । द्वृ-संवरणे । णिच्अच्प्रत्ययौ । "द्वारं निर्गमनेऽपि स्यादभ्युपाये" इति मेदिनी ॥ देवदारु स्वनामाख्यातो वृक्षः । तत्र च । चकारात् काष्ठे । पित्तले । शिल्पिनि । दारके च । त्रि० । **दारुः** । न० । स्यादित्यन्वयः । दॄ-भये, विदारे च । उण्प्रत्ययः । "दारुः स्यात् पित्तले काष्ठे देवदारौ नपुंसकम्" इति मेदिनी ॥ दासीसुतः दासीपुत्रः । दासः । उष्ट्रः प्रसिद्धः । तयोश्च । **दासेरः** । पु० । दास-दाने । एरक्प्रत्ययः । दास्या अपत्यम् । ढक्प्रत्ययः । "दासेरो दासिकापत्ये त्रिषु पुंसि क्रमेलके" इति मेदिनी ॥ अशने भोजने । मृतौ यमपुरगमने । तथा देवरथे च । **देवयात्रा** । स्त्री० । षष्ठीतत्पुरुषः । देवैरुपलक्षिता यात्रा वा । "देवयात्रा यमपुरीगमने भोजनेऽपि च" इति मेदिनी ॥ ३५६ ॥ अन्धकारे तमसि । चकारात् शिवे । क्षपणकभेदे । "दिगम्बरा मध्यमत्वमाहुरापादमस्तकम् । चैतन्यस्याप्तिसंदष्टेरानखाग्रश्रुतेरपि" इत्युक्त जीवस्य देहपरिमाणाङ्गीकारके । बौद्धभेदे । नग्ने । त्रि० । कलिकायाम् । स्त्री० । **दिगम्बरः** । पु० । दिक्शून्यमेवाम्बरं यस्य । दिशामम्बरमिवावरकत्वाच्च । "दिगम्बरः स्यात् क्षपणे नग्ने तमसि शङ्करे" इति मेदिनी ॥ वाद्यः वाद्यभेदः । मेघः पवनसलिलसङ्घातजन्यो जलधरः । तयोः । चकारात् भेके । पर्वतभेदे । मृन्मयपात्रभेदे । ग्रामजाले च । न० । **दर्दुरः** । पु० । दुनाति कर्णौ शब्दैः । दु-उपतापे । उरन्प्रत्ययः । गतिसमासः । "दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः । दर्दुरा चण्डिकायां स्याद्ग्रामजाले नपुंसकम्" इति मेदिनी ॥ भुवि पृथिव्याम् । आमलक्याम् । चकारात् मातरि । उपमातरि च । **धात्री** । स्त्री० ।

धारा हरिद्राश्वगतिनिशाम्बुस्रुतिराजिषु।
धाराधरो खड्गमेघौ धीरः पण्डितमन्दयोः॥ ३५८॥
धीरश्च कुङ्कुममथो धरा पृथ्वी धरो गिरिः।
नेत्रो नेतरि नेत्रश्च गुणे मूले विलोचने॥ ३५९॥
ना षिङ्गे नागरं शुण्ठयां नरोऽजे मनुजेऽर्ज्जुने।
नरेन्द्रो वार्त्तिके राज्ञि विषवैद्येऽपि दृश्यते॥ ३६०॥

धीयते पीयतेऽसौ। धा—धारणे। ष्ट्रन्प्रत्ययः। षित्त्वात् ङीप् च। "धात्री जनन्यामलकी वसुमत्युपमातृषु" इति मेदिनी॥ हरिः वराहरूपो विष्णुः। शैलः भूधरः। तयोश्च। **धराधरः।** पु०। धरं धारयति। धृ—धारणे। अच्प्रत्ययः। "धराधरो हरौ शैले" इति मेदिनी॥ ॥ ३९७॥ हरिद्रा स्वनामाख्यात औषधभेदः। अश्वगतिः अश्वानां गतिपञ्चकम्। "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा" इति। निशा तीक्ष्णा। खड्गादेरग्रनिशिता इति यावत्। अम्बु मेघस्यासारवर्षणम्। स्रुतिः द्रवद्रव्यस्य सन्तत्यापतनम्। राजिः समूहः। एतेषु। तथा उत्कर्षे। सन्ततौ। अतिवृष्टौ। यशसि। सदृशे। पुरीभेदे। सैन्याग्रिमस्कंधे। घटादिविच्छेदे च। **धारा।** स्त्री०। धृ—धारणे। णिच्अच्प्रत्ययौ। "धारा सैन्याग्रिमस्कन्धे तुरङ्गगतिपञ्चके। घटादिच्छिद्रसन्तत्योः प्रपाते स्याद्द्रवस्य च" इति मेदिनी॥ खड्गः असिः। मेघः जलधरः। तयोश्च। **धाराधरः।** पु०। धारां धारयति। धृ—धारणे। णिच्अच्प्रत्ययौ। "धाराधरोऽसिमेघयोः" इति मेदिनी॥ पण्डितः बुधः। मन्दः मूर्खः। तयोः। तथा धैर्यान्विते। विनीते। बलयुते। ऋषभौषधौ। बलिराजे। बुद्धिप्रेरके। बुद्धिसाक्षिणि। परमेश्वरे च। कुङ्कुमं प्रसिद्धम्। तत्र च। न०। चकारात् नायिकाभेदे। काकोल्याम्। महाज्योतिष्मत्याम्। स्थिरायां चित्तवृत्तौ च। स्त्री०। **धीरः।** पु०। धियं राति। रा—आदाने। कः प्रत्ययः। धियमीरयति। ईर—गतौ। अण् प्रत्ययः। धी—आधारे। क्रन् प्रत्ययो वा। "धीरो धैर्यान्विते स्वैरे बुधे क्लीबन्तु कुङ्कुमे" इति मेदिनी॥३९८॥ अथो अथशब्दार्थवाची। पृथ्वी भूमिः। तथा गर्भाशये जरायौ। स्त्री०। मेदावहायां नाड्याञ्च। **धरा।** गिरिः शैलः। तथा कूर्मराजे। वसुभेदे। कार्पाससूत्रे च। **धरः।** पु०। धृ—धारणे। अच्प्रत्ययः। "धरो गिरौ। कर्पासतूलके कूर्म्मराजे वस्वन्तरेऽपि च" इति मेदिनी॥ नेतरि नायके। प्रापके च। गुणे मूले। विलोचने नयने। न०। चकारात् मन्थदामनि। प्रवर्त्तके च। त्रि०। **नेत्रः।** पु०। नयति नीयते वाऽनेन। नी-प्रापणे। ष्ट्रन्प्रत्ययः। "नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च। रथे चक्षुषि नद्याञ्च" इति मेदिनी ॥३९९॥ षिङ्गे नारङ्गवृक्षे। पु०। शुण्ठ्यां स्वनामाख्याते औषधे। तथा देवरे। विदग्धे। जम्बीरभेदे। मुस्तकभेदे च। **नागरम्।** त्रि०। नगरे भवः। अण्प्रत्ययः। अगं राति अगरः न अगरः वा। "नागरं मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे" इति मेदिनी॥ अजे परमात्मनि। "आपो वै नरसूनवः" इति मनुः। विष्णौ वा। मनुजे मनुष्ये। अर्ज्जुने

धान्योत्क्षेपे निकारः स्याद्गुडूच्यामपि निर्जरा ।
नभश्चरौ पक्षिदेवौ पांशुला च निशाचरी ॥ ३६१ ॥
वलीकवनयोर्नीध्रं पूरः खाद्ये पयश्चये ।
यत्नारम्भौ परिकरौ खड्गफलेऽपि पुष्करम् ॥ ३६२ ॥

अर्जुनवृक्षे । तथा ऋषिभेदे । नरावतारे । गणितशास्त्रोक्ते छायाप्रमाणज्ञानोपयोगिनि । शङ्कौ च । **नरः** । पु० । नॄ—नृ-वा नीतौ अच्प्रत्ययः । "नरोऽजे मनुजेऽर्जुने" इति मेदिनी ॥ वार्त्तिके सूत्रानुक्ताद्यर्थविस्तारे ग्रन्थभेदे । राज्ञि राजिनि । विषवैद्ये । अपिशब्दात् एकविंशत्यक्षरपादके छन्दोभेदे च । **नरेन्द्रः** । पु० । दृश्यते इति क्रियापदेनान्वयः । नर इन्द्र इव । नराणाम् इन्द्र इति षष्ठीतत्पुरुषो वा । "नरेन्द्रस्तु महीपाले विषवैद्ये च पुंस्ययम्" इति मेदिनी ॥ ॥ ३६० ॥ धान्योत्क्षेपे व्रीह्यादिधान्यादेरूर्ध्वक्षेपे । तथा परिभवे । तिरस्कारे । अपकारे । मारणे च । **निकारः** । पु० । स्यादित्यन्वयः । निपूर्वः कृ—करणे । घञ्प्रत्ययः । कॄ—हिंसने । विक्षेपे च । घञ्प्रत्ययः । निपूर्वः कृ—करणे । णिच्घञ्प्रत्ययौ वा । "निकारः स्यात्परिभवे धान्यस्योत्पेक्षणेऽपि च" इति मेदिनी ॥ गुडूच्यां स्वनामाख्यातायां लतायाम् । अपिशब्दात् तालपर्ण्यां वा । **निर्जरा** । स्त्री० । निर्गता जरा यस्या इति पञ्चमीबहुव्रीहिः । "निर्जरा तु गुडूच्याञ्च तालपर्ण्यामपि स्त्रियाम्" इति मेदिनी ॥ पक्षी खगः । देवः अमरः । तयोः । तथा वायौ । मेघे । विद्याधरे । राक्षसे । सूर्य्यादिषु ग्रहेषु । आकाशगामिनि च । त्रि० । **नभश्चरः** । पु० । नभसि चरति । चर—गतौ, अच्प्रत्ययः । "नभश्चरो विहङ्गमे विद्याधरे घने वाते" इति मेदिनी ॥ पांशुला पुंश्चली, कुलटा वा । तस्याम् । "अपांशुलानां धुरि कीर्तनीया" इति रघुः । चकारात् राक्षस्याम् । शृगाल्याम् । पिशाच्याञ्च । **निशाचरी** । स्त्री० निशायां चरति चर—गतौ । टः प्रत्ययः । ङीष् च । "पांशुलायां निशाचरी" इति मेदिनी ॥ ३६१ ॥ वलीकः पटलान्तभागः । वनं वृक्षसमुदायात्मकम् अरण्यम् । तयोः । तथा नेमौ । चन्द्रे । रेवतीनक्षत्रे च । **नीध्रम्** । न० । निश्चयेन धरति जलादि धृ—धारणे । डप्रत्ययो वा मूलम् । कप्रत्ययः दीर्घश्च । क्वचित् नीव्रमिति पाठः । "नीध्रं नेमौ वलीकेन्द्वो रेवतीभे च कानने" इति विश्वः । नीव्रं नेमौ वलीकेन्द्वो रेवतीभेऽपि कानने" इति मेदिनी ॥ खाद्ये खादनीये । पयश्चये जलसमूहे । तथा व्रणशुद्धौ च । **पूरः** । पु० । पूर- पूर्त्तौ । कः प्रत्ययः । "पूरो जलसमूहे स्याद्व्रणसंशुद्धिखाद्ययोः" इति मेदिनी ॥ यत्नः उद्योगः । आरम्भः प्रसिद्धः । तयोः । क्वचित् "सन्नारम्भौ" इति पाठौ । तथा परिवारे। समूहे । पर्यङ्के । प्रगाढगात्रबन्धे । विवेके । सहचारिणि च । **परिकरः** । पु० । परिपूर्व कृ—करणे । अप् प्रत्ययः । "भवेत् परिकरः सङ्घे पर्यङ्कपरिवारयोः" इति मेदिनी ॥ खड्गफले असिफलके । अपिशब्दात् गजकराग्रे । मुखे । जले । वाद्यभाण्डे । आपणे । पद्मे । तीर्थभेदे । कुष्ठौषधौ । पद्मकोशे । द्वीपभेदे । युद्धे च । नृपभेदे । रोगभेदे । नागभेदे । सारसपक्षिणि च । पु० । **पुष्करम्** । न० । पुष—धृतौ ।

नद्यन्तराले पात्रं स्याद्भाण्डे चाऽथ निशापतौ।
पृथक्चारिगजे यूथभ्रष्टे पक्षचरः स्मृतः॥ ३६३॥
स्थाल्यां मन्थेऽपि पिठरं पवित्रं कुशमेध्ययोः।
देहे पाटलिपुत्रे च पुरं स्याद्गुग्गुलौ पुरः॥ ३६४॥
वरो जामातरि वृतौ कुङ्कुमे च नपुंसकम्।
वक्रः शनैश्चरे क्रूरे पुटभेदे तथा नृजौ॥ ३६५॥

पृष्टौ च। करन्प्रत्ययः। कस्य नेत्त्वम्। "पुष्करं खेम्बुपद्मयोः। तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्र-काण्डयोः। कुष्टौषधे द्वीपतीर्थभेदयोश्च नपुंसकम्" इति मेदिनी॥ ३६२॥ नद्यन्तराले तीरद्वयमध्य-वर्तिनि जलाधारस्थाने। भाण्डे। जलाद्याधारे। भोजनयोग्ये अमत्रे। चकारात् विद्यादियुक्ते दानयोग्ये ब्राह्मणे। "ब्राह्मणं पात्रमाहुः" इति स्मृतिः। यज्ञीये स्रुवादौ। नाटकेऽभिनेये। नायकादौ च। न०। **पात्रम्**। न०। स्त्री०। पाति रक्षत्याधेयम्। पिबत्यनेन वा। पा—रक्षणे। पाने च। ष्ट्रन्प्रत्ययः। स्त्रियां ङीप् च। "पात्रं स्रुवादौ पर्णे च भाजने राज-मन्त्रिणि" इति मेदिनी॥ अथ अनन्तरार्थवाची। निशापतौ चन्द्रे। यूथभ्रष्टे सजातीयसमु-दायच्युते पृथक् वा एकचारिणि गजे हस्तिनि च। **पक्षचरः**। पु०। स्मृत इति क्रियापदं सम्बन्धनीयम्। पक्षात् समूहात् भिन्नो भूत्वा चरति। चर—गतौ। अच्प्रत्ययः। "अथ पक्षचरश्चन्द्रे पृथक्चारिगजेऽपि च" इति मेदिनी॥ ३६३॥ स्थाल्यां पाकपात्रे। पु०। स्त्री० स्त्रियां ङीप्। मन्थे मन्थानदण्डे। अपिशब्दात् गृहभेदे। मुस्तायां च। **पिठरम्**। न०। पिठ—क्लेशे। करन्प्रत्ययः। "पिठरः स्थाल्यां ना क्लीबं मुस्ता मन्थनदण्डयोः" इति मेदिनी॥ कुशः स्वनामाख्याततृणम्। मेध्यं शुचि। व्रतादिना शुद्ध इति यावत्। तयोः। तथा ताम्रे। जले। वर्षणे। घर्षणे। अर्घोपकरणे। यज्ञाद्यर्थे। यज्ञोपवीते। मधुनि। घृते। "अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं सर्वकर्मसु" इत्युक्ते कुशद्वये च। **पवि-त्रम्**। न०। स्त्री०। पू—शोधे। इत्रः प्रत्ययः। "पवित्रं वर्षणे कुशे। ताम्रे पयसि च क्लीबं मेध्ये स्यादभिधेयवत्" इति मेदिनी॥ देहे शरीरे। पाटलिपुत्रे स्वनामाख्याते नगरे। न०। गुग्गुलौ स्वनामाख्याते निर्यासे। पु०। तद्वत् गेहे। कुसुमदलवृत्तौ। नागरमुस्तायाम्। चर्मणि। गृहोपरि गृहे। राशौ। पीतझिण्ट्यां च। **पुरम्**। न०। पुर—अग्रगमने। कः प्रत्ययः। "पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः। पुष्पादीनां दलावृत्तौ ना गुग्गुलौ न ना पुरि" इति। मेदिनी॥ ३६४॥ जामातरि दुहितृपतौ। वृतौ आवरणे। कुङ्कुमे स्वनामाख्याते औषधे। न० चकारात् इच्छायाम्। याचने। वेष्टने। अभीष्टे। श्रेष्ठे। त्रि०। जारे। गुग्गुलौ। पत्यौ च। **वरः**। पु०। व्रियते। वृ—आवरणे। अप्प्रत्ययः। वर—ईप्से। घञ्प्रत्ययो वा। "वरो जामातरि वृतौ देवतादेरभीप्सिते। षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्" इति मेदिनी॥ शनैश्चरे शनिग्रहे। क्रूरे रुद्रे। पुटभेदे नगरे। अनृजौ कुटिलगतौ। तथा मङ्गलग्रहे। त्रिपुरा-

कुब्जवृक्षे हरे वारो बन्धुरं रम्यनम्रयोः ।
भ्रमरः कामुके भृङ्गे भरोऽतिशयभारयोः ॥ ३६६ ॥
विषे स्वादौ च मधुरं मल्लिकायाञ्च माधुरम् ।
मखाग्नौ च महावीरो मक्षिकायाञ्च मत्सरः ॥ ३६७ ॥

सुरे । पर्वते । कुटिलवति । "राहुकेतू सदा वक्रौ" इति ज्यौतिषम् । नदीवक्रे च । न० । **वक्रः** । पु० । वकि–कौटिल्ये । गतौ च । रन्प्रत्ययः । "वक्रः स्यात्कुटिले क्रूरे पुटभेदे शनैश्चरे । अप्रमालम्बने वाते परिमाणे पलस्य च" इति विश्वः। "वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम् । त्रिषु क्रूरे च कुटिले" इति मेदिनी ॥३६५॥कुब्जवृक्षे स्वनामाख्याते द्रुमभेदे । हरे शिवे । तथा सङ्घे । अवसरे । स्वयोग्यकाले । द्वारे । क्षणे । सूर्यादिग्रहाणाम् अधिकृते दिने । यथा रविवारः रविस्वामिकं दिनमित्यादि । यज्ञपात्रे च । न० । **वारः** । पु० । वृ–आवरणे । घञ्प्रत्ययः । "वारः सूर्यादिदिवसे वारोऽवसरवृक्षयोः । कुब्जवृक्षे हरेर्वारं द्वारे मद्यस्य भाजने" इति विश्वः । "वारः सूर्यादिवासरे । द्वारे हरे कुब्जवृक्षे वृन्दावसरयोः क्षणे" इति मेदिनी ॥ रम्यं रमणीयम् । नम्रं नमनम् । तयोः । तथा उन्नतानते । मुकुटे । स्त्रीचिह्ने । तिलकल्के । बन्धुजीवकवृक्षे । बधिरे । हंसे । त्रिडङ्के । ऋषभौषधे । बके । विहङ्गे च । पु० । **बन्धुरम्** । न०। बन्ध–बन्धने । उरच्प्रत्ययः ।"बन्धुरं मुकुटे पुंसि स्त्रीचिह्ने तैलकल्कयोः । बन्धुके बधिरे हंसे त्रिषु स्याद्रम्यनम्रयोः" इति मेदिनी ॥ कामुके मैथुनकामनातिशयवति । भृङ्गे मधुकरे च । **भ्रमरः** । पु० । भ्रम–चलने । करन्प्रत्ययः । "भ्रमरः कामुके भृङ्गे" इति मेदिनी ॥ अतिशयः आधिक्यम् । भारः गुरुत्वपरिमाणम्, अष्टसहस्रतोलकपरिमाणं वा । तयोः । तथा भरणकर्त्तरि च । त्रि० **भरः** । पु० । भृ भरणे । अप्प्रत्ययः । "भरोऽतिशयभारयोः" इति मेदिनी ॥ ३६६ ॥ विषे । स्वादौ गुडादिस्थे मिष्टरसे । माधुर्यरसवति च । चकारात् द्रक्षवादौ । मनोहरे । "मधुरया मधुबोधितमाधवी" इति माघः । प्रिये । त्रि० । रक्तशिग्रौ । राजाम्रे । रक्तेक्षौ । गुडे । शालौ । जीरके । पु० । वङ्गे । शीसे । न० । शतपुष्प्याम् । यष्टिमधौ । काकोल्याम् । शतावर्याम् । बृहज्जीवन्त्याम् । मधुकर्कटिकायाम् । मधूल्याम् । मेदायाम् । पालङ्कशाके च। **मधुरम्** । न० । मधु माधुर्यं राति रा–आदाने । कः प्रत्ययः । मधु अस्यास्तीति अस्त्यर्थे रः प्रत्ययो वा । "मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः । मधुकर्कटिकाभेदा मधुलीयष्टिकासु च । क्लीबं विषे पुंसि रसे तद्वत् स्वादुप्रियेन्यवत्" इति मेदिनी ॥ मल्लिकायां मल्लिकापुष्पे । चकारात् मदिरायाम् । स्त्री० । **माधुरम्** । न० । क्वचित् "मुद्गरम्" इति पाठः । मधु राति भ्रमरेभ्यो ददाति । रा–दाने कः प्रत्ययः । स्वार्थे अण्प्रत्ययश्च । माधुरशब्दः कोषान्तरेषु न दृष्टः । मखाग्नौ यज्ञाग्नौ । चकारात् वसुमति । गरुडे । सिंहे । वज्रे । श्वेततुरङ्गे । कोकिले । धनुर्धरे । एकवीरवृक्षे । महाशूरे । [illegible] च । स्त्री० । **महावीरः** । पु० । महांश्चाऽसौ वीरश्चेति कर्म्मधारयस-

महेन्द्रो भूधरे शक्रे मन्दे वक्रे च मन्थरः।
विघ्नमन्मथयोर्मारो मकरो राशियादसोः॥ ३६८॥
गमनोत्सवयोर्यात्रा रुधिरं कुङ्कुमेऽपि च।
वृक्षभित्पापयो रोध्रो दैत्यभेदे मृगे रुरुः॥ ३६९॥
लम्बोदरः स्यादुद्ध्माने गणानामधिपेऽपि च।
लक्ष्मीपुत्रौ स्मरहयौ विस्तारौ स्तम्बविस्तृती॥ ३७०॥

मासः। "महावीरस्तु गरुडे शूरे सिंहे मखानले। वज्रे श्वेततुरङ्गे च सञ्चानविहगेऽपि च" इति मेदिनी॥ मक्षिकायां कीटभेदे। स्त्री०। चकारात् अन्यशुभद्वेषे। परसम्पत्त्यसहने। क्रोधे। कृपणे च त्रि०। **मत्सरः**। पु०। मद—गर्वे। दैन्ये च। सरः प्रत्ययः "मत्सरा मक्षिकायां स्यान्मत्सर्यक्रोधयोः पुमान्। असह्यपरसम्पत्तौ कृपणे चाऽभिधेयवत्" इति मेदिनी॥ ३६७॥ भूधरे जम्बुद्वीपस्थपर्वतभेदे। शक्रे महैश्वर्यवति इन्द्रे तथा परमेश्वरे च। **महेन्द्रः**। पु०। महांश्चाऽसौ इन्द्रश्चेति इन्द्रस्याऽपि नियन्तृत्वात्। "महेन्द्रः पर्वते शक्रे" इति मेदिनी॥ मन्दे। वक्रे। मन्थानदण्डे। चकारात् कोषे। फले। कुसुम्भ्याम्। नीचे। जडे। मन्दे। त्रि०। कैकेय्याः दास्याम्। स्त्री०। **मन्थरः**। पु०। मन्थ—विलोडे। करच्प्रत्ययः। "मन्थरः कोशफलयोर्बाधमन्थानयोः पुमान्। कुसुम्भ्यां न द्वयोर्मन्दे पृथौ वक्रेऽभिधेयवत्" इति मेदिनी॥ विघ्नः व्याघातः। अन्तरायो वा। मन्मथः कामदेवः। तयोः। तथा मरणे। धुस्तूरे। पक्षिभेदे च। **मारः**। पु०। मृ—मृतौ। घञ्प्रत्ययः। "मारो मृत्यौ स्मरे विघ्ने" इति मेदिनी॥ राशिः मकराकारत्वात् मेषादितो दशमो राशिः। यादसो जलजन्तुभेदः। तयोः। तथा निधिभेदे च। **मकरः**। पु०। मनुष्यं कृणाति हिनस्ति कृ—हिंसने। विक्षेपे। अच्प्रत्ययः। पृषोदरादित्वात् साधुः। "मकरो यादसो भेदे निधिराशिप्रभेदयोः" इति मेदिनी॥ ३६८॥ गमनं जिगीषया राज्ञां गमनम्। उत्सवः देवोद्देशेन उत्सवभेदो रथयात्रादिः। तयोः। तथा गमनमात्रे च। यात्रा। स्त्री०। या—गतौ। ष्ट्रन्प्रत्ययः। "यात्रा तु यापनेऽपि स्याद्गमनोत्सवयोः स्त्रियाम्" इति मेदिनी। कुङ्कुमे स्वनामाख्याते औषधभेदे। अपिशब्दात् शरीरस्थे रसपाकजन्ये धातुभेदे। मङ्गलग्रहे। रक्तवर्णे। तद्वर्णवति। त्रि०। **रुधिरम्**। न०। रुध—आवरणे। किरच्प्रत्ययः। "रुधिरोऽङ्गारके पुंसि क्लीबन्तु कुङ्कुमासृजोः" इति मेदिनी॥ वृक्षभिद् लोध्रवृक्षः। पापः किल्बिषः। तयोः। तथा अपराधे च। **रोध्रः**। पु०। न०। रुध—आवरणे। रन्प्रत्ययः। "रोध्रो ना सावरे क्लीबमपराधे च किल्बिषे" इति मेदिनी॥ दैत्यभेदे असुरविशेषे। मृगे मृगभेदे च। **रुरुः**। पु०। रु—वधे। गतौ च। कुः प्रत्ययः। "रुरुर्ना मृगदैत्ययोः" इति मेदिनी॥ ३६९॥ उद्ध्माने दुष्पूरोदरवति। त्रि०। गणानामधिपे गणेशे। अपिशब्दात् तारानाम्न्यां देव्याम्। स्त्री०। ङीप् च। **लम्बोदरः**। पु०। स्यादित्यन्वयः। लम्बं दीर्घमुदरं यस्येति बहुव्रीहिः। "लम्बोदरः

वप्रस्तातेऽस्त्रियां क्षेत्रे चये रेणौ च रोधसि ।
स्यादूषरे वनक्षेत्रे वल्लुरं गहनेऽपि च ॥ ३७१ ॥
वल्लूरा त्रिषु संशुष्कमांससूकरमांसयोः ।
वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिषु ॥ ३७२ ॥
विकारो विकृतौ रोगे विश्वकद्रू श्वभित्खलौ ।
बेरोऽङ्गे कुङ्कुमे बेरं वठरः शठमन्दयोः ॥ ३७३ ॥

स्यादुद्गाने गणानामधिपेऽपि च" इति मेदिनी ॥ स्मरः कामदेवः । हयः अश्वः । तयोः । तथा गन्धर्वभेदे । कुशे च । **लक्ष्मीपुत्रः** । पु० । लक्ष्म्याः पुत्र इति षष्ठीतत्पुरुषः । "लक्ष्मीपुत्रस्तु पुल्लिङ्गः कामदेवे तुरङ्गमे" इति मेदिनी ॥ स्तम्बः विटपः । विस्तृतिः विस्तीर्णता । तयोः । तथा समासवाक्यस्थे पदसमूहे च । **विस्तारः** । पु० । विपूर्वस्तॄ—आच्छादने । संज्ञायां कर्तरि घञ्प्रत्ययः । "विस्तारो विस्तृतौ स्तम्बे" इति मेदिनी ॥ ३७० ॥ ताते जनके । क्षेत्रे केदारे । चये दुर्गनगरादौ परिखया उद्धृतमृत्तिकास्तूपे । रेणौ धूलौ । रोधसि तटे, नद्यादिकूले वा । चकारात् सीसके । प्राचीरे । प्रजापतौ । पु० । मञ्जिष्ठायाम् । स्त्री० । **वप्रः** । पु०न० । उप्यतेऽत्र । वप—बीजवपने । रन्प्रत्ययः । "वप्रस्ताते पुमानस्त्री रेणौ क्षेत्रे चये तटे" इति मेदिनी ॥ ऊषरे क्षारमृत्तिकायुक्ते देशे । वनक्षेत्रे । वनकेदारे । गहने । कुञ्जे । अपिशब्दात् मञ्जर्याम् । निर्जनस्थाने । शाद्वले च । **वल्लुरम्** । न० । स्यादित्यन्वयः । वल्ल—संवरणे । उरन्प्रत्ययः । "वल्लुरः स्याद्वनक्षेत्रे गहनोषरयोरपि" इति मेदिनी ॥ ३७१ ॥ संशुष्कमांसः आतपादिना शुष्कमांसः । सूकरमांसः । स्वनामाख्यातस्य पशोर्मांसः । तयोः । तथा वाहने । वनक्षेत्रे । ऊषरभूमौ च । **वल्लूरा** । त्रि० । वल्ल—संवरणे । ऊरन्प्रत्ययः । "वल्लूरा त्रिषु संशुष्कमांससूकरमांसयोः" इति मेदिनी ॥ वैकल्ये विकलत्वे । विश्लेषे विश्लिष्टे । शैथिल्ये वा । न० । विकले स्वभावहीने । अपिशब्दात् विह्वले च । **विधुरम्** । त्रि० । विगता धूर्यस्येति अच्समासः । "विधुरं स्यात्प्रविश्लेषे न द्वयोर्विकले त्रिषु" इति मेदिनी ॥ ३७२ ॥ विकृतौ प्रकृतेरन्यरूपे, विकारयुक्ते वा । रोगे रुजावति । तथा परिणामे च । **विकारः** । पु० । विपूर्वः कृ—करणे । घञ् प्रत्ययः ॥ श्वभिद् श्वानभेदः । खलः दुर्जनः । तयोश्च । **विश्वकद्रुः** । पु० । विश्वं कद्यते । कद—विह्वलीभावे । रुः प्रत्ययः । "विश्वकद्रुस्त्रिषु खले श्वानाखेटशुनोः पुमान्" इति मेदिनी ॥ "विश्वकद्रुः खले श्वाने स्यादाखेटककुक्कुरे" इति विश्वः ॥ अङ्गे कलेवरे । देहे वा । पु० । कुङ्कुमे स्वनामाख्याते औषधभेदे । तथा वार्त्ताकौ । कर्पूरे च । **बेरम्** । न० । अज—गतौ । क्षेपणे च । रन्प्रत्ययः । वीभावश्च । "बेरं कलेवरे क्लीबं वार्त्ताकौ कुङ्कुमेऽपि च" इति मेदिनी ॥ शठः धूर्तः । मन्दः मूर्खः । तयोः । तथा अम्बष्ठे च । **वठरः** । पु० । वठ—सामर्थ्ये । असहायकरणे च । अरन्प्रत्ययः । "वठरः कुक्कुटे वस्त्रे शठे" इति

अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः ।
पर्याणेऽक्षोपकरणे शारिः शकुनिकान्तरे ॥ ३७४ ॥
श्रीर्लक्ष्मीवेशसम्पत्सु भारतीशोभयोरपि ।
शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु ॥ ३७५ ॥
पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च ।
शुक्रं रेतोक्षिरुक्शुक्रो ना काव्यज्यैष्ठवह्निषु ॥ ३७६ ॥
गजभूषा च शृङ्गारः शुषिरं गर्तवाद्ययोः ॥
कुटजे वासवे शक्रो वरीशच्योः शतावरी ॥ ३७७ ॥

मेदिनी ॥ अथ अनन्तरार्थद्योतको निपातः । व्यसनं विपत्तिः । व्यतिषङ्गः परस्परमेलनम् । तयोः । तथा सम्बन्धे च । **व्यतिकरः** । पु० । विअतिपूर्वः कृ—करणे । अप्प्रत्ययः । "अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी ॥ "व्यतिकरः समाख्यातो व्यसनव्यतिषङ्गयोः" इति विश्वः ॥ पर्याणे युद्धार्थं हस्तिपर्याणे । अक्षोपकरणे पाशकादिगुटिकायाम् । शकुनिकान्तरे पक्षिभेदे। "शारीं चरन्ती सखि मारय"इति नैषधम् । तथा व्यवहारभेदे । कपटे च । **शारिः** । स्त्री० । शॄ—हिंसने। इञ् प्रत्ययः । शारी अप्यत्र। वा ङीप्। "शारिर्नाक्षोपकरणे स्त्रियां शकुनिकान्तरे"इति मेदिनी॥३७४॥ लक्ष्मीः प्रसिद्धा । वेशः वेशरचना । सम्पत् धर्मार्थकामसम्पत्तिः। एतासु। भारती वाणी। शोभा दीप्तिः। तयोः। अपिशब्दात् लवङ्गे । प्रकारे। उपकरणे। बुद्धौ । विभूतौ । अधिकारे । प्रभायाम् । कीर्तौ । वृद्धौ । सिद्धौ । कमले । बिल्ववृक्षे। वृद्धिनामौषधौ । "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धं सिद्धादिकारांश्च श्रीपूर्वं समुदीरयेत्" इत्युक्तेषु देवादीनां नामोच्चारणायोपाधिभेदे च । रागभेदे च । पु० । **श्रीः** । स्त्री०। श्रि—सेवने । क्विप्प्रत्ययः । निपातनात् साधुः । "श्रीर्वेशरचनाशोभाभारतीसरलद्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तिविधोपकरणेषु च । विभूतौ च मतौ च स्त्री" इति मेदिनी ॥ शैलः पर्वतः । वृक्षः तरुः तयोः अग्रम् उपरिभागः । कक्षा शुष्कतृणादिः । पुलकः रोमाञ्चः । कोटिः अन्तमात्रम् एतासु ॥ ३७५ ॥ पक्वदाडिमबीजाभं परिणतदाडिमफलबीजवर्णं माणिक्यं रत्नभेदः । शकलं खण्डम् एकभागो वा एतेषु । अपिशब्दात् मूर्वायाश्च । **शिखरम्** । न० । शिखा अस्त्यस्य । अरच्प्रत्ययः । आलोपश्च । "शिखरोऽस्त्री द्रुमाग्रेऽद्रिशृङ्गे पुलककक्षयोः । पक्वदाडिमबीजाभमाणिक्यशकलाग्रयोः" इति मेदिनी ॥ रेतः मज्जजातश्चरमधातुः । अक्षिरुक् नेत्ररोगभेदः । काव्यः शुक्राचार्यः । ज्येष्ठः ज्येष्ठानक्षत्रयुक्तपौर्णमासीसम्बद्धः स्वनामाख्यातश्चान्द्रमासः । वह्निः दहनः । एतेषु । पु० । तथा चित्रकवृक्षे । विष्कम्भादिषु योगेषु मध्ये चतुर्विंशे योगे च । पु० । **शुक्रम्** । न० । शुच—शौचे । क्लेदे च । रक्प्रत्ययः । निपातनात् कुत्वम् । "शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोक्षिरुग्भिदोः क्लीबम्" इति मेदिनी ॥ ३७६ ॥ गजभूषा हस्त्यलङ्कारः । तत्र । चकारात् नाट्योक्ते रसभेदे । लवङ्गे । सिन्दूरे । चूर्णे ।

शंकरी मेखलाछन्दः शवरः सलिले शिवे ।
स्थिरा महीशालपर्ण्योः शम्बरं संयमे जले ॥ ३७८ ॥
शम्बरौ दैत्यहरिणौ सत्रं स्यात्कैतवे वने ।
स्रोतोऽञ्जने च सौवीरं काञ्जिके बदरेऽपि च ॥ ३७९ ॥

कालागुरुणि । आर्द्रके । भूषणे च । **शृङ्गारः** । पु० । शृङ्गं कामोद्रेकमृच्छत्यनेन । ऋ–गतौ । अणूप्रत्ययः । शृङ्गं कारणत्वेन ऋच्छति शृङ्गं प्राधान्यमृच्छत्यनेन वा इति । अणूप्रत्ययः । "शृङ्गारः सुरते नाट्यरसे च गजमण्डने । नपुंसकं लवङ्गेऽपि नागसम्भवचूर्णयोः" इति मेदिनी ॥ गर्त्तं भूमिछिद्रम् । वाद्यं वंशादिवाद्यं तयोः । तथा सच्छिद्रे । त्रि० । मूषिके । अग्नौ । पु० । नद्याम् । नलीनामगन्धद्रव्ये च । स्त्री० । **शुषिरम्** । न० । शुष–शोषे । किरच्प्रत्ययः । "शुषिरं वंश्यादिवाद्ये विवरे च नपुंसकम् । मूषिके ना स्त्रियां नल्यौषधौ-रन्ध्रान्विते त्रिषु" इति मेदिनी ॥ कुटजे कुटजवृक्षे । वासवे इन्द्रे । तथा अर्जुनवृक्षे । पेचके । ज्येष्ठानक्षत्रे च । **शक्रः** । पु० । शक–सामर्थ्ये । रक्प्रत्ययः । "शक्रः पुमान् देवराजे कुटजार्जुनभूरुहोः" इति मेदिनी ॥ वरी शतमूली । शची इन्द्रभार्या तयोश्च । **शतावरी** । स्त्री० । शतमावृणोति । आपूर्वः वृ–आवरणे । अच्प्रत्ययः । गौरादित्वात् ङीप् च । "शतावरी तु शच्यां स्यादिन्दीवर्यामपि स्त्रियाम्" इति मेदिनी ॥ ३७७ ॥ मेखला स्त्रीकट्याभूषणम् । उपनयनकाले ब्रह्मचारिधार्यं कटिसूत्रं वा । छन्दः चतुर्दशाक्षरपादकः छन्दो-भेदः तयोः । तथा नदीभेदे । वृषे च । **शक्करी** । स्त्री०पु० । शक–सामर्थ्ये । क्वरप्प्रत्ययः । क्वचित्तु "शकरी" "शर्करी" "शङ्करी" इति पाठा अपि दृश्यन्ते । "शर्करी छन्दसोभेदे नदीमे-खलयोरपि" इति मेदिनी ॥ सलिले जले । शिवे महादेवे । तथा म्लेच्छजातिभेदे च । **शवरः** । पु० न० । शव–विकारे गतौ च अरन्प्रत्ययः । "शवरो म्लेच्छभेदे च पानीये शङ्करेऽपि च" इति मेदिनी ॥ मही पृथिवी । शालपर्णी स्वनामाख्यात औषधभेदः तयोः । तथा शाल्मलौ । काकोल्याञ्च । **स्थिरा** । स्त्री० । स्था–गतिनिरोधे । किरच् प्रत्ययः । "स्थिरा भूशाल-पर्ण्योः" इति मेदिनी ॥ संयमे व्रताङ्गतया पूर्वदिनकर्त्तव्ये नियमभेदे । इन्द्रियनिग्रहे वा । जले पानीये । न० ॥ ३७८ ॥ दैत्यः असुरभेदः । हरिणः मृगभेदः तयोः । तथा मत्स्यभेदे । पर्वतभेदे । युद्धे । चित्रकवृक्षे । लोध्रे । अर्जुनवृक्षे । पु० । श्रेष्ठे । त्रि० । आखुपर्ण्याम् । स्त्री० । धने । चित्रे च । **शम्बरः** । पु० । शम्ब–गतौ । अरन्प्रत्ययः । "शम्बरं सलिले पुंसि मृगदैत्यविशेषयोः । शम्बरी चाऽऽखुपर्ण्यां स्यात्" इति मेदिनी ॥ कैतवे कपटतायाम् । वने अरण्ये । तथा स्थाने । यज्ञे । सदादाने । आच्छादने । धने । गृहे । दाने सरसि च । **सत्रम्** । न० । सद–गतौ । आश्रयकरणे च । त्रल्प्रत्ययः । स्यादित्यन्वयः । "सत्रं यज्ञे सदा-दानाच्छादनारण्यकैतवे" इति मेदिनी ॥ स्रोतोऽञ्जने स्रोतसि यमुनास्रोतोजलसन्निकृष्टसौवीरदेशभवे अञ्जने । अथ वा सौवीरदेशजाते अञ्जने । काञ्जिके बदरे कोलिवृक्षे । अपिशब्दात् काञ्जिकभेदे

हलतिग्मकरौ सीरौ सान्द्रं मृदौ घने वने।
तन्त्वादिग्रन्थयोः सूत्रं कारणेऽपि च दृश्यते॥ ३८०॥

इति रान्ताः॥

शैलेऽचलोऽचला भूमावरालः सर्जवक्रयोः।
अलिः सुरापुष्पलिहोः कल्लोलेऽप्याकुलं त्रिषु॥
आलुर्गलन्तिकायां स्त्री क्लीबं मूले च भेलके॥ ३८१॥

च। **सौवीरम्**। न०। पु०। सुष्ठुवीरो यत्र सुवीरो देशभेदः। तत्र भवः। अण्प्रत्ययः। "सौवीरं काञ्जिके स्रोतोऽञ्जने च बदरीफले" इति मेदिनी॥ ३७९॥ हलः लाङ्गलः। तिग्मकरः सूर्यः तयोः। तथा अर्कवृक्षे च। **सीरः**। पु०। सि—बन्धे। रक्प्रत्ययः। पृषोदरादित्वात् साधुः। "सीरोऽर्कहलयोः पुंसि" इति मेदिनी॥ मृदौ कोमले। घने निबिडे। वने अरण्ये। न०। तथा स्निग्धे। मनोज्ञे च। **सान्द्रम्**। त्रि०। अदि—बन्धने। रक्प्रत्ययः। सह अन्द्रेण। "सान्द्रं वने घने मृदौ" इति मेदिनी॥ तन्त्वादिः वस्त्रसाधनतन्तु। ग्रन्थः रचनाविशेषः, शास्त्रभेदो वा। स च 'स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥' इत्युक्तः। तयोः। कारणे। अपिशब्दात् व्यवस्थायाम्। नाटकसाधने। प्रस्तावे च। **सूत्रम्**। न०। दृश्यते इति क्रियापदं सम्बन्धनीयम्। सूत्र—ग्रन्थने, वेष्टने च। अच्प्रत्ययः। "सूत्रं तन्तुव्यवस्थायां शास्त्रादिसूत्रग्रन्थने" इति मेदिनी॥३८०॥ इति रकारान्ताः समाप्ताः॥ अथ लान्तानाह॥ शैले पर्वते। तथा शङ्कौ। महादेवे। ब्रह्मणि। चलशून्ये। त्रि०। भूमौ पृथिव्यां च। स्त्री०। **अचलः**। पु०। न चलति। चल—गतौ। अच्प्रत्ययः। नादितत्पुरुषः। "अचला वसुधायां स्यादचलः शैलकीलयोः" इति मेदिनी॥ सर्जः सर्जरसः। वक्रः कुटिलः। तयोः। तथा मत्तहस्तिनि। वेश्यायाञ्च। स्त्री०। **अरालः**। पु०। ऋ—गतौ। विच्प्रत्ययः—अर। अरमाऽऽलाति। आपूर्वः ला—आदाने। कः प्रत्ययः। "अरालः कुटिले सर्जरसे समददन्तिनि" इति मेदिनी॥ सुरा मद्यम्। पुष्पलिहः भ्रमरः। तयोः। तथा वृश्चिके। कोकिले। काके च। **अलिः**। पु०। अलति दंशे कूजिते शब्दिते वा समर्थो भवति। अल—भूषणे, वारणे, पर्याप्तौ च। इन्प्रत्ययः। "अलिः सुरापुष्पलिहोः" इति मेदिनी॥ कल्लोले महातरङ्गे। अपिशब्दात् व्याकुले च। **आकुलम्**। त्रि०। आपूर्वः कुल—बन्धे, संहतौ च। कः प्रत्ययः। आकुलशब्दो विश्वमेदिन्यादिषु न दृष्टः। गलन्तिकायां स्वल्पवारिधारायुतायाम्, कर्कर्यां वा। स्त्री०। "देवे देये गलन्तिका" इति स्मृतिः। मूले स्वनामाख्याते कन्दभेदे। भेलके नद्यादितारणार्थे प्लवे। न०। चकारात् पेचकपक्षिणि। क्षुद्रघटिकायाञ्च। स्त्री०। **आलुः**। पु०। आपूर्वः लू—छेदने। डुः प्रत्ययः। "आलुर्गलन्तिकायां स्त्री क्लीबं मूले च भेलके" इति मेदिनी॥ ३८१॥

आलिः सेतुः सखी यज्वा शौण्डिकश्चाऽऽसुतीवलः ।
आभीलं भीषणे कृच्छ्रे इला भूवाग्बुधाङ्गनाः ॥ ३८२ ॥
आर्द्रशूरणयो रोलः कालः स्यान्मृत्युकृष्णयोः ।
अंशे वृद्धावपि कला कदली ध्वजरम्भयोः ॥ ३८३ ॥
कफोणिघाते ज्वाले च कीलावत्कील इष्यते ।
शिरसोऽस्थ्नि कपालोऽस्त्री घटादेः शकले व्रजे ॥ ३८४ ॥

सेतुः आगन्तुकजलवारणार्थं सस्यसेकजलवारणार्थञ्च कृतो व्रतिरूपः सेतुः। सखी वयस्का तयोः। तथा पङ्क्तौ । आरामादिवृक्षश्रेण्याम्। सन्ततौ । शुद्धान्तःकरणे। अत्यर्थे च। त्रि० । **आलिः** । स्त्री० । आपूर्वः अल–भूषणे, वारणे च । इन्प्रत्ययः । आली अप्यत्र । "आलिर्विशदाशयोः । त्रिषु स्त्रियां वयस्कायां सेतौ पङ्क्तौ प्रकीर्त्तिता" इति मेदिनी॥ यज्वा सोमाभिषवशाली याज्ञिकः। शौण्डिकः मद्यविक्रेता । तयोः । चकारात् कन्यापालके च । **आसुतीवलः** । पु० । आसुतीरस्यास्ति । वलच् प्रत्ययः । दीर्घश्च । "आसुतीवल आख्यातः कन्यापालकयज्वनोः" इति मेदिनी । भीषणे भयानके । त्रि० । कृच्छ्रे कष्टे । तद्वति च । **आभीलम्** । न० । आसमन्तात् भियं लाति। आ–भी–पूर्वः ला–आदने। कः प्रत्ययः।"आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके" इति मेदिनी ॥ भूः पृथ्वी । वाक् वचनम् । बुधाङ्गना वैवस्वतमनुकन्या बुधपत्नी । सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता । बुधस्तु तामुपयम्य पुरूरवसमुत्पादयामास इति पुराणे प्रसिद्धम् । एतासु । तथा गवि । जम्बुद्वीपस्थनववर्षमध्ये वर्षभेदे च । **इला** । स्त्री० । इल–शयने, क्षेपे च । कः प्रत्ययः । "इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च" इति मेदिनी ॥३८२॥आर्द्रः आर्द्रायां भूमौ जातः स्वनामाख्यातो मूलभेदः । त्रि० । शूरणं कन्दविशेषः।तयोश्च॥ **ओलः** । पु० । आ उनत्ति आपूर्वः उन्द–क्लेदे । कः प्रत्ययः । नलोपे पृषोदरादित्वाद्दस्य लत्वम् । क्वचित् ओल्लः इति पाठः । "ओल्लस्तु शूरणे पुंसि स्यादार्द्रे वाच्यलिङ्गकः" इति मेदिनी ॥ मृत्युर्मरणम् । कृष्णः कालवर्णः । तद्वान् तयोः । तथा लौहे । कक्कोलके । यमे । महाकाले । शिवे । शनैश्चरे । कोकिले । रक्तचित्रके । कासमर्दे । क्षणदण्डादिसमये च । **कालः** । पु०। स्यादित्यन्वयः । कुत्सितमलति । अल–वारणे । अच्प्रत्ययः । कोः कादेशः। "कालो मृत्यौ महाकाले समये यमकृष्णयोः" इति मेदिनी ॥ अंशे चन्द्रमण्डलस्य षोडशे भागे। वृद्धौ दत्तधनस्याधिकलभ्यांशे । अपिशब्दात् कालपरिमाणे । ज्योतिषोक्त राशेस्त्रिंशद्भागस्य षष्ठिभागे । नौकायाम् । कपटे । विभूतौ । सामर्थ्ये । सङ्ख्यायाम् । मरीचिपत्न्याम् । चतुःषष्ठिप्रकारेषु गीतवाद्यादिषु च । **कला** । स्त्री० । कल–सङ्ख्यायाम् । अच्प्रत्ययः । "कला स्यान्मूलविवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः" इति मेदिनी॥ ध्वजः पताका ।ःरम्भा रम्भावृक्षः । तयोः । तथा मृगविशेषे च । **कदली** । स्त्री० । काये दल्यते त्वगादौ जलबहुलत्वात् । काशब्दोपपदः दल–भेदे । अच्प्रत्ययः । ङीप् च। "कदली पताकामृगभेदयोः" इति मेदिनी ॥ ३८३ ॥ कफोणिः भुजमध्यग्रन्थिः कूर्परः । घातः शङ्कुः ।

काको विषश्च काकोलौ सास्नायामपि कम्बलः ।
धूनकेऽपि कलकलः कामलः कामुके मधौ ॥ ३८५ ॥
कुलं गोत्रे गणे देहे न ना ज्ञाने च केवलम् ।
कपिला शिंशपाकौन्त्योः कपिलोऽग्नौ मुनौ शुनि ॥ ३८६ ॥

तयोः । ज्वाले अग्निशिखायाम् । चकारात् शस्त्रे । स्तम्भे । लेशे च । कीलावत् कीलाशब्द इव । कील: कीलशब्दः इष्यते काम्यते । शाब्दिकैरित्यध्याहारः । **कीलः** । पु० । कील—बन्धे । कप्रत्ययः । "कीलो लेशे द्वयोः स्तम्भे ज्वालाकफोणिशङ्कुषु" इति मेदिनी ॥ शिरसोऽस्थिन मस्तकास्थिन । घटादेः शकले कलशादेरवयवे । व्रजे समूहे । तथा यतीनां भिक्षापात्रे । कर्परे । कुष्ठरोगभेदे च । **कपालः** । पु० । कं जलं पालयति । पाल—रक्षणे । अण् प्रत्ययः । कप—कालन्प्रत्ययश्च । सौत्रिकः । "कपालोऽस्त्री शिरोऽस्थिन स्याद्घटादेः शकले व्रजे" इति मेदिनी ॥ ३८४ ॥ काकः द्रोणकाकः । विषं विषभेदः । तयोः । चकारात् सर्पे । सूकरभेदे । नरकभेदे । वायस्याम् । अश्वगन्धायाश्च । **काकोलः** । पु० । कक—लौल्ये । स्वार्थे णिच्ओलप्रत्ययौ । "काकोलं नरकान्तरे । ना कुलाले द्रोणकाके विषभेदे तु न स्त्रियाम्" इति मेदिनी ॥ सास्नायां गोगलस्थिते लोमसङ्घातात्मके कम्बले । अपिशब्दात् प्रावारे । नागभेदे । कृमौ । स्वनामाख्याते मेषलोमनिर्मिते वस्त्रासनादौ । जले च । न० । **कम्बलः** । पु० । कम्ब—गतौ । कलच्प्रत्ययः । "कम्बलो नागराजे स्यात् सास्नाप्रावरयोरपि । कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्" इति मेदिनी ॥ धूनके यक्षधूपे । सालनिर्यास इत्यर्थः । क्वचित् घुणक इति पाठः । अपिशब्दात् कोलाहले च । **कलकलः** । पु० । कल—शब्दे । घञ्प्रत्ययः । अवृद्धिः । कलप्रकारः गुणवचनवरात् प्रकारे द्वित्वम् । "कलकल उक्तः कोलाहले तथा शालनिर्यासे" इति मेदिनी ॥ कामयुक्ते । त्रि० । मधौ वसन्तकाले । तथा रोगभेदे च । **कामलः** । पु० । कामेन लस्यति । लस—श्लेषे, दीप्तौ च । डः प्रत्ययः । काम अस्याऽस्तीति । मत्वर्थे लच्प्रत्ययः । कामं कान्तिं लुनाति । लु—छेदे । डः प्रत्ययो वा । "कामला रोगभेदे वा न ना मरुवसन्तयोः । कामुके वाच्यलिङ्गः" इति मेदिनी ॥ ३८५ ॥ गोत्रे वंशे । गणे सजातीयगणे । देहे शरीरे । तथा देशे । गृहे । तन्त्रोक्ते जीवादौ । मध्यमहल्लद्वयेन कृष्यमाणायां भूमौ । शिल्पिकुलप्रधाने च । **कुलम्** । न० । कुल—बन्धे संहतौ च । कः प्रत्ययः । "कुलं जनपदे गोत्रे सजातीयगणेऽपि च । भवने च तनौ क्लीबं कण्टकार्यौषधौ कुली" इति मेदिनी ॥ ज्ञाने ज्ञानभेदे । चकारात् शुद्धे । न० । निश्चिते । कृत्स्ने । एके च । **केवलम्** । त्रि० । केव—सेवने । कलच् प्रत्ययः । के सरसि वलयति । वल—संवरणे । अच्प्रत्ययः । अलुकसमासः । शिंशपा रक्तपुष्पयोगा शिंशपा । कौन्ती भस्मगन्धिनी ओषधी । तयोः । अग्नौ ज्वलने । मुनौ सांख्यशास्त्रकारे मुनिभेदे । स च कर्दमप्रजापतितो देवहूत्यां भगवदंशेन जात इति पुराणादिषु प्रसिद्धः । शुनि कुक्कुरे । तथा वासुदेवे । दानवभेदे ।

कोलोङ्कपालावुत्सङ्गे वराहे भेलकेऽपि च ।
पिप्पल्यपि च कोला स्यात्कोलश्च बदरीफले ॥ ३८७ ॥
मृगे जले च कमलं कुवले बदरोत्पले ।
कल्लोलौ शात्रवोल्लोलौ पर्कट्याश्च कमण्डलुः ॥ ३८८ ॥
कर्म्मरङ्गतरौ कर्म्मफलं दुःखे सुखेऽपि च ।
करालो धूनतैलेऽपि देशे केशे च कुन्तलः ॥ ३८९ ॥

पिङ्गलवर्णे । पु० । तद्वति । त्रि० । स्वर्णवर्णायां गवि । नदीभेदे । पुण्डरीकनामदिग्गजकरिण्याश्च । **कपिला** । स्त्री० । कव-स्तुतौ-वर्णने च । इलच्प्रत्ययः । पादेशश्च । "कपिला रेणुकायाञ्च शिंशपागोविशेषयोः । पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् । नाऽनले वासुदेवे च मुनिभेदे च कुक्कुरे" इति मेदिनी ॥ ३८६ ॥ अङ्कपालौ क्रोडप्रान्ते । उत्संगे क्रोडे । वराहे सूकरे । भेलके नद्यादेस्तरणार्थे प्लवे । पिप्पली स्वनामाख्यातऔषधविशेषः । तत्र । स्त्री० । बदरीफले स्वनामाख्याते फले । न० । अपिशब्दात् शनिग्रहे । उडुपे । भुजान्तरे । चित्रायाम् । अस्त्रभेदे । टङ्कद्वयमाने । जातिभेदे । देशभेदे । चव्ये । मरिचे । तोलकमाने च । **कोलः** । पु० । कुल-संस्त्यागे । अच्प्रत्ययः । "कोलं कोलिफले क्लीबं पिप्पलीचव्ययोः स्त्रियाम् । नाऽङ्कपालौ शनौ चित्रे वराहोत्सङ्गभेलके" इति मेदिनी ॥ ३८७ ॥ मृगे मृगभेदे । जले । कुवले मुक्ताफले । बदरः कोलिफलम् । उत्पलं नीलपद्मम् । तयोः । तथा ताम्रे । व्योम्नि । औषधे । सारसपक्षिणि च । पु० । **कमलम्** । न० । कं जलमलति भूषयति । कं शब्दोपपदः अल-भूषणे । अच्प्रत्ययः । कम-वाञ्छायाम् । कलन्प्रत्ययो वा । कमलं सलिलेताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः" इति मेदिनी॥शात्रवः वैरी। उल्लोलः महातरङ्गः । तयोः । तथा हर्षे च । **कल्लोलः** । पु० । कल्-कूजने । अशब्दे च । ओलच् प्रत्ययः । "कल्लोलः पुंसिः हर्षे स्यादुल्लोलवैरिणोरपि" इति मेदिनी ॥ पर्कट्यां प्लक्षवृक्षे । चकारात् करङ्के । संन्यासिनां जलपात्रभेदे । चतुष्पादजातौ च । **कमण्डलुः** । पु० न० । मण्डते मण्डः । कस्य जलस्य मण्डं लाति । ला-आदाने । कुः प्रत्ययः । "कमण्डलुः स्यात्करके न स्त्री ना प्लक्षपादपे" इति मेदिनी ॥३८८॥ कर्मरङ्गतरौ कामरङ्गवृक्षे, तत्फले च । दुःखे कर्म्मविपाकजनिते प्रतिवेदनीये चित्तधर्म्मभेदे, दुःखसाधने वा । सुखे कर्म्मविपाकजनिते अनुकूलवेदनीये चित्तधर्म्मभेदे । सुखिनि, सुखकारके वा । अपिशब्दात् कर्म्मविपाकजन्ये च । **कर्म्मफलम्** । न० । कर्म्मणः फलमिति षष्ठीतत्पुरुषः । "अथ कर्म्मफलः कर्म्मरङ्गकर्म्मविपाकयोः" इति मेदिनी ॥ धूनतैले सर्जरसयुक्ततैले । अपिशब्दात् तैलभेदे । विकटे । भयानके । दन्तुरे । उच्चे । त्रि० । वृक्षभेदे च । **करालः** । पु० । कॄ-विक्षेपे । अप्प्रत्ययः । "करो विक्षेपः तस्मै अलति पर्य्याप्नोति । अल-पर्याप्तौ । अच्प्रत्ययः । "करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत् । ससर्ज्जरसतैले ना क्लीबं कृष्णकुठेरके" इति मेदिनी ॥ देशे देशभेदे । केशे

कुतूहलं प्रशस्तेऽपि खल्लश्चर्म्मणि चातके।
वस्त्रे निम्ने चाथ खल्लं सस्यस्थाने शठे त्रिषु ॥ ३९० ॥
मण्डले मणिके गोला गोलं गोदावरी सखी।
गोपो भूपश्च गोपालौ चपलः पारदेऽपि च ॥ ३९१ ॥
चपला पिप्पलीलक्ष्मीपुंश्चलीविद्युतः स्मृताः।
छलं छद्मस्खलितयोर्जम्बालौ पङ्कशैवलौ ॥ ३९२ ॥

चिकुरे। चकारात् पानपात्रे। जवे। हस्ते। जनपदभेदे च। **कुन्तलः**। पु०। कुन्तं कुन्ताकारं लाति। ला—आदाने। कः प्रत्ययः। "कुन्तलश्चषके वाले यवे पुंभूम्नि नीवृति" इति मेदिनी ॥ ३८९ ॥ प्रशस्ते प्रशंसनीये। अपिशब्दात् अपूर्ववस्तुदिदृक्षातिशये चेष्टाभेदे। फलनिरपेक्षतया चिकीर्षिते कौतुके च। अद्भुते च। त्रि०। **कुतूहलम्**। न०। कुतूं चर्म्ममयं स्नेहपात्रं हलति लिखति। हल—विलेखे। अच्प्रत्ययः। "कुतूहलं कौतुके स्यात् प्रशस्तेऽति च दृश्यते" इति मेदिनी ॥ चर्म्मणि इन्द्रियभेदे। येन स्पर्श उपलभ्यते तस्मिन्। चातके स्वनामाख्याते पक्षिभेदे। वस्त्रे वसनभेदे। निम्ने गर्त्ते। नीचे स्थाने च। चकारात् दृत्तौ। औषधमर्दनपात्रे च। **खल्लः**। पु०। खलतीति। खल—चलने, स्खलने च। क्विप्प्रत्ययः। खल्। तं लाति। ला—आदाने। कः प्रत्ययः। "खल्लो वस्त्रप्रभेदे स्याद्गर्त्ते चर्म्मणि चातके" इति मेदिनी ॥ सस्यस्थाने धान्यमर्दनस्थाने। शठे अधमे। तथा भुवि। तिलकल्के। नीचे। क्रूरे। सूर्ये। तमालद्रुमे च। **खलम्**। त्रि०। खल—चलने, स्खलने च। अच्प्रत्ययः। खे लीयते। लि—श्लेषे। डः प्रत्ययः। खं वर्णतः लाति। ला—आदाने। कः प्रत्ययो वा। "खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु" इति मेदिनी ॥ ३९० ॥ मण्डले चक्राकारेण वेष्टने, मण्डलाकारेण विहिते पदार्थे वा। मणिके मृन्मयपात्रभेदे अलिञ्जरे। तथा सर्वतो वर्त्तुले। मदनतरौ। भर्त्तरि मृते जारजे पुत्रे। ज्योतिषोक्ते भूगोले खगोले। एकराशौ षड्ग्रहयोगे। पु०। गुडे। पिण्डे। गन्धरसे। कलाये च। गोदावरी स्वनामाख्याता नदी। सखी सहचरी, वयस्या वा। तयोः। तथा पत्राञ्जने। बालक्रीडनके। कुनट्याम्। मण्डले। मणिके च। स्त्री। **गोलम्**। न०। गुड—वेष्टने, रक्षणे, चूर्णने च। घञ्प्रत्ययः। डलयोरैक्यम्। "गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम्। पत्राञ्जने मण्डले चाऽलिञ्जरे बालखेलने" इति मेदिनी ॥ "गोला सखीवर्त्तुलयोर्गोलं लक्ष्यानुसारतः। पत्राञ्जने कुनट्यां च गोदावर्याञ्च मण्डले" इति विश्वः। गोपः कृष्णः। भूपः नृपतिः। तयोः। चकारात् गोपार्थे च। **गोपालः**। पु०। गां सुरभीवृषभादिकं भूमिं वा पालयति। पाल—रक्षणे। अच्प्रत्ययः। "गोपालो नृपगोपेशे" इति मेदिनी ॥ पारदे रसराजे ॥ ३९१ ॥ पिप्पल्याम्। लक्ष्म्याम्। पुंश्चल्याम्। विद्युति। अपिशब्दात्। विजयायाम्। मदिरायाम्। जिह्वायाम्। आर्याभेदे च। स्त्री०। **चपलः**। पु०। चप—सान्त्वने, गतौ च। णिच्घञ्-

जङ्गलो निर्जने देशे त्रिलिङ्गः पिशितेऽस्त्रियाम् ।
जालं दम्भेऽपि जम्बीरे देवभेदेऽपि जम्भलः ॥ ३९३ ॥
झलाऽऽतपोर्म्मिर्दुहिता तलं मूलचपेटयोः ।
तालो गीतक्रियामाने हरिताले द्रुमान्तरे ॥ ३९४ ॥

नत्ययौ । चपं सान्त्वनं लाति । ला—आदाने । कः प्रत्ययो वा । मीने चोरनामगन्धद्रव्ये । प्रस्तरभेदे । राजमाषे । तरले । चञ्चले । क्षणिके । विकले । दुर्विनीते । त्रि० । "चपलः पारदे मीने चौरके प्रस्तरान्तरे । चपला कमला विद्युत्पुंश्चलीपिप्पलीषु च । नपुंसकन्तु शीघ्रे स्याद्वाच्यवत्तरले चले" इति मेदिनी ॥ छद्म स्वरूपाच्छादनः कपटः । स्खलितं कूटयुद्धादौ प्रवृत्त्या वीरमर्य्यादातः पतनं स्खलनमात्रम् । अथ वा न्यायोक्तं तत्पर्य्यायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरकल्पनेन वाद्युक्तौ प्रतिवादिना दत्तदूषणञ्च । यथा नेपालादागतोऽयं नवकम्बलवत्त्वादिति वादिना उक्तौ नवशब्दस्य नूतनार्थपरत्वे स्थिते प्रतिवादिना तस्य न सङ्ख्यायुक्तार्थत्वकल्पनेप्रास्य नवसङ्ख्याकम्बलवत्त्वमिति यद्दूषणं दीयते । तयोश्च । **छलम्** । न० । छो—छेदने । कलच् प्रत्ययः । "छलः स्खलितशाठ्ययोः" इति मेदिनी ॥ पङ्कः कर्दमः । शैवालः जलजातपदार्थभेदः । तयोः । तथा केतक्याञ्च । **जम्बालः** । पु० । जम्ब—गतौ । घञ्प्रत्ययः । जम्बमालाति आदत्ते । आपूर्वला—आदाने । कः प्रत्ययः । "जम्बालः शैवले पङ्के" इति मेदिनी ॥ ३९२ ॥ निर्जने देशे जनशून्ये वने रहसि वा । त्रि० । पिशिते मांसे । पु० न० । तथा वने च । **जङ्गलः** । पु० । गल—भक्षणे, स्रावे च । यङ्अच्प्रत्ययौ । पृषोदरादित्वात् साधुः । "जङ्गलं निर्जनस्थाने त्रिलिङ्ग्यां पिशितेऽस्त्रियाम्" इति मेदिनी ॥ दम्भे कपटे । अपिशब्दात् कदम्बवृक्षे । गवाक्षच्छिद्रे । "गवाक्षजालैरभिनिष्पतन्त्य" इति भट्टिः । मत्स्यधारणार्थे शणसूत्रनिर्म्मिते स्वनामाख्याते आनाये । अस्फुटकलिकायाम् । क्षुद्रफले । मृगपक्ष्यादिधारणार्थे पाशे । शाठ्ये समूहे । इन्द्रजाले । न० । स्वार्थे कन्प्रत्ययः । गवाक्षच्छिद्रे । पु० । मोचकफले । नवकलिकासमूहे । क्षारके च । न० । **जालम्** । न० । जल—संवरणे । घञ्प्रत्ययः । जल—घातने । णिच्अच्प्रत्ययौ । "जालं गवाक्ष आनाये क्षारके दम्भवृन्दयोः" इति मेदिनी ॥ जम्बीरे स्वनामाख्याते वृक्षे । देवभेदे बुद्धदेवान्तरे । अपिशब्दात् राक्षसीभेदे । तस्याः स्मरणे ज्वरनाशात् ज्वरनाशे च । **जम्भला** । स्त्री० । "समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी" इति ग्रन्थान्तरम् । जम्भं जृम्भां लाति । ला—आदाने । कः प्रत्ययः । "जम्भलः पुंसि जम्बीरे बुद्धदेवान्तरेऽपि च" इति मेदिनी ॥ ३९३ ॥ आतपोर्म्मिः सूर्य्यालोकस्य प्रकाशः । दुहिता पुत्री तयोश्च । **झला** । स्त्री० । झॄ—वयोहानौ । अच्प्रत्ययः । रस्य लत्वञ्च । "झला स्यादातपर्योर्मौ दुहितर्यपि च स्त्रियाम्" इति मेदिनी ॥ मूलं स्वरूपम् । यथा भूमितलम् । करतलम् । चपेटः विस्तृताङ्गुलिको हस्तः । तयोः । तथा अधोभागे । तालवृक्षे । खड्गमुष्टौ । आधारे । स्वभावे । पु० । वने । न० । व्याघातवारणे । गर्ते च ।

लोहे हारमणौ पुंसि यवाग्वां तरला स्त्रियाम् ।
ब्रह्मदारौ पिचौ तूलं स्थूणासादृश्ययोस्तुला ॥ ३९५ ॥
तमालो वरुणे खड्गे तापिच्छे तिलकेऽपि च ।
गुवाकेऽपि च ताम्बूलं विडङ्गेऽपि च तण्डुलः ॥ ३९६ ॥

स्त्री० न० । **तलम्** । न० । तल—प्रतिष्ठायाम् । अच्प्रत्ययः । "तलं स्वरूपेऽनूर्द्धेऽस्त्री क्लीबं ज्याघातवारणे । कानने कार्यबीजे च पुंसि तालमहीरुहे । चपेटे च त्सरौ तन्त्रीघाते सव्येन पाणिना" इति मेदिनी॥गितक्रियामाने गीतादौ द्विमात्रादिकालक्रियामाने । हरिताले पीत वर्णे उपधातुभेदे । द्रुमान्तरे स्वनामाख्याते वृक्षभेदे । तथा विस्तृताभ्याम् अङ्गुष्ठमध्यमाभ्यां परिमिते दीर्घपरिमाणभेदे । करतले करस्फोटे । कांस्यमयवाद्यभेदे । खड्गमुष्टौ । लेख्यपत्रे । न०। "तालो द्वादशभिर्जानुभ्रमणात् परिकीर्त्तितः" इत्युक्ते द्वादशधाहस्तेन जानुमण्डलपरिभ्रमणोपलक्षिते कालरूपे मानभेदे च। **तालः** । पु०।तल—प्रतिष्ठायाम् । घञ्प्रत्ययः । णिच्अच्प्रत्ययौ वा । "तालः करतलेऽङ्गुष्ठमध्यमाभ्याञ्च सम्मिते । गीतकालक्रियामाने करास्फाले द्रुमान्तरे । वाद्यभाण्डे च कांस्यस्य त्सरौ ताल्यजटौषधौ।क्लीबन्तु हरिताले स्यात्"इति मेदिनी ॥३९४॥ लोहे धातुभेदे । हारमणौ हारमध्यस्थे मणौ । पु०। यवाग्वां षड्गुणजलपक्के द्रवभेदे । पु० । तथा सुरायाम् । स्त्री० । हारे । तलेच । पु० । च पले । कामुके । विस्तारे भास्वरे । मध्यशून्ये द्रव्ये । द्रवीभूते पदार्थे च । त्रि० । **तरलः** । पु० । तॄ—तरणे, प्लवने, अभिभवने च । अलच्प्रत्ययः । तरलं चञ्चले षिङ्गे भास्वरेऽपि त्रिलिङ्गकम् । हारमध्यमणौ पुंसि यवागुसुरयोः स्त्रियाम्" इति मेदिनी ॥ ब्रह्मदारौ अश्वत्थाकारे वृक्षभेदे । पिचौ कार्पासतूले । "तूलराशिमिवानलः" इति स्मृतिः । तथा आकाशे । वृक्षभेदे च । **तूलम्** । न० । तूल—इयत्तापरिच्छेदे, निष्काशने च । कः प्रत्ययः । "राशौ पलशते भाण्डे तूलं स्यात् ब्रह्मदारुणि । आकाशे च पिचौ न स्त्री" इति मेदिनी ॥ स्थूणा गृहस्तम्भः । सादृश्यः समानता । तयोः । तथा माने । मेषावधितः सप्तमे राशौ । तोलनदण्डे । दिव्यप्रमाणरूपे । परीक्षाभेदे च । "विषवर्जं ब्राह्मणस्य सर्वेषान्तु तुला स्मृता" इति नारदोक्तिः । **तुला** । स्त्री० । तुल—उन्माने । भिदादित्वात् अङ्प्रत्ययः। "तुला सादृश्यमानयोः। गृहाणां दारुबन्धायां पीठिकायामपीष्यते" इति मेदिनी॥३९५॥ वरुणे वरुणवृक्षे । खड्गे असिपत्रे।तापिच्छे स्वनामाख्याते वृक्षे। तिलके तिलकवृक्षे । अपिशब्दात् कृष्णखदिरे च वंशत्वचि । पु०न०। ताम्बूलवल्ल्याम् । वरुणवृक्षे च । स्त्री०।ङीप् । **तमालः** । पु० । तम—खेदे । कालन्प्रत्ययः । "तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे" इति मेदिनी ॥ गुवाके क्रमुके। अपिशब्दात् नागवल्लीदले च। स्त्री०। **ताम्बूलम्** । न०। तम- खेदे । ऊलच्प्रत्ययः । बुगागमः दीर्घश्च । "ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्" इति मेदिनी ॥ विडङ्गे स्वनामाख्याते औषधभेदे । पु० । स्त्रियां टाप् । अपिशब्दात् धान्यादिसारे । निस्तुषे धान्यादौ तण्डुलीयशाके च । **तण्डुलः** । पु० । तडि—आहतौ । उलच्प्रत्ययः । "त-

दुकूलं श्लक्ष्णवस्त्रेऽपि चार्द्धे पत्रे छदे दलम् ।
धवला गवि ना शण्डे शुक्लसुन्दरयोस्त्रिषु ॥ ३९७ ॥
परमाणौ च पीलुः स्याद्देहे चात्मनि पुद्गलः ।
शस्ताकारेऽप्यथ तरौ पिप्पलः पिप्पलं जले ॥ ३९८ ॥
शाल्मली शिंशपा चैव पोतिका चाऽपि पिच्छिला ।
सश्मश्रुयुवती पालिः पङ्क्तिः कर्णलताऽपि च ॥ ३९९ ॥

ण्डुलः स्याद्विडङ्गे च धान्यादिनिकरे पुमान्'' इति मेदिनी ॥ ३९६ ॥ श्लक्ष्णवस्त्रे अल्पघनवस्त्रे । क्वचित् शुक्लवस्त्रे इति पाठः । अपिशब्दात् क्षौमाम्बरे । सूक्ष्मवस्त्रे च । **दुकूलम्** । न० । दु–गतौ । ऊलच्प्रत्ययः । कुक् च । दुष्टं कूलति । कूल–आवरणे । कः प्रत्ययो वा । पृषोदरादित्वात् साधुः । ''दुकूलं श्लक्ष्णवस्त्रे स्यात् क्षौमे च'' इति मेदिनी ॥ अर्द्धे खण्डे । पत्रे । छदे तमालपत्रे । चकारात् शस्त्रच्छेदे । अपकृष्टद्रव्ये । उच्चतायाम् । पङ्के । उत्सेधवस्तुनि च । पु० । **दलम्** । न० । दल–भेदे । अच्प्रत्ययः । ''दलमुत्सेधखण्डयोः । शस्त्रच्छेदेप्यऽपद्रव्ये पत्रे'' इति मेदिनी ॥ गवि वृषे । पु० । शण्डे वृषश्रेष्ठे । शुक्लः श्वेतवर्णः । सुन्दरः मनोहरः । तयोः । त्रि० । तथा धववृक्षे । वीरणवृक्षे । श्वेतमरिचे । चीनकर्पूरे । शुक्लवर्णायां गवि । स्त्रियां टाप् । गौरादित्वात् ङीप् वा । **धवला** । स्त्री० । धवं कम्पं लाति । ला–आदाने । कः प्रत्ययः । ''धवला गवि । वृषश्रेष्ठे पुमान् वाच्यलिङ्गः शुक्ले च सुन्दरे'' इति मेदिनी ॥ ३९७ ॥ परमाणौ वैशेषिकसिद्धे पृथिव्यादीनां चतुर्णां भूतानां द्व्यणुकरूपावयवारम्भके सूक्ष्मभूते । यथा पीलुपाकः पिठरपाकः इति वैशेषिकभेदः । चकारात् गजे । अस्थिखण्डे । तालकाण्डे । वासे । कृमौ । कोङ्कणदेशख्याते गुडफले वृक्षे । कुसुमे च । **पीलुः** । पु० । स्यादित्यन्वयः । पील–रोधे । उः प्रत्ययः । ''पीलुः पुमान् प्रसूने स्यात् परमाणौ मतङ्गजे । अस्थिखण्डे च तालस्य काण्डपादपभेदयोः'' इति मेदिनी ॥ देहे शरीरे । आत्मनि रूपादिविशिष्टे द्रव्ये । शस्ताकारे उत्कृष्टाकारे । चकारात् व्यणुकादिस्थानीये बोद्धाद्युक्ते पदार्थे च । **पुद्गलः** । पु० । गलतीति । गल–भक्षणे, स्रावे च अच्प्रत्ययः । पुत् कुत्सितं गलो यस्मादिति पञ्चमीबहुव्रीहिः । पुद्गलः सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः'' इति मेदिनी ॥ अथ अनन्तरार्थवाची । तरौ अश्वत्थवृक्षे । पु० । जले पानीये। तथा वस्त्रखण्डभेदे । बन्धनशून्ये पक्षिणि च। पु०। कणायाम् । स्त्रियां ङीप् वा । ह्रस्वः। ततः पिप्पलिः पिप्पली अप्यत्र । **पिप्पलम्** । न० पु० । पा–पाने, रक्षणे वा । अलच्प्रत्ययः । पृषोदरादित्वात् साधुः । ''पिप्पलं सलिले वस्त्रच्छेदभेदे च ना तरौ । निरंशुके पक्षिभेदे कणायां पिप्पली मता'' इति मेदिनी ॥ ३९८ ॥ शाल्मली स्वनामाख्यातो वृक्षः। शिंशपा स्वनामाख्यातो वृक्षः। पोतिका श्लेष्मातकवृक्षः । एतेषु, स्त्री० । तथा मसृणे । स्निग्धे ''पिच्छिलानि च दधीनि'' इति काव्यप्रकाशः । भक्तमण्डे । क्षारक्षव्यञ्जनसूपादौ । मण्डयुक्तभक्ते च । पु० । **पिच्छिला** । त्रि० । पिच्छा अस्यास्तीति

वीणादण्डे प्रबालोऽस्त्री विद्रुमे नवपल्लवे ।
नले काशे पोटगलः पित्तयुक्ते च पित्तलः ॥ ४०० ॥
पिङ्गलः स्यात् कपावग्नावाशुव्रीहिश्च पाटलः ।
फलं जातिफले लाभे बाणाग्रे फलकेऽपि च ॥ ४०१ ॥

अस्त्यर्थे इलच् प्रत्ययः । "पिच्छिलो विजिलेऽन्यवत् । स्त्री पोतिका शिंशपयोः शाल्मली सिन्धुभेदयोः" इति मेदिनी ॥ सश्मश्रुयुवती श्मश्रुयुक्ता तरुणी । पङ्क्तिः सजातीयसन्ततिः । कर्णलता कर्णपत्रम् एतासु । अपिशब्दात् कोणे यूकायाम् । सेतौ । प्रान्तभागे । प्रशंसायाम् । क्रोडे च । **पालिः** । स्त्री० । पाल—रक्षणे इन्प्रत्ययः । वा ङीप् । पाली अप्यत्र । "पालिः कर्णलताग्रेऽश्रौ पङ्क्तावङ्कप्रभेदयोः । छात्रादिदेये स्त्री पाली यूकाश्मश्रुयोषितोः" इति मेदिनी ॥ ३९९ ॥ वीणादण्डे वीणावाद्यस्थितालावुपरिस्थे काष्ठदण्डे । विद्रुमे रक्तवर्णमणिभेदे । नवपल्लवे नूतनकिशलये । "पुष्पं प्रबालोपहितं यदि स्यात्" इति कुमारः । **प्रबालः** । पु० न० । प्रकर्षेण बलति अवकम्प्यते ज्वलादित्वात् । प्रपूर्वः बल—जीवने । णः प्रत्ययः । "प्रबालोऽस्त्री किशलये वीणादण्डे च विद्रुमे" इति मेदिनी ॥ नले तृणभेदे । काशे काशाख्ये तृणे । तथा मत्स्ये च । **पोटगलः** । पु० । पोटेन श्लेष्ममात्रेण गलति । गल—भक्षणे, स्रावे च । अच्प्रत्ययः । "अथ पोटगलः पुंसि नले च काशमत्स्ययोः" इति मेदिनी ॥ पित्तयुक्ते पित्तबलवति, पित्तरोगवति च । चकारात् ताम्रादिजाते धातुभेदे । तोयपिप्पल्याम् । स्त्री० । **पित्तलः** । पु० । पित्तं लाति । ला—आदाने । कः प्रत्ययः । "पित्तला तोयपिप्पल्यां स्त्र्यन्यवत् पित्तसंयुते" इति मेदिनी ॥ ४०० ॥ कपौ वानरे । अग्नौ वैश्वानरे । तथा नागभेदे । रुद्रे । सूर्यपारिपार्श्वके । निधिभेदे । मुनिभेदे । मङ्गलग्रहे । स्थावरविषभेदे । क्षुद्रोलूके । षष्टिवर्षमध्ये । "पिङ्गले चारु पद्माक्षि दुर्भिक्षं नर्मदातटे" इत्युक्तलक्षणे वत्सरभेदे । प्राकृतछन्दोग्रन्थकारके । नागरूपे मुनिभेदे । दीपशिखातुल्ये वर्णे च । तद्वति । त्रि० । कुमुददिग्गजस्य योषिति । नाडिभेदे । राजनीतौ । शिंशपावृक्षे । वामनाख्यदिग्गजस्य योषिति । वेश्याभेदे । स्त्रियां टाप् । "यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ।" इति पुराणम् । **पिङ्गलः** । पु० । पिङ्गं लाति । ला—आदाने । कः प्रत्ययः । पिजि—दीप्तौ, वासे, बले च । कलच्प्रत्ययो वा । कुत्वम् । "पिङ्गलो नागभिद्रुद्रचण्डांशुपारिपार्श्वके । निधिभेदे कपावग्नौ पुंसि स्यात् कपिलेऽन्यवत् । स्त्रियां वेश्याविशेषे च करिण्यां कुमुदस्य च" इति मेदिनी ॥ आशुव्रीहिः । आशुधान्यम् । तत्र । न० । चकारात् श्वेतरक्तवर्णे । तद्वति । त्रि० । स्वनामाख्याते वृक्षे । स्त्री० । तत्पुष्पे च । न० । **पाटलः** । पु० । पाटयति । पट—दीप्तौ, वेष्टने वा । णिच्कलच्प्रत्ययौ । "पाटला पाटलो स्त्रीस्यादस्य पुष्पे पुमर्न ना । आशुधान्ये पुमान् श्वेतरक्तवर्णेऽपि वाच्यवत्" इति मेदिनी ॥ जातिफले स्वनामाख्याते फले । लाभे । बाणाग्रे । फलके । अपिशब्दात् वृक्षादीनां सस्ये । कार्ये । उद्देश्ये । प्रयोजने । त्रिफलायाम् । कक्कोले । फाले । दाने । मुष्के च ।

फेणिलं बदरेऽरिष्टे बालो ह्रीवेरकेशयोः ।
बलिर्जराश्लथत्वे स्त्री गृहदार्वसुरौ बली ॥ ४०२ ॥
बलं गन्धरसे रूपे क्लीबं वाट्यालके स्त्रियाम् ।
बहुलः कृष्णपक्षेऽपि मेलानन्द्यपि वार्दलः ॥ ४०३ ॥

कुटजवृक्षे । पु० । सामर्थ्यादौ । कन् प्रत्ययः । चर्ममये अस्त्रप्रतिघातनिवारणे पदार्थे । अस्थि-खण्डे । नागकेशरे । काष्ठादिपट्टके च । पु० । **फलम्** । न० । फल—निष्पत्तौ, गतौ वा । अच्प्रत्ययः । "फलं जातिफले सस्ये हेत्वर्थे व्युष्टिलाभयोः । त्रिफलायाञ्च कक्कोले" इति मेदिनी ॥ ४०१ ॥ बदरे बदरवृक्षे । अरिष्टे निम्बवृक्षे । तद्वत् फेणविशिष्टे । कोलिफले । मदनवृक्षफले च । न० । **फेणिलम्** । त्रि० । फेणमस्यास्तीति । अस्त्यर्थे इलच्प्रत्ययः । अत्र फेनिल इति दन्त्यनकारमध्यपाठोऽपि युज्यते । "फेणिलोऽरिष्टपादपे । नासफेने त्रिषु क्लीबं कोलीमदनयोः फले" इति मेदिनी ॥ ह्रीवेरः गन्धद्रव्यभेदः । केशः निकुरः । तयोः । पु० । तथा मूर्खे । शिशौ च । त्रि० । अश्वशिशौ । अश्ववालधौ । हस्तिवालधौ । नारि-केले । पशुपुच्छे च । पु० । **बालः** । पु० न० । बल--जीवने, निरूपणे । वा घञ्प्रत्ययः । "बालो ना कुन्तलेऽश्वस्य करिणश्चापि वालधौ । नारिकेले हरिद्रायां मल्लिकाभिद्यपि स्त्रियाम् । वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुन्नपुंसकम्" इति मेदिनी ॥ जराश्लथत्वे जरया श्लथचर्मणि । स्त्री० । वा ङीप्प्रत्ययः । "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः" इति स्मृतिः । गृह-दारु गेहदारुप्रभेदः । असुरः दैत्यभेदः, विरोचनपुत्रो वा । "येन बद्धो बली राजा दानवेन्द्रो महाबली" इति रक्षाबन्धनमन्त्रः । तयोः । तथा पूजोपहारे । "ददतुस्तौ बलिं चैव निज-गात्रासृगुक्षितम्" इति चण्डी । राजग्राह्ये भागे । उपप्लवे । चामरदण्डे । गृहस्थकर्त्तव्ये पञ्च-यज्ञमध्ये भूतयज्ञे । "बलिकर्म्म ततः कुर्यात्" इति स्मृतिः । उदरावयवे । "बलित्रयं चारु बभार बाला ।" इति कुमारः । गुह्यस्थे अङ्कुराकारे मांसपिण्डे । अतिबलायाञ्च । **बलिः** । पु० । बल दाने, वधे, निरूपणे च । इन्प्रत्ययः । बलमस्त्यस्येति । अस्त्यर्थेऽपि इनिः प्रत्ययो वा । "बलिर्दैत्यप्रभेदे च करिचामरदण्डयोः । उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि । गृह-दारुप्रभेदे च जठरावयवेऽपि च" इति मेदिनी ॥ ४०२ ॥ गन्धरसे । रूपे । न० । वाट्या-लके क्षुपभेदे । स्त्री० । तथा सैन्ये देहजे सामर्थ्ये । स्थौल्ये । देहे । पल्लवे । रक्ते च । बल-युक्ते । त्रि० । काके । बलदेवे । वरुणवृक्षे । दैत्यभेदे च । पु० । **बलम्** । न० । बल—जीवने । अच्प्रत्ययः । "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च" इति मेदिनी ॥ कृष्णपक्षे कालपक्षे । अपिशब्दात् अनेकसङ्ख्यान्विते प्रचुरे । अग्नौ । कृष्णवर्णे च । पु० । तद्वति । त्रि० । "बहुलेऽपि गते निशाकरः" इति कुमारः । आकाशे । न० । नीलिकायाम् । नीलवर्णायां गवि च । स्त्री० । प्रचुरे । त्रि० । अग्निदैवतत्वात् कृत्तिकानक्षत्रे च । स्त्रियां टाप् च । **बहुलः** । न० बहि-

दुर्दिनेऽप्यथ वेला स्यात्सिन्धोः कूले च भोजने ।
ऋषिभेदे प्लवे पुंसि भेलं भीरुहृदि त्रिषु ॥ ४०४ ॥
मेखलाद्रिनितम्बेऽपि ग्रहे ना मङ्गलं शुभे ।
निकटेऽपि च मूलं स्याद्धुस्तूरेऽपि च मातुलः ॥ ४०५ ॥

वृद्धौ । कुलच्प्रत्ययः । निपातनात् न लोपः । "बहुला नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राच्यकृष्णयोः" इति मेदिनी ॥ मेलानन्दा (दोआत) इति प्रसिद्धः मस्याधारः । पु० । दुर्दिने मेघाच्छन्ने दिवसे । अपिशब्दात् दक्षिणावर्त्तशङ्खे । काकचिञ्च्याम् । कृष्णलाबीजे । कृमिजे । आम्रबीजे च । न० । **वार्दलः** । पु० । वारे जलाय दीर्यते । दृ—आदरे । अप्प्रत्ययः । रस्य लश्च । कचित्तु वार्दर इति पाठः । "वार्दलः दुर्दिने मेलानन्दायां वार्दलः स्मृतः" इति मेदिनी ॥ ४०३ ॥ अथ अनन्तरार्थद्योतको निपातः । सिन्धोः कूले समुद्रकूले । स्त्री० । "वेलामूले विभावरीपरिहीने" इति भट्टिः । भोजने ईश्वरस्य भोजने । तथा उपवने । काले । समये । मर्यादायाञ्च । **वेला** । स्त्री० । स्यादित्यन्वयः । वेल—कालोपदेशे । अच् प्रत्ययः । वेला काले च सीमायामब्धेः कूलविकारयोः । अक्लिष्टमरणे रागे ईश्वरस्य च भोजने" इति मेदिनी ॥ ऋषिभेदे मुनिविशेषे । प्लवे नद्यादितारणार्थे प्लवे । पु० । भीरुहृदि भयशीलिनि चित्ते । त्रि० । तथा अज्ञे च । **भेलम्** । न० । भी—भये । रन्प्रत्ययः । रस्य लश्च । "भेलः प्लवे मुनौ पुंसि भीराव्ज्ञे च वाच्यवत्" इति मेदिनी ॥ ४०४ ॥ अद्रिनितम्बे पर्वतनितम्बे । अपिशब्दात् स्त्रीकट्या भूषणे उपनयनकाले ब्रह्मचारिधार्ये कटीसूत्रे । खड्गादेर्मुष्ट्या धारणार्थे उपर्यधोभागेन बन्धे । नर्मदायाम् । पृश्निपर्ण्याम् । होमकुण्डोपरिस्थे मृत्कृते वेष्टनभेदे च । **मेखला** । स्त्री० । मि—क्षेपे । खलच्प्रत्ययः । "मेखला खड्गबन्धे स्यात् काञ्चीशैलनितम्बयोः" इति मेदिनी ॥ ग्रहे भूमिसुते, ग्रहभेदे वा । पु० । शुभे प्रशस्ते । न० । तथा अभीष्टार्थसिद्धौ च । तद्वति । त्रि० । दुर्गायाम् । हरिद्रायाम् । दूर्वायाम् । पतिव्रतायाञ्च । स्त्री० । **मङ्गलम्** । न० । मगि—सर्पणे । अलच्प्रत्ययः । "मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे नपुंसकन्तु कल्याणे सर्वार्थरक्षणेऽपि च" इति मेदिनी ॥ निकटे अन्तिके । अपिशब्दात् शिफायाम् । आद्ये । निकुञ्जे । वाणिज्याद्युपयोगिनि मूलधने । निजे । चरणे । शूरणे । पिप्पलीमूले । टीकादिना व्याख्येयग्रन्थे च । अश्विन्यवधिके ऊनविंशे नक्षत्रे च । त्रि० । **मूलम्** । न० । स्यादित्यन्वयः । मूल—प्रतिष्ठायाम् । कः प्रत्ययः । "मूलं शिफाद्ययोः मूलवित्तेऽन्तिके वा ना भे" इति मेदिनी । धुस्तूरे मदनवृक्षे । अपिशब्दात् मातृभ्रातरि । तत्पत्न्यां वा । ङीप् वा । आनुक् च । "मातुलानी" "मातुली" मातुला चेति स्यात् । सर्पभेदे च । **मातुलः** । पु० । मातुर्भ्राता । मातृशब्दात् डुलच्प्रत्ययः । अथ वा । मद—हर्षे, गर्वे च । णिच्उलच्प्रत्ययौ । पृषोदरादित्वात् दस्य तः । "मातुलो व्रीहिभिन्मातृभ्रात्रोश्च मदनद्रुमे । धुस्तूरे मातुलो नन्दि-

मौलिः कङ्केलिवृक्षेऽपि मल्लः पात्रे कपालिनि ।
बलीयसि च मत्स्ये च मण्डूलं परिधौ गणे ॥ ४०६ ॥
बिम्बे देशे ना च शुनि रसालस्त्विक्षुचूतयोः ।
जिह्वाकमलयोर्लोला शाला स्याद्गृहशाखयोः ॥ ४०७ ॥
तरुजातौ मत्स्यभेदे शालो हाले नृपेऽपि च ।
निगडे पुंस्कटीबद्धवस्त्रे च शृङ्खलं त्रिषु ॥ ४०८ ॥

चौरे च ग्राहरोगयोः'' इति मेदिनी ॥ ४०५ ॥ कङ्केलिवृक्षे अशोकद्रुमे । अपिशब्दात् चूडायाम् । किरीटे । संयतकेशेषु च । भूमौ । स्त्री० । वा ङीप् । **मौलिः** । पु० । मूल-स्यादूरभवः । इञ्प्रत्ययः । ''मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् । नाऽशोकद्रौ स्त्रियां भूमौ'' इति मेदिनी ॥ पात्रे दीपाधारे पात्रे । कपालिनिः कपोलौ । बलीयसि । मत्स्य-भेदे । तथा बाहुयुद्धकारके नियोद्धरि च । **मल्लः** । पु० । मल्ल-धृतौ । अच्प्रत्ययः । ''मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि'' इति मेदिनी ॥ परिधौ चन्द्रसूर्यसमीपस्थे मेघा-दिसन्निकर्षात् जायमाने वेष्टनाकारे, चक्राकारेण वेष्टने वा। यथा । ''सूर्यमण्डलम् । भूमण्डलम्''। गणे समूहे । ''अर्थमण्डलमण्डलम्'' इति वोपदेवः ॥ ४०६ ॥ बिम्बे दर्पणादौ भासमानप्रति-बिम्बाश्रये, सूर्यादिमण्डले वा । देशे चतुःशतयोजनमिते देशभेदे । शुनि कुक्कुरे । तथा द्वाद-शनृपचक्रे । गोले चक्रे ''मण्डलाकारपादाख्यं मण्डलं स्थानमीरितम्'' इत्युक्ते धन्विनां स्थान-भेदे । कृत्रिमरेखासन्निकटवशेन रचिते पदार्थे च । यथा ग्रहमण्डलं सर्वतोभद्रमण्डलमित्यादि । **मण्डलम्** । न० । मडि-भूषणे । कलच्प्रत्ययः । ''मण्डलं परिधौ कोटे देशे द्वादशराजसु । क्लीबेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे'' इति मेदिनी॥ इक्षुः स्वनामाख्यातो वृक्षः । चूतः आम्र । ''रसालसालः समदृश्यतामुना'' इति नैषधम् । तथा सिह्लके । गन्धरसे । शिखरि-ण्याम् । रास्नायाम् । दूर्वायाम् । विदार्याम् । द्राक्षायाम् । स्त्री० । पनसे । गोधूमे । पुण्ड्रकेक्षौ च । **रसालः** । पु० । रसमालाति । आपूर्वः ला-आदाने । कः प्रत्ययः । रसां भूमिमाल-यति । आपूर्वः ली-द्रावणे । श्लेषे च । डः प्रत्ययः । ''रसालं सिह्लके बोले रसाऽथेक्षुचूतयोः'' इति मेदिनी ॥ जिह्वा रसना । कमलं पद्मम् । तयोः । तथा सतृष्णे । चञ्चले । लक्ष्म्याञ्च।**लोला**। स्त्री० । न० । लोड-उन्मादे । अच् प्रत्ययः । डस्य लः । ''सतृष्णे चञ्चले लोला जिह्वाकमलयोः स्त्रियाम्'' इति मेदिनी॥ गृहं सदनम् । शाखा वृक्षस्य स्कन्धशाखा । तयोश्च । **शाला** । स्त्री० । शाल-कथने । स्यादित्यन्वयः । अच्प्रत्ययः । ''शाला द्रुस्कन्धशाखायां गृहगेहैकदेशयोः । ना झषे'' इति मेदिनी ॥ ४०७ ॥ तरुजातौ स्वनामाख्याते वृक्षभेदे । मत्स्यभेदे झषविशेषे । हाले लाङ्गले । नृपे राजनि । क्वचित् ''हालनृपे'' इति पाठो दृश्यते । एवंसति तन्नामके राजनीत्यर्थः । अपिशब्दात् प्राकारे । वृक्षमात्रे । दन्त्यादिस्तु वृक्षमात्रे च । **शालः** । पु० । शल-गतौ। चालने च । घञ्प्रत्ययः । ''शालो हाले नृपे मत्स्यप्रभेदे सर्जपादपे'' इति विश्वः । निगडे अन्दुके।**लौह-**

शालिर्गन्धमृगे धान्ये शयालुः कुक्कुरेऽलसे ।
शकलं वल्कले खण्डे शीतलः शिशिरेऽनिले ॥ ४०९ ॥
षण्डाली तैलमाने स्यात्सारसीकामुकस्त्रियोः ।
सिध्मला शुष्कमीने स्त्री त्रिलिङ्गयान्तु किलासिनि ॥ ४१० ॥
ऋजौ वृक्षे च सरलः सालो वरणसर्जयोः ।
हस्तिमल्लो गजास्ये च हेलाऽवज्ञाविलासयोः ॥ ४११ ॥

इति लान्ताः ॥

मये पादबन्धने च । पुंस्कटीबद्धवस्त्रे गर्भसंस्कारकाले श्रोणिदेशे बद्धवस्त्रे । पुरुषस्य कटीप्रदेशबद्धवस्त्रखण्डे च । लौहमये हस्तिपादबन्धने च । **शृङ्खलम्** । त्रि० । शृङ्गात् प्राधान्यात् स्खल्यतेऽनेनेति । पृषोदरादित्वात् साधुः । शृङ्खला पुंस्कटीवस्त्रबन्धे च निगडे त्रिषु' इति मेदिनी ॥ ॥ ४०८ ॥ गन्धमृगे गन्धमार्जारे । धान्ये कलमादिधान्ये । षष्टिकादिधान्ये च । **शालिः** । पु० । शल—गतौ, श्लाघायाम् । इञ्प्रत्ययः । "शालिस्तु कलमादौ च गन्धमार्जारके पुमान्" इति मेदिनी ॥ कुक्कुरे शुनि । अलसे निद्राशीले । तथा अजगरे च । **शयालुः** । त्रि० । शी—शयने । आलुच्प्रत्ययः । "शयालुः स्यादजगरे निद्राशीले च कुक्कुरे" इति मेदिनी ॥

वल्कले वृक्षत्वचि । खण्डे एकभागे । तथा त्वचि । शल्के च । **शकलम्** । न० । शक—सामर्थ्ये । कलच्प्रत्ययः । "शकलं त्वचि खण्डे स्याद् रागवस्तुनि वल्कले" इति विश्वमेदिन्यौ । शिशिरे शीतस्पर्शे । अनिले वायौ । च तथा मलयोद्भवे चन्दने । शैलेये । न० । पद्मके । मौक्तिके । वीरणमूले । अशनपर्ण्याम् । बहुवारवृक्षे । चम्पके । चन्द्रे । कर्पूरे । राले च । **शीतलः** । पु० । शीतं लाति । ला—आदाने । कः प्रत्ययः । "शीतलं पुष्पकाशीशे शैलजे मलयोद्भवे । पुमानशनपर्ण्यां स्याच्छिशिरे वाच्यलिङ्गकम्" इति मेदिनी ॥ ४०९ ॥ तैलमाने तैलस्य मानयोग्ये । सारसी सारसपक्षिणी । कामुकस्त्री कामाभिलाषवती । एतयोश्च । **षण्डाली** । स्त्री० । स्यादित्यन्वयः । षडि—सङ्घाते, रोगे च । अलच्प्रत्ययः । ङीप् वा । पृषोदरादित्वात् षत्वञ्च । "षण्डाली तैलमाने च सारसीकामुकस्त्रियोः" इति मेदिनी ॥ शुष्कमीने आतपशुष्कमत्स्ये । स्त्री० । किलासिनि किलासरोगवति । तथा विकारे च । त्रि० । **सिध्मला** । स्त्री० । सिध—सिद्धौ । मनिन्प्रत्ययः । किच्च । सिध्मा अस्त्यस्येति अस्त्यर्थे पुनर्लच्प्रत्ययः । "सिध्मला मत्स्यविकृतौ वाच्यवत्तु किलासिनि" इति मेदिनी ॥ ४१० ॥ ऋजौ अवक्रे । वृक्षे पीतदारुणि । धूपकाष्ठभेदे । चकारात् उदारे च । त्रि० । त्रिपुटायाम् । स्त्री० । **सरलः** । पु० । सृ—गतौ । अलच्प्रत्ययः । "सरलः पूतिकाष्ठे नाऽथोदारावक्रयोस्त्रिषु" इति मेदिनी ॥ वरणः प्राकारः । सर्ज्जः स्वनामाख्यातो वृक्षः । तयोः । तथा वृक्षमात्रे च । "रसालः सालः समदृश्यते" इति नैषधम् । **सालः** । पु० । सल—गतौ । घञ्प्रत्ययः । "सालः पादपमात्रे स्यात् प्राकारे सर्जपादपे" इति मेदिनी ॥ गजास्ये गणेशे, गजवदने च ।

यागे च मद्यसन्धाने स्नाने चाभिषवः पुमान् ।
मृतावसत्त्वे चाभावः स्याद्रजः पुष्पमार्तवम् ॥ ४१२ ॥
आश्रवोऽङ्गीकृतौ वश्ये आहवौ यागसङ्गरौ ।
उपप्लवौ राहूत्पातौ कितवौ मत्तवञ्चकौ ॥ ४१३ ॥
खलीने स्त्री कविः पुंसि काव्यकृच्छुक्रसूरिषु ।
कैतवन्तु छले द्यूते राजिकायां क्षुते क्षवः ॥ ४१४ ॥

चकारात् अभ्रमातङ्गे । शङ्खनाभे च ॥ **हस्तिमल्लः** । पु० । हस्तिन इव मल्लो यस्येति बहुव्रीहिः । "हस्तिमल्लोऽभ्रमातङ्गे शङ्खनाभे विनायके" इति मेदिनी ॥ अवज्ञा निन्दा । विलासः स्त्रीणां शृङ्गारभावजः चेष्टाविशेषः । "प्रौढेच्छायाऽतिरूढानां नारीणां सुरतोत्सवे । शृङ्गारशास्त्रतत्त्वज्ञैर्हेला सा परिकीर्त्तिता" इति तयोश्च । **हेला** । स्त्री० । हेड-अनादरे । भावे अः प्रत्ययः । डस्य लश्च । "हेला स्त्रियामवज्ञायां विलासे वरयोषिताम्" इति मेदिनी ॥ ४११ ॥ इति लकारान्ताः समाप्ताः । अथ वान्तानाह ॥ यागे यज्ञे । मद्यसन्धाने सुरोत्पादनादिव्यापारे । स्नाने तथा पीडने । सोमलतापाने । तत्कण्डने । **अभिषवः** । पु० । अभिपूर्वः सू-प्रसवे । अप्प्रत्ययः । "भवेदभिषवः स्नाने मद्ये सन्धानयज्ञयोः" इति मेदिनी ॥ मृतौ मरणे । असत्त्वे अविद्यमानतायाम् । चकारात् न्यायमते । द्रव्यादिषट्कं भावः पदार्थः तद्भिन्ने च । **अभावः** । पु० । स्यादित्यव्ययः । भू-सत्तायाम् । घञ्प्रत्ययः । नञ्तत्पुरुषः । "अभावो मरणेऽसत्त्वे" इति मेदिनी ॥ रजः स्त्रीपुष्पम् । पुष्पं कुसुमम् । तयोः । तथा ऋतुजे फलपुष्पादौ । त्रि० । योषित्याम् । स्त्रियाम् ङीप् च । **आर्त्तवम्** । न० । ऋतौ भवम् । अण्प्रत्ययः । ऋतुरस्य प्राप्तः । अण्प्रत्ययश्च । "आर्त्तवं स्त्रीरजः पुष्पं क्लीबं स्यादृतुजे त्रिषु" इति मेदिनी ॥४१२॥ अङ्गीकृतौ स्वीकृतौ । कृताङ्गीकारे वा । अवश्ये आयत्ते । तथा क्लेशे । प्रवर्त्तयितुं निवर्त्तयितुं वा शक्ये । वचनस्थिते च । **आश्रवः** । पु० । आश्रुणोति वाक्यम् । आपूर्वः श्रु-श्रवणे । अप् प्रत्ययः । आश्रवोऽङ्गीकृतौ क्लेशे नान्यवद्वचनस्थिते" इति मेदिनी ॥ यागः यज्ञः । सङ्गरः युद्धम्, आपद्वा । तयोश्च । **आहवः** । पु० । न० । आहूयन्तेऽरयोऽत्र। आपूर्वः ह्वे-स्पर्द्धायाम्, शब्दे, आह्वानेऽर्थे च। अप्प्रत्ययः । संप्रसारणे गुणः। आहूयतेऽत्र । आपूर्वः हु-होमे, अदने च । अप्प्रत्ययः।"आहवो युद्धयज्ञयोः" इति मेदिनी ॥ राहुः ज्योतिश्चक्रस्थः सूर्यकिरणसम्पर्काभावेन जायमानः पृथिवीच्छायाधिष्ठाता ग्रहभेदः सिंहिकासुतो, दानवो वा। चन्द्रार्कग्रहणञ्च। उत्पातः गगनादुल्कापातादिरूप उपद्रवः तयोश्च। **उपप्लवः**। पु०। उपपूर्वः प्लु-सर्पणे, उत्प्लुत्यगतौ च । अप्प्रत्ययः।"उपप्लवः सैंहिकेये विप्लवोत्पातयोरपि" इति मेदिनी ॥ मत्तः धुस्तूरवृक्षः । वञ्चकः मायाकारः । तयोः । तथा खले । द्यूतकारके । चोरनामकगन्धद्रव्ये च । **कितवः**। पु०। कि-ज्ञाने । क्तः प्रत्ययः । किलेन वाति। वा-गतौ। कप्रत्ययः "कितवस्तु पुमान् मत्ते वञ्चके कनकाह्वये" इति मेदिनी॥४१३॥खलीने अश्वमुखस्थायां कविकायाम् । स्त्री० । वा ङीप्। काव्यकृत् काव्यनिर्म्माता । शुक्रः असुराचार्यः । सूरिः भास्करः।

केशवः केशवी विष्णुर्गालवो मुनिलोध्रयोः ।
जीवोऽस्त्री जीविते पुंसि गुरुजन्त्वोः स्त्रियां गुणे ॥ ४१५ ॥
तत्त्वं विलम्बिते नृत्ये स्वरूपे परमात्मनि ।
मेघे राज्ञि सुरे देवो द्विजिह्वौ व्यालसूचकौ ॥ ४१६ ॥

एतेषु । तथा वाल्मीकमुनौ । ब्रह्मणि च । अतीतानागतसर्वज्ञे सूक्ष्मार्थदर्शिनि पण्डिते । त्रि०। **कविः** । पु० । कु—शब्दे । इः प्रत्ययः । "कविर्वाल्मीकशुक्रयोः। सूरौ काव्यकरे पुंसि स्यात् खलाने तु योषिति" इति मेदिनी ॥ छले कपटतायाम् । द्यूते अक्षधूर्ते । तथा वैदूर्यमणौ । धुस्तूरपुष्पादौ च । **कैतवम्** । न० । कितवस्य कर्म्म । अण्प्रत्ययः । स्वार्थे अण्प्रत्ययो वा । "कैतवन्तु छले द्यूते" इति मेदिनी ॥ राजिकायां राजसर्षपे । स्त्री० । क्षुते नासातः वायुनिः-सरणजे शब्दे च । **क्षवः** । पु०। क्षु—क्षुतौ। अः प्रत्ययः । "क्षवः क्षुते राजिकायाम्" इति मेदिनी ॥ ४१४ ॥ केशवी प्रशस्तकेशवान् । विष्णुः हरिः । "यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन ॥ तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसि" इति तयोः । तथा सूर्यांशु-शवति परेश्वरे । "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मात् मां प्राहु-र्द्विजसत्तमाः" इति परवादिमतम्। **केशवः** । पु०। केशौ ब्रह्मरुद्रौ सर्वेश्वरावपि अनुकम्प्यतया वाति । वा—गतौ । डः प्रत्ययः । केशं केशिनं वाति हिनस्ति । वा—गमने । कः प्रत्ययो वा । "केशवोऽजे च पुन्नागे पुंसि केशवति त्रिषु" इति मेदिनी ॥ मुनिः मुनिभेदः । लोध्रः लोध्र-वृक्षः । तयोश्च । **गालवः** । पु० । गल—भक्षणे, स्रावे च । घञ्प्रत्ययः । तं गालं वाति । वा—गमने । कः प्रत्ययः । गालवस्तु मुनौ लोध्रे" इति मेदिनी ॥ जीविते प्राणधारणे । पु० । गुरुः बृहस्पतिः । जन्तुः प्राणी । प्राणान् क्षेत्रज्ञरूपेण धारयन् जीव उच्यते" इति । तयोः । गुणे धनुषो मौर्व्यां धनुराकर्षणदामनि । स्त्री० । तथा जीवनोपाये । वृक्षभेदे । देहाभिमानिनि आत्मनि । मनुष्यावधिकीटपर्यन्ते चेतने च **जीवः** । पु० न० । जीव—प्राणधारणे । कः प्रत्ययः । करणे भावे च घञ् प्रत्ययश्च । णिच्अच्प्रत्ययौ वा । "जीवः प्राणिनि वृत्तौ च वृक्षभेदे बृहस्पतौ । जीवा जीवन्तिका मौर्वी वचाशिञ्जिनभूमिषु । न स्त्री तु जीविते" इति मेदिनी ॥ ४१५ ॥ विलम्बिते अशीघ्रे मन्दे वा । नृत्ये नृत्यवाद्यादौ । स्वरूपे याथार्थ्ये । परमा-त्मनि । ब्रह्मणि । तथा चेतसि । ब्रह्मत्वे । वस्तुनि। सांख्योक्तेषु प्रकृत्यादिषु पञ्चविंशतौ पदार्थेषु च । **तत्त्वम्** । न० । तन—उपकारे, श्रद्धायाम् । शब्दे, आघाते च । क्विप्प्रत्ययः । ततो भवः तस्य भावो वा । त्वः प्रत्ययः । वा तलोपः । तत्त्वमिति । "तत्त्वं स्वरूपे परमात्मनि । स्याद्विलम्बितनृत्ये च" इति मेदिनी ॥ मेघे जलधरे । राज्ञि नाट्योक्तौ राजिनि । सुरे अमरे । तथा द्योतनात्मके आत्मनि । "दीव्यति क्रीडते यस्माद्रोचते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्वदेवतैः" इत्युक्ते परमेश्वरे । ब्राह्मणस्योपाधौ च । इन्द्रिये । न० । पूज्ये । त्रि० । **देवः** । पु० । दिव—प्रीतौ । पचाद्यच्प्रत्ययः । "देवो मेघे सुरे राज्ञि स्यान्नपुंसक-

ध्रुवो वटे स्मरारौ च गीतिस्रुग्भेदयोर्ध्रुवा ।
धवो धूर्त्तेऽप्यथ नवो नूतने वासवे स्तुतौ ॥ ४१७ ॥
प्लवो निषादे पर्कट्यां भेके भेले गतौ कपौ ।
पल्लवो विस्तरे षिड्गे किसले विटपे वने ॥ ४१८ ॥
घटादौ पार्थिवो राज्ञि वल्लवः सूदगोपयोः ।
गजे धन्विनि शुक्रे च पर्शुरामे च भार्गवः ॥ ४१९ ॥

मिन्द्रिये" इति मेदिनी ॥ व्यालः सर्पः । सूचकः पिशुनः, खलश्च । तयोः । तथा चौरे । दुःसाध्ये च । त्रि० **द्विजिह्वः** । पु० । द्वे जिह्वे यस्येति षष्ठीबहुव्रीहिः । "द्विजिह्वौ सर्पसूचकौ" इत्यमरः ॥ ४१६ ॥ वटे स्वनामाख्याते वृक्षे । स्मरारौ महादेवे । क्वचित् शराराविति पाठः । गीतिः गायना । स्रुच् वटपत्राकारविकङ्कतकाष्ठजं बाहुपात्रं यज्ञमात्रम् । तयोर्भेदयोर्विशेषयोः । स्त्री० । चकारात् शङ्कौ । विष्णौ । उत्तानपादनृपपुत्रे । वसुभेदे । ज्योतिषोक्तयोगभेदे । नासाग्रे । स्थाणौ । ललाटस्थे आवर्त्तभेदे । भूगोलस्थोत्तरदक्षिणकेन्द्रद्वयोपरिस्थे स्थिरे ताराभेदे च । निश्चिते । तर्के । आकाशे । उत्तरात्रयरोहिणीनक्षत्रेषु च । न० । सन्तते अपरिणामिनि नित्ये । स्थिरे च । त्रि० । मूर्वायाम् । शालपर्ण्याम् । स्त्री० । शरारिपक्षिणि च । पु० । स्त्री० । **ध्रुवः** । पु० । ध्रु–स्थैर्ये । अच्प्रत्ययः । "ध्रुवः शङ्कौ हरे विष्णौ वटे चोत्तानपादजे। वसुयोगभिदोः पुंसि क्लीबे निश्चिततर्कयोः। स्त्री मूर्वाढयौ शालपर्ण्यां गीतिस्रुग्भेदयोस्त्रिषु । सन्तते शाश्वते च" इति मेदिनी ॥ धूर्त्ते वञ्चके, यूतकारे च । अपिशब्दात् पत्यौ । नरे । स्वनामाख्याते वृक्षे कम्पने च । **धवः** । पु० । धवति धुवति, धुनोति, धुनाति वा । धु–कम्पने वा । अच्प्रत्ययः । भावे अप्प्रत्ययो वा । "धवः पुमान् नरे धूर्त्ते पत्यौ वृक्षान्तरेऽपि च" इति मेदिनी ॥ अथ अनन्तरम् । नूतने नव्ये । त्रि० । वासवे इन्द्रे । वाससे इति क्वचित् पाठः । स्तुतौ स्तवे । तथा रक्तपुनर्नवायाञ्च । **नवः** । पु० । नु–स्तुतौ । अप्प्रत्ययः । "नवं नव्ये पुमान् स्तुतौ" इति मेदिनी ॥ ४१७ ॥ निषादे चण्डाले । पर्कट्यां पर्कटीवृक्षे । भेके जन्तुभेदे । भेले नद्यादितरणार्थं कृते प्लवे । गतौ प्लुतगमने । कपौ वानरे । तथा प्लवने । मेषे । जलकाके । प्रवणे । कारण्डवपक्षिणि । शब्दे । रिपौ । जलभेदे । जलकुक्कुटे । जलचरपक्षिमात्रे । सारसादौ च । कैवर्तिमुस्तके । गन्धतृणे च । न० । **प्लवः** । पु० । प्लव–प्लवने । भावे अप्प्रत्ययः । कर्त्तरि अच्प्रत्ययो वा । "प्लवः स्यात् प्लवने भेले भेकेऽवौ श्वपचेऽपि च । शाखामृगे च कुलके प्रवणे पर्कटिद्रुमे । कारण्डवाख्यविहगे शब्दे प्लुतगतौ पुमान् । कैवर्त्तिमुस्तके गन्धतृणेऽपि स्यान्नपुंसकम्" इति मेदिनी॥ विस्तरे अभिनवे पत्रयुक्तशाखाविस्तारे । षिड्गे विटे । किसलये पल्लवे । विटपे शाखायाम् । वने अरण्ये । तथा बले । अलक्तकरागे । वलये । वपने च **पल्लवः** । पु० । पल्यते । पल–गतौ । क्विप् प्रत्ययः । पल्लूयते । लू–छेदने । अप्प्रत्ययः । कर्मधारयः । "पल्लवोऽस्त्री किसलये विटपे विस्तरे वने । शृङ्गारेऽलक्तरागे च" इति मेदिनी ॥ ४१८ ॥ घटादौ कलशादौ । पृथि

दूर्वा गौरी च भार्गव्यौ सत्तासंसारयोर्भवः।
भावो गौरविते जन्तौ पदार्थेऽभिनयान्तरे ॥ ४२० ॥
माधवौ हरिवैशाखौ राजीवो मृगमीनयोः।
रौरवौ घोरनरकौ लवश्छेदनलेशयोः ॥ ४२१ ॥

व्याकिविकारे भूमिभवे च। त्रि०। राज्ञि राजनि। तथा सीतायाम्। स्त्री०। तगरपुष्पे च। न०। **पार्थिवः**। पु०। पृथिव्या ईश्वरः। अण्प्रत्ययः। पृथिव्या विकारः इदं वा। अण्प्रत्ययः। "पार्थिवो नृपे। पार्थिवी तु सीतायां स्त्री पृथिव्या विकृतौ त्रिषु" इति मेदिनी ॥ सूदः पाचकः। गोपः गोपालः। तयोः। तथा भीमसेने च। **वल्लवः**। पु०। वल्ल–संवरणे। अच्प्रत्ययः। तं वल्लं वाति। वा–सुखाप्तौ। कः प्रत्ययः। "वल्लवः सूपकारे स्याद्भीमसेने च गोदुहि" इति मेदिनी ॥ गजे हस्तिनि। धन्विनि धनुर्द्धरे। शुक्रे शुक्राचार्य्ये। पर्शुरामे परशुरामे। दूर्वा प्रसिद्धा। गौरी पार्वती। तयोः। स्त्रियां ङीप्। चकारात् वेदप्रसिद्धे विद्याभेदे। लक्ष्म्याम्। स्त्रियां ङीप्। **भार्गवः**। पु०। भृगोरपत्यं तद्गोत्रापत्यं वा। अण्प्रत्ययः। "भार्गवो गजधन्विनोः। शुक्रे परशुरामे च भार्गवी पार्वतीश्रियोः। दूर्वायाम्" इति मेदिनी ॥ ४१९ ॥ सत्ता द्रव्यगुणकर्मवृत्तिः, विद्यमानता वा। संसारः जातितो जातिसंसरणम्। तथाप्याह—"स्कन्धानां परिपाटिश्च धात्वायतनयोरपि। अव्यवच्छिन्नाद्वर्तमानः संसार इति प्रोच्यते" इति। मिथ्याज्ञानजन्यसंस्काररूपवासना वा। तयोः। तथा जन्मनि। प्राप्तौ। जलमूर्तिधरे। महादेवे। जलस्य पृथिवी हेतुत्वेन तद्रूपस्य शिवस्य जन्महेतुत्वम्। तथा भव्ये। वृक्षे। मङ्गले च। **भवः**।पु०। भू–सत्तायाम्। भावे अप्प्रत्ययः। भवत्यस्मात्। अपादाने अप्प्रत्ययः। आधारे,कर्त्तरि च अप्अच्प्रत्ययौ भवतः। "भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः" इति मेदिनी॥ "भवः संसारसम्प्राप्तिश्रेयःशङ्करजन्मसु" इति विश्वः। गौरविते जन्तौ नाटयोक्तौ नानापदार्थचिन्तके पण्डिते। पदार्थे। साध्यरूपे सिद्धरूपे वा। क्रियारूपे धातोरर्थे। अभिनयान्तरे हृद्गतावस्थावेदके मानसविकारे स्वेदकम्पादौ। तथा व्यभिचारिभावे। रागे। आशये च। **भावः**। पु०। भावयति चिन्तयति पदार्थान्। भू–प्राप्तौ। अच्प्रत्ययः। अथवा भावयति ज्ञापयति हृदयगतम्। भू–प्राप्तौ। णिच्अच्प्रत्ययौ। घञ्प्रत्ययो वा। "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु। रत्यादौ" इति मेदिनी ॥ ॥ ४२० ॥ हरिः विष्णुः। वैशाखः स्वनामाख्यातो वर्षमध्ये द्वितीयश्चान्द्रमासः। तयोः। तथा वसन्ते। "स माधवेनाऽभिमतेन सख्या" इति कुमारः। मधूकपुष्पे। तत्पुष्पेण हि मद्यसम्भवः। वासन्तीलतायाम्। अस्याः मधुबाहुल्यतया। स्त्रियां ङीप्। **माधवः**। पु०। मायाः धवः माधव इति समासः।अथवा मधु अस्त्यस्येति अस्त्यर्थे स्वार्थे वा अण्प्रत्ययः।"माधवोऽजे मधौ राध्ये यादवे ना स्त्रियामसौ। मधुशर्करवासन्तीकुट्टिनीमदिरासु च" इति मेदिनी॥ मृगः हरिणविशेषः। मीनः मत्स्यभेदः। "राजीवसितलतुण्डाश्च" इति मनुः। तयोः। तथा

करञ्जभित्फले लट्वा वाद्यपक्षिप्रभेदयोः ।
विश्वं शुण्ठ्यां समस्ते च निर्वाणे विभवो धने ॥ ४२२ ॥
अश्वौघे वाडवं न स्त्री पाताले ना द्विजौर्वयोः ।
वडवाऽश्वाकुम्भदास्योर्योगे कीले हरे शिवः ॥ ४२३ ॥

पद्मे । "राजीवराजीवशलोल" इति माघः । गजे सारसपक्षिणि च । **राजीवः** । पुं० । राजी दलराजी अस्त्यस्येति अस्त्यर्थे वः प्रत्ययः । "राजीवं नलिने ना तु भेदे हरिणमीनयोः" इति मेदिनी ॥ घोरं दारुणम्, भयानकं वा । नरकः पापिनां दुःखभोगस्थानभेदः तयोः । तथा चञ्चले । धूर्त्ते च । **रौरवः** । पुं० । रोरूयतेऽत्र । रु-ध्वनौ । यङ्क्विप्प्रत्ययौ । तेन प्राप्यं तस्येदं वा अण्प्रत्ययः । "रौरवो नरके घोरे" इति मेदिनी ॥ छेदनः छेदकः । लेशः अल्पः तयोः । तथा विनाशे । श्रीरामपुत्रे । कालपरिमाणभेदे । गोलाङ्गूललोम्नि । बाले च । **लवः** । पुं० । लू-छेदने । अप्प्रत्ययः । "लवो लेशे विनाशे च छेदने रामनन्दने" इति मेदिनी ॥ ॥ ४२१ ॥ करञ्जभित् करञ्जभेदः । फलं वृक्षादीनां शस्यम् । तयोः । वाद्यं वादनीयं मृदङ्गादि । पक्षी खगः । तयोर्भेदयोर्विशेषयोः । तथा ग्रामचटके । कुसुम्भे । भ्रमरके च । **लट्वा** । स्त्री० । लट-बालभावे । वः प्रत्ययः । "लट्वा करञ्जभेदे स्यात् फले वाद्ये खगान्तरे" इति मेदिनी ॥ शुण्ठ्याम् स्वनामाख्याते औषधविशेषे । समस्ते सकले । चकारात् जगति । संसारे । तदभिमानिनि । जीवे च । पुं० । **विश्वम्** । न० । विश-प्रवेशे । वप् प्रत्ययः । "विश्वा त्वतिविषायां स्त्री जगति स्यान्नपुंसकम् । न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु" इति मेदिनी ॥ निर्वाणे मोक्षे । धने वित्ते । तथा सर्वमूर्तिसंयोगरूपे ऐश्वर्य्ये । षष्टिसंवत्सरमध्ये वर्षभेदे । "हृष्टाः पुष्टा जनाः सर्वे विभवेऽब्दे वरानने ।" इति परसमयः । **विभवः** । पुं० । विपूर्वः भू-सत्तायाम् । अच्प्रत्ययः । "विभवो रै मोक्षैश्वर्ये" इति मेदिनी ॥ ४२२ ॥ अश्वौघे घोटकसमूहे । पाताले धरायास्तलस्थे भुवने । द्विजः ब्राह्मणः । और्वः समुद्रस्थो वडवानलः । तयोश्च । पुं० । **वाडवम्** । न० । पुं० । वडवानां समूहः । अण्प्रत्ययः । "वाडवं करणे स्त्रीणां घोटकौघे नपुंसकम् । पाताले न स्त्रियां पुंसि ब्राह्मणे वडवानले" इति मेदिनी ॥ अश्वा घोटकी । कुम्भदासी तयोः । तथा तद्देवताके अश्विनीनक्षत्रे । दास्याञ्च । **वडवा** । स्त्री० । वलं वाति । वा-गमने । कः प्रत्ययः । लस्य डः । "वडवा द्विजयोषिति । अश्वायां कुम्भदास्याञ्च नारिजात्यन्तरेऽपि च" इति मेदिनी ॥ योगे विष्कम्भादिषु मध्ये विंशतितमयोगे । कीले गवां गात्रकण्डूयनार्थे गोष्ठे निखाते काष्ठे । हरे महादेवे । मङ्गले । सुखे । मोक्षे । न० । शमीवृक्षे । आमलक्याम् । अभयायाम् । तथा मङ्गलवत्यां स्त्रियाम् । दुर्गायाम् । शृगाले । दूर्वायाम् । गोरोचनायाम् । स्त्री० । चकारात् जले । सैन्धवे । सामुद्रे लवणे श्वेतटङ्कणे च । मङ्गलवति । त्रि० । बालग्रहे । वालुके । गुग्गुलौ । वेदे । पुण्डरीकवृक्षे । कृष्णधुस्तूरे । पारदे । देवे । लिङ्गे च । **शिवः** । पुं० । शो-तीक्ष्णीकरणे । वन्प्रत्ययः । पृषोदरादित्वात् साधुः ।

सुखं क्षेमं शिवं शम्यामलकी चाभया शिवा ।
षाडवस्तु रसे रागे सैन्धवो लवणाश्वयोः ॥ ४२४ ॥
स्वोऽस्त्रियां ज्ञातिधनयोः स्वमात्मनि नपुंसकम् ।
आधेयधारणे सत्त्वे मेलकेऽपि च सम्भवः ॥ ४२५ ॥

इति वान्ताः ।

अपभ्रंशो दुष्पतने भाषाभेदापशब्दयोः ।
टीकादर्पणावादर्शावाशा तृष्णादिशोः स्त्रियाम् ॥ ४२६ ॥
प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके ।
दिगम्बरे कपौ कीशः केशो वालप्रचेतसोः ॥ २२७ ॥

"शिवो मोक्षे महादेवे कीलकग्रहयोगयोः। वालुके गुग्गुलौ वेदे पुण्डरीकद्रुमे पुमान् । सुखक्षेमजले क्लीबम्" इति मेदिनी ॥ रसे रसभेदे । रागे रक्तवर्णे । तथा गीते च । **षाडवः** । पु० । षण–दाने । घञ्प्रत्ययः । णस्य डः । क्वचित्तु पाडव इति पाठो दृश्यते । "षाडवो गानरसयोः" इति मेदिनी ॥ लवणः सिन्धुनदीसमीपदेशे भवः लवणभेदः । अश्वः घोटकः । तस्य सिन्धुदेशसमुद्रसमीपस्थारट्टदेशोद्भवत्वात् । तयोः तथा सिन्धुभवे च । **सैन्धवः** । पु० । न०। सिन्धुनदीसमीपे देशे भवम् । अण् प्रत्ययः । सिन्धोरदूरभवः अण्प्रत्ययश्च।"सैन्धवोऽस्त्री माणिमन्थे नाऽश्वे सिन्धुभवे त्रिषु" इति मेदिनी ॥ ४२३ ॥४२४॥ ज्ञातिर्बन्धुः । धनं वित्तं तयोः । आत्मनि । न० । तथा आत्मीये । त्रि० । आत्मनि । आत्मीये चार्थेऽस्य सर्वनामता च । **स्वः** पु० । स्व–शब्दे, ध्याने वा । डः प्रत्ययः । "स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम् इति मेदिनी ॥ आधेयधारणे आधेयस्याधारे । सत्त्वे उत्पत्तौ । मेलके सङ्गे विवाहे वा । अपिशब्दात् समावेशनयोग्यत्वरूपे व्यापारे । उत्कटसन्देहे । हेतौ च । **सम्भवः** । पु०। सम्पूर्वः भू–सत्तायाम् । अप्प्रत्ययः । कर्त्तरि अच्प्रत्ययो वा । "सहाये सम्भवो हेतावुत्पत्तौ मेलकेऽपि च इति मेदिनी ॥ ४२५॥ इति वकारान्ताः समाप्ताः ॥ अथ शकारान्तानाह ॥ दुष्पतने अशोभनाकारपतने । भाषाभेदः भाषाविशेषः । अपशब्दः साधुशब्दभिन्नः अपशब्दः । यज्ञादिः तत्कथनस्य पापहेतुत्वात् तयोः । तथा पतने च । **अपभ्रंशः** । पु० न० । अप पूर्वः भ्रंशु-पतने । घञ्प्रत्ययः । अपभ्रश्यते अधर्म्महेतुतया पत्यतेऽनेन । करणे घञ्प्रत्ययो वा । "अपभ्रंशस्तु पतने भाषाभेदापशब्दयोः" इति मेदिनी ॥ टीका विषयपञ्चाख्या रूपाकृतिः । दर्पणः रूपप्रतिबिम्बदर्शनाधारः तयोः । तथा प्रतिबिम्बपुस्तके च । **आदर्शः** । पु० । आदृश्यतेऽत्र । दृश–चाक्षुषज्ञाने । घञ्प्रत्ययः । "आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि" इति मेदिनी ॥ तृष्णा अप्राप्ताभिलाषः । दिशा दिक् तयोः। तथा अशक्योपायार्थविषयायाम् । दीर्घकाङ्क्षायाञ्च । **आशा** । स्त्री०।आसमन्तात् अश्नुते। अश–भोजने। अच्प्रत्ययः। "आशा तृष्णादिशोः स्त्रियाम्" इति मेदिनी ॥ ४२६ ॥ प्रभुः स्वामी । शङ्करः महादेवः तयोः।

जीवितेशो यमे नाथे दंशः संहननेऽपि च।
सर्पक्षतेऽथ ज्ञाने च लोचने दर्शने च दृक् ॥ ४२८ ॥
नाशः पलायने मृत्यौ निस्त्रिंशौ खड्गनिर्दयौ ।
निशा रात्रिर्हरिद्रा च मृगादौ प्रमथे पशुः ॥ ४२९ ॥

लाङ्गलदण्डके लाङ्गलमध्यस्थे काष्ठमये दण्डे । स्त्री० । तथा परमेश्वरे । हिरण्यगर्भे च । **ईशः** । पु० । ईश—ऐश्वर्ये । कः प्रत्ययः । ''ईशा लाङ्गलदण्डके । ईशः प्रभौ महादेवे'' इति मेदिनी ॥ दिगम्बरे शिवे, क्षपणकभेदे च । ''दिगम्बरः मध्यमत्वमाहुरापादमस्तकम् । चेतनस्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि'' इत्युक्ते जीवस्य देहपरिमाणाङ्गीकारे च । कपौ वानरे च । **कीशः** । पु० । कस्य वायोरपत्यम् । अत इञ्प्रत्ययः । किः हनुमान् ईशो यस्येति बहुव्रीहिः । ''कीशो दिगम्बरे कपौ'' इति मेदिनी ॥ वालश्चिकुरः मज्जधातुजातोपधातुविशेषोऽयं केशः । अस्य परवर्तिनः पाशादिशब्दाः केशभूयस्त्ववाचिनः । ''वालास्तु तत्पराः पाशो रचनाभार उच्चयः । हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः'' इत्युक्तेः । प्रचेता वरुणः तयोः । तथा ह्रीवेरे च । **केशः** । पु० । क्लिश्यते क्लिश्नाति वा । क्लिश—उपतापे । अच् प्रत्ययः । ललोपश्च । कस्य ईशो वेति षष्ठीतत्पुरुषः । ''केशः स्यात् पुंसि वरुणे ह्रीवेरे कुन्तलेऽपि च'' इति मेदिनी ॥ ॥ ४२७ ॥ यमे प्राणस्वामिनि । ''जीवितेशवसतिं जगाम सा'' इति रघुः । तत्सम्बन्धानि अहिंसादीनि पञ्च व्रतानि । यथा—''अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता । अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च'' इति । नाथे प्रियनाथे । त्रि० । तथा जीवातौ । चन्द्रे । सूर्ये च । **जीवितेशः** । पु० । जीवितस्य ईश इति षष्ठीतत्पुरुषः । ''जीवितेशो यमे पुंसि त्रिषु स्याज्जीवितेश्वरे इति मेदिनी ॥ संहनने सङ्घाते । क्वचित् संनहने इति पाठः । सर्पक्षते सर्पाघाते । अपिशब्दात् वनमक्षिकायाम् । वर्म्मणि । मर्म्मणि । दोषे । खण्डने । दन्ते च । **दंशः** । पु० । दशन्—दंशने । अच्प्रत्ययः । करणादौ घञ्प्रत्ययो वा । दंशः कीटविशेषे च वर्मदंशनयोः पुमान्'' इति मेदिनी ॥ अथ अनन्तरम् । ज्ञाने सामान्यविशेषरूपं बुद्धिमात्रे । नानाविधेषु बुद्धिपरिणामेषु। यथा-''ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम् । सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा । संकल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः । ऊहोऽनध्यवसायश्च तथाऽन्येऽनुभवादयः'' इति । लोचने नेत्रे दर्शने चकारात् द्वित्वसङ्ख्यायाम् । साक्षिणि । द्रष्टरि । ज्ञातरि च । त्रि० । **दृक्** । स्त्री० । दृश—चाक्षुष ज्ञाने। भावे क्विप्प्रत्ययः । करणे, कर्त्तरि च । क्विप्प्रत्ययः । वा टाप् । ''दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके'' इति मेदिनी ॥ ४२८ ॥ पलायने **भयादिना** स्थानत्यागेनाऽन्यस्थानगमने मृत्यौ मरणे । तथा अदर्शने । अनुपलम्भे च । **नाशः** । पुं० । नश—नाशे । अदर्शने च । घञ्प्रत्ययः । ''नाशः पलायनेऽपि स्यान्निधनानुपलम्भयोः'' इति मेदिनी ॥ खड्गः असिः । त्रिंशदङ्गुल्यधिकस्यैव खड्गत्वात् ततो न्यूनत्वे छुरिका । तत्तुल्यहिंसकत्वात् । निर्दयः दयाराहित्यम् । त्रि० । तयोश्च । **निस्त्रिंशः** । पु० । निर्गतस्त्रिंशद्भ्योऽ-

पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च ।
रसे सोमलतायाश्च हुतशेषे च कीर्त्यते ॥ ४३० ॥
पाशः कचान्ते संघार्थः कर्णान्ते शोभनार्थकः ।
छात्राद्यन्ते च निन्दार्थः पाशः पक्ष्यादिबन्धने ॥ ४३१ ॥
वार्त्ताहरे पुरोगे च सहाये च प्रतिस्पशः ।
लोमशो मेढ्रकेऽपि स्याद्विवशाववशाविह्वलौ ॥ ४३२ ॥

कुलिभ्यः । डच् प्रत्ययः । समासः । "अथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु" इति मेदिनी ॥ रात्रिः रजनी । हरिद्रा पीतवर्णः स्वनामाख्यात औषधभेदः । तयोः । चकारात् दारुहरिद्रायाम् । ज्योतिषोक्तेषु मेषादिराशिषु च । यथा—"अजगोपतियुग्मञ्च कर्किधन्विमृगा निशाः" इति । **निशा** । स्त्री० । नितरां श्यति व्यापारान् । निपूर्वः शो—तीक्ष्णीकरणे । कः प्रत्ययः । "निशा दारुहरिद्रायां स्यात्त्रियामाहरिद्रयोः" इति मेदिनी ॥ मृगादौ लोमवल्लांगूलवति जन्तुभेदे । प्रथमे शिवानुचरे, अश्वे वा । तथा देवे । दर्शनार्थे अव्ययञ्च । **पशुः** । पु० । सर्वमविशेषेण पश्यति । दश--चाक्षुषज्ञाने । कुः प्रत्ययः । पशादेशः । "पशुर्मृगादिदेवाजे नाऽव्ययं पशुदर्शने" इति मेदिनी ॥ ४२९ ॥ हविर्भेदे यागविशेषे । पिष्टकस्य चमस्यां पिष्टकखाद्यभेदे । सोमलतायाः रसे सोमरसमानमात्रे । हुतशेषे यज्ञशेषे । चकारात् हविषि । यज्ञीयद्रव्ये च । **पुरोडाशः** । पु० । कीर्त्यते इति क्रियापदं सम्बन्धनीयम् । पुरो दाश्यते । दश—दाने । कर्मणि घञ्प्रत्ययः । क्विप्प्रत्ययो वा । "पुरोडाशो हविर्भेदे क्षमस्यां पिष्टकस्य च । हुतशेषे च" इति मेदिनी ॥४३०॥ कचान्ते केशादुत्तरं सङ्घार्थः । यथा केशपाशः । कर्णान्ते कर्णात्परं शोभनार्थकः । यथा कर्णपाशः शोभनकर्ण इत्यर्थः । छात्राद्यन्ते निन्दार्थः । यथा छात्रपाशः । गर्हितशिष्य इत्यर्थः । आदिना भिषक्पाशः । कुत्सितभिषगित्यर्थः । "याप्ये पाशप्" इत्यादिपाणिनीयसूत्रेण छात्रादिभ्यः पाशप्प्रत्ययः । पक्ष्यादिबन्धने मृगविहगादिबन्धने रज्जुभेदे । रज्जुमात्रे च । **पाशः** । पु० । पश्यते बन्ध्यतेऽनेन । पश—बन्धे । घञ्प्रत्ययः । "पाशः केशादिपूर्वः स्यात् तत्सङ्घे कर्णपूर्वकः । सुकर्णे च स्वसामर्थ्यान्मृगपक्ष्यादिबन्धने" इति मेदिनी ॥४३१॥ वार्ताहरे वृत्तान्तहारके । पुरोगे अग्रगामिनि, प्रधाने वा । सहाये सहचरे, अनुकूले वा । "असावनुक्तोऽपि सहाय एव" इति कुमारः । **प्रतिस्पशः** । पु० । प्रतिपूर्वः स्पश—ग्रन्थे, बाधने च । अप्प्रत्ययः । "प्रतिस्पशः सहाये स्याद्वार्त्ताहरपुरोगयोः" इति मेदिनी ॥ क्वचित् प्रतिष्कश इति पाठः । "प्रतिष्कशः सहाये स्याद्वार्त्ताहरपुरोगयोः" इति विश्वः । मेढ्रके मेषे । अपिशब्दात् मुनिभेदे । लोमयुक्ते । त्रि० । काकजङ्घायाम् । जटामांस्याम् । वचायाम् । शूकशिम्ब्याम् । महामेदायाम् बालायाञ्च । स्त्री० । **लोमशः** । पु० । लोमानि बाहुल्येन सन्त्यस्य । शः प्रत्ययः । "लोमशो मुनिमेषयोः । लोमान्विते स्त्रियां काकजङ्घामांसिवचासु च । शूकशिम्बी महामेदा काशीशे शाकिनीभिदि" इति मेदिनी ॥ अवशः

वंशो वर्गे च पृष्ठांशे वेशो वेश्यागृहेऽपि च ।
आयत्तत्वाप्रभुत्वे द्वे वशः परवशे त्रिषु ॥ ४३३ ॥
दाने रोगेऽपि च स्पर्शः सदृशं तूचिते समे ।

इति शान्ताः ॥

भ्राष्ट्रे युध्यम्बरीषं ना किशोरहरिशम्भुषु ॥ ४३४ ॥
अभिलाषेऽनुतर्षः स्यात्पानेच्छायामथामिषम् ।
सम्भोगोत्कोचमांसेषु उषा बाणात्मजा निशा ॥ ४३५ ॥

अस्वतन्त्रः । विह्वलः भयादिना व्याकुलः तयोः । "विवशा काममधुरि" इति कुमारः । तथा कृतरोधे च । **विवशः** । त्रि० । विगतो वश आयत्तता यस्येति बहुव्रीहिः । "विवशस्त्रि-ष्ववश्यात्मारिष्टदुष्टधियोरपि" इति मेदिनी ॥४३२॥ वर्गे पुत्रपौत्राद्यपत्यवर्गे । पृष्ठांशे पृष्ठावयवे । चकारात् वर्गे । तृणजातिभेदे । इक्षौ । सालवृक्षे च । वाद्यभेदे । स्त्री० । गौर्यादित्वात् ङीप् । "वंशीकलेन वडिशेन" इति वृन्दावनचम्पूः । **वंशः** । पु० । वश-स्पृहायाम् । घप्रत्ययः । निपातनात् नुमागमः । "वंशः पुंसि कुले वेणौ पृष्ठावयववर्गयोः" इति मेदिनी ॥ वेश्यागृहे गणिकागृहे । अपिशब्दात् प्रवेशे । गृहमात्रे । अलङ्कारादिना कृतरूपान्तरे । नेपथ्यकर्म्मणि च । **वेशः** । पु० । विश-प्रवेशे । घञ्प्रत्ययः । "वेशो वेश्यागृहे गृहे । नेपथ्ये च" इति मेदिनी ॥ आयत्तत्वम् अधीनता । वशीभूतभाव इत्यर्थः । अप्रभुत्वम् अस्वामित्वम् । तयोः । परवशे पराधीने । परायत्ते इत्यर्थः । त्रि० । **वशः** । पु० । वश-स्पृहायाम् । अच्प्रत्ययः । "वशमायत्ततायां स्याद्वशमिच्छाप्रभुत्वयोः । वशा वन्ध्यासुता योषा स्त्रीगवि करिणीषु च" इति विश्वः ॥ ४३३ ॥ दाने त्यागे । रोगे धातुवैषम्यजाते व्याधौ । अपिशब्दात् न्यायोक्ते त्वगिन्द्रियग्राह्ये गुणभेदे । युद्धे । ग्रहणे । गुप्तचरे । उपतापके च । वायौ । पु० । स्पर्शके । त्रि० । कादिषु मावसानेषु वर्गवर्णेषु । पु० । **स्पर्शः** । पु० । स्पर्श ग्रहणे । स्पृश-स्पर्शे वा । अच्प्रत्ययः । घञ्प्रत्ययो वा । अथवा-स्पृश-स्पर्शे । णिच्अच्प्रत्ययौ । स्पृश्यन्ते वायुना जिह्वाग्रादयोऽत्र । घञ्प्रत्ययश्च । "स्पर्शो रुजायां दाने च स्पर्शने स्पर्शकेऽपि च । स्पर्शः स्यात्सम्पराये च प्रणिधावपि पुंस्ययम्" इति मेदिनी ॥ उचिते युक्ते, परिचिते वा । समे तुल्यरूपे च । **सदृशम्** । न० । समानं दर्शनमस्य । समानशब्दपूर्वः दृश-चाक्षुष ज्ञाने । ठक्प्रत्ययः । "सदृशं समे उचिते च" इति मेदिनी ॥ इति शकारान्ताः समाप्ताः ॥ अथ षान्तानाह ॥ भ्राष्ट्रे भर्ज्जनपात्रे । कश्चित्तु भ्राष्टे इति पाठः । युधि सङ्ग्रामे । किशोरः बालकः । हरिर्विष्णुः । शम्भुः ईश्वरः । एतेषु । तथा आम्रातकवृक्षे । नरकभेदे । अनुतापे सूर्यवंश्यनृपभेदे च । पु० । **अम्बरीषम्** । न० । अम्ब्यते पच्यतेऽत्र । अम्ब-गतौ । अरिषः प्रत्ययः । निपातनात् दीर्घः । अबरिषमप्यत्र । ह्रस्वेकारयुक्तम् । "अम्बरीषं रणे भाष्ट्रे क्लीबं पुंसि नृपान्तरे" इति मेदिनी ॥ ४३४ ॥ अभिलाषे इच्छायाम् । पानेच्छा

भल्लूके शोणके चक्षो नक्षत्रे पुंनपुंसकम् ।
ऋषिर्वेदेऽपि कक्षस्तु दोर्मूले शुष्ककानने ॥ ४३६ ॥
कक्षा वरत्रा प्रकोष्ठस्पर्द्धोद्ग्रहणिकासु च ।
कुल्माषं काञ्जिके ना तु यवके स्यादथाऽबिले ॥ ४३७ ॥

मद्यपानेच्छा । तत्र। अपिशब्दात् सुरापानपात्रे । मद्ये । मद्यपाने च **अनुतर्षम्** । न० । अनु तृष्यतेऽनेन । अनुपूर्वः तृष—तृष्णायाम् । करणे घञ्प्रत्ययः । भावे घञ्प्रत्ययो वा । "अनुतर्षः सुरापानपात्रे तृष्णाभिलाषयोः" इति मेदिनी ॥ अथ अनन्तरार्थद्योतकः । सम्भोगः कामगुणः । उत्कोचः अन्याय्यकर्मकरणार्थं वादिप्रतिवादिभ्योऽर्थग्रहणम् । मांसः पिशितः । एतेषु । तथा भोग्यवस्तुनि रुचिररूपादौ । लोभसञ्चये । लाभे । विषये । भोजने च । **आमिषम्** । न० पु० । आपूर्वः मिष—पराभिभवेच्छायाम्, सेचने च । कप्रत्ययः । "आमिषं पुन्नपुंसकम् । भोग्यवस्तुनि सम्भोगेऽप्युत्कोचे पललेऽपि च" इति मेदिनी ॥ बाणात्मजा बाणराजसुता । निशा रात्री । तयोः । तथा "तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्" इति । वराहोक्ते काले च । **उषा** । स्त्री० । उष—दाहे वधे च । कप्रत्ययः । टाप् च । "उषा बाणसुतारात्र्योः" इति मेदिनी ॥४३५॥ भल्लूके स्वनामाख्याते जन्तुभेदे । शोणके शोणकवृक्षे । नक्षत्रे । चकारात् मेषादौ च । पु० न० । पर्वतभेदे । **ऋक्षः** । पु० । ऋष—गतौ । सप्रत्ययः । किञ्च । "ऋक्षः पर्वतभेदे स्याद्भल्लूके शोणके पुमान् । कृतवेधनेऽन्यलिङ्गो नक्षत्रे पुंनपुंसकम्" इति मेदिनी ॥ वेदे धर्मब्रह्मप्रतिपादके संहिताब्राह्मणात्मके ग्रन्थभेदे । अपिशब्दात् मन्त्रद्रष्टरि मुनौ । अनुष्ठेयकर्मज्ञापकसूत्रकृताचार्ये । गोत्रप्रवरप्रवर्तके मुनौ च । **ऋषिः** । पु० । ऋष—गतौ । इन्प्रत्ययः । किञ्च । "ऋषिर्वेदे वशिष्ठादौ दीधितौ च पुमानयम्" इति मेदिनी ॥ दोर्मूले

बाहुमूले । शुष्ककानने शुष्कवने ॥ ४३६ ॥ वरत्रा हस्तिबन्धनरज्जुः । प्रकोष्ठः कूर्परस्याधोभागस्थो मणिबन्धपर्यन्तो हस्तावयवः । स्पर्द्धा साम्या । उद्ग्रहणिका कक्षरोगभेदः । एतेषु स्त्री० । चकारात् स्त्रीणाम् उत्तरीयवस्त्रस्य पश्चाद्भागस्थे अचले। लतायाम् । शुष्कतृणे । पार्श्वभागे । राजान्तःपुरे । पृष्ठप्रदेशनिहिताधोंशुकस्यैकदेशे वस्त्राञ्चले । काञ्च्याम् । गृहभित्तौ च । पु० । **कक्षा** । स्त्री० । कष—हिंसायाम् । सप्रत्ययः । "कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्द्धास्पदे ना दोर्मूले कच्छवीरतृणेषु च" इति मेदिनी ॥ काञ्जिके आरनाले । मसीपरिणामे च । न० । यवके यवादौ । तुकारात् अर्धस्विन्नगोधूमादिषु । "अर्धस्विन्ना च गोधूमा अन्ये च चणकादयः। कुल्माष इति कथ्यन्ते" इति । "स हि कुल्माषान् खादन्तं बिभिक्षे" इति श्रुतिः । सूर्यस्य पारिपार्श्विकभेदे । शूकधान्ये । **कुल्माषम्** । न० । स्यादित्यन्वयः । कोलति कुल—बन्धे । संहतौ च । क्विप्प्रत्ययः । कुल्माषोऽस्मिन्निति सप्तमीबहुव्रीहिः । "कुल्माषं काञ्जिके याचके पुमान्" इति मेदिनी ॥ अथ अनन्तरम् । आबिले

पापे च कलुषं घोषः शब्दाभीरनिवासयोः ।
शुचौ दक्षे च चोक्षः स्यात्तर्षो लिप्सापिपासयोः ॥ ४३८ ॥
दक्षः प्रजापतौ ताम्रचूडे हरवृषे पटौ ।
पौरुषं मानभेदे च पुन्नागे पुरुषो नरे ॥ ४३९ ॥
पक्षौ मासार्द्धपार्श्वौ च महिषी राजपत्न्यपि ।
मूर्खे माने फले माषो मेषौ राश्यन्तरोरणौ ॥ ४४० ॥

अच्छरहिते । आकुलिके ॥ ४३७ ॥ पापे नरकहेतौ । दुरदृष्टे चकारात् महिषे च । पु० । **कलुषम्** । न० स्त्री० । कल–सङ्ख्यायाम् । उषच्प्रत्ययः । लुष–हिंसायाम् । कप्-प्रत्ययः । कस्य जलस्य लुषो घातक इति वेति षष्ठीतत्पुरुषः । "कलुषं त्वाविले पापे" इति मेदिनी ॥ शब्दः ध्वनिः । आभीरनिवासः आभीरपल्ली । तयोः। तथा मेघनादे । अपामार्गे । व्याकरणोक्ते वर्णविशेषोत्पत्तौ बाह्यप्रयत्नभेदे च । कांस्ये । **घोषः** । न०। घोषन्ति गावोऽत्र । घुष–आविष्करणे । आधारे घञ्प्रत्ययः । भावे घञ्प्रत्ययः । कर्त्तरि अच्प्रत्ययो वा । "घोष आभीरपल्ल्यां स्याद्गोपालध्वनिघोषके । कांस्ये चाम्बुदनादे ना घोषा मधुरिकौषधौ" इति मेदिनी ॥ शुचौ शुद्धाचरणे, पवित्रे वा । दक्षे कार्यकुशले । चकारात् गीते । तीक्ष्णे । मनोहरे च । **चोक्षः** । पु० । स्यादित्यन्वयः । चुक्ष–परिशुद्धतायाम् । घञ्प्रत्ययः । क्वचित्तु नोक्षः इति पाठः । "चोक्षो गीते शुचौ दक्षे तथा तीक्ष्णे मनोज्ञयोः" इति मेदिनी ॥ लिप्सा अभिलाषः । पिपासा तृष्णा । तयोश्च । "निवृत्ततर्षैरुपगीयमानात्" इति । **तर्षः** । पु० । तृष–तृष्णायाम् । घञ् प्रत्ययः । "तर्षो लिप्सोदन्ययोः" इति मेदिनी ॥ ४३८ ॥ प्रजापतौ ब्रह्मणः दक्षाङ्गुष्ठाज्जाते प्रजापतिभेदे । ताम्रचूडे कुक्कुटे । हरवृषे शिववृषभे । पटौ निपुणे । तथा मुनिभेदे । शिक्षिते । अनलसे च । **दक्षः** । पु० । दक्ष–वृद्धौ, शीघ्रार्थे च । अच्प्रत्ययः । "दक्षस्त्रिषु पटौ पुंसि ताम्रचूडे प्रजापतौ । मुनिभेदे हरवृषे द्रुमभेदे स्त्रियां भुवि" इति मेदिनी ॥ मानभेदे उर्ध्वविस्तृतबाहुपाणिकमनुष्य-परिमाणे । "जवेऽपि मानेऽपि च पौरुषाधिकम्" इति नैषधम् । चकारात् पुरुषत्वे । विक्रमे । उद्यमे च । **पौरुषम्** । न० । पुरुषस्य भावः, कर्म वा । अण्प्रत्ययः । पुरुषस्य इदम् इति अण् प्रत्ययः । "पौरुषं पुरुषस्य स्याद्भावे कर्मणि तेजसि । ऊर्द्ध्वविस्तृतदोःपाणिनृमाने त्वभिधेयवत्" इति मेदिनी ॥ पुन्नागे स्वनामाख्याते वृक्षे । नरे पुरुषे । तथा साङ्ख्यज्ञे च । **पुरुषः**। पु० । पुर–अग्रगतौ। उषन् प्रत्ययः । "पुरुषः पूरुषे साङ्ख्यज्ञे च पुन्नागपादपे" इति मेदिनी ॥ ४३९ ॥ मासार्द्धः शुक्लकृष्णप्रतिपदादिपञ्चदश्यन्तपञ्चदशतिथ्यात्मकः कालः । पार्श्वः कक्षाधोभागः । तयोः । चकारात् खगानां पतत्रे । शरस्य पुङ्खस्थे पत्रे । समूहे । केशात्परः समूहार्थे । यथा केशपक्षः । गृहे । न्यायोक्ते संदिग्धसाध्यवति पदार्थे । यथा–पर्वतो वह्निमान् । विरोधे । बले । सहाये । सखौ । चुल्लीरन्ध्रे । राजकुञ्जरे । खगे । वलये । पिच्छे । देहार्द्धे च । **पक्षः** ।

सङ्ख्यायान्तु न ना लक्षा क्लीबं व्याजशरव्ययोः ।
हरताक्ष्यौं विशालाक्षौ शेषो नानन्तसीरिणोः ॥ ४४१ ॥
उपयुक्तेतरे त्वस्त्री शैलूषो नटबिल्वयोः ।
शुश्रूषा परिचर्य्या च संहर्षः स्पर्द्धने मुदि ॥ ४४२ ॥

इति षान्ताः ।

योग्यायामन्तिकेऽभ्यासोऽधिवासौ स्थानसंस्क्रिये ।
आख्यायिका परिच्छेदे चाऽश्वासो निर्वृताऽवपि ॥ ४४३ ॥

पु०। पक्ष—परिग्रहे। अच्प्रत्ययः। "पक्षो मासार्द्धके पार्ष्णिग्रहे साध्यविरोधयोः । केशादे। परतो वृन्दे बले सखिसहाययोः । चुल्ली रन्ध्रे पतत्रे च वाजे कुञ्जरपार्श्वयोः" इति मेदिनी॥ राजपत्नी राज्ञः कृताभिषेका स्त्री । तस्याम्।अपिशब्दात् महिषजातिस्त्रियाम् । ओषधीभेदे च। **महिषी।** स्त्री०।मह—पूजने । वृद्धौ च। टिषच्प्रत्ययः। ङीप् च।"महिषी कृताभिषेकासैरिभ्योरोषधीमिदि" इति मेदिनी॥मूर्खे अज्ञाने।माने परिमाणभेदे।"दशार्द्धगुञ्जं प्रवदन्ति माषम्"इति।"गुञ्जाभिर्दशभिर्माषमिति च । फले व्रीहिभेदे । **माषः ।** पु० । मष—वधे । परिमाणे च । संज्ञायां घञ्प्रत्ययः । "माषो व्रीह्यन्तरे मूर्खे मानत्वग्दोषभेदयोः" इति मेदिनी ॥ राश्यन्तरः । ज्योतिश्चक्रस्य द्वादशांशः अश्विनीभरणीकृत्तिकानक्षत्रपादात्मकः राशिभेदः, प्रथमराशौ वा । उरणः एडकः तयोश्च। **मेषः ।** पु० । मिष—पराभिभवेच्छायाम् । अच्प्रत्ययः । "मेषो राश्यन्तरे हुडे" इति मेदिनी॥ ॥ ४४० ॥ सङ्ख्यायां दशायुतसङ्ख्यायाम् । स्त्री०। न०। व्याजः कपटः । शरव्यं लक्ष्यं शरेण वेधनायोद्देश्यम् । तयोः । न० । तथा पदे । चिह्ने च । **लक्षा ।** स्त्री० । लक्ष—दर्शने। अच्प्रत्ययः । "लक्षा न पुंसि सङ्ख्यायां क्लीबं व्याजशरव्ययोः" इति मेदिनी ॥ हरः महादेवः । ताक्ष्र्यः गरुडः तयोः । तथा विष्णौ । बृहन्नेत्रे । त्रि० । पार्वत्याम् । नागदन्त्याम् । स्त्रियां ङीप् । **विशालाक्षः ।** पु० । विशाले अक्षिणी यस्येति षष्ठीबहुव्रीहिः । "विशालाक्षो हरे ताक्ष्र्ये ना सुनेत्रेऽभिधेयवत्" इति मेदिनी ॥ अनन्तः बहुशीर्षकत्वादपरिच्छिन्नः शेषनागः । सीरी बलरामः तयोः । उपयुक्तेतरे अवशेषे । तथा सर्पभेदे । **शेषः ।** पु० । शिष—विशेषे, वधे च । अच्प्रत्ययः । "शेषः सङ्कर्षणे वधे । अनन्ते ना प्रसादे ना स्वनिर्माल्यार्पणे स्त्रियाम्" इति मेदिनी ॥ ४४१ ॥ नटः नृत्यः । बिल्वः बिल्ववृक्षः तयोः । तथा धूर्ते । तालधारके च । **शैलूषः ।** पु० न० । शिलूषस्यापत्यम् । अण्प्रत्ययः । "शैलूषो नटबिल्वयोः" इति मेदिनी ॥ परिचर्या उपासना । तत्र । चकारात् श्रवणेच्छायाम् । **शुश्रूषा।** स्त्री०। श्रु—श्रवणे । सन्अप्रत्ययौ।"शुश्रूषा स्यादुपासने । कथने श्रोतुमिच्छायाम्" इति मेदिनी॥ स्पर्द्धने पराभिभवेच्छायाम्। मुदि आनन्दे । तथा वायौ च । **संहर्षः।** पु०। सम्यक् हर्षः । सम्पूर्वः हृष—हर्षे, चित्तोत्साहे च। घञ्प्रत्ययः । संहृष्यतेऽनेनेति घञ्प्रत्ययो वा।"संहर्षस्तु प्रमोदेऽपि स्पर्द्धायाञ्च प्रभञ्जने" इति मेदिनी ॥ ४४२ ॥ इति षकारान्ताः समाप्ताः ॥ अथ सकारान्तानाह ॥ योग्यायां शास्त्राभ्यासे शिष्येभ्यो दानमित्येवंरूपशास्त्राभ्यासे वा । अन्तिके सामीप्ये। तथा गुरो-

उदर्चिरुत्प्रभे वह्नावेनः पापापराधयोः ।
कनीयाननुजेऽल्पे च कंसो मानेसुरान्तरे ॥ ४४४ ॥
तैजसे कंस्यपात्रे च गुत्सः स्तबकहारयोः ।
छन्दः पद्यश्रुतीच्छासु तरो वेगे बलेऽपि च ॥ ४४५ ॥

राकर्षणम्। तदर्थे युक्तायुक्तत्वविचारः । पौनःपुन्येन तदावृत्तिः। तस्याम् आवृत्तौ । पौनःपुन्येन कीर्तने । विजातीयज्ञानानन्तरिते सजातीयैकरूपज्ञानप्रवाहरूपे ध्यानादेरभ्यासे च। **अभ्यासः।** पु० । अभिपूर्वः अस–विद्यमानतायाम् । घञ्प्रत्ययः । "अभ्यासोऽभ्यसनेऽन्तिके" इति मेदिनी ॥ स्थानं यज्ञारम्भपूर्वदिवसे देवतास्थापनादिकर्म । संस्क्रिया गन्धमाल्यैः संस्कारः । तयोः। तथा निवासे च । **अधिवासः** । पु० । अधिपूर्ववस–निवासे । घञ्प्रत्ययः । अधिवासयति देवता अनेनेति । अधिपूर्वः वस–निवासे । णिच् । करणे घञ् प्रत्ययो वा । "अधिवासो निवासे स्यात्संस्कारे धूपनादिभिः" इति मेदिनी ॥ आख्यायिकापरिच्छेदे गद्यपद्यमयप्रबन्धस्य विच्छेदे । निर्वृतौ । सुस्थितौ । अपिशब्दात् आश्रयदाने । भीतस्य भयनिवारणार्थे सान्त्वने च । **आश्वासः** । पु० । आपूर्वः श्वस–जीवने । घञ्प्रत्ययः । "आश्वासः पुंसि निर्वृतौ । आख्यायिकापरिच्छेदे च" इति मेदिनी ॥ ४४३ ॥ उत्प्रभे उद्गतकान्तौ । वह्नौ दहने । तथा उच्छिखे वह्नौ । उत्कृष्टकान्तित्वात् कन्दर्पे । ऊर्द्ध्वरेतस्त्वात् शिवे । उद्गतायां शिखायाञ्च । न० । **उदर्चिः** । पु० । उदूर्द्धमर्चिः रश्मिरस्येति षष्ठीबहुव्रीहिः । "उदर्चिरुत्प्रभे वाच्यलिङ्गः पुंसि हुताशने" इति मेदिनी ॥ पापं नरकहेतुर्दुरदृष्टम् । अपराधः अकार्यादिकरणरूपो दोषः । तयोश्च । **एनः** । न० । इण–गतौ । असुन्प्रत्ययः । नुडागमश्च । "एनः पापापराधयोः" इति मेदिनी ॥ अनुजे कनिष्ठे । अल्पे द्वयोर्मध्ये अल्पतरे । चकारात् युवतरे च । स्त्रियां ङीप् । **कनीयान्** । पु० । अयमनयोरतिशयेन युवा अल्पो वा । ईयसुप्रत्ययः । कनादेशः । "कनीयानतियूनि स्यादत्यल्पानुजयोस्त्रिषु" इति मेदिनी ॥ माने आढक इति प्रसिद्धे परिमाणे । पु० न० । असुरान्तरे श्रीकृष्णमातुले ॥ ४४४ ॥ तैजसे तैजसद्रव्ये । कंस्यपात्रे स्वर्णरजतादिनिर्मिते पानपात्रे । क्वचित् तस्य पात्रे इति पाठः । चकारात् उग्रसेनसुते नृपे । ताम्ररङ्गमिश्रणजनितधातुद्रव्ये कांस्ये च । केचित् पृषोदरादित्वात् तालव्यान्त इति पठन्ति । **कंसः** । पु० । कम–वाञ्छायाम । सप्प्रत्ययः । "कंसोऽस्त्री तैजसद्रव्ये कांस्ये माने सुरे तु ना" इति मेदिनी ॥ स्तबकः कलिकाकुसुमादिसमूहवान् गुच्छः । काण्डशून्यः मूलत एव शाखाप्रधानसङ्घातात्मको धान्यमल्लिकादिस्तम्बो वा । हारः द्वात्रिंशद्यष्टिको हारभेदः। तयोः। तथा मयूरपुच्छे । टीकाकरञ्जे । ग्रन्थिपर्णे च । न० । **गुत्सः** । पु० । गु–विष्ठोत्सर्गे । सं० क्विप् प्रत्ययः । गुतं स्यति । सो–विनाशे । कः प्रत्ययः । गुत्स–गुत्सने । अः प्रत्ययो वा । गुच्छोऽप्यत्र । क्वचित् कुत्स इति च । "गुत्सः स्यात् स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः"

तमः शोकेऽप्यथ हिमर्त्तौ ना धर्म्मे व्रते तपः।
पद्मे स्वर्णे तामरसं निशा दुर्गा च तामसी ॥ ४४६ ॥
मणिदोषे दरे त्रासो दासो वित्तात्मचेटयोः।
झिण्ट्याश्च दासी दीर्घायुर्ऋषिः काकश्च शाल्मलिः ॥ ४४७ ॥

इति मेदिनी ॥ पद्यं कविकृतं चतुश्चरणात्मकम्। "पद्यं चतुष्पदी तच्च वृत्तं जातिरितिद्विधा" इत्युक्तो वाक्यभेदो वा श्रुतिर्वेदः। इच्छा अभिलाषः। एतेषु। तथा स्वैराचारे। नियताक्षरवर्णमात्रादिसंनिवेशवशात् चतुश्चरणादौ उक्थादिभेदे गायत्र्यादौ छन्दसि च। **छन्दः।** न०। छदि—इच्छायाम्, संवरणे च। असिः प्रत्ययः। "छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयोः" इति मेदिनी ॥ वेगे जवे, सवेगगमने वा। बले सैन्ये, बलशब्दार्थे च। अपिशब्दात् जले। रोगे। तीरे। वानरे च। **तरः।** न० तॄ—तरणे, प्लवने, अभिभवने च। करणादौ असुन्प्रत्ययः। "तरो बले च वेगे च" इति मेदिनी ॥ ४४५ ॥ शोके चित्तवृत्तिभेदे, इष्टवियोगजाते दुःखानुगुणे वा। अपिशब्दात् नेत्रवृत्तिरोधके नैशादिध्वान्ते। पापे। कार्याकार्याविवेके विशेषदर्शनविरोधिदोषे। साङ्ख्योक्ते गुरुवरणकमेव तम इत्युक्ते गुणभेदे। राहौ च। **तमः।** न०। तम—खेदे। असुन्प्रत्ययः। "तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे" इति मेदिनी ॥ अथ अनन्तरम्। हिमर्तौ शिशिरे ऋतौ। धर्मे स्वाश्रमविहितधर्मे। व्रते वैधे चान्द्रायणादौ कर्मणि। तथा चान्द्रे माघे मासि। जनलोकोपरिस्थे लोकभेदे। आलोचने। "स तपो कुरुत" इति श्रुतिः। ज्योतिषोक्ते लग्नतो नवमस्थाने च। न०। **तपः।** पु०। तप—उपतापे। असुन्प्रत्ययः। "तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः" इति मेदिनी ॥ पद्मे कमले। स्वर्णे कनके। तथा ताम्रे। धुस्तूरे द्वादशाक्षरपादके छन्दोभेदे च। **तामरसम्।** न०। तामरे जले सस्ति। सस—हिंसने। डः प्रत्ययः। "अथ तामरसं पद्मे ताम्रकाञ्चनयोरपि" इति मेदिनी॥निशा रात्री।दुर्गा स्वनामाख्यातादेवी।चकारात् जटामांस्याम्। तमोधिकायां स्त्रियाञ्च। **तामसी।** स्त्री०। तमसा व्याप्ता। अण्प्रत्ययः। ङीप् च। "तामसी निशि दुर्गायाम्" इति मेदिनी ॥ ४४६ ॥ मणिदोषे मणिजाते दोषे। दरे भये च। **त्रासः।** पु०। त्रस—भये। घञ्प्रत्ययः। "त्रासो भये मणेर्दोषे" इति मेदिनी ॥ वित्तात्मा ज्ञातात्मा। चेटः दासः तयोः। झिण्ट्याम्। चकारात् काकजङ्घायाम्। नीलझिण्टयाम्। चेट्याम्। दासपत्न्याम्। क्षुद्रपत्न्याम्। कैवर्त्तभार्य्यायाञ्च। स्त्री०। तथा शूद्रे। धीवरे। दानपात्रे। शूद्रस्योपाधौ। "शूद्रे दासं प्रयोजयेत्" इति स्मृतिः। सेवके। च **दासः।**

पु०। दस—क्षेपे। कर्मणि घञ्प्रत्ययः। "दासो भृत्ये च शूद्रे च ज्ञातात्मनि च धीवरे" इति मेदिनी ॥ "दासी चेट्याञ्च झिण्ट्याञ्च" इति विश्वः। ऋषिः मार्कण्डेयः। काकः वायसः। शाल्मलिः शाल्मलीवृक्षः एतेषु। तथा जीवकद्रुमे। चिरजीविनि च। **दीर्घायुः।** पु०। दीर्घम् आयुर्जीवनकालोऽस्येति षष्ठीबहुव्रीहिः। "दीर्घायुः शाल्मलीवृक्षे वायसे जीवकद्रुमे। मार्क-

योक्त्रे च वसुराख्याने स्वान्ते सरसि मानसम् ।
माश्चन्द्रमासयोः पुंसि खर्जूरेक्ष्वोर्महारसः ॥ ४४८ ॥
राजहंसो नृपाग्र्ये च जिह्वाभूः शल्लकी रसा ।
जले शरीरधातौ च पारदस्वादयो रसः ॥ ४४९ ॥
भाषाशृङ्खलके रासः क्रीडायामपि गोदुहाम् ।
रहो रते च गुह्ये च रभसो हर्षवेगयोः ॥ ४५० ॥

ण्डेये च पुंसि स्याच्चिरजीविनि वाच्यवत्'' इति मेदिनी ॥ ४४७ ॥ योक्त्रे ईषादण्डादौ । युगबन्धनार्थे दाम्नि च । आख्याते प्रसिद्धे इति वृत्तकथने । यथा ''अमृतमन्थनादुपाख्यातम्'' इति । चकारात् धने । रत्ने । श्यामे । स्वर्णे । जले । वृद्धौषधे च । न० । बकवृक्षे । सूर्ये वह्नौ । रश्मौ । गणदेवताभेदे । अष्टसङ्ख्यायाम् । वसुदेवताके । धनिष्ठानक्षत्रे च । पु० । मधुरे । शुष्के च । त्रि० । दीप्तौ । वृद्धौषधौ च । स्त्री० । **वसुः** । पु० । वस—नम्रतायाम्, निवासे वा । उः प्रत्ययः । ''वसुर्ना देवभेदाग्निभायोक्त्रबकराजसु । क्लीबं वृद्धौषधे श्यामरैरत्ने मधुरे त्रिषु'' इति मेदिनी ॥ स्वान्ते चित्ते । सरसि सरोवरे । केचित्तु कैलासान्तिकस्थे ब्रह्मणा कृते सरोवरभेदे इति पठन्ति । **मानसम्** । न० । मन एवेति स्वार्थे अण्प्रत्ययः । ''मानसं सरसि स्वान्ते'' इति मेदिनी ॥ चन्द्रः प्रसिद्धः । मासः त्रिंशद्दिनात्मकः कालः तयोः । **माः** । पु० । माति परिच्छिनत्ति स्वगत्या कालम् । मा—छेदे । माने च । असुन्प्रत्ययः । माश्चन्द्रमासयोः पुमान्'' इति मेदिनी ॥ खर्जूरे स्वनामाख्याते वृक्षे । इक्षुर्मधुररसयुक्तः स्वनामाख्यातवृक्षः । तयोः । कशेरुणि पारदे च । काञ्जिके । न० । **महारसः** । पु० । महान् रसो यस्येति षष्ठीबहुव्रीहिः । ''महारसः स्यात् खर्जूरे कोशकारकशेरुणोः''इति मेदिनी ॥ ४४८॥ नृपाग्र्ये । नृपश्रेष्ठे । चकारात् रक्तवर्णचञ्चुचरणयुक्ते श्वेतवर्णे हंसभेदे । कलहंसे च । **राजहंसः** । पु० । राजा हंस इव सारग्रहणात् । हंसानां राजा वा श्रेष्ठत्वात् । ''राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे'' इति मेदिनी ॥ जिह्वा रसना । भूः पृथिवी । शल्लकी मदनतरुः एतेषु । तथा पाठायाम् । कङ्गौ च । **रसा** । स्त्री० । रसो माधुर्यादिरूपोऽस्त्यस्याः अच्प्रत्ययः । ''स्त्रियान्तु रसना पाठा शल्लकीकङ्गुभूमिषु'' इति मेदिनी ॥ जले सलिले । शरीरधातौ देहस्थे धातुभेदे । ''सम्यक् पक्वस्य भुक्तस्य सारो निगदितो रसः'' इति । पारदः रसराजः । स्वादः रसनेन्द्रियग्राह्यः माधुर्यादिगुणभेदः । चकारात् आस्वाद्ये गुडादौ । पुष्पस्य मधुनि । वीर्य्ये । रागे । द्रवे च । **रसः** । पु० । रस्यते । रस—आस्वादे । अच्प्रत्ययः । ''रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः । देहधातुप्रभेदे च पारदस्वादयोः पुमान्'' इति मेदिनी ॥ ४४९ ॥ भाषाशृङ्खलके शृङ्खलाबन्धवत् द्वयोर्द्वयोर्मध्यस्थित्या क्रीडाभेदे । गोदुहां गोपानां क्रीडायाम् । तथा शब्दे । ध्वनौ । सबले । कोलाहले च । **रासः** । पु० । रस—स्वने असवादे च । घञ्प्रत्ययः । रास—

विहायाः शकुने पुंसि विहायः खे नपुंसकम् ।
पुत्रादौ तर्णके वर्षे वत्सः क्लीबन्तु वक्षसि ॥ ४५१ ॥
रसे क्रूरे च विकृतौ बीभत्सस्त्रिषु नाऽर्ज्जुने ।
व्यासो मुनौ च विस्तारे बर्हिर्ना कुशशुष्मणोः ॥ ४५२ ॥
अग्रे प्रधाने च शिरः श्रीवासो विष्णुधूपयोः ।
सुमनाः पुष्पमालत्योः स्त्रियां ना देवधीरयोः ॥ ४५३ ॥

शब्दे । घञ्प्रत्ययो वा । "रासः कोलाहले ध्वाने भाषाशृङ्खलकेऽपि च । क्रीडाभेदे च गोपानाम्" इति मेदिनी । रते रमणे । गुह्ये गोप्ये । चकारात् निर्जने । याथार्थ्ये च । निर्जने अव्ययम् । **रहः** । न० । रह—त्यागे, गतौ च । असुन्प्रत्ययः । "रहस्तत्त्वे रते गुह्ये" इति मेदिनी ॥ हर्षः इष्टाधिगमजन्य आनन्दः । वेगः जवः, औत्सुक्यं वा तयोः । तथा पौर्वापर्यविचारे च । **रभसः** । पु० । रभ--औत्सुक्ये । असच्प्रत्ययः । "रभसो वेगहर्षयोः" इति मेदिनी ॥ ४५० ॥ शकुने पक्षिणि । खे आकाशे च **विहायाः** । पु० न० । विपूर्वः हय—गतौ । असुनप्रत्ययः । निपातनात् वृद्धिः । स्वार्थे अच्-प्रत्ययः । विहायसमप्यत्र । आकाशे । न० । "विहायाः शकुने पुंसि गगने पुन्नपुंसकम" इति मेदिनी ॥ पुत्रादौ शिशौ । तर्णके गवादीनां वत्से वर्षे संवत्सरे । पु० । वक्षसि वक्षःस्थले । न० । **वत्सः** । पु० । वस—निवासे, स्तम्भे च । सप्प्रत्ययः । "वत्सः पुत्रादिहर्षयोः । तर्णके नोरसि क्लीबम्" इति मेदिनी ॥ ४५१ ॥ रसे नाटयादौ प्रसिद्धे जुगुप्सास्थायिभावके रसभेदे । क्रूरे कर्कशे । विकृतौ तद्रसविषये विकृतमांसादौ । त्रि०। अर्जुने अर्जुनवृक्षे । पु० । तथा पाविनि । जुगुप्सिते । घृणाविषये । **बीभत्सः** । त्रि० । बध—निन्दायाम् । स्वार्थे सन् । कर्म्मणि घञ्प्रत्ययः । बीभत्सो नाऽर्जुने क्रूरघृणात्मविकृते त्रिषु" इति मेदिनी ॥ मुनौ पराशरसुते मुनिभेदे । विस्तारे विस्तीर्णतायाम् । चकारात् समासादिसमार्थके विग्रहवाक्ये । गोलवृत्तक्षेत्रस्य मध्यस्थरेखायाम् । पुराणपाठके विप्रे च । "स एवं वाचयेद्विप्रः स ब्रह्मन् व्यास उच्यते" इति । **व्यासः** । पु० । व्यस्यति वेदान् । विपूर्वः अस—क्षेपे । घञ्-प्रत्ययः । "व्यासो ना विस्तृतौ मुनौ" इति मेदिनी ॥ कुशं स्वनामाख्यातं तृणम् । शुष्मा वह्निः । "बर्हिषि रजतं न देयम्" इति श्रुतिः । तयोः । तथा ग्रन्थिपर्णे । चित्रके च । दीप्तियुक्ते । त्रि० । "बर्हिर्देवसदनम्" इति श्रुतिः । **बर्हिः** । पु० स्त्री० । बृहि—दीप्तौ, वृद्धौ च । इसुनप्रत्ययः । निपातनात् नलोपश्च । बर्ह—दीप्तौ । इसुनप्रत्ययो वा । "बर्हिः पुंसि हुताशने । न स्त्री कुशे" इति मेदिनी ॥ ४५२ ॥ अग्रे उपरिभागे । प्रधाने सेनाग्रे च । श्रेष्ठे वा । चकारात् मस्तके । शिखरे च । **शिरः** । न० । शृ- हिंसने । असुन् प्रत्ययः । निपातनात् साधुः । "शिरः प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च" इति मेदिनी ॥ विष्णुः श्रीरामः । धूपः वृकधूपः । सालवृक्षरसः तयोः । तथा पङ्कजे च । **श्रीवासः** । पु० । श्रियै वासः सौर-

वीणाभेदे सर्जरसो धूनकेऽप्यथ सारसम् ।
पद्मे ना पक्षिणीन्दौ च सरो नीरतडागयोः ॥ ४५४ ॥
हविः सर्पिषि हव्ये च हंसस्तु खगसूर्ययोः ।
निर्लोभे नृपतौ विष्णावन्तरात्मनि चेष्यते ॥ ४५५ ॥

इति सान्ताः ॥

अवग्रहः स्यात्प्रकृतिभाववृष्टिविबन्धयोः ।
अवरोहोऽवतरणे त्रिदिवे च लतोद्गमे ॥ ४५६ ॥

भ्रमरस्येति बहुव्रीहिः । "श्रीवासो वृकधूपे स्यात् पङ्कजे मधुसूदने" इति मेदिनी ॥ पुष्पं कुसुमम् । "किं सेव्यते सुमनां मनसा विगन्ध" इति रसगङ्गाधरः । मालती स्वनामाख्याता लता । तयो । स्त्री० । देवः सुरः । धीरः पण्डितः तयोः । पु० । प्रशस्तचित्तयुक्ते । त्रि० । प्रशान्तमनसि च । **सुमनाः** । न० । सुष्ठु मनो यस्मात् यस्येति वा बहुव्रीहिः । "सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः" इति मेदिनी ॥ ४९३ ॥ वीणाभेदे वाद्यभाण्डभेदे । धूनके यक्षधूपे च । **सर्जरसः** । पु० । सर्जस्य रसः इति षष्ठीतत्पुरुषः । अथ अनन्तरम् । पद्मे सरसीरुहे । पु० । पक्षिणि स्वनामाख्याते खगे । इन्दौ चन्द्रे । चकारात् पक्षिण्याम् । स्त्री० । सरोवरसम्बन्धिनि च । त्रि० । **सारसम्** । न० । सरोऽभिजनो नियतवसतिरस्य । अण्प्रत्ययः । सरस इदं वा । अणुप्रत्ययः । "सारसः पक्षिभेदेन्द्वोः क्लीबन्तु सरसीरुहे" इति मेदिनी ॥ नीरं जलम् । तडागः सरोवरम् । तयोश्च । गौरादित्वात् ङीप् च । सरस्यत्र । **सरः** । न० । सृ-गतौ । असिः प्रत्ययः । "सरो नीरतडागयोः" इति मेदिनी ॥ ४९४ ॥ सर्पिषि घृते । हव्ये हवनीयद्रव्यमात्रे । "वपाया मेदसो हविषो नु ब्रूहि" इति श्रुतिः । चकारात् होमे च । **हविः** । पु० । हूयते । हु-होमे, अदने च । कर्मणि असुन्प्रत्ययः । "हविर्होतव्यमात्रे च सर्पिष्यपि न पुंसकम्" इति मेदिनी ॥ खगः स्वनामाख्यातः पक्षी । सूर्यः दिनकर. तयोः । निर्लोभे नृपतौ निर्लोभराजनि । विष्णौ श्रीकृष्णे । अन्तरात्मनि परमात्मनि । "हंसं तनौ सन्निहितं चरन्तम्" इति नैषधम् । चकारात् मत्सरे । यतिभेदे । देहस्थवायुचेष्टाभेदे । मन्त्रभेदे । अश्वभेदे । सुमेरुपर्वते । शिवे । अग्रस्थिते । श्रेष्ठे । विशुद्धे । अजपामन्त्ररूपे वर्णे च । "हकारेण बहिर्याति सकारेण विशेत् पुनः । हंसेति सततं मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम् । **हंसः** । पु० । इष्यते इत्यन्वयः । हस-हासे । अच्प्रत्ययः । पृषोदरादित्वात् साधुः । "हंसः स्यान्मानसौकसि । निर्लोभनृपविष्ण्वर्के परमात्मनि मत्सरे । योगभेदे मन्त्रभेदे शरीरमरुदन्तरे । तुरङ्गमप्रभेदेऽपि" इति मेदिनी ॥ ४९५ ॥ इति सकारान्ताः समाप्ताः ॥ अथ हकारान्तानाह ॥ प्रकृतिभावः । वृष्टिविबन्धः वर्षाजलप्रतिघातः । निदाघ इत्यर्थः । तयोश्च । **अवग्रहः** । पु० । अवपूर्वः ग्रह-ग्रहणे, आदाने च । घः प्रत्ययः । "अवग्राह" इति क्वचित् घञ्प्रत्ययेन साध्यम् । "अवग्रहो वृष्टिरोधे प्रतिबन्धे गजालिके" इति मेदिनी ॥ अवतरणे ऊर्द्ध्वदेशात् निम्नदेशागमने । त्रिदिवे स्वर्गे ।

आरोहस्तु नितम्बे स्यादीर्घत्वे च समुच्छ्रये।
शक्तौ स्नेहे चाग्रहः स्यादीहातूद्यमवाञ्छयोः॥ ४५७॥
सूपे च पाकपात्रे च कटाहो महिषीशिशौ।
खड्गकोषे च कलहो दात्यूहश्चातकेऽपि च॥ ४५८॥
समारम्भे च पटहो ब्रह्मण्यपि पितामहः।
प्रवाहो व्यवहारे च बहुर्विपुलसङ्ख्ययोः॥ ४५९॥

ततो हि भोगावसाने सर्वेऽवतरन्ति। लतोद्गमे तरोर्मूलादग्रपर्यन्तमारूढायां गुडूच्यादिलतायाम्। चकारात् आरोहे। **अवरोहः**। पु०। अवपूर्वः रुह—उद्भवे। घञ् प्रत्ययः। अपादाने घञ्प्रत्ययश्च। "अवरोहोऽवतरणेऽप्याऽरोहे च लतोद्गमे" इति मेदिनी॥ ४५६॥ नितम्बे उत्तमस्त्रीणां कटितटे। दीर्घत्वे दीर्घतायाम्। समुच्छ्रये अत्युन्नतौ। चकारात् आरोहणे। गजारोहे। परिमाणभेदे च। **आरोहः**। पु०। स्यादित्यन्वयः। आपूर्वः रुह—उद्भवे। घञ्प्रत्ययः। "आरोहस्त्ववरोहे च वरारोहाकटावपि। आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये" इति मेदिनी॥ शक्तौ सामर्थ्ये। स्नेहे प्रेम्णि। चकारात् अनुग्रहे। आक्रमणे। ग्रहणे च।

आग्रहः। पु०। स्यादित्यन्वयः। आपूर्वः ग्रह—ग्रहणे, आदाने च। अच्प्रत्ययः। "आग्रहोऽनुग्रहाशक्त्योराक्रमे ग्रहणेऽपि च" इति मेदिनी॥ उद्यमे उत्साहे। वाञ्छा अभिलाषा तयोः। तथा चेष्टायाञ्च। **ईहा**। स्त्री०। ईह—चेष्टने। अः प्रत्ययः। "ईहोद्यमवाञ्छयोः" इति मेदिनी॥ ४५७॥ सूपे पाचके। पाकपात्रे तैलादेः पाकसाधनपात्रे। महिषीशिशौ लुलायीशावके। चकारात् खर्परे। नरके च। **कटाहः**। पु०। कटामाहन्ति। आपूर्वः हन—वधे, गतौ च। डः प्रत्ययः। "कटाहः कूर्मखर्परे। द्वीपस्य च प्रभेदे स्यात् तैलादेः पाकभाजने। जायमानविषाणाग्रमहिषीशावकेऽपि च" इति मेदिनी॥ खड्गकोशे असिकोशे। चकारात् विवादे। युद्धे च। **कलहः**। पु० न०। कलं हन्ति। हन—वधे। डः प्रत्ययः। कलहं युधि चाटे ना खड्गकोषे च भण्डने" इति मेदिनी॥ चातके स्वनामाख्याते पक्षिभेदे। अपिशब्दात् कालकण्ठके च। **दात्यूहः**। पु०। दो—छेदे। क्तिन्प्रत्ययः। दितिं खण्डनं वहति॥ वह—प्रापणे। क्विप्प्रत्ययः। दितिं वाट्। स्व एव अण्प्रत्ययः। वाह ऊठ्। आदेरिते आत्त्वम्। "दात्यूहस्तु पुमान् कालकण्ठचातकपक्षिणोः" इति मेदिनी॥ ४५८॥ समारम्भे उद्यमे, दर्पे वा। चकारात् ढक्कावाद्ये च। **पटहः**। पु० न० पटेन हन्यते। हन—वधे। पट इत्येवं शब्दं जहाति वा। हा—त्यागे। डः प्रत्ययः। "पटहो ना समारम्भे आनके पुन्नपुंसकम्" इति मेदिनी॥ ब्रह्मणि विरिञ्चौ। अपिशब्दात् पितुः पितरि च। **पितामहः**। पु०। पितुः पिता पितृशब्दात् डामहः प्रत्ययः। पितुः पितृपत्न्याम्। स्त्री०। ङीप् च। "पितामहो विरिञ्चौ स्यात् तातस्य जनकेऽपि च" इति मेदिनी॥ व्यवहारे अर्थविशेषबोधनाय शब्दविशेषप्रयोगे, सहासनभोजनादौ वा। चकारात् प्रवृत्तौ। जलस्रोतसि।

वराहः सूकरे मेघे मुस्तकेऽप्यथ मूर्च्छने ।
अविद्यायाश्च मोहः स्याद्वृषस्कन्धेऽनिले वहः ॥ ४६० ॥
देहनिर्माणसैन्येषु व्यूहः स्यादथ विग्रहः ।
सङ्ग्रामे प्रविभागे च देहविस्तारयोरपि ॥ ४६१ ॥
वैदेही पिप्पलीसीतावणिक्स्त्रीरोचनास्वपि ।
संक्षेपेऽपि सङ्ग्रहः स्यात् सिंह्यौ वार्त्ताकवासकौ ॥ ४६२ ॥

उत्तमाश्वे च । **प्रवाहः** । पु० । प्रपूर्वः वह–प्रापणे । घञ्प्रत्ययः । "प्रवाहस्तु प्रवृत्तौ स्यादपि स्रोतसि वारिणः" इति मेदिनी ॥ विपुलः विस्तीर्णः । सङ्ख्या द्विप्रभृत्यनेकसङ्ख्यान्विता तयोश्च । **बहुः** । वह–वृद्धौ । कुः प्रत्ययः। न लोपः। "बहु स्यात् त्र्यादिसङ्ख्यासु विपुलेऽप्यभिधेयवत्" इति मेदिनी ॥ ४५९ ॥ सूकरे स्वनामाख्याते पशौ । मेघे जलधरे । क्वचित् मेषे इति पाठः । मुस्तके स्थावरविषभेदे । अपिशब्दात् यज्ञवराहाख्ये विष्णोरवतारभेदे । पर्वतभेदे । शिशुमारे । वाराहीकन्दे । द्वीपभेदे च । **वराहः** । पु० । वराय अभीष्टाय मुस्तादिलाभाय आहन्ति खनति भूमिम् । आपूर्वः हन–हिंसायाम् । डः प्रत्ययः । "वराहः सूकरे विष्णौ मानभेदेऽद्रिमुस्तयोः" इति मेदिनी॥ अथ अनन्तरार्थवाची । मूर्च्छने मूर्च्छायाम् । अविद्यायाम् अज्ञाने । चकारात् भ्रान्तिसाधने । वेदान्तोक्ते अविद्यावृत्तिभेदे । दुःखे । देहादिष्वात्माभिमाने च । **मोहः** । पु० । मुह–मोहे, वैचित्त्ये च । घञ्प्रत्ययः । "अथ मोहो पुलिङ्गः स्यादविद्यायाञ्च मूर्च्छने" इति मेदिनी॥ वृषस्कन्धे वृषभस्य स्कन्धदेशे।अनिले वायौ । तथा अश्वे। पथि । वाहो । नदे च । **वहः** । पु० । उह्यतेऽनेन । वह–प्रापणे । अच्प्रत्ययः । "वहः स्याद्वृषभस्कन्धे वाहे गन्धवहेऽपि च" इति मेदिनी ॥४६०॥ देहः कायः । निर्माणं रचना । सैन्यं सेनासमूहः । एतेषु । तथा सम्यक्तर्के । युद्धार्थं सैन्यसन्निवेशनविशेषे च । **व्यूहः** । पु० । विपूर्वः ऊह–वितर्के । घञ्प्रत्ययः । "व्यूहः स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः" इति मेदिनी ॥ अथ अनन्तरम् । सङ्ग्रामे युद्धे । प्रविभागे प्रकृष्टविभागे । देहः शरीरम् । विस्तारः विस्तीर्णः । तयोः । अपिशब्दात् समासादिवृत्तिसमानार्थकवाक्यभेदे । विशेषज्ञाने च । **विग्रहः** । पु० । विपूर्वः ग्रह–आदाने । ग्रहणे च, अच् प्रत्ययः । "विग्रहः कायविस्तारविभागे ना रणेऽस्त्रियाम्" इति मेदिनी ॥ ४६१ ॥ पिप्पली प्रसिद्धा । सीता जनकात्मजा । वणिक्स्त्री वणिजयोषिति । रोचना गोरोचना । एतासु । अपि शब्दात् हरिद्रायाञ्च । **वैदेही** । स्त्री० । विदेहेषु मिथिलादेशेषु भवा । अणूप्रत्ययः । "वैदेही रोचनासीतावणिक्स्त्रीपिप्पलीषु च" इति मेदिनी ॥ संक्षेपे संक्षिप्तकरणे । तथा सञ्चये । बह्वर्थकवाक्यानामेकत्र सङ्कलने च । **सङ्ग्रहः** । पु० । स्यादित्यन्वयः । सम्पूर्वः ग्रह–ग्रहणे । आदाने च । अप्प्रत्ययः । "सङ्ग्रहो बृहदुत्सङ्गे ग्रहसंक्षेपयोरपि" इति मेदिनी । वार्त्ताकः स्वनामाख्यातः लताविशेषः। वासकः स्वनामाख्यातो वृक्षः । येन तेन प्रकारेण वासकः काश-

राशिभेदे हरौ सिंहः श्रेष्ठार्थे चोत्तरस्थितः ।
सौहृदे घृततैलादौ स्यात्स्नेहोऽप्यव्ययाः परे ॥ ४६३ ॥

इति हान्ताः ।

नञभावे निषेधे च तद्विरुद्धतदन्ययोः ।
सादृश्ये चेषदर्थे च हिरुङ्मध्यविलासयोः ॥ ४६४ ॥

नाशक" इति वैद्यकः । तयोः । तथा कण्टकार्याम् । बृहत्याम् । मुद्गपर्ण्याम् । राहुमातरि च । **सिंही** । स्त्री० । हिनस्ति रोगान् । हिन्स—हिंसने । अच्प्रत्ययः । पृषोदरादित्वात् साधुः । "सिंही तु कण्टकार्यां स्याद्वार्त्ताकौ वासकेऽपि च" इति मेदिनी ॥ ४६२॥ राशिभेदे मेषादितः पञ्चमे राशौ । हरौ स्वनामाख्याते पशुभेदे । उत्तरस्थितः उत्तरपदान्तस्थः । श्रेष्ठार्थे उत्तमार्थे । यथा नृसिंहः शाक्यसिंहः राजसिंहः इति । चकारात् रक्तशोभाञ्जने च । **सिंहः ।** पु० । हिन्स—हिंसने । अच्प्रत्ययः । पृषोदरादित्वाद्वर्णविपर्य्ययश्च । "सिंहः कण्ठीरवे राशौ सप्तमे चोत्तरस्थित" इति मेदिनी ॥ सौहृदे सुहृद्भावे, प्रेम्णि च । घृततैलादौ सर्पिस्तैलादिरसभेदे । अपिशब्दात् न्यायोक्ते गुणभेदे च । यद्वशात् दाहानुकूल्यम् । **स्नेहः** । पु० । स्यादित्यन्वयः । ष्णिह—प्रीतौ । घञ्प्रत्ययः । "स्नेहः स्यात् पुंसि तैलादिरसद्रव्ये च सौहृदे" इति मेदिनी ॥ ४६३ ॥ इति हकारान्ताः समाप्ताः ॥ अथ ऊर्ध्वं वक्ष्यमाणाः नामतो भिन्ना अन्ये अनेकार्थाः अव्ययाः । उच्यन्त इत्यत्रान्वयः । अस्मिन्वर्गे तेषामुपन्यासस्तु पूर्ववन्नानार्थत्वादेवानेकार्थः । अतः नामानन्तरं परे अन्ये । अव्ययाः "स्वरादिनिपातमव्ययम्" इति पाणिन्युक्तः निपाताः शिष्यशिक्षार्थं वक्तव्याः । ते च सर्वासु विभक्तिषु सर्वेषु वचनेषु च एकरूपाः शब्दवृत्तिधर्मविशेषा एव भवन्ति । यथाह—"स्वरादयोऽव्ययाः सर्वत्रैकरूपाः" इति । तल्लक्षणन्तु—'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्' इति श्रुतिः । तेषु नञित्यव्ययम् अभावादावर्थषट्के वर्तते । तस्य ञकारोऽनुबन्धः । अनुबन्धो हि कार्यविशेषार्थं ज्ञापयति । अत्रादौ शिष्यहिताय नञर्थो दिङ्मात्रं निदर्श्यते । तत्तु बोधकैः सम्यग्बोधनीयम् । ननु सदसती नञा न निषेध्येयातां शक्यत्वात् सिद्धत्वाच्च । तथा चोक्तम्—"सतां न च निषेधोऽस्ति सोऽसत्सु च न विद्यते । जगत्यनेन न्यायेन नञर्थः प्रलयं गतः" इति । नच सन्निषेद्धुं शक्नोतीति वाच्यम् । पापं मे नास्तीति प्रायश्चित्तं न कुर्याम् । ततः कुत्र नञ् प्रवर्ततामिति । नैतदस्ति । सर्वो हि ज्ञातमर्थं ज्ञापयितुं शब्दान् प्रयुनक्ति । तत्र ज्ञानमुभयं प्रमा भ्रमश्च । तत्र पूर्वस्मिन्नञो व्यापारः परस्मिन्नस्ति । तत्रायं ब्राह्मण इति प्रतीतिर्मिथ्येति नञा ख्यायते । स च द्विविधः । पर्युदासवृत्तिः प्रसज्जवृत्तिश्च । आद्ये ब्राह्मणादन्यो ब्राह्मणत्वेनाध्यासितो राजन्यादिरब्राह्मणो ब्राह्मणसदृश इति प्रतीयते। उत्तरे तु मिथ्यानिवृत्तिरेव । ब्राह्मणोऽयं भवतीत्यत्र ब्राह्मणत्वेनाध्यवसितो न भवतीत्यर्थः । तस्मादुभयत्रापि पूर्वपदार्थप्रधानम् । तद्वशेन सदृशनिवृत्त्योः प्रतीतेः । एवञ्च न सतो नाप्यसतः

प्रतिषेधः । किन्तु भ्रमादतस्मिंस्तदिति प्रयुक्तस्य ब्राह्मणशब्दार्थो निषेध्यत इति तत्त्वम् । इह निपातानामनेकार्थत्वात्तत्रासादृश्यकृतादन्यता तदन्यता । "अभक्ष्यो गृञ्जनकः । अपेया सुरा" इत्यादावव्यवहार्यतानिषेध एव नञा ख्यायते । "अनृतमधर्ममभिक्षुः" इति रुचिविषयस्य तदन्यता। एवमन्यदूह्यम्। उक्तञ्चेति—"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः" इति । अत्र तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् "अवर्षा हेमन्तः असर्वस्मै" इत्यादौ तु स्वलिङ्गवचनसर्वनामत्वादिकं न विहन्यते । एकशब्दस्तु उपात्तसङ्ख्याद्वित्वबहुत्वेन वक्तीति एकवचनमुत्पद्यते। अनेकशब्दस्याप्युक्तन्यायात्तथैव नियतम् । यथा—"करेणुः प्रस्थितोऽनेकः" इति।यत्तु विजातीयानामर्थानामनेकत्वं प्रत्येकं विवक्ष्यते।यथा—"कथं वमी सन्ततमस्य सायका भवन्त्यनेके जलधेरिवोर्मयः" इति भारविः । न तद्भर्तृहरिणा व्यवस्थितमिति । पूर्वपदार्थप्राधान्ये तु अब्राह्मणमित्यव्ययीभावः । ब्राह्मणस्याभाव इत्यर्थः । ननु अब्राह्मण इत्यादौ उत्तरपदार्थसादृश्यस्य विधेयत्वाद्विधेरेव प्राधान्यम् । प्रतिषेधांशे तात्पर्याभावात् । उक्तञ्च—"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यस्योत्तरपदे नञः" इति । अत एवोत्तरपदेन सह पर्युदासस्य परस्परसम्बन्धार्थस्य विद्यमानत्वादस्तु समासः । "किञ्चिन्न कुर्वाण" इत्यादौ तु विध्यंशस्याप्राधान्यम् । प्रतिषेधस्यैव प्राधान्यम् । तदर्थत्वेन शब्दयोगात् उत्तरपदेन सह नञः सम्बन्धो नास्ति । क्रियया सहैव सम्बन्धात् कथमत्र समासः । तथा चोक्तम्।—"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" इति । सत्यम् । अनभिधानमेव समासनिषेधकारणम् । अत्र तु तदभावादेव समासः । अन्ये तु अलुगविशिष्टादुत्तरपदे । "घञ्भावकारकयोरकर्त्तरि" इत्यादिनिर्देशात् समास इत्याहुः । अप्यधिकारात् क्वचिदसाक्षात्सम्बन्धेऽपि समास इति श्रीपतिः । यथा—"सूर्यं न पश्यत्यसूर्यम्पश्यः । किञ्चिन्न कुर्वाणोऽकिञ्चित्कुर्वाणः । मांसं न हरमाणोऽमांसहरमाणः । न पुनर्दीयन्तेऽपुनर्देयाः श्लोकाः । श्राद्धं न भुङ्क्ते अश्राद्धभोजी । एवमलवणभोजी । कर्णवेष्टकाभ्यां न शोभते अकर्णवेष्टिकिकं मुखम् । वत्सेभ्यो न हितम् अवात्सीयो गोधुक् । वधं नार्हति अवध्यो ब्राह्मणः । सन्तापाय न भवति असन्तापिकः । असदुपदेशकः । अभक्तभेदेन वधूर्ववन्दे' इत्यादि । अन्यत्र न स्यात् ब्राह्मणो न भवति । अथ केनचिन्नञ्समासः कर्मधारयान्तर्निवेशोऽङ्गीकृतः । स तु विदुषामसम्मतः । विशेषणविशेष्यभावस्याप्रसङ्गत्वात् । लक्षणकल्पना तु कल्पनैव । किञ्चाशुक्ल इत्यादौ विशेषणविशेष्याभावानियततया पूर्वनिपातसन्देहः स्यात् । अकर्मधारयत्वात् अपथी अपथिकः इत्यत्र इनिकौ स्याताम् इति श्रीपतिरिति पद्मनाभदत्तवचनमङ्गीकृतम् । तथा भट्टोजिदीक्षितादीनां पूर्वीयाणां शाब्दिकानाञ्च मतानुगम्यनञर्थस्य विशेषदर्शनार्थं मया किञ्चिन्मात्रमिहोपाहितम् । ततः परमप्युक्तानुक्रमेणैव सार्थोदाहरणानामाविष्करणञ्च भवति । अभावे यथा—अपापम् । पापस्याभाव इत्यर्थः । एवमकुशलम्—अनुत्तरः अनुपलम्भः इत्यादि । तद्विरुद्धे यथा—असुरः सुरविरुद्ध इत्यर्थः । एवमलोभः अमित्रमित्यादि । तदन्ये यथा—अघटः

पुनरर्थेऽङ्ग भोर्थे च सुष्ठ्वत्यर्थप्रशंसयोः ।
च पादपूरणे पक्षान्तरे हेतौ विनिश्चये ॥ ४६५ ॥

घटभिन्न इत्यर्थः । एवमव्याकृता धर्माः । अपर्याप्ता इत्यादि । निषेधे यथा—नैकधा न एक प्रकारेणेत्यर्थः । एवमसंस्कृताः । अकुर्वन् । अकृत्वा । अगम्य इत्यादि । सादृश्ये यथा—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः । एवमश्रमणः अमनुष्यः अपुत्र इत्यादि । ईषदर्थे यथा । अनुदरी । अल्पोदरीत्यर्थः। कृशाङ्गीति यावत्।एवमनुदिता इत्यादि । एवमेतेष्वर्थेषु **नञ्** अव्ययंविद्वद्भिः प्रायो निगद्यते । तत्र तात्पर्यार्थाः।तथा चाहुः प्राञ्चः। "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः" इति । "नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे । ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः" इति । क्वचित्तु नभ्राटादिषु शब्देषु नञः आदेशो न स्यात् । यथा नभ्राट् । न भ्राजते इत्यर्थः। नपात् । न पातीत्यर्थः । नवेदाः । न वेत्तीत्यर्थः। नासत्याः । न असत्या इत्यर्थः । नमुचिः । न मुञ्चतीत्यर्थः । नकुलः । न कुलमस्येत्यर्थः । नखः । न खमस्येत्यर्थः। नपुंसकम् । न स्त्री न पुमानित्यर्थः। स्त्रीपुंसयोः नपुंसकभावो निपातनात् सिद्धः । नक्षत्रम् । न क्षरतीत्यर्थः । क्षीयते क्षरतेर्वा क्षत्रमिति निपात्यते । नक्रः । न क्रामतीत्यर्थः । नाकः । न अकमस्मिन्नित्यर्थः । तथा चोक्तम्—"नाको नवेदा नकुलश्च नक्रो नासत्यनक्षत्रनपाच्च नभ्राट् । नपुंसकं वै नमुचिर्नखश्च नादेशमेतेषु वदन्ति धीराः" इति । नद्वयस्य प्रयोगात् प्रकृतेर्दृढत्वञ्च सूच्यते । यथा—न नाभूत् । अभूदित्यर्थः। "द्वौ नञौ प्रकृतेर्दार्ढ्यं सूचयत" इति मधुकोशपञ्जिका ॥ मध्यः अन्तरम् । विलासः दीप्तिः तयोश्च । **हिरुक्** । मध्ये यथा । "कृष्णो हिरुग्ब्रह्मशम्भ्वोः" ब्रह्मणः शम्भोश्च मध्ये कृष्ण इत्यर्थः। विलासे यथा—"हिरुक् वह्नेरजायत" अग्नेर्दीप्तिरभवदित्यर्थः । तथा वर्जने समीप्ये च । वर्जने यथा । "हिरुक् कर्म न मोक्षः" कर्म विना संसारमुक्तिर्नास्तीत्यर्थः । सामीप्ये यथा—"पर्वतस्य हिरुङ्नदी" पर्वतस्य अन्तिके समीपे गङ्गा इत्यर्थः । "हिरुक्शब्दो विनार्थे च मध्यार्थेऽपि च दृश्यते" इति मेदिनी । "हिरुङ्मध्यविनार्थयोः" इति विश्वः॥४६४॥ पुनरर्थे भोर्थे सम्बोधने च **अङ्ग** शब्दः। पुनरर्थे यथा "मूर्खोऽपि नावमन्यते किमङ्ग विद्वान्" अज्ञोऽपि नावमन्यते पण्डितोऽपि किं पुनरवमन्यते नेत्यर्थः। सम्बोधनार्थे यथा—"अङ्ग भीम ! यज्ञं रक्षस्व" भो भीम ! तं क्रतुं पालयेत्यर्थः। "अङ्ग सम्बोधने हर्षे सम्भ्रमासूययोरपि" इति मेदिनी॥ अत्यर्थे अतिशये। प्रशंसायाञ्च । **सुष्ठु** शब्दः । अतिशये यथा—"सुष्ठु पीतं मया घृतम्" । मयाऽतिशयेन सर्पिः पीतमित्यर्थः । प्रशंसायां यथा । विद्वज्जनमनोहारि सुष्ठु काव्यं प्रजायते" । पण्डितानां मनोरञ्जनयोग्यं काव्यं सुष्ठु प्रशंसनीयम्भवतीत्यर्थः । "सुष्ठु प्रशंसनेऽपि स्यादत्यर्थे च निगद्यते" इति मेदिनी ॥ पादपूरणार्थचतुष्के **च** शब्दः । पादपूरणं श्लोकचरणपूर्णता । तत्र पादपूरणे यथा—"स च प्राह च राजानम्" । स राजानं न्यवेदयदित्यर्थः । पक्षान्तरे यथा—"सत्यं चेत् तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्" यदि सत्यं भवेत् तपःकर्मणा किम् । यदि पवित्रं चित्तं

हा विस्मये प्रमोदे च ओमेवं प्रणवार्थयोः ।
युक्तार्थे चाधुनार्थे च साम्प्रतं तद्विदो विदुः ॥ ४६६ ॥

विद्यात् तीर्थेन तीर्थचरणेन किं प्रयोजनमित्यर्थः । "पिबत्यसौ पाययते च सिन्धुः" । असौ समुद्रः स्वयं नदीः पिबति तरङ्गाधरं पाययते च इत्यर्थः । अत्र केचित्तु पक्षान्तरार्थं पठन्ति । अपरे तु "सर्वत्राण् तलोपश्च" इति पाणिनीयसूत्रे चकारः पक्षान्तरदीपक इति च। हेतौ यथा- "यच पुत्र अजायत" । अत्र चकारो हेत्वर्थबोधकः । यस्मात् हेतोः तस्य पुत्रः अजायत इत्यर्थः । निश्चये यथा-"ससैन्यैश्चान्वगाद्रामं दर्शितानाश्रमालयैः" । ससैन्यो भरतः राममन्वगाचेत्यर्थः । अत्र चकारो निश्चयार्थः । अन्ये तु-"निश्चित्य चानन्यनिवृत्तिवाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत्" किञ्च वाच्यमपवादम् । अनन्यनिवृत्तिनिश्चयं कृत्वा पत्न्याः परित्यागेन परिहर्तुमैच्छदित्यर्थः । इत्यादौ निश्चयार्थ इति वदन्ति । तथा अन्वाचये समुच्चये इतरेतरयोगे । समाहारे च चकारः स्यात् । अन्वाचयो नाम एकस्य प्राधान्येन इतरस्यानुषङ्गेणोक्तिः । तत्र यथा-"ग्रामं गच्छ अजाञ्चानय" । अत्र ग्रामगमनमेव प्राधान्यम् । अजानयनन्त्वानुषङ्गिकम् । समुच्चयो नाम परस्परापेक्षारहितस्यानेकस्य एकस्मिन् कर्मादौ अन्वयः । तत्र यथा- "पिता पुत्रश्च ग्रामं गच्छति" अत्रैकस्मिन् गमने कर्मणि पितुरिव पुत्रस्यापि अन्वयः । तत्रान्वयश्च विशेष्यतया विशेषणतया च । क्रियासमुच्चयद्रव्यसमुच्चयतया वा द्विधा भवति।तत्राद्यम्- "चैत्रो गच्छति पचति च" इत्यादौ क्रियासमुच्चये । अन्त्यम्-"ईश्वरं गुरुञ्च भजस्व" इत्यादि द्रव्यसमुच्चये । इतरेतरयोगो नाम परस्परसापेक्षाणामेकस्मिन् कर्मादावन्वयः। तत्र च द्वन्द्वसमास एव । यथा-"पितापुत्रौ गच्छतः" अत्रोभयोरपि एकस्मिन् प्रत्येकरूपेण गमने परस्परसापेक्षतयैवान्वयः । अन्वाचयादयमेवास्य विशेषः । सापेक्षता च स्वघटितनामोत्तरवर्तिविभक्त्यन्वयित्वेन । समाहारो नाम मिलितानामन्वयः । परस्परापेक्षाणामुद्भूतावयवभेदकसमूहरूपो वा । तत्र यथा-"हस्तपादं वादयति" । अत्र हस्तादीनां मिलितानामेवान्वयः । इतरेतरयोगे तु प्रत्येकस्यैवान्वयः । अथवा तद्वृत्तिपदसमुदायोपस्थाप्यतत्तत्पदार्थसंहतिरेव तत्र प्रधानम्। संहतेश्चैकत्वात् तत्रैकवचनता । व्यासवाक्ये च चकारेणोभयत्र इतरेतरयोगस्य समाहाररूपसंहतेश्च प्राधान्यं द्योत्यते । तद्वदविलम्बार्थे किञ्चार्थेऽपि चकारो दृश्यते । तत्राविलम्बार्थे यथा । "तेच प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः" । अत्र द्वौ चकारौ गमनप्रतिबोधयोरविलम्बार्थौ । तथा हि अत्याक्षेपो गमनस्याव्यासङ्गः । अविलम्ब इति यावत् । किञ्चार्थे यथा- "हेमपक्षप्रभाजालं गगने च वितन्वता" "पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया" एतयोः श्लोकपादयोश्चकारः किञ्चार्थश्च । "चान्वाचये समाहारेऽप्यन्यान्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" इति मेदिनी ॥ ४६९ ॥ विस्मये आश्चर्ये अद्भुते वा । प्रमोदे हर्षे । चकारात् विषादे शोके दुःखे पीडायां च **हाकारः** । तेषु विस्मये यथा-"हा चित्रम्" चित्रमाश्चर्यमित्यर्थः । प्रमोदे यथा-"हा पुत्रजन्म पितुः" पुत्रस्योत्पत्ति-

हुं वितर्के चानुमतौ वार्त्तायामरुचौ किल ।
प्रातर्दिने च पूर्वेऽत्यर्थे पूर्वेद्युरिष्यते ॥ ४६७ ॥

इति नानार्थवर्गः ३.

र्जनकस्य प्रमोद इत्यर्थः । दुःखे यथा—"ही कान्तारगमनम्" । कान्तारमार्गे गमनं दुःखमित्यर्थः । हेतौ यथा—"धनप्राप्तेर्ही" धनलाभस्य हेतोरित्यर्थः । "ही दुःखे हेतावाद्याता विषादे विस्मयेऽपि च" इति मेदिनी ॥ एष्वर्थेषु हाकारोऽपि दृश्यते । यथा "हा धिग्दैवकृतं स एव मधुपः कां कां दशां नागतः" । अत्र हाकारः विस्मये । प्रमोदे यथा—"हा कान्त मैवं वद मेनुरागम्" । अत्र हाकारः हर्षे । विषादे यथा—"हा तातेति क्रन्दितमाकर्ण्य निषण्णः" "हा हन्त हन्त नलिनीं गज उज्जहार" "हा प्रियङ्कर ! हा पुत्र! क नु पश्यामि ते मुखम्"इत्यादौ हाकारः खेदे । शोके यथा—"हा रमणीयो गतः कालः" "हा राम ! वनं गतोऽसि । अत्र हाकारः शोके । पीडायां यथा—"हा हतोऽस्मि" । अत्र हाकारः पीडायाम् । कुत्सितार्थेऽपि हाकारो दृश्यते । यथा—"हा वृषल त्वमेवं मा भाषसि" । वृषल ! त्वम् एवंरूपं कुत्सितवचनं न कथयेत्यर्थः । तथा खेदसूचके हाहाशब्दः हहाशब्दश्च स्यात् । यथा—"तदा जनसमूहस्य हाहाकारो महानभूत्" "वैदेही तु कथं भविष्यति हहा हा देवि ! धीरा भव" इत्यादि । "हा विषादे च शोके च कुत्सादुःखार्थयोरपि" इति मेदिनी ॥ प्रणवः ओङ्कारः वेदादौ पाठ्यः शब्दभेदः । अर्थः आरम्भः तयोः । तथा अङ्गीकारे मङ्गले शुभे ज्ञेये ब्रह्मणि च । सादृश्ये इत्थम्प्रकारे अवधारणे स्वीकारे प्रश्ने च । **ओमेवङ्कारौ** स्याताम् । उदाहरणानि यथाक्रमेणैव स्युः । अङ्गीकारे यथा—"ओमित्युक्तवतोऽथ शार्ङ्गिण" इति । मङ्गले यथा—"ओं नमो रत्नत्रयाय" । शुभे यथा—"ओं भगवते त्रिलोकीनाथाय" । ज्ञेये यथा—ओं नमः शिवाय" । अपरे त्वत्र ओङ्कारो मङ्गलार्थवाची । ततस्तेन मङ्गलं सूचितमिति पठन्ति । ब्रह्मणि यथा—"ओं तत्सत्" इति च । सादृश्ये यथा—"एवम्भूतः" । इत्थम्प्रकारे यथा—"एवं मयाश्रुतम्" "एवं यदाह भगवान्" । अवधारणे यथा—"एवमेवम्" । स्वीकारे यथा—"एवं कुर्मो वयम्" । प्रश्ने यथा—"एवं त्वं करोषि । "ओमित्यनुमतौ प्रोक्तः प्रणवे चाप्युपक्रमे" इति च । "एवम्प्रकारोपमयोरङ्गीकारेऽवधारणे" इति च विश्वः ॥ युक्तार्थे अधुनार्थे च । **साम्प्रतम्** । तद्विदः निरुक्तिवेदिनः । विदः जानन्ति । तत्र युक्तार्थे यथा—"विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्" । विषद्रुमः अपि आदरेण संवर्द्धयित्वा आत्मना छेत्तुं न युक्तमित्यर्थः । तथा "प्रयोक्तुं साम साम्प्रतम्" । अधुनार्थे यथा—"क्रमशो वच्मि साम्प्रतम्" । तथा-तत्रास्ते साम्प्रतं मुनिः" इति च । "साम्प्रतं चाधुनार्थे स्यादुचितार्थे च दृश्यते" इति मेदिनी ॥ ४६६ ॥ वितर्के अनुमतौ च । तथा प्रश्ने क्रोधे भये निन्दायाम् अवज्ञायाञ्च । **हुङ्कारः** स्यात् । वितर्के यथा—"हुं जलं मृगतृष्णा हुं स्याचेत् किं हुं प्रपद्यते" । अनुमतौ यथा—"हुं त्वं गच्छ गृहं पुत्र !" । "हुं बाले । क्षमं कुरु" । प्रश्ने

आनन्देऽस्तु शुभं दिष्ट्या कट्टरे कंट्टराद्भुते ।
भूर्भुवः स्वस्त्रिभुवने मनागर्थे दरं स्मृतम् ॥ १ ॥

यथा—"हुं देवदत्तोऽयम्"।क्रोधे यथा—"हुं हुं नाहर चेटिके" भये यथा—"हुं राक्षस आगतः"। निन्दायां यथा—"हुं पुत्र मैवं कुरु" । अवज्ञायां यथा—"हुं साधवोऽप्येवं न कुर्वन्ति" इति च । हुं वितर्के परिप्रश्ने हुं रुषोक्त्यनुनीतिषु" इति विश्वः । "हुं वितर्के परिप्रश्ने हुं लज्जायां निवारणे" इति हैमः । वार्तायाम् । अरुचौ च । तथा अनुशयार्थे । निश्चये । सम्भाव्ये सम्भावनीये, प्रसिद्धप्रमाणद्योतके वा । सत्ये हेतौ अलीके तिरस्कारे अनुनये च ॥ तथा ऐतिह्ये ईषदसमाप्ते । **किल** शब्दः । तत्र वार्तायां यथा—"जघान कंसं किल वासुदेवः" "त्वं किलानुचितपूर्वभक्षणः" । अरुचौ यथा । "यूयं किल मा भणत माणवाः" । अनुशयार्थे यथा—"समाधिनीतेन किलोपनीतः" । निश्चये यथा—"न किलानुययुस्तस्य" । सम्भाव्ये यथा—"गुरून् किलातिशेते शिष्यः" "समदृश्या किल स्वयम्"।सत्ये यथा—"पूतात्मनामत्र किलाभिषेकात्" इति । हेतौ यथा—तत्किल एवमाहुः" । अलीके यथा । " प्रसह्य सिंहः किल तां चकर्ष" । तिरस्कारे यथा—"जहार शक्रः किल गूढविग्रहः । अनुनये यथा । "अमूक्किल त्वं त्रिदिवादवातरः" इति । ऐतिह्यः पारम्पर्योपदेशः । तत्र यथा—"विनीतनागः किल सूत्रकारैः" । ईषदसमाप्ते यथा—"ब्राह्मे मुहूर्ते किल तस्य देवी" । किलशब्दस्तु वार्तायां सम्भावनानुनयार्थयोः' इति विश्वः। "किल सम्भाव्यवार्तयोः । हेतुरुच्योरलीके च" इति हैमः॥ प्रातः प्रभातकाले । पूर्वत्र दिने पूर्वस्मिन् दिवसे । इत्यर्थे च । **पूर्वेद्युः** इष्यते । काम्यते इत्यर्थः । पण्डितैरित्यन्वयः । कचित्तु "पूर्वेद्युः" इति पाठः । "पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरे" इति रुद्रः । "पूर्वेद्युः प्रातःकाले स्यात् तथैव धर्मवासरे" इति मेदिनी। "पूर्वेद्युरिष्यते प्रातः पूर्वेद्युःपूर्ववासरे" इति विश्वः । चकारात् उत्तरेद्युः । अपरेद्युः । परेद्युः । अधरेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः । उभयद्युः । उभयेद्युः । तथा परेद्यविआदीनां ग्रहणञ्च । उदाहरणानि क्रमेणैव स्युः। यथा—पूर्वस्मिन् दिवसे पूर्वेद्युः । "पूर्वेद्युरागतः"। प्रातःकाले आगत इत्यर्थः । उत्तरस्मिन् दिवसे उत्तरेद्युः । "उत्तरेद्युर्विवाहः परिकीर्तितः" । एष्यद्दिवसे श्वो वा विवाहः कथित इत्यर्थः । अपरस्मिन् दिवसे अपरेद्युः । "अथापरेद्युर्विहितस्वकृत्ये" । "आगता न परेद्युस्तान्" । "अथापरेद्युः कश्चित् द्विजः" । परस्मिन् दिवसे परेद्युः । "परेद्युः प्रातरेव" । अधरस्मिन् दिवसे अधरेद्युः "अधरेद्युः प्रसूता सा" । अन्यस्मिन् दिवसे अन्येद्युः । "अन्येद्युरात्मानुचरस्य भावम्"। "अथान्येद्युर्नरपतिः" । अन्येद्युर्विज्ञातवृत्तान्तेन"। अन्यतरस्मिन् दिवसे अन्यतरेद्युः । आरोप्यान्तरेद्युः स्वम् । अन्यतरेद्युः पितरं द्रक्ष्यसि" । इतरस्मिन् दिवसे इतरेद्युः। "कष्टदिनादितरेद्युः प्रियो द्रष्टव्यः" । उभयोर्दिवसयोः उभयद्युः उभयेद्युर्वा । "उभयद्युरुपोषणम्" परस्मिन् दिवसे परेद्यवि । "मित्रं द्रक्ष्य परेद्यवि" "परेद्यवि प्रपन्नबुद्धिः समागतः"इत्यादि॥४६७॥ इति नानार्थवर्गः समाप्तः॥३॥ **अस्तु शुभं दिष्ट्या** इति त्रयम् आनन्दे। यथा—"साधयाम्यहमविघ्नमस्तु ते" तव अविघ्नं निरुपद्रवम्

आमाङमम्भ्युपगमे नवरं केवलार्थकम् ।
प्रातरर्थेऽनपयति क्षणमात्रे क्षणंक्षणम् ॥ २ ॥

अस्त्वित्यर्थः । अमरकोषे तु असूयापूर्वकस्वीकारे च । यथा—"तथा वित्रस्तानदशेषमस्तु नः" । "शुभं भूयान्महीपतेः" राज्ञः कल्याणं कुशलं वा भूयादित्यर्थः । "दिष्टया ते दर्शनं कान्ते" । हे कान्ते ! तव दर्शनं सन्तोष इत्यर्थः । "दिष्टया शकुन्तला साध्वी सदपत्यमिदं भवान्" "अनेन सम्बन्धमुपेत्य दिष्टया" इति ॥ **कटरे कटरा** इति निपातद्वयम् अद्भुते च स्यात् । क्वचित् कटवे कटवा इति कदरे कदरा इति च पाठाः । तयोश्च उदाहरणानि अप्रकटानि ॥ **भूः भुवः स्वः** इति त्रयं भुवने जगति स्यादित्यन्वयः । केचित् त्रिभुवने इति पठन्ति । उदाहरणानि क्रमेण । यथा—"निष्प्रभश्च रिपुरास भूभृताम्" । "न परं भूपतिमाश्रयामहे" इति । अत्र भूशब्दः जगद्वाची । "भक्तिर्भुवश्चन्दनकल्पितेव" । "भर्त्ता भुवो भानुनिभः प्रभावैः" "भावितात्मा भुवोभर्त्तुरथेनं प्रत्यबोधयत्" इति अत्र भुवः शब्दोऽपि जगद्वाची । "स्वर्गतस्य क्रिया कार्या पुत्रैः परमभक्तितः" इति । अत्र स्वः शब्दः परलोकवाची ॥ **दर** मनागर्थे अल्पार्थे स्मृतम् अभिमतमित्यर्थः । अल्पार्थे यथा—"दरादराभ्यां दरकम्पिता" इति । "दरहसितलीलाञ्चितमुखः" । "तनुस्पर्शादस्या दर मुकुलिते हन्त नयने" दरमुकुलिते ईषन्मुकुलभावं प्राप्नुत इत्यर्थः । "दराव्ययं मनागर्थे" इति मेदिनी ॥ १ ॥ **आम् । आङ् । अम् ।** इति त्रयञ्च । अभ्युपगमे अङ्गीकारे । समीपगतौ च । क्वचित् आमोमुमभ्युगपमे इति पाठः । क्रमेणोदाहरणानि । यथा—"आं कुर्मः सम्प्रति वयम्" "आ एवं किल तत्" "आ एवं मन्यसे" इति । तथा आङ्शब्दः ईषदर्थे अभिव्याप्तौ सीमार्थे अभिविधौ क्रियायोगे च वर्त्तते । तत्र ईषदर्थे यथा । "आ पिङ्गलः" ईषत्पिङ्गलमित्यर्थः । अभिव्याप्तौ यथा "आसंसारं न दीप्यते" सीमार्थे यथा "आसमुद्रं राजदण्डः" । अभिविधौ यथा । आजन्मशुद्धानाम्" । जन्म आरभ्य निषेकादिसर्वसंस्कारसम्पन्नानामित्यर्थः । आफलोदयकर्मणाम् । आफलसिद्धेः प्रारब्धकर्मान्तिगानामित्यर्थः। "आसमुद्रक्षितीशानाम्" । सार्वभौमानामित्यर्थः । "आनाकरथवर्त्मनाम्" । इन्द्रसहचारिणामित्यर्थः । अत्र सर्वत्र आङोऽभिविध्यर्थत्वं द्रष्टव्यम् । अथवा मर्यादार्थत्वे जन्मादिषु शुध्यभावप्रसङ्गात् क्रियायोगे यथा- आहरति । आक्रमतीत्यादि । विसर्गयुक्तस्तु आनिपातः पीडायाम् । कोपे च वर्तते । पीडायां यथा । "आः शीतम्" । कोपे यथा । "आः पाप ! किं विकथ्यसे" "ऊ गच्छसि बहिर्धव" । ह्रस्वपाठे उमित्यपि । क्वचित् अमिति च दृश्यते। "रुषोक्तावुम् उं प्रश्ने" इति पाठान्तरम् । हुं प्रश्ने इत्यपि पाठः । "आम् ज्ञाननिश्चयस्मृतः" इति । "प्रश्नेऽपि स्यादुम् रुषोक्तौ" इति । "आङ् सीमायामभिव्याप्तौ क्रियायोगेषदर्थयोः" इति मेदिनी । "आस्मरणेऽपाकरणे कोपसन्तापयोरपि" इति कोषान्तरम् ॥ **नवरम्** । इत्येकं केवलार्थकं निश्चितार्थम् । तत्राप्युदाहरणमप्रकटम् । **अनपयति** । इत्येकं प्रातरथ प्रातःकालार्थ । तत्राप्युदाहरणं न दृष्टम् । तानि सद्भिरूहनीयानि । **क्षणंक्षणम्** । इत्येकं केचित्तु

क्षेमे पुण्ये च स्वस्ति स्यादुच्चैरर्थेऽट्ट कीर्त्तितम् ।
वारंवारं शश्वदर्थे वारं वारेण चेष्यते ॥ ३ ॥
उताहो यदिवा यद्वा किं वा नेति समा इमे ।
किन्त्वर्थेऽपितु यद्यर्थे सचेत्प्रात्कादिवाचकम् ॥ ४ ॥

क्षणक्षणमिति च । क्षणमात्रे दशपलपरिमिते काले । निमेषक्रियाचतुर्थभागे काले च । "स विलक्ष्यमुखैर्देवैर्वीक्ष्यमाणः क्षणंक्षणम्" "क्षणंक्षणं साधु समेधमानः" । क्षणंक्षणमित्यत्र प्रतिक्षणमित्यर्थः ॥ २ ॥ **स्वस्ति** इत्येकं क्षेमे निरुपद्रवे । पुण्ये च स्यात् । कचित् स्वस्तिना इति पाठः । तत्र क्षेमे यथा–"स्वस्ति प्रजाभ्यः सततम्" स्वस्ति राज्ञे च मन्त्रिणे" इति । पुण्ये यथा–"स्वस्तिमान् स्वर्गमश्नुते" । तथा मङ्गले आशंसायाञ्च । मङ्गले यथा–"स्वस्ति श्रीभोजराजस्त्रिभुवनविजयी धार्मिकः सत्यवादी" आशंसा अप्राप्तस्य प्राप्तीच्छा, आशीर्वादो वा । तत्र यथा । "स्वस्ति ते भूयान्महीपते" इति "स्वस्ति स्यान्मङ्गले पुण्येऽप्याशंसायामपि कचित्" इति मेदिनी ॥ **अट्ट** इत्येकम् उच्चैरर्थे अत्युच्चतरे । कीर्तितं कथितम् । यथा–"स्फुटमट्टहासमिव सौधपङ्क्तयः । एवमट्टालिका इति । **वारंवारं वारं वारेण** इति निपातत्रयं शश्वदर्थे नैरन्तर्यार्थे । पुनःपुनरित्यर्थे च । इष्यते काम्यते । शाब्दिकैरिति अनुसन्धेयः । शश्वदर्थे यथा–"वारंवारं शशिन्यपगते" "वारं दत्त्वा दिवं ययौ" । "वारेणासौ जगति विलसत् कीर्तिपीयूषसिन्धुः" इति ॥ ३ ॥ **उताहो यदिवा यद्वा किं वा न** इति षडिमे निपाताः । समाः विकल्पार्थे सदृशा इत्यर्थः । तेषां क्रमेणोदाहरणानि । उताहो शब्दस्य यथा उताहो ब्रह्म चोच्यते" "उताहो घटादिवत् स्वत उत्पद्यन्ताम्" इति । तथा उतशब्दोऽपि विकल्पे । यथा–"स्वविकल्पसम्भूता नरकाः उत स्वभावसम्भूताः" । "एको धर्मः सत्त्वस्थितये यदुत चत्वार आहाराः" । "एतद्धि भिक्षवः परमं सत्यं यदुताऽमोघधर्मो निर्वाणः" । केचित्तु उतशब्दः अवधारणेऽपि भवतीति पठन्ति । यदिवा शब्दो यथा–"भये वा यदिवा हर्षे सम्प्राप्ते यो विमर्शयेत्" । "स गन्ता संस्तावन् न गतीः प्राप्नोति यदिवा न करोति" । "यदि लक्ष्यं यदिवा लक्षणम्" । "पिता वा यदिवा भ्राता पुत्रो वा यदिवा सुहृत्" । "सन्धाय युवराजेन यदिवा मुख्यमन्त्रिणा" इति ॥ यद्वाशब्दो यथा–"यद्वा गङ्गायां घोष इतिवत्" । यद्वा समाहारद्वन्द्वः" । "यद्वा मीयतेऽनेनेति मानम्" इति । अयं यद्वाशब्दो शब्दकौस्तुभतत्त्वबोधिनीकुमारसम्भवटीकासु च नूतनकाव्यादिषु च मया दृष्टः । महाकाव्यादिषु न दृष्टः । वराहमिहिरकृतायां बृहत्संहितायामपि दृष्टः । नूतनकाव्यादिषु प्रायो यद्वा तद्वा इति एतौ द्वौ निपातौ दृष्टौ । केचित्त्वेतौ यत्तच्छब्दाभ्यां परं विकल्पार्थवाचिनो वाशब्दस्य प्रयोगौ इति विकल्पार्थवाचिनौ यद्वातद्वाशब्दौ इति च पठन्ति । यथा– "यद्वा तद्वा वदन्तश्चटुलखुरखरीपृष्ठमारोहयन्तः" इति । "यद्वा तद्वा विषमपतितं साधु वा गर्हितं वा" इति । "यद्वा मया कुकृतमल्पमिहाकृतं वा" इति । किं शब्दो यथा–

अस्त्याह कालसामान्ये तिङन्तप्रतिरूपकम् ।
सज्जं सहार्थे नेत्याह निषेधे यदि शेषगीः ॥ ५ ॥

"बिभर्ति किं परिम्लानरक्तोत्पलवनश्रियम्"। तत्प्रभावोपमादाय किं स्वसत्यं वदाम्यहम्"। गर्भस्थितमपत्यं यत् किं रूपं तद्भविष्यति"। किमपि काम्यगिरा परपुष्टया"। "किमिव न शक्तिपरं ससाध्वसानाम्"। "किमपि रसेन रसान्तरं भवन्ति"। किमपीत्यनिर्वाच्यम्। तच्चेह किलकिञ्चिताख्यं विवक्षितमपरैः"। तथा किन्तर्हीति अन्यपदसंयुक्तनिपातोऽपि दृश्यते। यथा। "किन्तर्हि अस्मिन् सतीदं भवति"। "किन्तर्हि स्वप्रसिद्धेनाऽपि"। तथा किंशब्दो सन्देहार्थे च दृश्यते। यथा—"किमलम्बताम्बरविलग्नमधः। किमवर्धतोर्ध्वमवनीतलतः"। वक्तव्यार्थे किञ्चार्थे च किमुकिमुतशब्दौ स्याताम्। "लीलाभिः किमु सति कारणे रमण्यः"। "किमु चोदिताः प्रियहितार्थकृतः"। "चिरमपि ताः किमुत प्रयासभाजः"। "किं वितर्के परिप्रश्ने क्षेपनिन्दाप्रकारयोः" इति विश्वः। वा शब्दो यथा—"जयो भवति पराजयो वा"। "शिवं वा यदि वा विष्णुम्"। "प्रविशेन्मुखमाहेयं दुस्तरं वा महार्णवम्"। "एकं हन्यान्न वा हन्यात्"। "दिवा वा यदि वा रात्रौ" इति। "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चय" इति विश्वः। नशब्दो यथा। "नच सर्वमस्मि न वा नास्ति पुनः"। "कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः"। अत्र नकारो विकल्पार्थे स्यात्। न निषेधार्थे **अपितु** शब्दः किन्त्वर्थे किञ्चशब्दार्थे। स्यादित्यन्वयः। यथा। "अपितु धर्मा एव शून्याः"। "अपितु धर्मा एवानिमित्ताः"। "तत् किं मन्यसे काश्यप! अपितु स पुरुषः"। केवलं तु विरहितः अपिशब्दः प्रश्ने कच्चिदर्थे च दृश्यते। प्रश्ने यथा—"अपि क्रियार्थं सुलभं समित्कुशम्"। "अपि स्वशक्त्या तपसि प्रवर्तसे"। अत्र देहमपीडयित्वा तपश्चरसि कच्चिदित्यर्थः॥ **सचेत** शब्दो यद्यर्थे पक्षान्तरार्थे। प्रोक्तः कथित इत्यर्थः। यथा—"सचेत्ते कल्पजानीयः यथा जानाति नायकः"। "सचेत् कुलपुत्र! निर्वाणादप्यधिरूढो नान्यो धर्मोऽभविष्यत्"। अत्र सचेत् शब्दः चेत्यदिशब्दवत् पक्षान्तरार्थद्योतकः॥ **प्राक्** इति अव्ययमादिवाचकम्। यथा—"धर्मः प्रागेव चिन्त्यः"। प्रपेदिरे प्राक्तनजन्मविद्याः" इति। "प्राक् पूर्वस्मिन्नवान्तरे। अग्रे प्रभातेऽतीते च देशे दिक्कालयोरपि" इति मेदिनी ॥ ४ ॥ कालसामान्ये कालभूते सादृश्यप्रयोजकधर्मे च। **अस्ति आह** इति द्वौ निपातौ स्याताम्। तौ चात्र तिङन्तप्रतिरूपकं क्रियापदस्वरूपं भजतः। काले यथा—"अस्ति नास्ति न जानाति"। "अस्ति न स्तुतिवचोऽनृतन्तत्र"। पूर्वमानन्दार्थे अस्त्विति निपातो दर्शितः। तथा अनुज्ञायाम। अङ्गीकारे च। अस्त्वित्यव्ययं निपातोऽपि स्यादेव। यथा—"अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम्"। "अस्तु नाप्यनुमानप्रवेशः"। "अस्त्वेवं पृथिव्याः स्वलक्षणम्" इति। आहनिपातः सामान्ये भवति। यथा—"अथाह वर्णी विदितो महेश्वरः" इति। सहार्थे सहशब्दस्यार्थे। **सज्जम्** इति निपातः स्यात्। यथा—"ओ सृष्टायैवाज्ञा नरपतिना सज्जम् एव कृत्वा तत्र सकुशलं राजानमुपेत्य इदमावहः"

विभाषान्यतरस्यां वा विकल्पार्थाः प्रकीर्त्तिताः ।
ते इति स्यात्त्वयेत्यर्थे मयेत्यर्थे च मे इति ॥ ६ ॥
इत्यव्ययवर्गः ।

इति । महावस्तु । कचित्सजुः "सजूः" इति । "सजुः कृत्यरतिं वसेत्" इति भट्टिः । राज्ञा सहेत्यर्थः।तस्मिन् सहार्थे सह सार्द्धम् समम् साकमित्येषामपि प्रयोगाश्च दृश्यन्ते । यथा—'कल्पद्रुमैः सह विचित्रफलैर्विरेजुः" । "सह मेघेन तडित् प्रलीयते"। "यतिभिः सार्द्धमनग्निमग्निचित्" । "ततः पौरजनैः सार्द्धं सामात्यः पृथिवीपतिः" । "बकुलैरर्धचितां समं मया" । "रणेन कड्वाम्रिदशैः समं पुनः" । "ताभ्यां शाकं चन्द्रमुखी चन्द्रशेखरमार्चयत्" इत्यादि । निषेधे निवृत्तौ, प्रतिषेधे वा । **न** इति निपातम् । आह उवाचेत्यर्थः । यथा । "न पादपोन्मूलन-शक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य" । "न खलु दूरगतोऽप्यतिवर्त्तते" । "न महता महताः कचनारयः" इत्यादि । तथा माशब्दोऽपि निषेधे वर्त्तते। यथा—"अनृतगिरं गुणगौरि ! मा कृथा माम्" । "द्रुतपदमिति मा वयस्य यासीः"। "अवितथा वितथा सखि ! मा गिरः" इत्यादि । **यदि** इति निपातः शेषगीः अवशेषवाक्यम् । पक्षान्तरञ्च भवति । यथा—"यदि सन्धित्सुरसौ सहामुना"। "यदि सन्धत्स्व पुरा न नश्यति"। "रेवां यदि प्रेक्षितुमस्ति कामः" । "लज्जा तिरश्चां यदि चेतसि स्यात्" "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः"इत्यादि । तथा—चेत्शब्दोऽपि पक्षान्तरार्थे वर्त्तते । यथा । "अनेन चेदिच्छसि गृह्यमाणम्" । "न चेदिदं द्वन्द्वमयोजयिष्यत्" । "स चेत् स्वयं कर्मसु धर्मचारिणाम्" । "सा तृष्णा चेत्परित्यक्ता को दरिद्रः क ईश्वरः । तस्याश्चेत् प्रसरो दत्तो दास्यञ्च शिरसि स्थितम्" इत्यादि । अत्र सर्वत्र चेत्शब्देन पक्षान्तरार्थवाचित्वमेवावगम्यते ॥ ९ ॥ **विभाषा । अन्यतरस्याम् । वा** इति त्रयं विकल्पार्था इति प्रकीर्त्तिताः । निरुक्तिवेदिभिरित्यन्वयः । तेषां क्रमेणोदाहरणानि। यथा—"विभाषा समीपे" एवंरूपो नियमो वा स्यादित्यर्थः । "युष्मदस्मदोरन्यतरस्यां खञ्च" युवयोर्युष्माकं वा अयं युष्मदीयः अस्मदीय इत्यर्थः । "समर्थानाम्प्रथमाद्वा" । समर्थानां मध्ये सूत्रे प्रथमोपात्तात्प्रत्ययो वेदितव्यः । स च वेत्यर्थः । एषु च सर्वेषु पाणिनीयसूत्रेषु विभाषा अन्यतरस्यां वेति त्रयो निपाताः विकल्पार्थवाचका एव स्युः। एते निपाताः भूयिष्ठं पाणिन्यादिसूत्रेष्वेव दृश्यन्ते नाऽन्यत्र । तथा । "अन्यो न प्राप्स्यते प्राप्तो न द्रक्षत्यदहन्पुनः । न निर्वास्यत्यनिर्वाणः स्थास्यते वा स्वलिङ्गवान्" इति माध्यमिकाः । तद्वृत्तिकारेणाऽपि अत्र वा शब्दः अवधारणे द्रष्टव्यो विकल्पार्थो वा स्वलिङ्गे वेत्युक्तः । नैवाग्निः स्थास्यति यदि वा नास्त्यन्यस्त्वयमग्नेरिन्धमादि इति समुच्चये वा अन्यो न प्राप्स्यति न द्रक्ष्यति न च निर्वास्यति स्वलिङ्गावाश्च स्थास्यति । तस्मादयुक्तमिन्धनादन्यस्त्वमग्नेरिति च दर्शितम् । अत एक एव वाशब्दः एकत्र अवधारणे विकल्पार्थे समुच्चये च भवितव्य इति केषाञ्चिद्विदुषां मतम् । ततस्तदूहनीयं विचारणबुद्धिशालिभिः सद्भिः । अत्र द्रक्ष्यतीति पाठः कचित् धक्ष्यति पक्ष्यतीति विशेषतया दृश्यते । सोऽपि अपाठ एवेत्यव-

लिङ्गादिसङ्ग्रहेऽनुक्तममरेणाऽभिदध्महे ।
स्त्रियामाजिर्दरज्जातिः पूरुभाद्राः समाः शरत् ।
सिकताद्या बहुत्वेऽपि विंशत्याद्येकवागपि ॥ १ ॥

गन्तव्यः । **ते** इति निपातः त्वया इत्यर्थे युष्मच्छब्दस्य कर्तृविभक्त्यर्थे च । **मे** इति निपातो मया इत्यर्थे अस्मच्छब्दस्य कर्तृविभक्त्यर्थे च स्यात् । क्रमेणोदाहरणानि यथा—"विचित्रं ते कृतं तात । सतां वर्त्मनि वर्तिना" । "अर्चितास्ते महर्षयः" । अत्र ते इति त्वयेत्यर्थः ।"विलक्ष्य वाणी न कदापि मे श्रुता" । "विदितं तप्यमानञ्च तेन मे भुवनत्रयम्" । अत्र मे इति मया इत्यर्थः । अत्र सर्वत्र कर्तरि षष्ठी स्यात् । तथा युष्मदस्मदोः षष्ठीचतुर्थ्येकवचनयोस्ते मे इति द्वे रूपे स्याताम् । तत्र सम्बन्धार्थे यथा—"योगप्रभावो नच लक्ष्यते ते" । अत्र तवेत्यर्थः । "त्वयि मे भावनिबन्धनारतिम्" मे इति ममेत्यर्थः । सम्प्रदानार्थे यथा । "प्रीतोस्मि ते सौम्य चिराय जीव" । अत्र ते इति तुभ्यमित्यर्थः । "ब्रूषे किमोमिति सखे! कथयाशु तन्मे" । मे इति मह्यमित्यर्थः । सम्बन्धार्थवाचिनोस्तेमेशब्दयोरेकत्र प्रयोगोऽपि दृश्यते । यथा । "यामः सुन्दरि ! याहि पान्थ ! दयिते ! शोकं वृथा मा कृथा । शोकस्ते गमने कुतो ? मम ततो बाष्पं कथं मुञ्चसि । शीघ्रं न व्रजसीति ? मां गमयितुं कस्मादियं ते त्वरा ? । भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे सम्भ्रमः" इति।इत्थं स्वरादीनां निपातानां भूरिप्रयोगा महाकाव्यादिषु दृश्यन्ते । तेषां विस्तरस्तु अमरकोषे च अमरविवेकाख्यायां तट्टीकायाञ्च तथा महाभाष्यसिद्धान्तकौमुद्यादिषु च अन्येषु मनोरमातत्त्वबोधिन्यादिषु च प्रायो दर्शितः । अतो नात्रान्यद्वक्तव्यमस्ति । ततस्तत्रानुक्तानां केषाञ्चिन्निपातानां विशेषो दिङ्मात्रमिह दर्शितः । अथाप्युक्तम् । "उपसर्गा निपाताश्च प्रत्ययाश्चापि ते त्रयः । नैके नैकार्थविषया इति नैरुक्तिका विदुः" इति ॥ ६ ॥ इति अव्ययवर्गः समाप्तः ॥ ४ ॥ अथ लिङ्गादिसङ्ग्रहवर्गमाह ॥ अमरेण आचार्यामरसिंहेन । स्वकृते अमरकोषाभिधे अभिधानशास्त्रे लिङ्गादिसङ्ग्रहे तन्नामके काण्डे । अनुक्तं प्रकृतिप्रत्ययादिविभागपरिदर्शनेन यानि नामानि अनुक्तानि अकथितानि । तानि च नामानि। अत्र त्रिकाण्डशेषकोषे । अभिदध्महे कथयाम इति । अत्र अनुक्तमिति जात्योपेक्षावशादेकवचनमङ्गीकृतम् । अयं त्रिकाण्डशेषस्तु प्रायेण पूर्वमनुक्तैरेव शब्दजातैः सङ्गृह्यत इत्यर्थः । अस्मिंस्तु सङ्ग्रहवर्गे लिङ्गमपि समुन्नेयम् । तत् कथमित्याकांक्षायां सति यथा सङ्कीर्णवर्गे प्रकृतिप्रत्ययादिभिर्लिङ्गमुन्नयेत् तथात्राप्युन्नयेदिति भावः । यद्यपि तेषु तेषु वर्गेषु तेषां तेषां नाम्नां कथनावसर एव पूर्वं लिङ्गमुक्तं ननु । तथाऽप्यत्र अप्राप्तानां प्रापणार्थं लिङ्गानुशासनमवश्यं कार्यम् । तद्धि प्राधान्यमेव प्रयोजनम् । अतोऽत्रातिविस्तरं तत्सर्वं दर्शयितव्यम् । अथापि प्रागुक्तानां सविशेषाणां पुनः कथनात् पुनरुक्तिदोषप्रसङ्गाद्ग्रन्थविस्तरभयाच्च तदप्यत्र पुनर्नाभिधीयते । ततस्तदभिज्ञातुमिच्छद्भिर्विद्यार्थिभिः अमरविवेके श्रीमता महेश्वरशर्मणा याथार्थ्यतः सोदाहरणक्रमेण प्रपञ्चितम् । तत्तत्रोक्तानुसारेणैवावगन्तव्यम् । अत्रायमाचार्यः पुरुषोत्तमदेवः स्त्रीलिङ्गानुशासनप्रारम्भे स्त्रिया-

पुंस्त्वे हाहाँ हूहूँ-ग्रन्थिः पाणिः कलिर्दतिर्मौलि ।
अञ्जलिरङ्घ्रिः कुक्षिर्लीवकलोकोत्तरासङ्गाः ॥ २ ॥

माजिरित्यादिमाह । अत्र स्त्रियामित्ययमधिकारः शरच्छब्दपर्यन्तं ज्ञेयः । आज्यादिशरत्पर्यन्तानां यदभिधानं तत् स्त्रियां स्यात् । यथा—**आजिः** रणभूमिः । "अथाजिः स्त्री समभूमौ च संग्रामे इति मेदिनी । "समे क्ष्मांशे रणेऽप्याजिः" इत्यमरः ॥ **दरद्** प्रपातः । "दरद् स्त्रियां प्रपातेऽपि भय-पर्वतयोरपि" इति मेदिनी । दरत् म्लेच्छजातिर्वा । **जातिः** जन्म । "जातिः स्त्री गोत्रजन्म-नोः" इति मेदिनी । पूः पुरी । क्वचित् पूः पुरौ इति रेफान्तः पूः शब्दः । "पूः स्त्री पुरी नगर्य्यौ वा" इत्यमरात् । **उरूः** महती । "विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् । वड्रोरु विपुलम्" इत्यमरः । **भाः** दीप्तिः । "भाःप्रभावे मयूखे स्त्री" इति मेदिनी । **द्वाः** गृहादि-निर्गमनस्थानम् । "स्त्री द्वार्द्वारं प्रतीहार" इत्यमरः । क्वचित्तु पुरुद्वाषाः इति पाठः । **समाः** वत्सरः । अमरकृताप्यस्य नित्यबहुवचनान्तता अङ्गीकृता । पाणिनिना तु—"समां समां विजायते" इति सूत्रे एकवचनान्तता निर्दिष्टा । समां समाम् इत्यत्र कालाधारे द्वितीया । प्रतिवर्षं विजातायां गवीत्यर्थः । "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यमरः । "समा संवत्सरे स्त्रियाम्" इति मेदिनी ॥ **शरत्** संवत्सरः । आश्विनकार्त्तिकमासात्मकः ऋतुर्वा । शरदिति तवर्गतृतीयान्तश्च । "शरद् स्त्री वत्सरेऽप्यृतौ" इति मेदिनी ॥ **सिकताः** वालुकाः । "सिकताः स्युर्वालुकापि" इत्यमरः । "सिकता स्त्री सिकतिले वालुकायान्तु भूमनि" इति मेदिनी । आदिपदात् आपः जलानि । लाजाः भर्जितव्रीहयः । पुँल्लिङ्गत्वम-प्यत्र । अक्षताः क्षतरहिताः । "अक्षता यवा" इति पुराणम् । तथा टाबंतो दाराशब्दोऽपि । "क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनी-षिभिः" इति । हेमचन्द्रात् एकैकस्याभिधानं स्त्रीबहुत्वविधानार्थम् । बहुत्वेऽपि स्त्रीलिङ्ग-बहुवचनञ्च स्यात् । "लाजः स्यादार्द्रतण्डुले नपुंसकमुशीरेऽथ स्त्रियां पुं भूम्नि वाक्षताः" इति मेदिनी । अक्षतं न द्वयोः पण्डे लाजेषु त्रिष्वहिंसिते । यवेऽपि क्वचित्" इति मेदिनी ॥ **विंशतिः** द्विदशकसङ्ख्या । आदिपदात् । एकविंशतिः द्वाविंशतिः । तथा त्रिंशत् त्रिदश-सङ्ख्या । चत्वारिंशत् चतुर्दशसङ्ख्या । पञ्चाशत् पञ्चदशसङ्ख्या । षष्टि षड्दशसङ्ख्या । सप्तति: सप्तदशसङ्ख्या । अशीतिः अष्टादशसङ्ख्या । नवति नवदशसङ्ख्या च । बहुत्वा-भिधानं त्वेकत्वविधानार्थम् । **एकवाग**पि स्त्रीलिङ्गैकवचनम्भवेदित्यर्थः ॥ १ ॥ इति स्त्रीलिङ्ग-सङ्ग्रहः समाप्तः ॥ अथ पुँल्लिङ्गसङ्ग्रहमाह ॥ पुंस्त्वे पुँल्लिङ्गे । स्यादित्यन्वयः । अयन्तु पुँल्लिङ्गपर्यन्तमधिकारः । **हाहाः** गन्धर्वभेदः । देवानां गायकः ॥ **हूहू**र्गन्धर्वविशेष एव । "हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्" इत्यमरः । "हाहाः सान्तोऽपि गन्धर्वो हाहसि प्रोक्त" इति रत्नकोषः । अत्र हहा इत्यादि ह्रस्वः हुहुः इत्युभयह्रस्वश्च दृश्यते । "गीत-माधुर्यसम्पन्नौ विख्यातौ च हहाहुहू" इति व्यासोक्तेः ॥ **ग्रन्थिः** वंशादिसन्धौ ख्यातः कौटिल्यः । "ग्रन्थग्रन्थिरिह क्वचित्" इति नैषधम् ॥ **पाणिः** करः । "पञ्चशाखः

अवटव्रातसङ्केतपोतगर्तगरुच्छदाः ।
श्लेष्मोष्मपापयक्ष्माश्मात्मानो वातायनः स्तनः ॥ ३ ॥
फेणाभिजनकलापनिकाया हारोच्चारोपलकल्लोलाः ।
फालचषालकीलनलतण्डुलशैवलखलविभवप्रसवाश्च ॥ ४ ॥

शयः पाणिः" इत्यमरः ॥ **कलिः** विभीतकवृक्षः । कलिः कलहश्च । "कलिः स्त्री कलिकायां ना सराजिकलहे युगे" इति मेदिनी । शूरादिकलहे इति पाठान्तरम् ॥ **दृतिः** चर्मनिर्मितोदकपात्रं चर्मपुटको वा । "दृतिश्चर्मपुटे ना" इति मेदिनी ॥ **मौलिः** चूडा किरीटो वा । "मौलिः किरीटे धम्मिले चूडायामनपुंसकम् । नाऽशोकद्रौ स्त्रियां भूमौ" इति तु मेदिनी ॥ **अञ्जलिः** संयुतकरपुटः। "अञ्जलिस्तु पुमान् हस्तसम्पुटे कुडवेऽपि च" इति मेदिनी ॥ **अङ्घ्रिः** चरणम् ॥ **कुक्षिः** उदरम् । **लावकः** पक्षिभेदः । क्वचित् मारक इति पाठः । **लोकोत्तरः** । लोकादुद्गतः । अत्युत्तमः । सर्वक्लेशापगत इत्यर्थः । **असङ्गः** सङ्गरहितः ॥ २ ॥ **अवटः** गर्त्तः कूपो वा । क्वचित् "यवक" इति पाठः । क्वचित्तु स्यान्मौनो इति पाठः । **व्रातः** समूहः । क्वचित् वात इति पाठः ॥ **सङ्केतः** मनोगतभावव्यञ्जनाय कृतः हस्तादिचालनरूपो व्यापारः । **पोतः** बालकः, नौकारूपं यानं वा । "यानपात्रे शिशौ पोत" इत्यमरः । "पोतः शिशौ वहित्रे च गृहस्थाने च वाससि" इति मेदिनी ॥ **गर्त्तः** भूमिच्छिद्रः, रोगभेदो वा । **गरुत्** खगानां नभोगतिहेतुपक्षः ॥ **छदः** पत्रम्, पक्षिण पक्षो वा । "छदः पलाशे गरुति ग्रन्थिपर्णतमालयोः" इति मेदिनी ॥ **श्लेष्मा** कफः । **उष्मा** निदाघः, ग्रीष्मऋतुश्च । ऊष्माशब्दोऽप्यत्र । **पापः** दुरदृष्टः, दुराचारश्च । **यक्ष्मा** रोगभेदः ॥ **अश्म** पाषाणः ॥ **आत्मा** स्वरूपः, देहः, चित्तञ्च । "आत्मा पुंसि स्वभावे च प्रयत्नमवसोरपि" इति मेदिनी । **वातायनः** गवाक्षः, अश्वाश्च ॥ **स्तनः** स्त्रीणामङ्गभेदः, कुचश्च ॥ ३ ॥ फेणः दुग्धजलादेरुपर्युपरिस्थो बुद्बुदाकारः पदार्थः । पृषोदरादित्वान्मतान्तरे णत्वम् । "हंसश्रेण्यो नदीतीरे निनदैः सम्प्रतीविरे । यथा सारस्वता मन्त्रा अन्तरे फेणसङ्गताः" इत्युक्तेः । हिमश्च । फेन इति दन्त्यनकारयुक्तोऽप्यत्र । **अभिजनः** कुलम् । जन्मभूमिश्च । "अभिजनः कुले ख्यातो जन्मभूम्यां कुलध्वजे" इति विश्वः । **कलापः** समूहः, मयूरपिच्छो वा । "कलापः संहतौ बर्हे काञ्च्यां भूषणतूणयोः" इति मेदिनी । **निकायः** समानधर्मप्राणिसमूहः, निवासश्च । "निकायस्तु पुमान् लक्ष्ये सधर्मिप्राणिसंहतौ" इति मेदिनी ॥ **आहारः** द्रव्यमात्रस्य गलान्तःकरणरूपं भोजनम् । "आहारः स्यादाहरणे भोजने च पुमानयम्" इति मेदिनी ॥ **उच्चारः** उच्चारणम् । विष्ठा च । "उच्चारावस्करौ शमलं शकृत्" इत्यमरः । उपलः प्रस्तरः । "उपलः प्रस्तरे रत्ने शर्करायान्तु योषिति" इति मेदिनी । **कल्लोलः** महातरङ्गः । "कल्लोलः पुंसि हर्षे स्यादुल्लोलवैरिणोरपि" इति मेदिनी ॥ **फालः** बलदेवः, महादेवश्च, जम्भीरबीजादिर्वा । "फालः पुंसि महादेवे कालिन्दीभेदनेऽपि च" इति मेदिनी ।

आनापजननाडीभ्यो युगमङ्गं पदं व्रणम् ।
अनक्षे दुन्दुभिरथ बहुत्वेऽप्यसवो ग्रहाः ।
सक्तवो वल्कजालाजा दाराः प्राणा दशा इति ॥ ५ ॥

फालः लाङ्गलस्याधःस्थितं काष्ठम् । यस्याग्रलोहेन प्रबध्यते तंदुपरिवर्ती लोहो वा "निरीशं कुटकं फालः कृषको (कुषको) लाङ्गलं हलम्" इत्यमरः । **चषालः** यज्ञीयपशुबन्धनार्थं यूपमध्ये देयः वलयाकारः काष्ठमयो वा लौहमयो वा पदार्थश्च । **कीलः** शङ्कुः कफोणिर्वा । कीलः कफोणौ निर्घाते शङ्कौ ज्वाले तु कीलवत्" इति विश्वः ॥ **नलः** तृणभेदः नृपभेदश्च । "नलः पोटगले राज्ञि पितृदेवे कपीश्वरे" इति मेदिनी॥**तण्डुलः** धान्यादिसारः निस्तुषःधान्यादिः, विडङ्गो वा । "तण्डुलः स्याद्विडङ्गे च धान्यादिनिकरे पुमान्" इति मेदिनी॥**शैवलः** पद्मकाष्ठम्, जलजातः पदार्थविशेषश्च । "शैवलः पद्मकाष्ठे स्यात् शैवालेऽपि पुमानयम्" इति मेदिनी । **खलः** क्रूरः, नीचः, अधमश्च । "खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु" इति मेदिनी ॥ **विभवः** ऐश्वर्यः । धनं मोक्षश्च । षष्टिसंवत्सरमध्ये वत्सरविशेषः । "हृष्टाः पुष्टाः जनाः सर्वे विभवेऽब्दे वरानने" इति ॥ **प्रसवः** गर्भमोचनम् । उत्पत्तिश्च । "उदश्चराचरं विश्वं प्रसवस्तस्य गीयते" इति कुमारः । "प्रसवो गर्भमोचने । उत्पादे स्यादपत्येऽपि फले च कुसुमेऽपि च" इति मेदिनी ॥ क्वचित्तु प्रभव इति पाठः ॥ ४ ॥ आनश्च अपश्च जनश्च नाडी चेति द्वन्द्वः तेभ्यः आनापजननाडीशब्देभ्यः परे युगम् । अङ्गं पदं व्रणम् इति इमे शब्दाः पुँल्लिङ्गे स्युरेवेत्यर्थः ॥ यथा-**आनयुगः** नासिकापुटः । आन इति ख्यातस्य अन्तःस्थितस्य प्राणवायोर्नासिकयोच्छ्वासः । **अपाङ्गः** नेत्रप्रान्तः । अङ्गहीनश्च, तिलको वा । "अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च" इति मेदिनी ॥ **जनपदः** देशः । "भवेज्जनपदो जानपदोऽपि जनदेशयोः" इति विश्वमेदिन्यौ ॥ **नाडीव्रणः** यो व्रणः सदा गलति स तु नाडीव्रणः देहस्थः शिरायुक्तो व्रणविशेषः । "नाडीव्रणः पुमान्" इत्यमरः । नाडीव्रग इत्यपि पाठः । क्वचित् अनोपजननाडीभ्य इति च पाठः ॥ अनक्षे चक्षशून्ये चक्षुरादीन्द्रियशून्ये च । क्वचित् आनन्दे इति पाठः ॥ **दुन्दुभिः** । यथा प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि" इति । "दुन्दुभिः पुमान् । वरुणे दैत्यभेर्योश्च स्त्र्यक्षबिन्दुत्रिकद्वये" इति मेदिनी । इमे शब्दा अपि पुँल्लिङ्गे स्युरिति पूर्वेणान्वयः । अथ पुँल्लिङ्गैकवचनानन्तरं नियतपुंल्लिङ्गबहुवचनान्तशब्दानाह ॥ **असवः** पञ्चवृत्तयो वायुभेदः । "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः । **ग्रहाः** सूर्यादयो नवग्रहाः । तथा "सम्भाव्यते ग्रह" इति ज्योतिषम् । पूतनादयश्च । "ग्रहो निग्रहनिर्बन्धग्रहणेषु रणोद्यमे। सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः" इति विश्वः ॥ **सक्तवः** भ्रष्टयवादिचूर्णाः । "मघादौ सक्तवो देयाः" इति स्मृतिः ॥ **वल्कजाः** वृक्षत्वक्कृताः वस्त्रविशेषाः । क्वचित्तु वल्वजाः वल्जाः वल्चाः इति च पाठाः दृश्यन्ते ॥ **लाजाः** भ्रष्टधान्यानि । "लाजः स्यादार्द्रतण्डुले । नपुंसकमुषिरे च स्त्रियां पुंभूम्नि वाक्षते" इति मेदिनी ॥ **दाराः** पत्नी । सा हि पत्युः भ्रातृस्नेहं भिनत्तीति लोकप्रसिद्धम् । पत्नी पाणिगृहीती द्वितीया सहधर्मिणी भार्या जाया दाराः इति

क्लीबे कलत्रविषबीजकुटुम्बरत्नतल्पोक्थकुङ्कुमप्रवीणतृणाक्षराणि ॥
शृङ्गाट्टपीठगृहभेषजपृष्ठकिण्वदैवाण्डभाण्डचिबुकोडुपसाहसानि ॥८॥

सप्त परिणीतायाः स्त्रियाः। तासु दाराशब्दो नित्यं पुंसि बहुवचनान्तश्च ॥ प्राणाः पञ्चवृत्तयो देहस्थवायुभेदाः। इन्द्रियाणि च। "प्राणो हृन्मारुते बोले काव्यजीवेऽनिले बले। पुँल्लिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चात्मसु" इति मेदिनी ॥ **दशाः** अवस्थाः, दीपवर्त्ती च। "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरता मणिदीपा इवोत्तमाः" इत्युद्भटः। "दशावस्थादीपवर्त्योर्वस्त्रान्ते भूम्नि योषिति" इति मेदिनी ॥ अनेकविधबाल्यादिरूपा दशा। वस्त्रान्तेऽपि दशा स्त्रियां बहुत्वे। "दशावर्तावत्रस्थायां वस्त्रान्ते स्युर्दशा अपि" इति। अत्र इतिशब्दो धर्ममाचरेदित्यादाविव परिसमाप्तौ। यथा—"इति स्वरूपे सान्निध्ये विवक्षानियमेऽपि च। हेतौ प्रकारप्रत्यक्षप्रकर्षेष्ववधारणे। एवमर्थे समाप्तौ स्यात्" इति हैमः ॥ इमे शब्दाः बहुत्वे पुँल्लिङ्गबहुवचने। स्युरित्यन्वयः। नन्विमे शब्दा एव पुंसि बहुवचनान्ताः। अन्ये जनपदवाचिनः शब्दा अपि बहुवचनान्तत्वेनैव निर्दिष्टाः। ग्रन्थविस्तरभिया नात्र ते निर्दिष्टाः ॥९॥ पुँल्लिङ्गसङ्ग्रहः समाप्तः ॥ अथ नपुंसकलिङ्गसङ्ग्रहमाह॥ **कलत्रं** नितम्बम्, भार्या च। "कलत्रं श्रोणिभार्ययोः" इति अमरमेदिन्यौ। "दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः" इति रभसः ॥ **विषं** जलम्। पद्मकेशरं मृणालं गन्धरसः वत्सनाभश्च। "विषं जलेऽतिविषायाम्" इति मेदिनी ॥ **बीजं** धान्यादेः फलादि ॥ अङ्कुरं शुक्रम्। अव्यक्तगणितभेदः तत्त्वावधानं मन्त्रभेदश्च। "बीजमङ्कुरकारणे। हेतुतत्त्वावधानशुक्रे" इति मेदिनी॥ **कुटुम्बं** पोष्यवर्गः। बान्धवः सन्ततिः। द्वितीयगृहश्च। क्वचित् "कटस्त्र" इति पाठः। तत्र कटं नडादिरचितमासनम्। अतिशयः कालः। तृणश्च। शानश्च। "कटं श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शरे। समये गजगण्डे च पिप्पल्यां तु कटी मता" इति मेदिनी ॥ स्वयं धनम्, आत्मा च। "स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धने स्त्रियाम्" इति मेदिनी ॥ "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धने" इत्यमरः। **रत्नं** माणिक्यादिप्रस्तरम्। स्वस्वजातिषु श्रेष्ठम्। हीरकश्च। "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इति मेदिनी ॥ **तल्पं** शय्या। अट्टालिका दाराश्च। "तल्पमट्टे कलत्रे च शयनीये च न द्वयोः" इति मेदिनी ॥ **उक्थं** नवविधात्मकसाम्नोऽवयवभेदः। महाव्रताख्यो यज्ञः। सामवेदस्याङ्गम्। प्राणाश्च। क्वचित् अक्तम् उक्तमिति च पाठौ। तत्र अक्तं कृताञ्जनम्। परिमितं सङ्कुचश्च। उक्तम् एकाक्षरपादकश्छन्दोभेदः। "उक्तमेकाक्षरश्छन्दसि" इति मेदिनी ॥ **कुङ्कुमं** काश्मीरदेशजं स्वनामाख्यातं गन्धद्रव्यम्। "सङ्कोचे मीनभेदे च बन्धे क्लीबन्तु कुङ्कुमम्" इति विश्वमेदिन्यौ ॥ "रक्तं नील्यादिरञ्जिते कुङ्कुम" इति हैमः॥ **प्रवीणं** निपुणम्। "प्रवीणो निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः। क्वचित् पुरीतप्रवीड इति च पाठौ। **तृणं** नडादि। खटश्च। "तृणमर्जुनम्" इत्यमरः। क्वचित् द्रण इति पाठः। **अक्षरं** नाशशून्यम्। मोक्षं ब्रह्म च। "अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोः।

यकृत्कुहकसिध्मानि तीरं कशिपु जानु च ।
धामार्द्धसारमित्राण्यङ्गदलन्याथबन्धुषु ॥ ७ ॥

गगने धर्मतपसोरम्बरे मूलकारणे'' इति हैमः ॥ शृङ्गाटः फलकण्टको जलवृक्षः । तत्फलञ्च । **पीठं** व्रतोक्तमासनम् । आसनभेदश्च।''पीठमासनम्'' इत्यमरः । ''विष्टरः पीठमस्त्रियाम्'' इति चात्र । **गृहम्** इष्टकामृत्तिकादिरचितं गेहम् । कलत्रञ्च। न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते'' इति स्मृतिः । ''गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि'' इति मेदिनी ॥ क्वचित् गुद इति पाठः । **भेषजम्** औषधम् । ''भेषजौषधभैषज्यान्यगदोजायुरित्यपि'' इत्यमरः ॥ **पृष्ठं** तनोः पश्चाद्भागः । वेदप्रसिद्धः स्तोत्रभेदश्च । ''पृष्ठन्तु चरमं तनोः'' इत्यमरः । ''पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे'' इति मेदिनी ॥ **किण्वं** सुराबीजं द्रव्यम् । ''किण्वादिभ्यो मदशक्तिवत्'' इति साङ्ख्यसूत्रम् । तण्डुलादिद्रव्यकृतसुराबीजं वा । पापञ्च। ''किण्वं बीजे च सीधुनः । पापे क्लीबं नपुंसके षण्ढेऽन्यवदविक्रमे'' इति मेदिनी ॥ **दैवं** भाग्यम् । फलोन्मुखं शुभाशुभकर्म । ''प्राग्जन्मनि कृतं कर्म शुभं वा यदि वाऽशुभम् । दैवशब्देन निर्दिष्टमिह जन्मनि तद्बुधैः'' इति । पूर्वजन्मार्जितं कर्म । दक्षिणहस्ताङ्गुलीनामग्ररूपं देवतीर्थम् । मन्त्राणामनुग्राहकदेवताज्ञानम् । उत्पातज्ञानम् । विवाहभेदश्च । ''दैवं दिष्टं भागधेयं भाग्यं'' इत्यमरः । ''अङ्गुल्यग्रे तीर्थं दैवम्'' इत्यमरः । अङ्गुलीनामग्रे दैवं तीर्थं ज्ञेयमित्यर्थः । अतो दैवतीर्थेन तर्पयेदित्यत्राङ्गुल्यग्रेणेति बोध्यमिति परमतम् । **अण्डं** पुंसोऽण्डावयवः । पक्षिडिम्बः । वीर्यञ्च। ''अण्डं मुष्के च पेश्यां स्यात्'' इति मेदिनी ॥ क्वचित् अशुभ इति पाठः ॥ **भाण्डं** पात्रम् । तैलाद्याधारः भाजनम् । गृहभेदः । वणिजां मूलधनम् । ''ब्रह्माण्डभाण्डोदरे'' इति वीरचरितम् । ''भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः'' इति मेदिनी ॥ क्वचित् अशुचीति पाठः । **चिबुकम्** । अधराधोभागः । ''अधस्ताच्चिबुकम्'' इत्यमरः । क्वचित् 'बुक बुक' इति च पाठौ ॥ **उडुपः** प्लवः । क्षुद्रनौका च।उडपमप्यत्र । उडुपशब्देन चन्द्र उच्यते । उडूनि नक्षत्राणि पातीति विग्रहः। स हि ताराणां पतिरतो रक्षकः । पुँल्लिङ्गश्च । ''उडुपन्तु प्लवेऽस्त्रियाम् । चन्द्रे पुंसि'' इति मेदिनी ॥ **साहसं** बलेन कृतं चौर्यस्त्रीसङ्ग्रहादिदुष्टकर्म । ''सहसा क्रियते यत्तु तत्साहसमिति स्मृतम्'' इति तच्च पञ्चविधम् । ''मनुष्यमारणं स्तेयं परदारादिमर्दनम् । पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्'' इति स्मृतिः । सहसा अविवेचनेन कृतं कर्म, अविमृष्य कृतकर्म वा । स्मृत्युक्तः दण्डविशेषश्च । ''साशीतिपणसाहस्रो दण्ड उत्तम साहसः । तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः'' इति स्मृतिः । ''साहसन्तु बलात्कारकृतकार्ये दमेऽपि च'' इति मेदिनी ॥ ''साहसन्तु दमो दण्ड'' इत्यमरः ॥ ६ ॥ **यकृत्** कुक्षौ दक्षिणभागस्थं मांसपिण्डम् । तद्वृद्धरोगश्च । ''कालखण्डयकृति'' इत्यमरः ॥ **कुहकं** कृतपापप्रतिच्छादनलक्षणा माया, इन्द्रजालमाया वा । अन्यथा स्थितस्य वस्तुनोऽन्यथादर्शनमित्यर्थः ॥ **सिध्म** किलासरोगः । तद्रोगवांश्च । ''किलासिसिध्मे'' इत्यमरः ॥ **तीरं** नद्यादेः कूलम्, सायकञ्च । ''कूलं रोधश्च

पुन्नपुंसकयोर्दारुजीवातुस्थाणुसीधवः।
स्याद्वास्तु हिङ्गु तितउ सानु कम्बु कमण्डलु ॥ ८ ॥
गोमयकुमुदबिम्बशङ्खाश्रमशूलसुवर्णतोरणाः।
नूपुरशिखरतूर्यनिर्य्यासगृहाङ्कुशबर्हिपल्लवाः ॥ ९ ॥

तीरञ्च" इत्यमरः। "तीरन्तु रोधसि" इति मेदिनी ॥ **कशिपु** अन्नम्, वस्त्रञ्च। "कशिपु त्वन्नमाच्छादनं द्वयम्" इत्यमरः। कशिपुरिति क्वचित्पुँल्लिङ्गोऽपि दृश्यते क्वचित् कालश्च ॥ **जानु** ऊरुजङ्घयोर्मध्यभागः ॥ "जानूरुपर्वाष्ठीवदस्त्रियाम्" इत्यमरः ॥ अङ्गे देहे। **धामन्** शब्दः। दले समांशे। खण्डे च। **अर्द्ध**शब्दः। न्याये गौतमोक्ते शास्त्रभेदे ॥ **सार**शब्दः। बन्धौ बान्धवे। ज्ञातिजने ॥ **मित्र**शब्दश्च। क्लीबलिङ्गः। स्यादित्यन्वयः। क्वचित् धर्मार्थसारमित्राण्यङ्गदनन्यव्यबन्धुषु इति पाठः ॥ ७ ॥ इति नपुंसकलिङ्गसङ्ग्रहः समाप्तः ॥ अथ पुन्नपुंसकलिङ्गसंग्रहमाह ॥ **दारुः** काष्ठम्। देवदारुः पित्तलञ्च ॥ **जीवातुः** अन्नम्। जीवितं जीवनौषधञ्च। "जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे" इति मेदिनी ॥ "जीवातुर्जीवनौषधम्" इत्यमरः ॥ **स्थाणुः** शिवः, शाखाशून्यवृक्षश्च। "स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुवः" इति मेदिनी ॥ **सीधुः** मद्यम्। "इक्षोः पक्वरसैः सिद्धः सीधुरित्यभिधीयते" इत्युक्तो मद्यभेदश्च। **वास्तु**र्वासयोग्यभूमिः। स्वनामाख्यातः शाकश्च। "वेश्मभूर्वास्तुरस्त्रियाम्" इत्यमरः। **हिंगुः** रामठदेशभवस्य वृक्षस्य निर्यासः। हिंगुद्रव्यञ्च। "सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम्" इत्यमरः। **तितउः** चालन इति प्रसिद्धः। अत्र सन्धत्र ड उ इति निर्देशात् न सन्धिः। "चालनी तितउः पुमान्" इत्यमरः ॥ **सानुः** पर्वतस्थसमभूमिदेशप्रस्थः। वनं वातसमूहश्च। "सानुः प्रस्थः सानुरस्त्रियाम्" इत्यमरः। "सानुरस्त्री वने प्रस्थे वात्यामार्गप्रकोविदे" इति मेदिनी ॥ **कम्बुः** शङ्खम्, गजश्च। "कम्बुः शङ्खेऽस्त्रियां पुंसि शम्बूके वलये गजे" इति मेदिनी ॥ **कमण्डलुः** संन्यासिनां जलपात्रभेदः। करङ्कः प्लक्षवृक्षश्च। "कमण्डलुः स्यात् करके न स्त्री ना प्लक्षपादपे" इति मेदिनी ॥ ८ ॥ **गोमयं** गोपुरीषम्। "गोविट् गोमयमस्त्रियाम्" इत्यमरः। **कुमुदः** कैरवम्। कह्लारं श्वेतोत्पलं वानरभेदश्च। "कुमुदं कैरवे रक्तपद्मेऽस्त्री कुम्भिकौषधौ। गाम्भार्यां पुंसि दिङ्नागे नागे शाखामृगान्तरे" इति मेदिनी ॥ **बिम्बं** दर्पणादौ भासमानप्रतिबिम्बाश्रयम् ॥ कमण्डलुः। सूर्यादिमण्डलञ्च। "बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः। "बिम्बस्तु प्रतिबिम्बे स्यात्मण्डले पुन्नपुंसकम्। बिम्बिकायाः फले क्लीबं कृकलासे पुनः पुमान्" इति मेदिनी ॥ **शङ्खः** स्वनामाख्यातः समुद्रजातः पदार्थः। ललाटास्थि। निधिभेदश्च। "शङ्खो निधौ ललाटास्थ्नि कम्बौ" इत्यमरः। "शङ्खः कम्बौ न योषिन्ना भालास्थिनिधिभिन्नखे" इति मेदिनी ॥ **आश्रमः** ब्रह्मचर्यादिकः शास्त्रोक्तो धर्मभेदः। मुनीनां वासस्थानम्। कलौ तु ब्रह्मचर्यवानप्रस्थौ न स्तः गृहस्थभिक्षुकाश्रमावेवेति केचिद्वदन्ति। यथा—"गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे"

व्रतदिनमासवर्षदलवल्कलकोटरषण्डचामराः ।
चन्दनपद्मधर्मकोलाहलकिसलयदेहदोहदाः ॥ १० ॥

इति । "आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे वने । अस्त्रियाम्" इति मेदिनी ॥ **शूलः** रोगभेद् व्यवायः । सुतीक्ष्णम् । अयःफालः त्रिशूलश्च । "शूलोऽस्त्री रोग आयुधे" इति मेदिनी ॥ क्वचित् "सृणिः" इति पाठः ॥ **सुवर्णः** स्वनामाख्यातो धातुभेदः । हरिचन्दनम् । स्वर्णगैरिकः । कर्षमितं काञ्चनञ्च । "कर्षं सुवर्णस्य सुवर्णसंज्ञम्" इति । "सुवर्णो ना स्वर्णकर्षे सुवर्णाख्यमखान्तरे । स्त्री कृष्णागुरुणि क्लीबं काञ्चने हरिचन्दने" इति मेदिनी ॥ **तोरणः** बहिर्द्वारम् । स्तम्बोपरिस्थं सिंहाकारकाष्ठम् । द्वारबाह्यभागश्च । "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः ॥ **नूपुरः** पादाङ्गुदः । "पादाङ्गुदं तुलाकोटिर्मञ्जीरे नूपुरोऽस्त्रियाम्" इत्यमरः ॥ **शिखरः** वृक्षाग्रः । पर्वताग्रः । रत्नमात्रञ्च । "शिखरोऽस्त्री द्रुमाग्रेऽद्रिशृङ्गे पुलकक्षयोः । पक्वदाडिमबीजाभमाणिक्यसकलाग्रयोः" इति मेदिनी ॥ **तूर्य्यः** वाद्यभेदः ॥ **निर्यासः** वृक्षात् तरलतया निर्गतः कालेन कठिनतां प्राप्तः रसः । वृक्षरसः । काथश्च ॥ **गृहम्** इष्टकामृत्तिकादिरचितं गेहम् । कलत्रञ्च । "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति स्मृतिः ॥ पुँल्लिङ्गस्तु बहुवचनान्त एव । "तत्रागारं धनपतिगृहान्" इति मेघदूतम् । कलत्रेऽपि दाराशब्दवद्बहुवचनम् । "गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि" इति मेदिनी ॥ **अङ्कुशः** हस्तिपालनोपयोगी वक्राग्रो लौहमयास्त्रभेदः । **बर्हिः** कुशः । "बर्हिर्देवसदनम्" इति श्रुतिः ॥ क्वचित् बर्ह इति पाठः । **पल्लवः** नवं पत्रविस्तारम्, शाखाविस्तारश्च । "लवोऽपि पल्लवे" इति नैषधम् । "पल्लवोऽस्त्री किसलयं विस्तारो विटपेऽस्त्रियाम्" इत्यमरः । "पुंसि क्लीबे च पल्लव" इति तु व्याडिः ॥ ९ ॥ **व्रतः** पुण्यसाधनार्थम् उपवासादि नियमभेदः । भक्षणभेदश्च। "नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम्" इत्यमरः॥ **दिनं** सूर्यकिरणोपलक्षितं षष्टिदण्डात्मकं तद्विशिष्टं वा । चतुर्यामात्मकः कालश्च । "घस्रो दिनाह्नी वा तु" इत्यमरः॥ **मासः** त्रिंशद्दिनात्मकः कालः । स च सौरसावनचान्द्रनक्षत्रभेदाच्चतुर्विधः । "पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ" इत्यमरः । पक्षो हि द्विविधः शुक्लः कृष्णश्चेति । तत्र मासस्य पूर्वः शुक्लः । कृष्णस्त्वपरः । यतः शुक्लादिक्रमेण प्रायशो मासप्रवृत्तिः । तावुभौ पक्षावेको मासः । चान्द्रेण मानेनेदमुक्तम् ॥ **वर्षः** द्वादशमासात्मकः कालः । जम्बुद्वीपः जम्बुद्वीपांशभेदश्च । तथा वृष्टिः प्रभवादयः षष्टिसंवत्सराश्च । "वर्षोऽस्त्री भारतादौ च जम्बुद्वीपाब्दवृष्टिषु" इति मेदिनी ॥ "स्याद्वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्" इत्यमरः ॥ **दलः** शस्त्रच्छेदः । अपकृष्टद्रव्यम्, पत्रं तमालपत्रं वा । तथा खण्डम् । उत्सेधवस्तु च । "अथ पिचौ न स्त्री दलमुत्सेधखण्डयोः । शस्त्रच्छेदेऽप्यऽपद्रव्ये पत्रे" इति मेदिनी ॥ **वल्कलः** वृक्षत्वक् । "वल्कं वल्कलमस्त्रियाम्" इत्यमरः । **कोटरः** वृक्षस्थगह्वरम् । "निष्कुहः कोटरं वा ना" इत्यमरः । **षण्डः** वृषः। नपुंसकम् । कमलादिसमूहः । "षण्डं पद्मादिसङ्घाते न स्त्री स्याद्गोपतौ

कुलिशध्वजकार्षापणपिनाकमुस्तान्धकारशृङ्गवलयाः।
पटलप्रवालचषकोपवासकासारकटकसन्तानाः॥ ११॥

पुमान्'' इति मेदिनी॥ शण्ड इत्यपि पाठः॥ **चामरः** चमरपुच्छकृतव्यजनम्। ''चक्रगण्डौ च पुंसि स्याच्चामरं चमराऽपि च। दण्डे च वालव्यजने'' इति मेदिनी॥ क्वचित् वासव इति पाठः॥ **चन्दनः** मलयजातो गन्धसारः। रक्तचन्दनम्। वानरभेदः। औषधिभेदश्च। ''चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकम्'' इति मेदिनी॥ **पद्मः** कमलम्। गजमुखादिस्थः। बिन्दुसमुदायः कमलाकारेण सैन्यादेरभिनिवेशनरूपो व्यूहभेदः। निधिभेदश्च। ''पद्मोऽस्त्री पद्मके व्यूहनिधिसङ्ख्यान्तरेऽम्बुजे'' इति मेदिनी॥ **धर्मः** स्वभावः। ''विहितक्रियया साध्यो धर्मः पुंसां गुणो मत'' इत्युक्तः कर्म्मजन्यः अदृष्टः। शास्त्रविहितकर्मानुष्ठानजन्यः भाविफलसाधनभूतः शुभादृष्टश्च। ''धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे'' इति मेदिनी॥ **कोलाहलः** बहुविधो दूरगामी अव्यक्तशब्दः। बहुभिः कृतः स्पष्टशब्दश्च। ''कोलाहलः कलकल'' इत्यमरः॥ **किसलयः** किशलय इति तालुजशकारमध्यो वा पत्रादियुक्तशाखापर्वा। पल्लवश्च। ''पल्लवोऽस्त्री किसलयम्'' इत्यमरः। **देहः** स्थूलसूक्ष्मकार्यकारणरूपं शरीरम्। लग्नश्च। ''कायो देहः क्लीबपुंसोः'' इत्यमरः॥ **दोहदः** गर्भः। ''सुदक्षिणा दोहदलक्षणं दधौ'' इति रघुः। गर्भिण्यभिलाषः लालसा च। ''अथ दोहदम्। इच्छा काङ्क्षा स्पृहेहा'' इत्यमरः॥१०॥ **कुलिशः** वज्रः। अस्थिसंहारवृक्षः। मत्स्यभेदश्च। ''ह्लादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः'' इत्यमरः॥ ''यमे ना कुलिशो न स्त्री दम्भोलौ ना झषान्तरे'' इति मेदिनी॥ **ध्वजः** चतुष्कोणाकारः वंशदण्डोपरिस्थः वस्त्रखण्डः। खट्वाङ्गः मेढ्रश्च। ''पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्'' इत्यमरः। ''ध्वजः स्यात्सौण्डिके पुमान्। न स्त्रियान्तु पताकायां खट्वाङ्गे मेढ्रचिह्नयोः'' इति मेदिनी॥ **कार्षापणः** षोडशपणाः। पणश्च। ''कार्षापणः कार्षिकः स्यात्'' इत्यमरः। ''कार्षापणोऽस्त्री कार्षीके पणषोडशकेऽपि च'' इति मेदिनी॥ **पिनाकः** शिवधनुः। तच्छूलास्त्रम्। पांशुवर्षणञ्च। ''पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः'' इति मेदिनी॥ क्वचित् पिधाननिधानौ इति पाठौ। आश्रयः कार्यावसानश्च। **मुस्तः** मुस्तकः। स्थावरविषभेदश्च। ''कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्'' इत्यमरः॥ **अन्धकारः** तेजोभावः। तमश्च। ''अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः'' इत्यमरः। क्वचित् कर्काहारेति पाठः॥ **शृङ्गः** पर्वतोपरिभागः। प्राधान्यः। कामोद्रेकश्च, पश्वादेर्विषाणं वा। ''शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कर्मशीर्षके'' इति मेदिनी॥ **वलयः** हस्तपादकटकादिः। उत्तरपदस्थः तदाकारवेष्टनञ्च। यथा ''भूवलयम्'' वेष्टभूमिः गोलश्च। ''आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम्'' इति मेदिनी॥ **पटलः** छदिः। वृक्षः। ग्रन्थभेदश्च। ''छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना'' इत्यमरः। ''अथ पटलं

आकाशकुञ्जकुतपौदनवारवाणप्रस्थावतंसनखमण्डपकच्छपुच्छाः ।
कान्तारकङ्कणतडागकिरीटराष्ट्रतीर्थव्रणस्तबकसङ्क्रमपीठकानि ॥१२॥

पिटके च परिच्छदे । छर्दिर्द्विरोगतिलके क्लीबं वृन्दे पुनर्न ना'' इति मेदिनी ॥ **प्रवालः** नवपल्लवः । प्रबाल इति कचित्पाठः । ''पुष्पं प्रवालोपहितं यदि स्यात्'' इति कुमारः । रक्तवर्णमणिभेदः । वीणादण्डश्च । ''प्रवालमङ्कुरेऽप्यस्त्री'' इत्यमरः ॥ ''प्रवालोऽस्त्री किसलयं वीणादण्डे च विद्रुमे'' इति मेदिनी ॥ **चषकः** मद्यपानपात्रम् । ''चषकोऽस्त्री पानपात्रम्'' इत्यमरः । ''चषकोऽस्त्री पानपात्रे मधुमद्यप्रभेदयोः'' इति मेदिनी ॥ **उपवासः** अनाहारः । ''तपनोदयमारभ्य यामाष्टकमभोजनम् । उपवास इति ख्यात'' इति स्मृतिः । ''औपवस्तं तूपवासः'' इत्यमरः । औपवस्तम् । उपवस्तमप्यत्र । औपवस्त्राम्'' इति च कचित् पाठः । **कासारः** सरोवरम् । सपद्मः निष्पद्मो वा महाजलाशयश्च । कासारः कृत्रिमपद्माकर इति केषाञ्चिन्मतम् । ''पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः'' इत्यमरः। **कटकः** मेखलाख्यः पर्वतमध्यभागः । बाहुभूषणवलयः । हरितदन्तमण्डलञ्च । ''आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम्'' इत्यमरः । ''कटकोऽस्त्री नितम्बेद्रेर्दण्डिनां दन्तमण्डले । सामुद्रलवणे राजधानीवलययोरपि'' इति मेदिनी ॥ **सन्तानं** वंशः । विस्तारः अपत्यम् । कल्पवृक्षश्च । ''सन्तानः सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे'' इति मेदिनी ॥ ''वंशोन्ववायः सन्तानो वर्णाः स्युर्ब्राह्मणादयः'' इत्यमरः ॥ ११ ॥ **आकाशः** गगनम् । ''वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी'' इत्यमरः ॥ **कुञ्जः** समन्ताल्लतादिभिराच्छादितो मध्यशून्यः पर्वतादिः स्थानभेदः । हस्तिहनुश्च । ''कुञ्जो दन्तेऽपि न स्त्रियाम्'' इत्यमरः । ''कुञ्जोऽस्त्रियां निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनाम्'' इति मेदिनी ॥ **कुतपः** पञ्चदशधा विभक्तदिनस्याष्टमांशः कालः । स च मध्याह्नात् पूर्वोत्तरदण्डद्वयात्मकः मुहूर्त्तरूपः कालः । ''अष्टमोह्नः कुतपोऽस्त्रियाम्'' इत्यमरः । अत्र अह्नशब्दो मुहूर्त्तपर इति पठन्ति । यथा—''मुहूर्तात् सप्तमादूर्द्ध्वं मुहूर्तान्नवमादधः । स कालः कुतपो ज्ञेय'' इति । ''क्लीबेऽपि कुतपम्'' कुतुप इति व्युकारशब्दोऽपि शब्दरत्नावल्यामागतः । ''कुतपोऽस्त्रियां दौहित्रे वाद्येऽच्छागजकम्बले । कुशे दिनस्याष्टमांशे ना सूर्ये'' इति मेदिनी ॥ **ओदनः** भक्तम् । स्विन्नान्नञ्च । ''भिःसा स्त्री भक्तमन्धोन्नमोदनोऽस्त्री स दीदिविः'' इत्यमरः । ''ओदनं न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्'' इति मेदिनी ॥ **वारवाणः** कवचः । ''कञ्चुकी वारवाणोऽस्त्री'' इत्यमरः । ''क्लीबे तु वारवाणम्'' इति च ॥ **प्रस्थः** पर्वतस्य वासयोग्यभूमौ । मानभेदश्च । ''प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि'' इति मेदिनी ॥ **अवतंसः** कर्णपूरः । शिरोभूषणभेदश्च । ''पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे'' इत्यमरः । ''अवतंसो न स्त्रियां स्यात् कर्णपूरे च शेखरे'' इति मेदिनी ॥ **नखः** करजः । अङ्गुल्यग्रस्थः कण्टकश्च । ''पुनर्भवः कररुहो नखोऽस्त्री'' इत्यमरः । ''नखी स्त्रीक्लीबयोः शुक्तौ नखरे पुन्नपुंसकम्'' इति मेदिनी ॥

समरसरकरणविटप्राग्भारगौरिकदैवतकूटागाराः।
प्रोथमुहूर्त्तदिवसफलकानिकांशनिदाघमुषलतिलकानि ॥ १३ ॥

मण्डपः जनविश्रामस्थानम्। देवादिगृहश्च। यथा धर्ममण्डपः। चण्डीमण्डपः। विष्णुमण्डप इत्यादि। "मण्डपोऽस्त्री जनाश्रयः" इत्यमरः॥ **कच्छः** जलप्रायो देशः। तटः पुन्नागद्रुमश्च। "जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः" इत्यमरः। तथाविधः अनूपसदृशः कश्चिन्नद्यादे-रुपान्तदेशः कच्छ इत्यपरैरुच्यते। "अथ कच्छः स्यादनूपे तुन्नकद्रुमे। नौकाङ्गे पुंसि वाराह्यां चीरिकायाञ्च योषिति" इति मेदिनी॥ पुच्छः पश्चाद्भागः। लाङ्गुलञ्च। "पुच्छोऽस्त्री लूम-लाङ्गुले" इत्यमरः। केचित् लाङ्गूलमप्यत्र। "पुच्छः पश्चात्प्रदेशेऽपि लाङ्गूले पुच्छमस्त्रि-याम्" इति मेदिनी॥ **कान्तारं** कोविदारवृक्षः। इक्षुभेदः उपद्रवः काननम्। दुर्गवर्त्म। गर्त्तञ्च। "महारण्ये दुर्गपथे कान्तारं पुन्नपुंसकम्" इत्यमरः॥ कङ्कणं करभूषणम्। भूषण-मात्रञ्च। "कङ्कणं करभूषणम्" इत्यमरः॥ "कङ्कणो ना प्रतिसरः" इति रत्नकोषः। "कङ्कणं करभूषायां सूत्रमण्डलयोरपि" इति मेदिनी॥ **तडागं** पञ्चशता न्यूनधनुर्मितः द्विस-हस्रन्यूनहस्तक्षेत्रफलकः पञ्चचत्वारिंशद्धस्तान्न्यूनदीर्घविस्तारः जलाशयः। यथा। "शतेन-धनुर्भिः पुष्करणी। त्रिभिर्दीर्घिका। चतुर्भिर्द्रोणः। पञ्चभिस्तडाग इति वशिष्ठोक्तिः। "प्रश-स्तभूमिभागस्थो बहुसंवत्सरोषितः। जलाशयस्तडागः स्यात्" इति। "पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः" इत्यमरः। क्वचित् तटाक इत्यपि पाठः। ततस्तटाकतडागावपि स्याताम्। "तडागोऽस्त्री जलाधारविशेषे यन्त्रकूटके" इति मेदिनी॥ **किरीटं** मुकुटः। शिरोवेष्टनञ्च। "अथ मुकुटं किरीटं पुन्नपुंसकम्" इत्यमरः। मकुटमित्यपि पाठः॥ **राष्ट्रं** जनपदः। "गौडं राष्ट्रमनुत्तमम्" इति प्रबोधचन्द्रोदयः। उपद्रवश्च। "अथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे" इत्य-मरः। "राष्ट्रं स्यादुपवर्त्तने। उपद्रवे क्लीबपुंसोः" इति मेदिनी॥ **तीर्थं** शास्त्रम्। यज्ञः क्षेत्रम् उपायः। स्त्रीरजः। नद्यादेरवतरणम्। घट्टादिश्च। "निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इत्यमरः। निपानमित्यत्र कश्चिन्निदानमित्यपि पाठः। निदानमुपायः। सिंहलार्थव्याख्याने तु निदानमादिकार-णमित्यर्थः। तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु" इति मेदिनी॥ **व्रणं** क्षतम्। "व्रणोऽस्त्रियामीर्ममरुः" इत्यमरः॥ **स्तबकं** गुच्छः। "स्याद्गु-च्छकस्तु स्तबकः इत्यमरः॥ **सङ्क्रमं** जलबन्धनस्थानम्। "आत्मानं सङ्क्रमं कृत्वा" इति स्मृतिः। रथ्यादेः रथ्यन्तरसञ्चारश्च। "अस्त्री तु सङ्क्रमो दुर्गसञ्चरः" इत्यमरः। "सङ्क्रमः क्रमणे पुंसि न स्त्री स्याद्दुर्गसञ्चरे" इति मेदिनी॥ **पीठकम्** आसनभेदः। व्रतिनामासनञ्च। पीठ इत्यपि पाठः। "पीठमासनम्" इत्यमरः। अस्मिन् त्रिकाण्डशेषकोषेऽपि "विष्टरः पीठम-स्त्रियाम्" इति च॥ १२॥ **समरः** युद्धम्। "अस्त्रियां समरानीकरणाः कलहविग्रहौ" इत्यमरः॥ **सरकः** मद्यपानपात्रम्। मद्यपरिसेवनम्। इक्षुजमद्यम्। तत्पात्रञ्च। "सरकोऽप्यनु-तर्पणम्" इत्यमरः। "सरकं वा नानुतर्षो ना" इति रत्नकोषः। "सरकः सीधुपानेक्षुसीधुनो

वल्मीकवृषणद्रोणगाण्डीवनिगडानि च।
मुकुलादि च विज्ञेयं शिष्टसन्दर्भतोपरम् ॥ १४ ॥

मद्यभाजनम्" इत्यजयः । "सरकोऽस्त्री सीधुपाने सीधुपात्रेक्षुसीधुनोः" इति मेदिनी ॥ **रणः** युद्धम् । शब्दः । क्वणः । गतिश्च । "अस्त्रियां समरानीकरणाः कलहविग्रहौ" इत्यमरः । "रणः कोणे क्वणे पुंसि समरे पुन्नपुंसकम्" इति मेदिनी ॥ **विटपः** शाखा । पल्लवविस्तारः । स्तम्बः। पल्लवश्च । "स्तम्बेऽपि विटपोऽस्त्रियाम्" इत्यमरः ॥ "विटपो न स्त्रियां स्तम्बशाखाविस्तार-पल्लवे" इति मेदिनी॥ **अङ्गारः** अर्धदग्धः अग्निसंक्रान्तः अग्निशून्यो वा काष्ठखण्डः । मङ्गल-ग्रहः । रक्तवर्णः । "अथ न स्त्री स्यादङ्गारोऽलातमुल्मुकम्" इत्यमरः । "अङ्गारमुल्मुके न स्त्री पुँल्लिङ्गस्तु महीसुते" इति मेदिनी ॥ **गैरिकः** पर्वतजात उपधातुभेदः । स्वर्णञ्च । "स्वर्णेऽपि गैरिकम्" इत्यमरः । अत्रापि शब्दाद्गेरू इति ख्यातः धातुश्च । "गैरिकं धातुरुक्मयोः" इति मेदिनी ॥ **दैवतः** देवः । देवतानां समूहश्च । "वृन्दारका दैवतानि पुंसि वा" इत्यमरः । **कूटागारः** । मृषागारम् । चन्द्रशालिका । क्रीडागृहञ्च ॥ **प्रोथम्** अश्वनासिका । कटी । शाटकम् । स्त्रीगर्भः । भीषणम् । स्थितिश्च । " घोणा तु प्रोथमस्त्रियाम्" इत्यमरः । "प्रोथोऽस्त्री हयघोणायां ना कटयामध्वगे त्रिषु"इति मेदिनी॥**मुहूर्त** द्वादशक्षणमितः कालः । पञ्च-दशधा विभक्तस्य दिनस्य पञ्चदशभागः । किञ्चिन्न्यूनाधिकघटिकाद्वयरूपः कालश्च । "तास्तु त्रिंशत्क्षणस्ते तु मुहूर्त्तो द्वादश स्त्रियाम्"इत्यमरः । **दिवसं** दिनम्। सावनादीनि दिनानि च । "नाडी षष्टितमस्तत्र सावनो दिवसः स्मृतः । त्रिंशद्भागोर्केराशेस्तु दिवसः सौर उच्यते । चान्द्रस्य तिथ्यवच्छिन्नो भौमो भूपरिधेर्मतः"इति ॥ **फलकः** चर्म। वृक्षादीनां शस्यम् । लाभः। फलकम् । कार्यम् । दानम् । मुष्कञ्च । फलोऽप्यत्र पाठः । "फलकोऽस्त्री फलं चर्म" इत्यमरः । "फलं जातिफले शस्ये हेतूत्थे व्युष्टिलाभयोः । त्रिफलायाञ्च कक्कोले प्रियङ्गौ तु फली स्मृता"इति मेदिनी ॥ **काशः** रोगभेदः । क्षुतः तृणभेदः। तत्पुष्पञ्च । काशकोऽप्यत्र। "काशमस्त्रियाम्,"इत्य-मरः । "काशस्तृणे स्यात्क्षवथौ" इति विश्वः । क्वचित् मास इति पाठः ॥ **निदाघम्** उष्णम् । घर्मः । घर्म्मकालः ज्यैष्ठाष्षाढमासयोः । घर्मजलञ्च । "घर्मो निदाघः स्वेदः स्यात्" इत्यमरः।"निदाघो ग्रीष्मकाले स्यादुष्मस्वेदाम्बुनोरपि" इति मेदिनी ॥ **मुषलम्** अयोग्रम् । स्वनामाख्यातः धान्यादिखण्डनसाधनः पदार्थश्च । मुसलं मुशलञ्चेति दान्त्यतालुजसकारयुक्तौ पाठावपि स्याताम् । "अयोग्रं मुषलोऽस्त्री स्यात्" इत्यमरः ॥ "मुषलं स्यादयोग्रे च पुन्नपुंसकयोः"इति मेदिनी ॥ **तिलकं** स्वनामाख्यातः नासादिधार्यश्चन्दनादिविशेषकः । क्लोम च । तमालपत्र-तिलकचित्रकान्यपि ।"तिलकं क्लोम" इत्यमरः। "तिलको द्रुमरोगाश्वभेदेषु तिलकालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके इति मेदिनी ॥ १३ ॥ **वल्मीकं** स्तूपम । "वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम्" इत्यमरः "वल्मीको रोगभेदे च नाकौ च पुन्नपुंसकम्" इति मेदिनी । "वल्मीको वामलूरे स्यान्मुनिरोगविशेषयोः" इति विश्वः ॥ **वृषणम्** अण्डकोषम् ।

अथ स्त्रीपुंसयोः केलिर्मणिर्योनिर्मसिर्मुनिः।
मरीचिः शाल्मलिः स्वातिः श्रेणिर्मुष्टिस्तिथिः सृणिः ॥ १५ ॥

"मुष्कोण्डकोषो वृषणः" इत्यमरः। **द्रोणः** भारतप्रसिद्धः स्वनामाख्यातो योद्धृभेदः। भारतप्रसिद्धः स्वनामाख्यातो राजगुरुर्बौद्धोपासकब्राह्मणवरश्च। वृश्चिकः। मेघभेदः। वृक्षभेदः। आढकचतुष्टयरूपः परिमाणश्च। "अस्त्रियामाढकद्रोणौ" इत्यमरः। "द्रोणोऽस्त्रियामाढके स्यादाढकानां चतुष्टये। पुमान् कृपीपतौ दग्धकाके स्त्री नीवृदन्तरे। तथा काष्ठाम्बुवाहिन्यां गवादिन्यामपीष्यते" इति मेदिनी ॥ **गाण्डीवम्**। अर्जुनचापः। चापमात्रञ्च। "कपिध्वजस्य गाण्डीवगाण्डीवौ पुन्नपुंसकौ" इत्यमरः। "गाण्डीवो गाण्डीवश्चाऽस्त्री कार्मुकेर्जुनकार्मुके" इति मेदिनी ॥ **निगडं** शृङ्खला। लोहमयो हस्तिपादबन्धनः अन्दुकश्च। "अन्दुको निगडोऽस्त्री स्यात्" इत्यमरः ॥ **मुकुला** ईषद्विकशितकलिका। "कुड्मलो मुकुलोऽस्त्रियाम्" इत्यमरः ॥ **अपरम्** अत्रादिपदात् देहमृणालापणाग्निषादि अन्यच्च। शिष्टसन्दर्भतः शिष्टानां स्थिरबुद्धीनाम्। "न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागङ्गचपलः" इति शिष्टस्य लक्षणम्। इत्युक्तलक्षणवतां महेश्वरेन्द्रचन्द्रपाणिनिवररुचिप्रभृतीनाम्। सन्दर्भतः काव्यादिरचनाविशेषतः। प्रबन्धविशेषतश्चेति यावत्। "गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा। नानार्थकत्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः" इत्युक्तलक्षणात् सन्दर्भविशेषाद्वा। विज्ञेयं बोद्धव्यम्। विशेषेण ज्ञातव्यमित्यर्थः। पुन्नपुंसकयोः पुँल्लिङ्गे च क्लीबलिङ्गे च पूर्वोक्ताः शब्दगणाः। भवेयुरिति पूर्वेणात्रान्वयः ॥ १४ ॥ इति पुन्नपुंसकलिङ्गसङ्ग्रहः समाप्तः ॥ अथ स्त्रीपुंलिङ्गसङ्ग्रहमाह ॥ अथ अनन्तरार्थद्योतकः ॥ **केलिः** परिहासः। क्रीडा। पृथिवी च। "द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च" इत्यमरः। परीहास इत्यत्र परिहास इति च। लीला इत्यत्र खेला इति च क्वचिद्दृश्यते ॥ **मणिः** मुक्तादिरत्नम्। "मणिहारावलिरामणीयकम्" इति। "नृपनीलमणीगृहत्विषा" इति च नैषधम्। मृन्मयपात्रभेदः। अलिञ्जरः लिङ्गाग्रश्च। "रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च" इत्यमरः। "मणिः स्त्री पुंसयोरश्मजातौ मुक्तादिकेऽपि च। कण्ठदेशस्तनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च" इति मेदिनी ॥ **योनिः** मण्यादीनामुत्पत्तिस्थानमाकरः कारणम्। स्त्रीणामसाधारणचिह्नम्। तद्देवताकं पूर्वफाल्गुनीनक्षत्रञ्च "भगं योनिर्द्वयोः" इत्यमरः। योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे" इति मेदिनी ॥ **मसिः** पत्रलेखनद्रवम्। कज्जलम्। नीलशेफालिकावृन्तञ्च। अत्र मशिरिति तालुजशकारान्तपाठोऽपि। **मुनिः** स्थिरचित्तो वीतरागादिश्च। "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते" इति गीतायाम्। मन्वत्रिविष्णुहारितादयश्च। "मुनित्रयं नमस्कृत्य" इति बुद्धश्च। "मुनीन्द्रः श्रीघनः शास्ता मुनिः" इत्यमरः। सप्तसङ्ख्या च। "मुनिगुहकार्णवैः कृतयतिवदकोकिलकम्" इति वृत्तरत्नाकरः। तपस्वी च। तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः" इत्यमरः। "मुनिः पुंसि वशिष्ठादौ वकसेन-

ऊर्म्मिगभस्तिरशनिर्वैपार्ष्णीषुधिराशयः ।
वस्तिश्च किष्कुः कन्दुश्चरेणुतन्वीशबाहवः ॥ १६ ॥

तरौ जिने'' इति मेदिनी ॥ मरीचिः किरणः। "भानुः करो मरीचिः स्त्री पुंसयोः" इत्यमरः। "मरीचिर्मुनिभेदे ना गभस्तावनपुंसकम्'' इति मेदिनी । **शाल्मलिः** स्वनामाख्यातो वृक्षः । "स्थिरायुः शाल्मलिर्द्वयोः" इत्यमरः । अत्र शाल्मली शाल्मलिः इति द्वयमपि । शाल्मलेर्दीर्घायुष्कत्वात् स्थिरायुः इति वदन्ति । स्थिरमायुर्यस्याः स्थिरायुः । "षष्टिवर्षसहस्राणि वने जीवति शाल्मलिः'' इति वचनात्॥ " शाल्मलिस्तरुभेदे स्याद्द्वीपभेदेऽपि च द्वयोः'' इति मेदिनी ॥ **स्वातिः** अश्विन्यादिषु पञ्चदशमं नक्षत्रम् । सूर्यपत्नीभेदश्च ॥ **श्रेणिः** छिद्ररहिता पङ्क्तिः । "द्वयोः श्रेणिः सजातिभिः'' इत्यमरः । "श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ'' इति मेदिनी ॥ **मुष्टिः** बद्धपाणिः । पलपरिमाणम् । कुञ्च्यष्टभागः । मोषणञ्च । "मुष्टिर्द्वयोः पले बद्धपाणौ त्सरौ'' इति मेदिनी ॥ **तिथिः** पञ्चदशचन्द्रकलाक्रियारूपा प्रतिपदादिः । पञ्चदशसङ्ख्या च । **सृणिः** शत्रुः । अङ्कुशास्त्रम् । अत्र तालुजशकारादिश्च । "अङ्कुशोऽस्त्री सृणिः स्त्रियाम्'' इत्यमरः । "शृणिरङ्कुशवाची च काशश्च तृणवाचकः'' इति शकारभेदः । "आरक्षमग्नमवमत्य सृणिः सिताग्रम्'' इति माघः । केचित्त्वत्र सृणिरिति दन्त्यसकारान्तपाठोऽपि माघस्य प्रमादात्सम्भूत इति पठन्ति ॥ १९ ॥

ऊर्मिः तरङ्गः प्रकाशः । वेगः । वस्त्रसङ्कोचरेखा । पीडा । उत्कण्ठा । बुभुक्षादयः षट् च । यथा । "बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ । शोकमोहौ शरीरस्य जरामृत्यु-षड्र्मयः'' इति । "ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसङ्कोचरेखायां वेदनापीडयोरपि'' इति मेदिनी ॥ **गभस्तिः** किरणः । सूर्यः स्वाहा । वह्निपत्नी च । "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः'' इत्यमरः । "गभस्तिः किरणे सूर्ये ना स्वाहायान्तु योषिति'' इति मेदिनी । **अशनिः** मेघोत्पन्नः । ज्योतिषम् । वज्रम् । प्रस्तरवर्षी । उल्काविशेषः । विद्युच्च । "शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः'' इत्यमरः । "अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां पवावपि'' इति मेदिनी ॥ **पार्ष्णिः** पादग्रन्थः । गुल्फस्याधोभागः । पृष्ठश्च । "पुमान् पार्ष्णिस्तयोरधः'' इत्यमरः । "पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद्ध्वजिनीकटौ'' इति रन्तिदेवः । "पार्ष्णिः स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च'' इति मेदिनी॥ अत्र वैदशब्दस्तु पादपूरणे स्यात्। "ऊर्म्मिगभस्तिरसनीरैपार्ष्णीषुधिराशयः'' इति क्वचित् पाठः । **इषुः** बाणः । तत्तुल्यसङ्ख्यम् । पञ्चसङ्ख्यान्वितञ्च । "कलम्बमार्गणशराः पत्रीरोप इषुर्द्वयोः'' इत्यमरः । धिर्ज्ञानभेदः बुद्धिश्च । अत्र ईकारान्तधीशब्दोऽपि । "धीः प्रज्ञा शेमुषीमतिः'' इत्यमरः । "धिर्ज्ञानभेदे बुद्धौ च'' इति मेदिनी ॥ **राशिः** धान्यादीनां पुञ्जम् । ज्योतिश्चक्रस्य द्वादशांशो मेषादिः । व्यक्ताव्यक्तगणभेदश्च । "द्वौ राशी पुञ्जमेषाद्यौ'' इत्यमरः । "राशिर्मेषादिपुञ्जयोः'' इति मेदिनी ॥ **वस्तिः** नाभेरधोभागः

गण्डूषगर्जजागर-भुजकीलज्वालवर्त्तकव्रीडाः ।
उत्कण्ठशटवराटक-रभसाः स्त्रीत्वे तु टाबन्ताः ॥ १७ ॥

मूत्राधारस्थानम् । **वासः** वसनदशा च । "वस्तिर्नाभेरधोर्द्वयोः" इत्यमरः । "वस्तिर्द्वयोर्निरूहे नाभ्यधोभूम्नि दशासु च" इति मेदिनी ॥ **किष्कुः** द्वादशाङ्गुलपरिमाणम् । प्रकोष्ठदेशः हस्तपरिमाणञ्च । किष्कुर्हस्ते वितस्तौ च' इत्यमरः । "प्रकोष्ठेऽप्यनपुंसकः" इति रुद्रः । "किष्कुर्द्वयोर्वितस्तौ च संप्रकोष्ठकरेऽपि च" इति मेदिनी ॥ **कन्दुः** स्वेदनीपात्रम् । "कन्दुपक्कं तैलपकम्" इति स्मृतिः॥ तण्डुलादेर्भर्जनपात्रमात्रञ्च । "गोकुले कन्दुशालायाम्" इति स्मृतिः। "कन्दुर्वा स्वेदनी स्त्रियाम्" इत्यमरः ॥ **रेणुः** परागः । धूली । पांशुः । पर्पटश्च । "रेणुः स्त्रीपुंसयोर्धूलौ पुँल्लिङ्गः पर्पटे पुनः" इति मेदिनी ॥ **तनुः** देहः । मूर्त्ती । अल्पम् । विरलश्च । "तनुः काये त्वचि स्त्री स्यात्रिष्वल्पे विरले कृशे" इति मेदिनी ॥ **ईशः** महादेवः । परमेश्वरः । हिरण्यगर्भः । शिवपत्नी च । "ईशः प्रभौ महादेवे" इति मेदिनी ॥ "ईशः प्रभौ शङ्करे स्यादीशा लाङ्गलदण्डके" इति विश्वः । क्वचित् वेणुतन्वीषबाहव इति पाठः ॥ **बाहुः** भुजः । कक्षावध्यङ्गुलिपर्यन्तोवयवश्च । "द्वौ परौ द्वयोः भुजबाहू" इत्यमरः ॥ १६ ॥ **गण्डूषः** मुखपूरणयोग्यं जलम् । "गजाय गण्डूषजलम्" इति कुमारः ॥ करिहस्तम् ॥ प्रसृत्या प्रमितं जलम्। कराङ्गुलिश्च । "गण्डूषो मुखपूर्त्तौ स्याद्गजहस्त्याङ्गुलावपि । प्रसृत्या प्रमितेऽपि स्यात्" इति हैमः ॥ "गण्डूषो मुखपूर्त्तीभपुष्करप्रसृतोन्मिते" इति मेदिनी ॥ **गर्जः** मेघनादः। मत्तकरी च ॥ **जागरः** निद्राभावः । जागरणम् । कवचश्च । "जागर्या जागरा द्वयोः" इत्यमरः ॥ **भुजः** बाहुः करः त्रिकोणचतुष्कोणादिक्षेत्रस्थरेखाविशेषः । "तथाऽयते तद्भुजकोटिघातः" इति लीलावती । "अस्त्री द्वौ परौ द्वयोः भुजबाहू" इत्यमरः । "भुजा द्वयोर्बाहौ करे" इति मेदिनी ॥ **कीलः** शङ्कुः । शस्त्रम् । अग्निशिखा । कफोणी । स्तम्भः । लेशश्च । "शङ्कावपि द्वयोः कीलः" इत्यमरः । "कीलोग्नितेजसि" । कफोणिस्तम्भयोः शङ्कौ" इति हैमः । "कीलो लेशे द्वयोः स्तम्भज्वालाकफोणिशङ्कुषु" इति मेदिनी ॥ **ज्वालः** अग्निशिखा। दग्धान्नम् । दाहश्च । "वह्नेर्द्वयोर्ज्वालकीलौ" इत्यमरः । वर्त्तकः पक्षिभेदः । अश्वखुरश्च । "खुरेऽप्यश्वस्य वर्त्तकः" इत्यमरः। "वर्तकस्तु खुरेऽश्वस्य विहगे" इति मेदिनी॥ व्रीडा लज्जा । "मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा" इत्यमरः । तथा रभसकोषे स्त्रीपुँल्लिङ्गशब्दानां निर्देशे । "गण्डूषगर्जभुजजागरहारकीलज्वालाझटारभसवर्त्तकगद्धशङ्काः । व्रीडादयश्च वरटश्च वराटकश्च उत्कण्ठबाणकरकाश्च समामयाश्च" इत्युक्तम् ॥ **उत्कण्ठः** इष्टलाभे कालासहनरूपम् औत्सुक्यम "उत्कण्ठोत्कलिके समे" इत्यमरः ॥ "चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्नभिध्या तूभयोरपि" इति शब्दार्णवः । **शटः** अम्लः । सिंहकेशरः । जटा च । "शटा जटाकेशरयोः" इति मेदिनी ॥ क्वचित् शठः सठ इति पाठो च । **वराटकः** कपर्दः । क्षुद्रवराटः क्षुद्रकपर्दे । स्वार्थे कन् । "वराटकानां दशकद्वयं यत्" इति । हंसवाची

शल्लको वृश्चिकः कीटः शारस्तूणो घटः कटः ।
शफरो वेतसश्चामी स्त्रियां ङ्यन्ताः प्रकीर्त्तिताः ॥ १८ ॥
स्त्रीक्लीबयोरुडुर्दामा छर्दिर्ज्योतिः सदोर्च्चिषः ।
सुखं लक्षं वर्णिज्यश्च वडिशक्रोडपाटलम् ॥ १९ ॥

वरटशब्दोऽपि पुंस्त्रियोः स्यात् । रभसः वेगः । हर्षः । औत्सुक्यम् । पौर्वापर्याविचारे च । "रभसो वेगहर्षयोः" इति मेदिनी । "रभसो हर्षवेगयोः" इति विश्वः । इमे शब्दाः । स्त्रीत्वे स्त्रीलिङ्गभावे तु । टाबन्ता टाप्प्रत्ययान्ता एवेति ज्ञेयाः । न तु ईबन्ता इत्यर्थः ॥ १७ ॥ **शल्लकः** त्वक् । भेकः । स्वार्थे कन् । त्वक् । शणवृक्षः । पक्षिभेदश्च । "छत्रादिकाष्टिशरयोः शल्लकी पशुवृक्षयोः" इति मेदिनी ॥ **वृश्चिकः** कीटभेदः । शुक्रकीटः । मेषादितः अष्टमो राशिः । औषधिभेदः । मदनवृक्षः । कर्कटः । गोमयकीटश्च । "वृश्चिकः शुककीटः स्यादलिद्रुणौ तु वृश्चिके" इत्यमरः । "वृश्चिको द्रुण आलिः स्यात्" इति गोदालितः । "वृश्चिकस्तु द्रुणे राशौ शूककीटौषधीभिदोः" इति मेदिनी ॥ **कीटः** कृमिभ्यः स्थूलं क्षुद्रजन्तुमात्रम् । स्वार्थे कन् । मगधजातिश्च ॥ **शारः** कर्बुरवर्णः । वायुश्च । "शारो वायौ स तु त्रिषु । कर्बुरे" इत्यमरः । "शारः स्याच्छैवले वाच्यलिङ्गः पुंसि समीरणे" इति मेदिनी । **तूणः** बाणधारः । स्वनामाख्यातः इषुधिश्च । "तूणोपासाङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः" इत्यमरः । "तूणेषुधी उपासङ्गः" इति रत्नकोषः । **घटः** कलसः । परिमाणभेदश्च । "कलसस्तु त्रिषु द्वयोः । घटः कुटनिपावस्त्री" इत्यमरः । "घटः समाधिभेदेभशिरःकूटकुटेषु च" इति मेदिनी ॥ **कटः** हस्तिगण्डस्थलम् । कटिपार्श्वः । नडादिरचितमासनम् । अतिशयः । कालः । तृणम् । शवः । शवरथः । ओषधिः । श्मशानञ्च । "कटः श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शरे । सवये गजगण्डे च" इति मेदिनी ॥ **शफरः** मत्स्यभेदः ॥ **वेतसः** वृक्षभेदः । "अथ वेतसः । रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः" इत्यमरः । अमी इमे शब्दाः । स्त्रियां स्त्रीलिङ्गे । ङ्यन्ताः ङीप्प्रत्ययान्ताः । प्रकीर्त्तिताः कथिताः । न टाप्प्रत्ययान्ता इत्यर्थः । इमे शब्दगणाः । स्त्रीपुंसयोः स्त्रीलिङ्गे पुँल्लिङ्गे च । स्युरिति पूर्वेणान्वयः ॥ १८ ॥ इति स्त्रीपुँल्लिङ्गसङ्ग्रहः समाप्तः ॥ अथ स्त्रीनपुंसकलिङ्गसङ्ग्रहमाह ॥ **उडुः** नक्षत्रम् । जलञ्च । "नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्" इत्यमरः । **दामा** दोहनकाले पशुबन्धनरज्जुः । रज्जुमात्रम् । माला च । स्त्रीत्वे वा टाप् । दामा दामे । "न पुंसि दामसन्दानं पशुरज्जुस्तु दामनि" इत्यमरः । **छर्दिः** वमनरोगः । **ज्योतिः** सूर्यः । अग्निः । मेथिकावृक्षः । नेत्रकनीनिकामध्यस्थं दर्शनसाधनं पदार्थः । नक्षत्रञ्च । "ज्वालाभासौ न पुंस्यर्चिर्ज्योतिर्भद्योतदृष्टिषु" इत्यमरः । **सदः** सभा । "समज्यापरिषद्गोष्ठीसभासमितिसंसदः । आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः" इत्यमरः । अर्चिर्वह्न्यादिशिखामयूखश्च । "ज्वालाभासौ न पुंस्यर्चिः" इत्यमरः । "अर्चिर्मयूखशिखयोर्न ना" इति मेदिनी ॥ **सुखं** पुण्यजन्यो गुणभेदः । सुखकारकम् । आत्मधर्म इति नैयायिकाः । चित्तधर्म इति

तारकं रसनं नीडमेते टाबन्तकाः स्त्रियाम् ।
ङ्यन्तास्तु नगरास्थानस्थलानि पाटलं पुरम् ॥ २० ॥
त्रिलिङ्ग्यान्तु प्रतिसरस्फुलिङ्गनखरार्गलाः ।
कन्दरं शृङ्खलं नालं वल्लूरफलमुस्तकाः ॥ २१ ॥

साङ्ख्यादयश्च । "सुखं शर्मणि नाके च सुखा पुर्यां प्रचेतसः" इति मेदिनी ॥ **लक्षं** दशायुतसङ्ख्या । "लक्षा न पुंसि सङ्ख्यायां क्लीबं व्याजशरव्ययोः" इति मेदिनी ॥ **वणिज्यं** वणिज्यकर्म । वाणिज्यमप्यत्र । "वाणिज्यन्तु वणिज्या स्यात्" इत्यमरः ॥ **वडिशं** मत्स्यधारणार्थं वक्रलौहकयुक्तः पदार्थः । "वडिशेन झषीरिवास्मान्" इति वृन्दावनचम्पूः ॥ **क्रोडम्** अश्वानामुरः । भुजान्तरम् । अङ्कम् । राक्षसः । सूकरश्च । "न ना क्रोडं भुजान्तरम्" इत्यमरः । "क्रोडः शनौ सूकरे ना न पुमानङ्करक्षसोः" इति मेदिनी ॥ **पाटलं** स्वनामाख्यातो वृक्षः । तत्पुष्पम् । आशुधान्यञ्च । "आशुर्व्रीहिः पाटलः स्यात्" इत्यमरः । "आशुर्व्रीहौ पाटलो ना श्वेतरक्तेन्यवान्" इति रुद्रः । "पाटलापाटलौ स्त्री स्यादस्य पुष्पे पुनर्न ना । आशुधान्ये पुमान् श्वेतरक्तवर्णेऽपि वाच्यवत्" इति मेदिनी ॥ १९ ॥ **तारकं** नक्षत्रम् ॥ **रसनं** जिह्वा ॥ **नीडं** स्थानम् । कुलायश्च । "नीडं स्थानकुलाययोः" इति मेदिनी । एते शब्दाः स्त्रियां स्त्रीलिङ्गे । टाबन्तकाः टाप्प्रत्ययान्ताः । स्युरिति पूर्वेणान्वयः ॥ **नगरं** पुरम् ॥ **आस्थानं** विश्रामस्थानम् । सभा च । **स्थलं** जलशून्यः अकृत्रिमः भूभागः ॥ **पाटलम्** आशुधान्यम् । **पुरं** नगरम् । इमे शब्दा अपि । स्त्रीलिङ्गे । ङ्यन्ताः ङीप्प्रत्ययान्ताश्च भवन्ति । इमे शब्दगणाः स्त्रीक्लीबयोः स्त्रीलिङ्गे नपुंसकलिङ्गे च । स्युरित्यन्वयः ॥ २० ॥ इति स्त्रीनपुंसकलिङ्गसङ्ग्रहः समाप्तः ॥ **प्रतिसरः** सैन्यपश्चाद्भागः । हस्तसूत्रञ्च । "ना चमू जघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम्" इत्यमरः । "भवेत्प्रतिसरो मन्त्रभेदे माल्ये च कङ्कणे । व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डले। आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः" इति मेदिनी॥ **स्फुलिङ्गः** अग्निकणः । अग्निच्युतक्षुद्रांशश्च । "त्रिषु स्फुलिङ्गोऽग्निकणः" इत्यमरः ॥ **नखरः** नखः । करजश्च। "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" इत्यमरः। "नखरं पुंसि क्लीबे च नखनं त्रिषु" इति अमरमाला ॥ **अर्गलः** कपाटमध्यस्थः रोधकः काष्ठादिदण्डः । सप्तशतीस्तोत्रस्यादिपाठ्यः स्तोत्रविशेषश्च। "अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् । जपेत्सप्तशतीं पश्चात्" इति । कल्लोलः कपाटः । क्षुद्रार्गलश्च । "तद्विष्कम्भोऽर्गलं न ना" इत्यमरः । अर्गला त्रिषु कल्लोलेऽन्तर्दण्डातारयोर्न ना" इति मेदिनी ॥ **कन्दरं** गुहाकारं गिरिनितम्बदेशः । गुहा । अङ्कुशः । आर्द्रकञ्च । "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इत्यमरः । "कन्दरस्त्वङ्कुशे पुंसि गुहायान्तु नपुंसकम्" इति मेदिनी ॥ **शृङ्खलं** निगडः । लौहमयं पादबन्धनञ्च । "पुंस्कट्यां शृङ्खलं त्रिषु" इत्यमरः । "शृङ्खलापुंस्कटीवस्त्रबन्धे च निगडे त्रिषु" इति मेदिनी ॥ **नालं** काण्डः । उत्पलादिदण्डः । मृणालश्च । "नाला मृणालाग्रभुजो भजाम" इति नैषधम् । "नाडी नालञ्च काण्डोऽस्य" इत्यमरः। "नलो न ना पद्मदण्डे नाली शाककदम्बके" इति मेदिनी

जृम्भश्च टाबन्ता एते स्त्रियामथ विभीतकः ।
हरीतकाढकतटकवाटाश्च गुणो वटः ॥ २२ ॥

वल्लूरः आतपादिना शुष्कमांसः । सूकरमांसः । वनक्षेत्रम् । वाहनम् । ऊषरभूमिश्च । "उत्तप्तं शुष्कमांसं स्यात् तद्वल्लूरं त्रिलिङ्गकम्" इत्यमरः । "वल्लुर" इति ह्रस्वोकार अप्यत्र । "वल्लूरं स्याद्वनक्षेत्रे गहनोषरयोरपि । वल्लूरा त्रिषु संशुष्कमांससूकरमांसयोः" इति मेदिनी ॥ **फलः** अस्थिखण्डः । नागकेशरः । काष्ठादिपट्टकः । वृक्षादीनां सस्यम् । फलकम् । कार्यञ्च । "फलं जातिफले सस्ये हेतूत्थे व्युष्टिलाभयोः । त्रिफलायाञ्च कक्कोले प्रियङ्गौ तु फली मता" इति मेदिनी ॥ **मुस्तकः** स्थावरविषभेदः । मुस्ता च । क्वचित् पुस्तके पाठः । "कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्" इत्यमरः ॥ २१ ॥ **जृम्भः** मुखविकाशः । जृम्भणञ्च । क्वचित् जम्भ इति पाठः । "जृम्भा विकाशजृम्भणयोस्त्रिषु" इति मेदिनी ॥ एते शब्दाः । स्त्रियां स्त्रीलिङ्गे । टाबन्ताः टाप्प्रत्ययान्ताः भवन्ति । न तु ङीबन्ता इत्यर्थः । अथशब्दः अनन्तरार्थवाची । **विभीतकः** स्वनामाख्यातवृक्षः । अक्षश्च । "त्रिलिङ्गस्तु विभीतकः" इत्यमरः । **हरीतकः** स्वनामाख्यातः वृक्षः । तत्फलञ्च । स्त्रियां हरीतकी । "हरीतकी हैमवती चेतकी श्रेयसी शिवा" इत्यमरः ॥ "कदाचित्कुपिता माता नोदरस्था हरीतकी" इति वैद्यकम् । **आढकः** सर्वतो दशाङ्गुलमानम् । प्रस्थचतुष्टयपरिमितम् । पुष्कलचतुष्टयमितम् । धान्यमानपात्रम् । षट्पञ्चाशदधिकद्विशतमुष्टिपरिमाणम् । द्रोणस्य चतुर्थभागश्च । "आढकी तु तुवर्य्यां स्त्री परिमाणान्तरे त्रिषु" इति मेदिनी ॥ क्वचित् आटक इति पाठः ॥ तटः कूलं नद्यादेस्तीरम् । "कूलं रोधश्च तीरञ्च प्रतीरं च तटं त्रिषु" इत्यमरः । "तटं नपुंसकं क्षेत्रे प्रतीरे तु तटं त्रिषु" इति मेदिनी ॥ कवाटः द्वाररोधकः काष्ठखण्डः । "कपाटी" अप्यत्र । "कवाटश्च कपाटश्च त्रिषु स्यादरं न ना" इति वाचस्पतिः ॥ गुणः धनुषो मौर्विः धनुराकर्षणदामा । रज्जुमात्रं ज्ञानविनयादयश्च । "मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः" इत्यमरः । "गुणे मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसत्त्वादिसन्ध्याद्यावृत्तिरज्जुषु । शुक्लादावपि वटयां च" इति मेदिनी ॥ वटः स्वनामख्यातो वृक्षः शणनिर्मिततन्तुश्च । "न्यग्रोधो बहुपाद्वटः" इत्यमरः ॥ २२॥ मण्डलं बिम्बं चक्राकारेण वेष्टनम् । यथा सूर्यमण्डलम् । भूमण्डलम् । चतुःशतयोजनमितो देशभेदः । मण्डलाकारेण विहितः पदार्थः । द्वादशनृपचक्रम् । गोलम् । समूहश्च । "परिवेशस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः । वेष्टने परिवेशः स्याद्भानोः सविधुमण्डले इति रभसः । "मण्डलं परिवेशश्च परिधिश्चोपसूर्यकम्" इति भागुरिः । "मण्डलं परिधौ कोटे देशे द्वादशराजसु । क्लीबेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे" इति मेदिनी ॥ शलभं कीटभेदः पतङ्गश्च । "समौ पतङ्गशलभौ" इत्यमरः । भल्लातकं वृक्षभेदः । "भल्लातकी" अप्यत्र । "वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु" इत्यमरः ॥ कलशः घटः । "कलसः" इति दन्त्यसकारान्तोऽपि । "कलशस्तु त्रिषु द्वयोः । घटः कुटनिपौ, इत्यमरः ॥ कन्दलः कपालः । नवाङ्कुरः । करध्वनिः । अपवादः । कन्दली लतापुष्पम् । कनकम् । युद्धम् । कलापश्च ।

मण्डलं शलभं भल्लातकं कलक्षकन्दलौ ।
मृणालामलकौ दाडिमश्च ङ्यन्ताः स्त्रियामिमे ॥ २३ ॥
करणे ल्युट् त्रिषु यथा तस्य व्याख्यान इत्यदः ।
सूत्रकृद्भाष्यकृत्कोसावनुमान इतीच्छति ॥ २४ ॥

इति लिङ्गादिसङ्ग्रहवर्गः ॥

दृष्टप्रयोगा ये शब्दाः प्रायस्त इह कीर्त्तिताः ।
अप्रयुक्तास्तूत्पलिन्यादिदृष्टा अप्युपेक्षिताः ॥ २५ ॥

इति श्रीपुरुषोत्तमदेवविरचितस्त्रिकाण्डशेषाभिधानकोषः समाप्तः ॥

"कन्दलं त्रिषु कपालेऽप्युपरागे नवाङ्कुरे । कलध्वनौ कन्दली तु मृगगुल्मप्रभेदयोः" इति मेदिनी ॥ मृणालः पद्मादेर्नालस्थं सूत्रम् । वीरणमूलं च । "मृणाली" इत्यपि । विषतन्तुः । "मृणालं विषम्" इत्यमरः । "मृणालं नलदे क्लीबं पुन्नपुंसकयोर्विषः" इति विश्वमेदिन्यौ । आमलकः वासकवृक्षः । धात्री तिष्यफला । धात्रीफलं च ॥ दाडिमः दाडिम्बवृक्षः । स्त्रियां ङीप्प्रत्ययः । "वियोगिनीमैक्षत दाडिमीमसौ" इति नैषधम् । अत्र "दालिमः डालिमः दाडिम्बः" इत्यपि पाठाः । "समौ करकदाडिमौ" इत्यमरः । "दाडिम्बसारपिण्डीरस्वाद्वम्लशुकवल्लभाः" इति रभसः । "दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिषु" इति मेदिनी । इमे शब्दाः । स्त्रियां स्त्रीलिङ्गे ङ्यन्ताः ङीप्प्रत्ययान्ताः स्युरित्यन्वयः ॥ २३ ॥ करणे करणकारके । ल्युट् ल्युट्प्रत्ययान्तं पदम् । त्रिषु स्त्रीपुंनपुंसकेषु लिङ्गेषु । स्यादिति शेषः । तस्य ल्युट्प्रत्ययान्तपदस्य । यथा—तस्य व्याख्यान इति "तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः" (४, ३, ६६) इति अदः पाणिनीसूत्रमुदाहरणं भवति । सूत्रकृत् सूत्रकारकः पाणिनिः । भाष्यकृत् भाष्यकारकः पतञ्जलिश्च इति तौ द्वौ कुशाग्रीयधियौ महाशाब्दिकौ इच्छतः असौ ल्युट्प्रत्ययः त्रिलिङ्गः स्यादिति । साक्षात् दृष्टेन गोचरत्वात् अनुमान इति कः इच्छति अभिलषतीत्यर्थः ॥ २४ ॥ इति लिङ्गादिसङ्ग्रहवर्गः समाप्तः ॥ ९ ॥ अनन्तरं शब्दप्रयोगनियमं दर्शयन्नाह । ये शब्दाः दृष्टप्रयोगाः शिशुपालवधादिषु महाकविकृतेषु, उत्तरीयाणां बौद्धधर्म्मग्रन्थेषु, वैदिकग्रन्थेषु च स्वचक्षुषा प्रयोगाः वीक्षिताः । ते शब्दाः प्रायः भूयिष्ठम् । इह अस्मिन् त्रिकाण्डशेषकोषे कीर्तिताः कथिताः । प्रकाशिता इत्यर्थः । ये शब्दाः । अप्रयुक्ताः ऋषिप्रणीतेषु महाकाव्यादिषु, धर्म्मविषयेषु च अप्रयोगीकृताः । उत्पलिन्यादिषु प्राचीनकोषेषु । आदिपदात् अग्निपुराणादिषु पुराणेषु च दृष्टा वीक्षिता अपि । ते शब्दाः । उपेक्षिताः अनपेक्षिताः औदासीन्या कृता इत्यर्थः । मयेति शेषः । अत्र कोषे महाकाव्यादिषु आगताः शब्दा एव प्रायेण प्रयुक्ता इति भावः ॥ २५ ॥ शिवम् । इत्याचार्यश्रीशीलस्कन्धस्थविरविरचितायां सारार्थचन्द्रिकाख्यायां त्रिकाण्डशेषटीकायां तृतीयः काण्डः समाप्तः ॥

ये शब्दार्णवपारमापुरमलप्रेक्षातरीवैभवाद्धीरांस्तान्समनुस्मरामि सततं तेभ्यस्त्वियं न क्रिया । बाला येऽकृतबुद्धयो निजधिया :कोषार्थबोधेऽक्षमास्तानुद्दिश्य हि वाङ्मयेऽभिरुचिताचैषा क्रिया मे भवेत् ॥ विख्यातलङ्कापुरिसौधपङ्क्ति—शृङ्गाग्ररत्नच्छुरितोऽभिरामः । वासो यतीनां स्थिरसंयतानां यः शैलबिम्बाभिध आश्रमोऽस्ति ॥ तत्राध्युषन्सज्जनगीतकीर्तिः सद्धर्मविद्या-कृतिलब्धबोधः । तर्कागमालङ्कृतिसाङ्ख्यनीतिच्छन्दःस्वभिज्ञो विबुधावतंसः ॥ श्रीशील-स्कन्धनामा विदितयतिवरोऽसौ व्यधात्पर्यवान्तं षड्भिर्मासैरित्त्वमां सत्कविजनहृदयानन्दहेतुं विधात्रीम । लक्ष्मीशीके[1] ग्रहेन्दुद्विरदशशधरैः[2] सम्मिते कुम्भगेऽर्के लोकोत्तीर्णां समृद्धिं विधदतु सुतरां बालधीसम्प्रवृद्धया ॥

इति सटीकत्रिकाण्डशेषकोषस्य तृतीयः काण्डः समाप्तः ॥

शिवमस्तु ॥

१—लक्ष्मीदास नामकशाके । २–१८१९ तमैः ।

विज्ञापनम् ।

सम्प्रति प्रचलितनाम्नां प्राप्ताप्राप्तानां बहूनां कोषग्रन्थानां नामानि बोधकानामनुग्रहार्थमत्र प्रयुक्तानि ॥

प्राप्तकोषाः ।

ग्रन्थाः	कर्त्तारः
१ नामलिङ्गानुशासनम्	अमरसिंहकृतम् ॥
२ कल्पद्रुः	केशवकृतः ॥
३ शब्दार्णवः	दुर्गादासकृतः ॥
४ प्रमाणनाममाला	धनञ्जयकृता ॥
५ त्रिकाण्डशेषः	पुरुषोत्तमदेवकृतः ॥
६ हारावली	तेनैव कृता ॥
७ एकाक्षरकोषः	तेनैव कृतः ॥
८ द्विरूपकोषः	तेनैव कृतः ॥
९ द्विरूपकोषः	भरतसेनमल्लकृतः ॥
१० मातृकानिघण्टुः	महीदासकृतः ॥
११ अनेकार्थध्वनिमञ्जरी	महाक्षपणककृता ॥
१२ अव्ययकोषः	महादेवकृतः ॥
१३ विश्वप्रकाशः	महेश्वरकृतः ॥
१४ शब्दभेदप्रकाशः	तेनैव कृतः ॥
१५ नानार्थमञ्जरी	मेदिनीकरकृता ॥
१६ वैजयन्ती	यादवकृता ॥
१७ लिङ्गविशेषविधिः	वररुचिकृतः ॥
१८ पञ्चतत्त्वप्रकाशः	वेणीदत्तकृतः ॥
१९ नानार्थसमुच्चयः	शाश्वतकृतः ॥
२० लक्ष्मीनिवासः	शिवरामकृतः ॥
२१ गणितनाममाला	हरिदत्तकृता ॥
२२ अभिधानरत्नमाला	हलायुधकृता ॥
२३ शारदीनाममाला	हर्षकीर्त्तिकृता ॥
२४ अनेकार्थसङ्ग्रहः	हेमचन्द्रकृतः ॥
२५ अभिधानचिन्तामणिः	तेनैव कृतः ॥

ग्रन्थाः	कर्तारः
२६ अभिधानचिन्तामणिनाममालापरिशिष्टः	तेनैव कृतः ॥
२७ लिङ्गानुशासनम्	तेनैव कृतम् ॥
२८ अभिधानचिन्तामणिशिलोञ्छः	जिनदेवमुनीश्वरकृतः ॥
२९ मदनपालनिघण्टुः	मदनपालकृतः ॥

अमुद्रितकोषाः ।

ग्रन्थाः	कर्तारः
३० मुक्तावली	श्रीधरकृता ॥
३१ रत्नमाला	दण्डाधिनाथोपनामइरुगप्पकृतः ॥
३२ शब्दसङ्ग्रहनिघण्टुः	अगस्त्यकृतः ॥
३३ नानार्थसङ्ग्रहः	अजयपालकृतः ॥
३४ नामसङ्ग्रहमाला	अप्पयदीक्षितकृता ॥
३५ एकाक्षरनाममाला	अमरसिंहकृता ॥
३६ प्रयुक्तपदमञ्जरी	कालिदासकृता ॥
३७ शब्दार्णवः	काशिनाथकृतः ॥
३८ लघुनिघण्टुसारः	केशवकृतः ॥
३९ लोकप्रकाशः	क्षेमेन्द्रकृतः ॥
४० अनेकार्थध्वनिमञ्जरी	गदसिंहकृता ॥
४१ शब्दमाला	गोपीनाथकृता ॥
४२ नामावली	गोवर्द्धनकृता ॥
४३ शब्दसागरः	गोविन्दशर्मकृतः ॥
४४ शब्दचन्द्रिका	चक्रपाणिदत्तकृता ॥
४५ अभिधानतन्त्रम्	जटाधराचार्यकृतम् ॥
४६ निघण्टुः	जैमिनिकृतः ॥
४७ कोमलकोषसङ्ग्रहः	तीर्थस्वामिकृतः ॥
४८ गीर्वाणभाषाभूषणम्	त्रिविक्रमाचार्यकृतम् ॥
४९ नानार्थरत्नमाला	दण्डनाथकृता (क्वचित्तु भास्करकृतेति) ॥
५० नाममाला	दुर्गकृता ॥
५१ वैष्णवाभिधानम्	देवकीनन्दनकृतम् ॥
५२ नानार्थसमुच्चयः	धरणीशकृतः ॥
५३ कविजीवनम्	धर्मराजकृतम् ॥
५४ बालप्रबोधिका	नन्दिरकविकृता ॥

अप्राप्तकोषाः ।

ग्रन्थाः	कर्तारः
५५ वर्णाभिधानम्	नन्दनभट्टाचार्य्यकृतम् ।
५६ राजनिघण्टुः	नरसिंहपण्डितकृतः ।
५७ राजवल्लभः	नारायणदासकृतः ।
५८ रत्नकोषः	नृसिंहमुनिकृतः ।
५९ भूरिप्रयोगः	पद्मनामकृतः ।
६० शीघ्रबोधिनीनाममाला	पुण्डरीकविट्ठलकृता ।
६१ वर्णदेशनम्	पुरुषोत्तमदेवकृतम् ।
६२ रत्नकोषः	पृथ्वीधराचार्य्यकृतः ।
६३ शब्दचन्द्रिका	बाणभट्टकविकृता ।
६४ निघण्टुकैकाध्यायः	वाह्लिकेयमिश्रकृतः ।
६५ त्रिरूपकोषः	बिह्लणकृतः ।
६६ नामसङ्ग्रहनिघण्टुः	भार्गवाचार्यकृतः ।
६७ नाममाला	भोजराजकृता ।
६८ मङ्खकोषः	मङ्खकृतः ।
६९ शब्दरत्नावली	मथुरेशकृता ।
७० पदचन्द्रिका	मयूरभट्टकृता ।
७१ अनेकार्थतिलकः	महीपकृतः ।
७२ शब्दरत्नाकरः	तेनैव कृतः ।
७३ एकाक्षरनिघण्टुः	माधवकृतः ।
७४ सुप्रसिद्धपदमञ्जरी	मुरारिकृता ।
७५ आयुर्वेदपर्य्यायरत्नमाला	रत्नमालाकरकृता ।
७६ शब्दार्थनिर्णयः	राक्षसकृतः ।
७७ कविदर्पणनिघण्टुः	रामकृतः ।
७८ उणादिकोषः	रामशर्मकृतः ।
७९ शब्दमाला	रामेश्वरकृता ।
८० रूपमञ्जरीनाममाला	रूपचन्द्रकृता ।
८१ नाममातृकानिघण्टुः	वरदराजकृतः ।
८२ ऐन्द्रनिघण्टुः	वररुचिकृतः ।

अप्राप्तकोषाः ।

ग्रन्थाः	कर्तारः
८३ कविमञ्जरी	वल्लभकृता ।
८४ शब्दरत्नाकरः	वामनभट्टकृतः ।
८५ कविदीपिकानिघण्टुः	विक्रमादित्यकृतः ।
८६ शब्दार्थचिन्तामणिः	विट्ठलाचार्यकृतः ।
८७ कोषकल्पतरुः	विश्वनाथकृतः ।
८८ शब्दार्थकल्पतरुः	वेङ्कटकृतः ।
८९ शाब्दिकविद्वत्कविप्रमोदकः	तेनैव कृतः ।
९० दशदीपनिघण्टुः	वेदान्ताचार्यकृतः ।
९१ संयमिनाममाला	शङ्करकृता ।
९२ शिवकोषः	शिवदत्तकृतः ।
९३ द्विरूपकोषः	श्रीहर्षकृतः ।
९४ श्लेषार्थपदसङ्ग्रहः	तेनैव कृतः ।
९५ एकाक्षरनिघण्टुः	सदाचार्य्यकृतः ।
९६ लिङ्गप्रकाशः	सारेश्वरकृतः ।
९७ भुवनप्रदीपिका	सार्वभौममिश्रकृता ।
९८ शब्दरत्नाकरः	सुन्दरगणिकृतः
९९ अनेकार्थतिलकः	सोमभत्रकृतः ।
१०० एकार्थनाममाला	सौभरीकृता ।
१०१ द्व्यक्षरनाममाला	तेनैव कृता ।
अविदितग्रन्थनामानि ।	विदितकर्तृनामानि ।
१०२ कोषः	अमरदत्तकृतः ।
१०३ कोषः	कृत्यकृतः ।
१०४ कोषः	गङ्गाधरकृतः ।
१०५ कोषः	चन्द्रगोमिकृतः ।
१०६ कोषः	तारपालकृतः ।
१०७ कोषः	दामोदरकृतः ।
१०८ कोषः	धर्म्मदासकृतः ।
१०९ कोषः	वोपालितकृतः ।

अप्राप्तकोषाः ।

अविदितग्रन्थनामानि ।	विदितकर्तृनामानि ।
११० कोषः	भागुरिकृतः ।
१११ कोषः	भोगीन्द्रकृतः ।
११२ कोषः	मङ्कल (मङ्गल) कृतः
११३ कोषः	मार्तण्डकृतः ।
११४ कोषः	रन्तिदेवकृतः ।
११५ कोषः	रभसपालकृतः ।
११६ कोषः	राजशेखरकृतः ।
११७ कोषः	राजमुकुटकृतः ।
११८ कोषः	रुद्रकृतः ।
११९ कोषः	धरणीधरकृतः ।
१२० कोषः	वाग्भटकृतः ।
१२१ कोषः	सर्व्वधरकृतः ।
१२२ कोषः	वाचस्पतिकृतः ।
१२३ कोषः	राजदेवकृतः ।
१२४ कोषः	वामनकृतः ।
१२५ कोषः	मुकुटकृतः ।
१२६ कोषः	विक्रमादित्यकृतः ।
१२७ कोषः	विश्वरूपकृतः ।
१२८ कोषः	भट्टमल्लकृतः ।
१२९ कोषः	व्याडिकृतः ।
१३० कोषः	विश्वविलोचनकृतः ।
१३१ कोषः	शुभाङ्ककृतः ।
१३२ कोषः	सोमनन्दीकृतः ।
१३३ कोषः	सज्जनकृतः ।
१३४ कोषः	साहसाङ्ककृतः ।
१३५ कोषः	हट्टचन्द्रकृतः ।
१३६ कोषः	हरकृतः ।
१३७ कोषः	कात्यायनकृतः ।

अप्राप्तकोषाः ।

विदितग्रन्थनामानि ।

१३८ अमरमाला
(केचित्तु अमरसिंहकृतेऽति वदन्ति)
अग्रे कर्तृनामान्यविदितानि वर्तन्ते ।
१३९ असालतिप्रकाशः
१४० आनन्दकोषः
१४१ एकवर्णसङ्ग्रहः
१४२ एकाक्षरकोषः
१४३ उत्पलिनी
१४४ ऊष्मविवेकः
१४५ अजयः
१४६ अरुणः
१४७ इन्दुकोषः
१४८ कल्पतरुकोषः
१४९ ग्रहाभिधानम् (दैवज्ञमुखमण्डनम्)
१५० जकारभेदः
(बाणभट्टकृत इति वदन्ति)
१५१ दण्डिकोषः
१५२ सुभूतिकोषः
१५३ धन्वन्तरिनिघण्टुः
१५४ नक्षत्राभिधानम्
१५५ देशीकोषः
१५६ नानार्थमञ्जरी
१५७ नामनिधानम्
१५८ पद्मकोषः
१५९ भुम्रकोषः
१६० चकारभेदः
१६१ बीजकोषः
१६२ बृहदमरकोषः
(अमरसिंहकृत इति वदन्ति)

विदितग्रन्थनामानि ।

१६३ महाखण्डनकोषः
१६४ पदरत्नावली
१६५ राजकोषनिघण्टुः
१६६ पुद्गलकोषः
१६७ लिङ्गप्रकाशः
१६८ मुनिकोषः
१६९ वर्णप्रकाशकोषः
१७० पालकोषः
१७१ वात्स्यायनकोषः
१७२ कोषसारः
१७३ शब्दतरंगिणी
१७४ गङ्गाधरः
१७५ शब्ददीपिका
१७६ गोवर्द्धनकोषः
१७७ शब्दरत्नसमुच्चयः
१७८ शब्दसारनिघण्टुः
१७९ चन्द्रकोषः
१८० संसारावर्तः
१८१ चरककोशः
१८२ सकलग्रन्थदीपिका
१८३ सकारभेदः
(बाणभट्टकृत इति वदन्ति)
१८४ सञ्जीवनी
१८५ सन्मुखवृत्तिनिघण्टुः
१८६ सरसशब्दसरणिः
१८७ सरस्वतीनिघण्टुः
१८८ साध्यकोषः
१८९ रत्नकोषः
१९० सारस्वताभिधानम्
१९१ हनुमन्निघण्टुः
१९२ सिद्धौषधनिघण्टुः

भूयिष्ठमप्राप्तेषु एतेषु निघण्टुकोषादिषु सिद्धौषधनिघण्टुः सरस्वतीनिघण्टुर्दैवज्ञमुखमण्डनमित्येते त्रयो ग्रन्थाः लङ्काद्वीपे सिंहलाक्षरैर्मुद्रिताः सन्ति । अवशेषा अपि कोषग्रन्थाः सम्प्रति सन्तीति श्रूयत एव । यद्येतर्हि भारतदेशे वा लङ्कादेरन्यत्र वा येषां केषाञ्चित्सकाशे वा प्राचीनेषु नवीनेषु पुस्तकालयेषु वा एते निघण्टुकोषादयः सन्तु तैः श्रीमद्भिर्लोकोपकृतये ते सम्प्रति मुद्रणीयाः प्रकाशनीयाश्च । अत्र तु केषाञ्चित् पुस्तकानां नामानि पुनरुक्तानि वा संदिग्धानि वा सन्तीति मन्ये । शिवम् ॥

श्रीशीलस्कन्धयतिवरस्य ॥

सटीकत्रिकाण्डशेषकोषस्य-
अकारादिवर्णानुक्रमेण
शब्दानुक्रमणिका ।

शब्दानुक्रमणिका।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका ।

शब्दानुक्रमणिका।

शब्दानुक्रमणिका ।

इति त्रिकाण्डशेषकोशस्याकारादिक्रमानुक्रमणिका समाप्ता ।

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस—बंबई.

क्रय्यपुस्तकें (कोशकाव्यादि-ग्रन्थाः)।

नाम.	की.
अमरकोष-मूल-छोटे अक्षरका गुटका	।)
अमरकोष-सटीक	१)
अमरकोष-भाषाटीकासमेत। शब्दानुक्रमणिकासमेत। ग्लेज	१॥)
,, तथा रफ कागज	१।=)
अनेकार्थध्वनिमञ्जरी-भाषामें सुगमहै...	=)
भावीनाममाला-(छन्दबद्ध भाषाकोष) इसको जोधपुर निवासी रामसनेही साधु भावनदासजी महाराजने विशेष कर अमरकोष तथा हैम-विश्व-व्याडि-धरणि-मेदिनी आदि अनेक कोषोंका सार लेके अपूर्व ग्रंथ बनाया है। इसमें संस्कृत तथा भाषामें प्रचलित प्रायः सभी शब्द आयेहैं...	१)
अमरुशतक-शृंगार और वेदान्तपर काव्य टीकासहित	॥=)
अश्वधाटीकाव्य-भाषाटीकासमेत	≡)
ऋतुसंहारकाव्य-कालिदासकृत और चोरकविकृत-चौरपञ्चाशिकाकाव्य इसमें षड्ऋतुवर्णनादि राजकुमार बाबू देवनंदनसिंहकृत छन्दोबद्धभाषाटीकाहै...	।≡)
कामाक्षिस्तुतिशतक-मूककविविरचित	।)
किरातार्जुनीयकाव्य-सटीक। ग्लेज कागजका दाम	१।।।)
,, तथा रफ कागजका	१॥)
कुमारसम्भव-महाकवि कालिदाकृत और मल्लिनाथकृत संजीवनीटीकासमेत	१।)
कृष्णलीलामृतकाव्य	।-)
कृष्णकर्णामृतकाव्य-(बडाही भक्तिमयहै)	।)
कार्ष्णिकण्ठाभरण-कार्ष्णिगोपालदास विरचित। नरोत्तमीयटीका तथा अमरेश्वरीय टिप्पणीसहित	।-)
गीतगोविन्द-राधाविनोदसमेत-भाषाटीकासहित। इसमें जयदेवगोस्वामिकृत अतिललित संस्कृतमें रागमय राधाकृष्णकी प्रेममयभक्तिकी गानेकी चीजें विद्यमान हैं	१)
गीतगोविन्द-मूलमात्र	=)
गुरुपीयूषलहरी--गुरुनानकसाहबका वर्णन	।=)
घटकर्परकाव्य-भाषाटीकासमेत	=)
दशकुमारचरित्र-(संस्कृत)	१॥)
नलोदयकाव्य-सटीक-इसमें महाराजा नल और दमयन्तीका रोचक चरित्र वर्णित है ...	॥।)
पद्यमुक्तावलि-इसके श्लोकोंके आदिमें क्रमसे स्वर व्यंजनोंके अक्षर आतेहैं। यद्यपि छोटाहै किन्तु देखने योग्य है...	-)॥
पञ्चतन्त्र-मूलमात्र। विष्णुशर्माकृत नीतिशास्त्र...	१॥)
पञ्चतन्त्र-विष्णुशर्मांकृत और पं० ज्वालाप्रसादजीमिश्रकृत सुबोध भाषाटीकासमेत ...	२)
भर्तृहरिशतक-नीति, शृंगार तथा वैराग्य भाषाटीका समेत।	१
भक्तिरत्नावली-श्रीमद्भागवतोद्धृत स्तुतिसंग्रह	१)